श्री षडक्षरीशविरचितं

कविकर्णरसायनम्

(चोलभूपालीयम्)

वेङ्कनसुधीविरचितसुधोदयव्याख्यासमन्वितम्

प्राच्यविद्यासंशोधनालयः

मैसूरुविश्वविद्यानिलयः, मैसूरु

१९७५

श्री षडक्षरीशविरचितं

कविकर्णरसायनम्

(चोलभूपालीयम्)

वेङ्गनसुधीविरचितसुधोदयव्याख्यासमन्वितम्

प्राच्यविद्यासंशोधनालयः

मैसूरुविश्वविद्यानिलयः, मैसूरु

१९७५

कविकर्णरसायनम्
(चोलभूपालीयम्)

KAVIKARṆARASĀYANAM
(COLABHŪPĀLĪYAM)

UNIVERSITY OF MYSORE

ORIENTAL RESEARCH INSTITUTE SERIES No. 121

GENERAL EDITOR

Dr. G. MARULASIDDAIAH M.A. Ph.D.

Director, Oriental Research Institute,
and
Professor and Head,
Department of Sanskrit, Manasagangotri
University of Mysore, Mysore

Published by

The Oriental Research Institute
University of Mysore
Mysore–5

ORIENTAL RESEARCH INSTITUTE SERIES NO. 121

KAVIKARṆARASĀYANAM

(COLABHŪPĀLĪYAM)

OF

ṢAḌAKṢARĪŚA

WITH SUDHODAYA COMMENTARY BY VEṄGANASUDHĪ

EDITED BY

Vidvan, M. S. BASAVARAJAIAH

Research Assistant

Oriental Research Institute, Mysore

ORIENTAL RESEARCH INSTITUTE, MYSORE

1975

First Edition 1975

Price : Rs. 20-75

PUBLISHED AT THE ORIENTAL RESEARCH INSTITUTE, MYSORE BY THE DIRECTOR AND PRINTED AT THE SAMSKRITA SAHITYA SADANA, 1040 DEVAPARTHIVA ROAD, CHAMARAJAPURAM, MYSORE

प्राच्यविद्यासंशोधनालयग्रन्थमाला १२१

श्री षडक्षरीशविरचितं

कविकर्णरसायनम्

(चोलभूपालीयम्)

वेङ्कनसुधीविरचितसुधोदयव्याख्यासमन्वितम्

संपादकः

विद्वान् एम्. एस्. बसवराजय्यः

रिसर्च् असिस्टेन्ट्, प्राच्यविद्यासंशोधनालयः, मैसूरु

प्राच्यविद्यासंशोधनालयः

मैसूरुविश्वविद्यानिलयः, मैसूरु

१९७५

प्रथममुद्रणम्–१९७५

मूल्यम्—रू. २०-७५

मैसूरु प्राच्यविद्यासंशोधनालयात् प्रकाशितम्
मैसूरुसंस्कृतसाहित्यसदनस्य मुद्रणालये तदधिकारिभिर्मुद्रितम्
१९७५

CONTENTS

INTRODUCTION

The Mysore University is publishing through the Oriental Research Institute, Mysore a great Sanskrit Kāvya called "Kavikarṇarasāyanam" or "Colabhūpālīyam" by Sri Ṣaḍakṣrideva or Sadakṣarikavi with the lucid and comprehensive Sanskrit commentary called "Sāhityasudhodaya" by Veṅganasudhī. This kāvya consists of twelve cantos. The subjet matter is the story of Mānakanjāra and Sundaracola, the pauranic persons who, by virtue of genuine Śivabhakti attained "Śivagaṇatva" andare even today worshipped among the 63 purātanas. For details see page 22 of Sanskrit Introduction.

The commentary by Veṅganasudhī is also useful as it is on the model of other standard commentaries.

Saḍakṣarideva, as explained in Page 2, Sanskrit Introduction, fills in an important gap in the 17th century among the lineage of eminent Sanskrit and Kannada Mahākavis. His native place was Dhanugur, Malavalli Taluk, Mysore District. He was born in an Āradhya family and by virtue of his scholarship, conduct and character was taken as Rājaguru by Amṛtāmbā, the mother of Sri Chikkadevaraja Vodeyar, king of Mysore. She resided at Yelandur, Mysore District, where still exists the tomb (Gaddige) of Śaḍakṣari.

Poets come and go. The epithet "Mahākavi" is today claimed by anybody and everybody. But, the title Kaviśekhara obtained by Ṣaḍakṣari in the 17th century was equal in status to the Bhaṭṭa title in Kashmir during the 10th and 11th centuries A.D. The encomium "Ubhayabhāṣākavi cakravarti" conferred on him during the middle of the 17th century is not a managed one, but a thing conferred on him for his well-deserved merit. Innumerable works of a high order Ṣaḍakṣari has composed both in Kannada and Sanskrit. Rājaśekharavilāsa, Śabaraśaṅkaravilāsa are the two famous works in Kannada while the "Kavikarṇarasāyanam" stands to his credit in Sanskrit. The easiness with which the poet handles the theme and the mastery of the language exhibits his scholarship and erudition. For details see Pages 16 and 17 of Sanskrit introduction.

Fourteen stanzas are devoted by the poet to observe the usual formalities like obeisance to his dieties like Śiva, Pārvati, Gaṇeśa, Skanda, Bhṛṅgi, Vīrabhadra and also to Śri Reṇuka and other Śivagaṇendras. Again, we see in the first canto special respects to his Guru Śri Uddānayati, the original pontiff of Dhanugur Mutt (1-54) and also Harihara, the veteran master poet of the Vīraśaiva community (1-14). He condemns the poetasters and compliments great poets as is the usual tendency of most Sanskrit poets. It is significant to note here that the great poet Ṣaḍakṣari betrays his inclination

only to the Vīraśaivas and refers to all other galaxy of poets by the general reference "Mahākavin." This is never a drawback, but some critics may feel it a deviation or departure. It is worth noting that only a few works in Sanskrit are secular by nature, but all Kāvyas take their origin with a specific purpose, wide or narrow, communal or devotional, religious or didactic, clanish or general, pauranic or epic etc· Glorification of Mānakanjāra or Sundaracola and magnifying their unique Śivabhakti in the days of Śri Ṣaḍakṣarideva is really a good and great deed. Values fluctuate day to day, and the time cannot evaluate the real worth of a standard work. Śri Ṣaḍakṣarideva had been recognised as an eminent scholar and natural poet all over Karnataka. Like a fish in water and bird in sky he swings easily the theme and his composition reflects his easiness, perfection and also natural genius.

माधुर्यमौदार्यमुदात्तरीतिरौज्ज्वल्यमङ्गीकृतवृत्तिशोभा ।
स्फुरद्रसोऽलङ्कृतिरस्ति यस्यां सा सत्कृतिः स्यात्तरुणीव रम्या ॥

(I—33)

is the definition of poetry according to him. As opposed to good poetry, he quotes

स्खलत्पदा त्यक्तरसा विधातुः श्लथाङ्गका दुर्ध्वनिरात्तदोषा ।
सदन्ततां त्यक्तवती कृतिः स्यात् वृद्धेव हेया खलु दुष्कवीनाम् ॥

(I–32)

as definition of bad poetry. There is no evidence to show that there was any kind of vain glory of undesirable degree in this master. His self compli-

mentation of his poetry is well deserved. According to him, his talent, genius and mastery in Kannada and Sanskrit are a result of his pious deeds in many previous births. Rightly has our poet concluded it as anti-natal predisposition or Vāsanā which he calls as—

अनेकजन्मार्जितपूर्णपुण्यात् कवित्वचिन्तामणिरेव लब्धः ।
स्वार्थं परार्थं परलोकसिद्धिं कीर्तिं प्रमोदं च कवेस्तनोति ॥

(1-31)

Having had this talent, he has no mind to use it for mundane purposes and this well-begotten gift he wants to surrender and submit to Lord Śiva, the only *summum bonum* of a real Yatiśvara of his eminent order.

सुदुर्लभं प्राप्य कवित्वरत्नं तदप्युमेशाय समर्पणीयम् ।
अन्यार्पितं तद्धि भवत्यवश्यं निरर्थकं स्यादिति मे मनीषा ॥

(1-59)

Dedication of this type is very rare and the honesty and humility of a great scholar is really setting an example to others, which, however cannot be expected of all people. Ṣaḍakṣari, like Paṇḍitarāja Jagannātha, swears not to take recourse to plagiarism.

परोदितार्थान् अपहृत्य चौर्यात् करोति काव्यं कुकविः स निन्द्यः ।
भवेत्सभायां परिवर्जनीयः ततो महद्भिः कविभिः परार्थः ॥

(1-30)

Full of material, mastery, imagination and inspiration of course he need not draw inspiration from anyone else. But, any seasoned reader passing through the pages will, at times, think of all eminent Sanskrit

poets whose style and calibre seem to be similar to this work. No doubt, our author is not confining himself to any doctrine of a Mahākāvya, envisaged by Bharata or Daṇḍin. But, he is in the rut of a Sanskrit Mahākāvya. His style, metre, figures and above all, sentiments and bhāvas are well depicted to impress the reader of his Bhaktirasa. Here and there, the conventional display of all the other Rasas including Sṛṅgāra, speaks of his learning and yearning of Sanskrit scholarship. The usual methodology of a Mahākāvya is faithfully observed in elaborate Varṇanās which are appreciated more by pedants than by a passing critic. At times, the reader may feel the campū style in this kāvya all because of its toughness. The mellifluity and the spontaniety of masters like Kālidāsa are not copiously available and one is tempted to think of Māgha or Naiṣadha.

Incidentally, one would see Ṣaḍakṣari, an ideal guru of the Vīraśaiva order, gives scope for faithful depiction of the Vīraśaiva tenets. The Aṣṭāvaraṇas, Pancācāras and above all the concepts of Ṣaṭsthala would tend to proclaim Vīraśaivism as a means to The End and not as a religion for or against any existing Hindu communities. Śri Ṣaḍakṣarideva makes a reference to Śri Reṇuka and Śrī Siddaliṅgeśvara, as well as to Sri Basaveśvara, the real founder of the Vīraśaiva discipline in his works. It may not be argued by some extremists that Ṣaḍakṣari subscribes only to the clanish and

not to the Vacanaśāstra way of life. It is not a point to be observed or argued here. Each has the liberty of interpreting things in his own way. In sum, this Colabhūpālīyam, significantly called as "Kavikarṇarasāyanam" is a praiseworthy piece of literature from a Vīraśaiva poet. Critics have complimented the dignity of his work as "Gajagamana" and conferred on him the title "Kaviśekhara".

Our author, while eulogising Vikramacola, writes—

जनक एव नृपतिः प्रजावने सुमनुरेव शिवधर्मसंग्रहे ।
विजय एव निमिषाहितक्षये भुवि बुधैरिति स एव भाव्यते ॥

(3-59)

Here, the foot "सुमनुरेव शिवधर्मसंग्रहे" can be interpreted as is done by the commentator that Manu has contributed a Śivadharmasaṅgraha. It may mean that there was a Śivadharmaśāstra codified by Manu. Was Ṣaḍakṣarideva in possession of a work like this? If he were not aware of such a work, what exactly is the implication to this is a matter of anxiety. Was such a work extent or was this only a heresy in the times of the author is a matter of further anxiety. May be, such a work was confined to the oblivion by the interested people or the disinterested Vīraśaivas. Any way this conjecture I wish to submit to the public.

"Kavikarṇarasāyanam" is in short a genuine poetry from a fertile pen known for its Bhāvābhi-

niveśa. Critics may find 'Navanavonmeṣa' even in this traditional or conventional composition. There is scholarship, pedantry and also erudition coupled with seasoned imagination. There is Kāvyamahimā, but some may not find the extraordinary 'Kāvyamahā-mantramūrchā.' 'Śivapāramya' may be deemed as religious as it is in the case of Yādavābhyudaya, etc. The poet's mastery over Sanskrit and poesy is extraordinary. A good attractive piece of art is carved dexterously by Ṣaḍakṣarideva and the sincere prayer and poetry offered by a pious soul will really reach the divine feet of Lord Śiva. This work is one of the proud contributions of Karnataka to Sanskrit Muse. The Kāvyanīti of Ānandavardhana of the 9th century A.D. is adopted here and the Rasa, Guṇa, Ritis, Dhvani and Alaṅkāras have their due place in the work. Description and Scholarship gain better place and Kāvaya-Nitis and Ritis are incidental.

Vidwan Sri M. S. Basavarajaiah, has taken sufficient pains to edit this work in our institution. He is an experienced scholar in the Vīraśaiva works and Sanskrit literature. This work was first published with the help of a manuscript (only two Cantos) by Sri S. G. Kadadevara Matha, B.A., B.T., with a good English introduction and notes. Then Dr. S. C. Nandimath informed me that he had secured a manuscript of four Cantos of this work. But, unfortunately he did not publish it.

This institute struggled hard to secure a complete copy of this work. We must thank our stars for having secured a manuscript of twelve cantos during our tour in Karnataka and that with necessary readings is edited by Vidwan Sri M. S. Basavarajaiah ably.

We are grateful to His Excellency Dr. Basappa Danappa Jatti, Vice-President of India, for releasing this work on 14th July 1975 at Yelandur, the place of the author taking permanent rest. We are also indebted to Messrs Samskrita Sahitya Sadana, Mysore for neat printing and get up.

Suggestions if any, for improvement are always welcome from critics.

Dr. G. MARULASIDDAIAH M.A. Ph.D.,
Director,
Oriental Research Institute,
University of Mysore,
Mysore-570 005

ॐ

प्रस्तावना

नमोऽस्तु शिवभक्तेभ्यो भूयो भूयो नमो नमः
अभावे शिवभक्तानां विश्वेशाय नमो नमः ॥

कविष्षडक्षरीशः—

सुविदितमेव सर्वेषां काव्यनिर्मितेरुद्देशः 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये' इत्यादिना तथैव काव्यनिर्माणसामर्थ्यादिकं 'शक्तिर्निपुणते'-त्यादिना कविमहिमाच 'कविरेकः प्रजापतिः' 'नानृषिः कुरुते काव्यामि'त्यादिना न्यरूपिषत प्राचीनैरिति ।

प्रतिभासम्पन्न एव सहृदयहृदयाह्लादककाव्यनिर्माणक्षमः । एतादृशप्रतिभासम्पन्नाः कवयः । साहित्यप्रपञ्चे वाल्मीकि-बादरायणौ रत्नाकरसदृशौ । भासः कालिदासः भोजः इत्यादयः ब्राह्मी-गङ्गा-यमुनादिसदृशाः विरला एव दृश्यन्ते । अनुकरणशीला एव बहवो लभ्यन्ते । माघ-भारवि-श्रीहर्षादयश्च कृष्णा-कावेरी गोदावर्यादिसदृशाः महाकवीनां मध्ये विशिष्टतया विराजन्ते ।

भासादीनां माघादीनां च मध्यवर्तीभवितुमर्हत्ययमिलापतिपूजितपादपङ्कजः 'निखिलकलाकलापविज्ञानसमधिगतनैपुणीसमेधितबहुविधमधुरकविताविशारदः शारदसुधाकरचन्द्रिकाविनिर्मलचित्तः चित्तजारातिकृपामृतरससेचन-

परिहृतसंसृतिजनितसन्तापः तापसजनमान्यपुण्यचरितः सकलसुधीसमूहश्लाघनीयसरससद्वचोविस्तरविन्यासविलासचातुरीधुरीणः उभयभाषाकविव्रातविख्यातकीर्तिः षडक्षरीशाख्यः[1]' कलावित् कोविदः कविशेखरः।

वैशिष्ट्यं तावदस्योभयभाषासत्कवित्वं कर्णाटे-संस्कृते च। 'कर्णाटसारस्वतप्रपञ्चे पम्पः प्रथमं चम्पूयुगं प्रावर्तयत्। गच्छता कालेन पुनः चम्पूकाव्ये वैरल्यं प्राप्नुवति षडक्षरीशः स्वीयैः रम्यतमैः चम्पूप्रबन्धैः पुनः चम्प्वां नवयुगप्रवर्तको बभूव इत्यामनन्ति सारवत्तया विबुधाः[2]' असौ कर्णाटभाषायां राजशेखरविलास-वृषभेन्द्रविजय-शबरशङ्करविलासाख्यान् वस्तुक (चम्पू) महाप्रबन्धान् विनिर्ममे।

महाकविरसौ संस्कृतभाषायां तत्रापि 'प्रसन्नगीर्वाणगिरा' कविकर्णरसायनाख्यमन्वर्थकं भावबन्धुरपदगुम्फितं रमणीयार्थप्रतिपादकं विबुधजनलालितं भक्तिरसपरिपूरितं नवामृतरसमधुरमिमं श्रीचोलभूपालीयापरनामकं चारुमहाप्रबन्धं वर्णकरूपेण (पद्यकाव्यात्मना) निर्मितवान्। समकालीनैस्सर्वैरपि 'बुध' इति ,कलाकोविद' इति 'कविशेखर' इति च संस्तुतः।

एकादशवयस्येव शिवप्रसादाच्चोभयभाषाकविताविभवोऽयं, राजशेखरविलासाख्यं शृङ्गाररसपरिपूर्णं विबुधजनश्लाघनीयं महाप्रबन्धं एकाब्द एव परिपूर्णतामगमयदित्येतावदेवालमस्य सत्कवित्ववैभवविषये।

अयं षडक्षरीशः-षडक्षरी-षडक्षरीश्वरः-षडक्षरः-षडक्षराङ्कः-षडक्षरस्वामी-षडक्षरदेवः-षडक्षरविभुः-षडक्षरिदेवः-षडक्षरिदेवदेशिकेन्द्रः-षडक्षरार्यः-प्रणवपरि - मिलत्पञ्चवर्णाख्यदेवः-मूलमन्त्राभिधानः इत्यादिनामभिः विश्रुतः।

---

[1] क. क. र : व्याख्यानपीठिकायां। [2] सी. पु. ष. पृ. १९४।

कविवचनावगम्याः तद्विचाराः

स्वयमेवाह स्वस्य प्रथममहाप्रबन्धे भाषात्मके राजशेखरविलासे कविकर्णरसायने चास्मिन् स्वकीयगुरुपरम्परादिविषये तथैव कवि-कविता-काव्य-प्रयोजन-भाषाद्वयसत्कवित्वनिर्माणसामर्थ्यादिविषये चेत्थम् ।

गुरुपरम्परादिकम्—

"श्रीरेणुकाचार्यः । तस्य पुत्रः श्रीरुद्रमुनिः । तस्य वंशोद्भवः उद्दानशिवयोगिराट् । तस्य करसञ्जातो अन्नदानीशः । तस्य पाणिसञ्जातः श्रीरेणुकरूपः रेवणसिद्धदेशिकः 'इलारमणीहृदयाम्बुरुहवत् स्थिते दनुगूरु (धनुः पुरी)नामकग्रामे भास्वत्कर्णिकावत् विराजिते श्रीमठे परमहंस इव रराज' । तस्य करकञ्जजः श्रीचिक्कवीरदेशिकः । तस्य श्रीचिक्कवीरदेशिक-करकञ्जसञ्जातोऽहं उत्तमजनानन्दाब्धिराकासुधाकरः उद्यत्कवितालतार्जित यशःपुष्पोदयः साम्बशङ्करपदाब्जमधुव्रतः सुकविवृन्दस्तोत्रापात्रं सरसप्रबन्धसुभ-गाम्भोजप्रभावल्लभषडक्षरिदेवनामा[1]" इति । "धनुःपुरोद्दानयतीन्द्रवंश्यः श्रीचिक्कवीरेश्वरपाणिजातः । षडक्षरीशाख्यतया प्रसिद्धः कलाविदास्ते कविता-प्रगल्भः ॥ वृषेन्द्र-सत्येन्द्रसुवृत्तरम्यं काव्यद्वयं वस्तुकमेव चक्रे । कर्णाटवाण्या स्तवनीयमार्यैरुद्यद्रसं यत्सुभगं गुणौघैः ॥ यस्यास्ति भाषाद्वयसत्कवित्वं जगन्नुतं नूत्नमनन्यलभ्यम् । नैपुण्यमीशागमशास्त्रराशावीशप्रसादात्परिलब्ध-मुर्व्याम् ॥ सोऽहं प्रसादात्परमेश्वरस्य प्रबन्धमेकं रचयामि रम्यम् । श्रीचोल-राजस्य गुणैरुदारैः प्रसन्नगीर्वाणगिराऽद्य युक्तम् ॥ सुवर्णबद्धं स्फुरदर्थरत्नं सुवृत्तमौज्ज्वल्यगुणप्रयुक्तम् । कृतं सुकाव्यं श्रवणोचितं तद्बुधेन्द्रकर्णाभरणं न

---

[1] रा. वि. १–५३–६८ ।

किं स्यात् [1]?" ॥ इति । तथैव "यशसा भूतले महितास्सर्वकलाविशारदाः बुधराजास्त्वेकदा प्रीत्या एवमब्रुवन्—अप्राप्तयौवनमेव (एकादशवयस्कमेव) सम्प्राप्ताखिलकलाविलासं भवन्तं दृष्ट्वा स्वयमेवागता कोमलकविताङ्गना। भवानपि वक्षसा तामङ्गीकृतवान्। कथं वा भवन्तं 'यतिकुलतिलकं' इति इला वर्णयतीत्याश्चर्यावहम् ॥ भवद्वचस्समुदयः किं वा अमृताम्बुधिसहचरो वा, चन्द्रमसस्सोदरो वा, सुदत्यधरामृतमधुरिमगुर्वा, सुधारसविजयी वा? ॥ इलापतिपूजितपादपङ्कजस्य भवतो निसर्गत एव निरहङ्कृतिः निर्मलबुद्धिः शुद्धवर्तनं शिवयोगसम्पत्तिः शिवागमविशारदत्वं सद्गुरुभक्तिः शैवकाव्यनिवह-पुराणतति-तर्कसमञ्चितषट्स्थलशास्त्र(षट्स्थलविद्या)निचयसारदर्शनं च वर्तत इति [2]" ॥ 'श्रुत्वा काव्यमिदं यथैव विबुधै रोमाञ्चितैश्श्लाघितम्। प्रेम्णाऽवोचमहं हि साम्बकृपया पूर्णं तथैकाब्दके। भक्त्या पूतषडक्षरार्य-विबुधस्साहित्यविद्याविदश्रान्तश्रीशिवलिङ्गसङ्गतमहामाहेश्वरो विश्रुतः [3]' शबर-शङ्करविलासे च एकादशवयस्येव अभवप्रसादबलात् कवितातरुणी षडक्षरि-देवं वृतवतीति विबुधानां विस्मयजनकमिदम् ॥ कोविदानां स्तुत्यर्हं यथा तथा शम्भुकृपाबलात् अशेषकाव्यवृन्दस्य सारभूतां संस्कृत-कर्णाटकाव्यविनिर्मितिं कृतवान् प्रगल्भः षडक्षरिदेवः [4]" ॥

सत्कविविषयः—

भुवने भोजराजमहासभायां बहुशास्त्रकोविदाः बहवः कवयः आसन् इति कथा तावदास्ताम्। परन्तु कालिदासप्रमुखसत्कवीन्द्राणां यश एवाद्यापि

---

[1] क. क. र : १ ; ५४–५७; १ ; २१ । [2] रा. वि. १ ;६९-७२ ।
[3] रा. वि. १४-१७२ । [4] श. शं. वि. ५ ; ६०—६२ ।

लोके यथा राराज्यते, तथा भोजास्थानस्थितानां सर्वेषां कवीनां यशः किं भुवने विराजते ? न कुकवयः सत्कवितुल्या भवन्ति[1] " ॥

सत्काव्यविषयः —

'प्रविश्य विबुधानां श्रवणं नवरसाः, उल्लास्य तनुं, व्याप्य च मनः, किमुद्गता इतीव सुखबाष्पबिन्दून् उद्गमयत्कृतिकथनं कवेस्साम्प्रतम्[2] '॥ 'माधुर्यमौदार्यमुदात्तरीतिरौज्ज्वल्यमङ्गीकृतवृत्तिशोभा । स्फुरद्रसालङ्कृतिरस्ति यस्यां सा सत्कृतिस्स्यात्तरुणीव रम्या[3]' ॥

कवि-विद्वत्सम्बन्धः —

" अखिलवर्णावलिः वेद-वेदाङ्गपालिश्च यदास्यतः प्राक्प्रसृता स एव देवः लब्धवर्णैः कविभिर्महद्भिः संस्तुत्यः । सुदुर्लभस्य कवित्वरत्नस्य तदैव साफल्यं नान्यथा । तस्मात् ऐहिकामुष्मिकसौख्यनिमित्तं कवीन्द्रैः भुवनैकनाथः शिवः गुणाभियुक्तः शिवभक्तश्च प्रणुत्यः[4]। शिवानुग्रहादेवाहं शिवभक्त-चोलराजगुणैराकर्षितः प्रसन्नगीर्वाणगिरा रम्यं प्रबन्धमेकं रचयामि । प्रमादतो वाऽऽगतं स्खालित्यं धीरैः समुत्सार्य निजानुभावाद्विनीयतामिदं काव्यम् । ब्रह्मादीनामप्यशक्ये शिवैकभक्तस्य महामहत्त्ववर्णने कियानहम् ? केवलं भक्तिवशादेव यथामति स्तोतुमुत्सहे[5] । यतः कलावतः सन्निधिरेव हेतुः सुधारसश्रीजननस्थलस्य प्रबन्धवार्धेः परिवर्धनस्य । विद्वत्सहायश्च कवेः प्रभावः किल । अतः साहित्यविज्ञानविदः एवात्र परिशीलनार्हाः । नैकस्मिन्

---

[1] रा० वि० १–२८ । [2] रा० वि. १–५२ । [3] क. क. र. १–३३ [4] क. क. र. १–४९, ५२, ५९ [5] क. क. र.१–५७, ५८, ६० ।

जन्मनि कवित्वचिन्तामणिः लब्धुं शक्यः। अनेकजन्मार्जितपूर्वपुण्यादेव कवित्वचिन्तामणिः लभ्यते [1]।

कवेरादर्शः —

"शिवपदमेवाश्रितान् शिवशरणान् काव्यमुखेन संस्तुत्य कैवल्यलक्ष्मीपतित्वं प्राप्तो महाकविर्हरीश्वर एव मार्गदर्शी। 'तदुदितमार्गानुसारेणाहं कविताध्वनि गच्छामि। समस्तवर्णावलीनां जनयितारौ अपर्णापरमेशाविति निगमोक्तिमवलम्ब्य, रसायां 'रसो वै स' इति स्तुतमसमनयनमस्तुत्वा सुरान् मानुषान्वा स्तुवन् वरकनकं परित्यज्य अवकरं परिगृह्णन्निव। तस्मात् महितमहिमास्पदं शिवं, तदीयशरणव्रजं च सम्मुदा यथामति स्तौमि नान्यान् नरान् सुरान्वा स्तवीमि [2]" इति उद्देशोऽस्य कवेः।

कविना स्तुताः —

स्वकृतिषु रेणुक-राम-पण्डित-मरुळाचार्यान्, बसव-चेन्नबसवाल्लमसिद्धराम-महादेवी-मायिदेव - जक्कणार्य - सिद्धलिङ्ग - निजगुणशिवयोगीश्वरान् महितान्, उद्भट-मल्हण-बिल्हण-पुष्पदन्त-मल्लणार्य-भोज-काळिदास-हरीश्वर-राघवाङ्क-पद्मरस-केशिराज-सोमनाथ-भीमकवि-शङ्करार्यान् शिवकवीन् आद्यान् पुरातनांश्च संस्तुतवान्।

स्वकृतीनां पौर्वापर्यकथनम्—

शबरशङ्करविलासे—'प्रविमलराजशेखरविलासमहाकृतिं वृषाधिराजलसत्प्रबन्धं च कर्णाटवाण्या निर्माय ततश्च भुवनविनुत्यं कविकर्णरसायनाख्यं

---

[1] १–१६, २८, ४७, ३१। [2] रा. वि. १; १९–२२।

काव्यं प्रविततसंस्कृतोक्त्या विनिर्ममे षडक्षराह्वयोऽहम्[1]' इति कविरेव स्वनिर्मितेषु चतुर्षु महाप्रबन्धेषु तृतीयं काव्यमिदं इति स्पष्टीकृतवान्। कविकर्णरसायनेऽपि इममंशं विशदीकृतवान्[2]।

अन्येषामुक्तिभिः ज्ञायमानः कविविचारः

कवेर्विषये राजावलिकथाकारः देवचन्द्रः —

देवचन्द्रस्तु स्वकीयभाषाकृतौ राजावलिकथायां—'सोऽयं षडक्षरी चिक्कदेवराजस्य मातुः एलवन्दूरमूताम्बायाः वंशस्य गुरोराराध्यपुत्रः, अन्तःपुर-जनप्रेरणया अस्मिन् आनीते सति, लीलावतीकादम्बर्याद्यनेकवस्तुक(चम्पू)-काव्येषु नैपुण्यं सम्पाद्य कविशेखरत्वात् राजशेखरविलासाख्यं नूत्नं प्रबन्धं विरच्य सन्तोष्य कांश्चित् कांश्चिन्मठान् मान्यांश्च लब्ध्वा अद्भुतानि च प्रकटयामास[3] इति। तथैव 'एळवन्दूर.......षडक्षरी, तत्पुरस्य जैनब्राह्मणो बोम्मरसपुत्रो विशालाक्षपण्डितः, तिरुमलार्यश्चैते त्रयोऽपि सहाध्यायिनस्सन्तः निघण्टु-व्याकरण-काव्य-नाटकच्छन्दोऽलङ्कार-तर्कादिविद्यां समस्तां अभ्यस्य स्वस्वमतप्रमेयेषु शिखामणयस्सन्तः, कवि-गमकि-वादि वाग्मित्वादिषु अग्रगण्या बभूवुः। तेषु चिक्कदेवराजनृपालः कोविदशिखामणिरिति, तिरुमलार्यः विद्या-विशारद इति, विशालाक्षः साहित्यभारती इति षडक्षरी च **कविशेखर** इति प्रख्याताः[4]' इति उल्लिलेख।

चिक्कदेवराजास्थानविद्वत्सचिष्वेकः षडक्षरीशः —

मैसूरुराजपरम्परायां चतुर्दशः राजा चिक्कदेवराजभूपालः। 'स तु मन्त्रालोचनादिकार्यनिर्वहणार्थं मन्त्रालोचनासमितिमेकां निर्माय तस्यां एळन्दूरु-

---

[1] श. शं वि ५–६३।   [2] क. क. र. १–५४, ५५, ५६, ५७।

[3] क. क. च. भा II पृ. ४४२।   [4] रा. वि. प्र. पृ. V।

पण्डितं, तिरुमलय्यङ्गार्यं, षडक्षरार्यं, स्वशिक्षाचार्यं चिक्कुपाध्यायं तथैव लिङ्गण्णर्यनामकं चेति पञ्चविबुधान् नियोजितवान्[1]' चिक्कदेवराजमहीपालस्य शासनकालः क्रिस्तीयः १६७३–१७०४। 'विशालाक्षपण्डितः, षडक्षरिदेवः तिरुमलार्यः इत्येते त्रयः परस्परं चिक्कदेवराजमहीपालस्य कार्येष्वनुकूला आसन्[2]' इति राजावळिकथाकारः कथयति। एतेन चिक्कदेवराजभूपालस्य विद्वत्सचिवेष्वेकस्सन् अयं कविः तस्यास्थानेऽपि सम्मानितपदवीमधिष्ठितवान् इति वेद्यते।

चिक्कदेवराज-तिरुमलार्यौ क्रिस्तीये १६४५ तमे वर्षे पार्थिवसंवत्सरे आश्वयुजमासे सञ्जातौ। षडक्षरिदेवः अनयोस्सहाध्यायीति कथितोऽपि सोऽयं ताभ्यां ज्यायान् वयसा इति प्रतिभाति। कथमिति चेत् क्रिस्तीये १६५४ तमे वर्षे शृङ्गाररसपरिपूरितराजशेखरविलासाख्यकाव्यनिर्माणावसरे प्राप्तयौवनः प्रायः १८-२० वर्षवयाः स्यात्। तथा च क्रिस्तीये १६३६ वर्षे तावत् प्रायशः जातः[3]।

चिक्कदेवराजमानितस्य कवेर्विरसप्रसङ्गकारणं राज्ञा वैष्णवधर्मावलम्बनं च—

(क्रिस्तीये १६८५ तमे वर्षे तावत्) चिक्कदेवनृपालराज्ये करभारं प्रजा विरुरुधुः। राज्ये तावत् गम्भीररूपा क्रान्तिरेव समजनि। तदा चिक्कदेवराजः षडक्षरिदेवस्याशयमपृच्छत्। 'प्रजानां प्रार्थना न्याययुतैव।

---

[1] श्री. म. वं. भा I. अ. ८. पृ. १०५। [2] रा. वि. प्र. पृ. IX।
[3] रा. वि. प्र. पृ.(ii)।

तन्न्यायप्रतिबन्धस्तु केनापि कर्तुं नैव साध्यः' इत्युत्तरं स दत्तवान्। अनेनोत्तरेण राज्ञः षडक्षरीशविषये बाल्यात्प्रभृतिस्थितादराभिमानभक्तिविश्वासादयस्सर्वे विगलिताः। यद्यपि चिक्कदेवराजस्य वीरशैवधर्मे आनुवंशिकी श्रद्धा आसीत्; तथापि अनेनोत्तरेण प्रजाभिप्रायानुमोदकेन विमनाः विरसो भूत्वा श्रीवैष्णवधर्ममवलम्बितवान्[1]"। इत्यनेन च निर्विवादं स्फुटीभवति यत् चिक्कदेवराजेनापि पूजितपादोऽयं महाकविरिति ॥

हदिनाडुमुद्दुभूपालकुलगुरुत्वम्—

हदिनाडुराज्यस्य राजधानी एळन्दूरु(बालेन्दुपुरम्)ग्रामः। तत्र तिरुमलराजसुतः मुद्दुराजः क्रिस्तीय १६५४ तमे वर्षे शास्ति स्म। अस्य कुलगुरुश्चायं महाकविः। स्वविरचितशिवाधिक्यरत्नावळि-भक्ताधिक्यरत्नावल्योस्समाप्तिगद्ये तावत् स्वयमेवाह 'श्रीबालेन्दुपुरवराधीशमुद्दुभूपकुलगुरु-षडक्षरस्वामिविरचिता[2]' इति। अनेन मुद्दुभूपालेनापि पूजितोऽयमिति च विदितं भवति।

बालेन्दुपुराधिपस्य कुलदेवता गौरीश्वरः। बालेन्दुपुरस्थितस्यास्य देवालयस्य शालिवाहन शके १५७६ तमे जयसंवत्सरे अर्थात् क्रिस्तीय १६५४ तमे वर्षे तावत् शिलाशासनपूर्वकं प्रदत्तं दानमेव साक्षीभूतमस्य शैवमार्गावलम्बित्वस्य[3]। गौरीश्वरदेवालयः दनुगूरुग्रामेऽप्येको वर्तते[4]। गुरुत्व-कुलगुरुत्व-देवतासम्बन्धाच्च षडक्षरि-मुद्दुराजयोस्तथैव धनुःपुर (दनुगूरु)

---

[1] रा. वि. प्र. पृ. IX। [2] शि. र. पृ. ८८, भ. र. पृ. ६६।
[3] मै. डि. शा. Vol IV part II। [4] मै. डि. शा. भा II. मलवल्लीता–धनुगूरु नं ७४।

बालेन्दुपुर(एळवन्दूरु)योश्च महान्तं सम्बन्धं सूचयत्ययं धनुःपुरीस्थगौरी-श्वरदेवालयोऽपि ।

कालनिर्णयः —

"सुरुचिरशालिवाहनशकान्वितरत्न-समुद्र-बाण-भू-। परिगणनाङ्क 'बन्धु-रजयाब्द' सुमाघविशुद्धपक्षवि-। स्फुरिततृतीययाञ्चित सुसौम्यदिने परिपूर्ति-मगादसौ कृतिश्च श-। ङ्करशिवलिङ्गपादकृपयैव षडक्षरदेवनिर्मिता[1]"॥ इति कविरेवाह काव्यसमाप्तिकालम् ॥ परन्तु अत्रस्थरत्न-समुद्र-बाण-भूपदानि क्रमात् ५-७-५-१ सङ्ख्यासंज्ञकानीत्यवबुध्य 'अङ्कानां वामतो गतिः'इत्युक्तरीत्या परिगण्यमाने, शालिवाहनशकाब्दः १५७५ तमो भवति। रत्नशब्दस्य पञ्च रत्नानीति च पञ्चसंज्ञकस्य प्रसिद्धिरप्यस्ति। तथैव अत्रोल्लिखित-'बन्धुरजयाब्द' पदस्य केवलं 'जयाब्द' इति स्वीकारे शकसंवत्सरस्य व्यत्ययो भवति। 'बन्धुर' इति पदं जयाब्दस्य विशेषणं वर्तते। विशिष्टो जयः विजयः' इति विजयशब्दस्य व्युत्पत्तिरस्ति किल। एतद्विशिष्टार्थबोधकत्वेनैव कविरत्र 'बन्धुर' इति पदं निबद्धवानिति च मत्वा 'बन्धुर-जयाब्द' पदेन 'विजयाब्द' एव स्वीकर्तव्यः। एवं स्वीकृते शालिवाहनशकाब्दे १५७५ तमे विजयसंवत्सरे माघमासे शुक्लपक्षे तृतीयायुक्तबुधवासरे अर्थात् श्री स्वामि-कण्णुपिळ्ळैपञ्चाङ्गरीत्या ११-१-१६५४ तमे क्रिस्तीयवर्षे पूर्णोऽभूदयं राज-शेखरविलासः इति समीचीनमेव वर्तते।

बन्धुरेति विशेषणत्यागे जयाब्द इति स्वीकृते वारव्यत्ययो भवति। रत्न-समुद्रपदयोः वैकल्पिकसंज्ञाकल्पनात् क्लिष्टकल्पनाच्च[2] विवादरहित-

---

[1] रा. वि. आ. १४ प १८४ ।

[2] क. क. च. भा २ पृ. ४४२ ; सं. रा. वि. उपोद्घाते-पृ. ४, ५, ६ ।

मुपर्युक्तं ११-१-१६५४ क्रिस्तदिनमेव राजशेखरविलासस्य परिसमाप्तिकाल इति स्वीकारस्समुचितो वर्तते ।

'शालिवाहनशकाब्दः १५७६ तमः जयसंवत्सरः' इति हदिनाडु-मुद्दुभूपालस्थापिते, सरसकविसासलय्येन रचिते एलन्दूरुग्रामस्थगौरीश्वर-देवालयस्य शिलाशासने स्पष्टमेव वर्तते । एतेन श्रीबालेन्दुपुरवराधीशमुद्दु-भूमिपकुलगुरोः श्रीषडक्षरदेवस्य राजशेखरविलासं एतच्छिलाशासनस्थापन-वर्षात्पूर्ववर्षे एव समाप्तमिति च सम्यक् प्रतिभाति । मैसूरु महाराजवंशावलीतः, तथैव राजावलिकथातश्चायं समय एव राजशेखरविलाससमाप्तिसमय इति व्यज्यते च ।

अतः शालिवाहनशके १५७५ तमविजयसंवत्सरे माघमासे शुक्लपक्षे तृतीयायुक्तबुधवासरः अर्थात् क्रिस्तीयः ११-१-१६५४ दिवस एव राज-शेखरविलासपरिसमाप्तिकालः इति निर्धार्यते ।

वृषेन्द्र(बसवराज)विजयोक्तं काव्यसमाप्तिसूचकपद्यं[1] तथैव तद्-ग्रन्थस्य परिशिष्टत्वेन दत्तायाः बसवकृतेः परिसमाप्तिसूचकपद्यं[2] च दोषयुते, पञ्चाङ्गविरुद्धे । एतत्पद्यद्वयमपि कविनैव लिखितमिति नास्माकं प्रत्ययो भवति शकाब्दादिदुष्टत्वात् । किञ्च बसवकृतिश्च बसवराजविजयात् न पृथक्कृति-स्स्यात् । सा बसवराजविजयस्थबसवविषयकस्तोत्राणामेकत्र संग्रहरूपा केवलम् । यथा एवमेवास्य कवेश्शिव-देवीस्तोत्राणि च सङ्गृहीतानि नान्दीपद्यानीति प्रथितानि तथैवेमानि पद्यान्यपि बसवराजविजयनान्दीपद्यसंग्रहरूपाणि स्युः ।

---

[2]ब. रा. वि. आ ४२ प. ८९.   [2] ब. रा. वि. परि २ प. २३.

केनचनाप्रबुद्धेन लिपिकारेण सङ्ग्राहकेण एतत्पदद्वयमपि प्रक्षिप्तमिति प्रतिभाति। अस्मिन् विचारे विमर्शकाः प्रमाणम्। एतावता एव बसवराजविजयात् बसवकृतिस्स्वतन्त्रकृतिरिति परिगणयितुं निर्णेतुं च नैव साधनमस्तीत्यलम्।

कवेः कालनिर्णायकं अपरं प्रमाणमपि वर्तते तच्च—शालिवाहन १६०० तमशकाब्दे (वर्तमान १६०१ तमशकाब्दे) स्थिरवासरे मित्रतारायुक्त हर्षणयोगे भद्रकरणे अर्थात् स्वामिकण्णुपिळ्ळैपञ्चाङ्गरीत्या २२-१-१६७९ तमे क्रिस्तवर्षे तावत् भाषाकविना बसवलिङ्गाख्येन कोट्टूरुबसवपुराणाख्यं भाषाकाव्यं परिसमापितमति स्वग्रन्थान्ते उक्तम् यथा— "उभयकविताविवरणक्षमषडक्षरिदेवदेशिकोत्तुङ्गदयाप्रसादसरसामृतापाङ्गसङ्गत—सुकृतफलोत्करादेव एतत्काव्यकरणे शुभकरबुद्धयभिवृद्धेरहं पूतात्माऽभवमवनीतळे[3]" इत्युक्तत्वात् षडक्षरिदेवदेशिकनिदेशादेव इमां भाषाकृतिं विरचितवानिति स्पष्टं भवति। अनेन षडक्षरिदेवदेशिकोऽयं २२-१-१६७९ तमे संवत्सरेऽप्यासीदिति दृढं भवति।

शृङ्गाररसप्राचुर्यराजशेखरविलासरचनावसरे तावत् प्रायोऽष्टादशवर्षीयः स्यादिति विदुषां तर्कश्च समञ्जसस्सन्दृश्यते। राजावळिकथाकारश्च (क्रिस्तीये १६८५ तमे वर्षे तावत्) 'चिक्कदेवराजनृपालेन साकं विरसप्रसङ्गस्सञ्जातः' इत्याह। एतेन क्रिस्तीयं १६३६ तमं वर्षं अस्य महाकवेः जननकालः स्यात्। अर्थात् क्रिस्तीयः १६३६-१६८५ जीवितकालः इति सुविदितं भवति॥

---

[3] को. ब. पु. सं १९. प. ७३।

समकालिकप्रमुखवीरशैवविबुधाः —

मुरिगाशान्तवीरः द्वितीयमुरिगागुरुसिद्धः कुमारविजयकर्ता (भाषात्मना) हानगल्लुविरक्तः कुमारविभुः मलेयशान्तेशगुरुः कोट्टूरुबसवपुराणकर्ता बसवलिङ्गकविश्चैते कवेः समकालिकप्रमुखवीरशैवविबुधाः वयसा ज्येष्ठाः कनिष्ठाश्च। एतेषु द्वितीयमुरिगागुरुसिद्धः अयं षडक्षरीशश्च एकवंश्यौ इति नूत्नतया अस्माभिरवगतो विषयः। एतयोः षडक्षरिदेवदेशिकः गुरुस्थानमलङ्कृतवान्। द्वितीयमुरिगागुरुसिद्धः जङ्गमस्थानमलङ्कृतवान्। षट्स्थलब्रह्मस्वरूपी गुरुष्षडक्षरीशः निरञ्जनप्रणवस्वरूपी जङ्गमः द्वितीयमुरिगागुरुसिद्धः। एकः महागुरुरेणुकाधिष्ठितसिंहासनासीनो महादेशिकेन्द्रः। अपरः निरञ्जनाधिष्ठितशून्यसिंहासनासीनो महादेशिकेन्द्रः।

द्वितीयमुरिगागुरुसिद्धविरचित'प्रभुलीला[1]'प्रथमसर्गस्य २९-३९ तमश्लोकान्ते विद्यमानं विवरणंत्वित्थं वर्तते—

"धनुःपुर्यां(धनुगूरु)चिच्छक्ति(निरञ्जन)पीठाधिपो दक्षिणामूर्ति रिव वीरशैवोपदेष्टा उद्दानयोगिराट् आसीत्। तस्य वंश्यः, सोमशेखरसद्गुरोः करजातः, श्रीमद्बसवलिङ्गतः शिक्षां प्राप्तः, परिव्राजां गुरोः मुरिगाशान्तवीरात् लब्धमहाज्ञानः तथैव प्राप्ततन्नामरूपकश्चाहं षट्स्थलवित् गुरुसिद्धाख्यः योगी" इति द्वितीयमुरिगागुरुसिद्धः स्वविषयं विवृण्वन् 'धनुः पुर्युद्दानयतिवंश्यः' इति स्पष्टं उक्तवान्। षडक्षरीशश्च कविकर्णरसायने 'धनुः पुरोद्दानयतीन्द्रवंश्यः' इति सुस्पष्टतया स्ववंशं सूचितवान्।

षडक्षरीशस्तु धनुःपुरीस्थश्रीमठे पट्टाभिषिक्तशिवाचार्यः, ततः बालेन्दुपुर(एळन्दूरु)मधिष्ठितवान्। द्वितीयमुरिगागुरुसिद्धस्तु प्रथमतः

---

[1] प्रभुलीलाकाव्यमिदं डाक्टर जि. मरुलसिद्धय्य M.A. p.hd., इत्येतैः सम्पादितं मैसूरुविश्वविद्यालयेन १९६६ तमे वर्षे प्रकटितं वर्तते।

तृणपुरी(हुल्लहळ्ळी-हरिणपुरी)स्थमुरिगामठेऽभिषिक्तः निरञ्जनः, ततः चित्र-दुर्गमुरिगामठमधिश्रितः। उभावेतावपि मैसूरु(Mysore District)मण्ड-लान्तर्गतावेव। द्वितीयमुरिगागुरुसिद्धस्य षडक्षरीशविषये अतीवगौरवबुद्धि-रासीत्। षडक्षरीशस्यैक्यमपि दृष्टवान्। ऐक्येन तीव्रसन्तप्तोऽयं गुरुसिद्धः चरमपद्यात्मकं गेयमेकं भाषायां विरच्य स्वशोकमपि प्रदर्शितवान्[2]।

षडक्षरीश-मलेयशान्तेश-मुरिगाशान्तवीर-द्वितीयमुरिगागुरुसिद्धाः तत्का-लीनवीरशैवसमाजे प्रतिष्ठिताः प्रभावयुताः महिताः मार्गदर्शिनः महाप्रेरक-तारकशक्तयश्च आसन्। शिवधर्ममर्मज्ञास्त्वेते अधर्मनिरसने धर्मसंस्थापनेच निरता आसन्।

षडक्षरीशमेव मुरिगागुरुसिद्धोऽप्यनुसृतवान् काव्यमार्गे। यथैव षडक्षरीशः स्वग्रन्थेषु शिवस्तुतिं देवीस्तुतिं च (नान्दीपद्यानि) कृतवान् तथैव गुरुसिद्धोऽपि हालास्यमहात्म्ये (सौन्दरमहापुराणे) भाषात्मके इममेव मार्गं, 'शिवलिङ्गाङ्कितं' च अनुससार। भिक्षुकविलासकर्ता (भाषात्मना) कुमार-विभुरपि षडक्षरीशं स्तुतवान् तथैव कवितासरणौ च इममनुकृतवान्। तथैव कोट्टूरुबसवपुराणकर्ता च॥

सङ्ग्रहेण कवेश्चरितम्—

एतावता, कव्युक्तिभिः परोक्तिभिश्चैवं सङ्ग्रहेण कवेश्चरितं सिध्यति—महाकविरयं मैसूरुदेशे मैसूरुमण्डलान्तर्गत'दनुगूरु'नामकग्रामविराजमान-श्रीरेणुकाचार्यसम्प्रदायपीठे उद्दानयतीन्द्रवंश्यस्सन् चिक्कवीरदेशिकपाणि-सञ्जातः पट्टाभिषिक्तः शिवाचार्यः। मैसूरुमण्डला(District) न्तर्गतहदि-

---

[1] सम्पदाकपरिष्कृतेनाप्रकटितग्रन्थभागेन उद्धृतोऽयमंशः।

नाडुभूपालस्य मुद्दुभूपस्य राजगुरुश्च। तथैव मैसूरुचिक्कदेवराजानृपालस्याप्त-सचिवः। चिक्कुपाध्याय-तिरुमलार्य-विशालाक्षपण्डित-चिक्कदेवराजास्तु अस्य सहवर्तिनः। द्वितीयमुरिगागुरुसिद्धस्य वंशीयः। सर्वविबुधमूर्धन्यः वीरशैव-समाजे सुप्रतिष्ठितः। अन्ते बालेन्दुपुरे शिवैक्यभाक्। कालस्तु क्रिस्तीयः १६३६-१६८५. इति निर्धारितं भवति। मलेयशान्तलिङ्ग (मलेयशान्तेश) देशिकः मुरिगाशान्तवीरदेशिकश्च वयसा तुल्यौ इति द्वितीयमुरिगागुरुसिद्धः कुमारविभुः बसवलिङ्गकविश्च वयसा कनिष्ठाः इति च ज्ञायते। केळदी-राजधानीमपि संदृष्टवानिति वीरभद्रोदाहरणगद्येनावगम्यते॥

कवेः प्रशस्तिः —

महाकवेरस्य विषये विद्यानिधिः सिद्धेश्वरशास्त्रीचित्रावमहाशयः 'भारतवर्षीयमध्ययुगीनचरित्रकोश' नामके महाराष्ट्रज्ञानकोशे तावत् एतत्कवि प्रस्तावावसरे "— एकादशवयस्येवायं संस्कृत-कर्णाटोभयभाषाकवितानिर्माण-सामर्थ्येन प्रसिद्धिं गतः। अस्य शैली तूत्कृष्टा। एतद्रचितराजशेखरविलासाख्ये चम्पूप्रबन्धे वर्णितः तिरुकोळविनाचीविलापस्तु कालिदासीयाजविलापतुल्यत्वेन प्रख्यातोऽस्ति। राजशेखरविलासाख्यः प्रबन्धश्च 'पद्यकादम्बरी' इति वक्तुं अर्हः। कविरयं कर्णाटके उन्नतस्थानापन्नः। बालेन्दुपुरमठाधिपतिः। तत्रैव समाधिमापन्नश्च [1]" इत्यभिप्रैति।

तथैव एम्. कृष्णमाचार्यः विमर्शकः स्वकीये 'हिस्टरि अफ् क्लासिकल् स्यान्स्क्रिट् लिटरेचर' नामकग्रन्थे अष्टमाध्याये १९४ तमे पृष्ठे तावत्

---

[1] भा. म. च. पृ. ५८८।

" षडक्षरिदेवोऽयं प्रख्यातः कर्णाटमहाकविः तथैव संस्कृतमहाकविश्च । एतद्रचितकविकर्णरसायनाख्ये चोलराजीये दशसर्गात्मके चोलराजचरितं वर्णितमिति । तत्रैव टिप्पण्यां अस्य कविकर्णरसायनस्य मधुरानगरीयान्ध्र-कविना वेङ्कनाख्येन निर्मितमेकं व्याख्यानं वर्तते " इति च उल्लिखितवान् ।

कुमारविभु - बसवलिङ्गकवि - द्वितीयमुरिगागुरुसिद्ध - देवचन्द्रादयश्च प्राक्तनाः, अर्वाचीनाः अभिनवकालिदासबसवप्पशास्त्रिप्रमुखाः कर्णाटकवि-चरितकाराः आर्. नरसिंहाचार्यादयः विमर्शकाश्च अस्योभयभाषासत्कवित्व-विषये प्रशस्तमभिप्रायमुद्घोषितवन्तः ॥

षडक्षरीशविरचिताः प्रबन्धाः

कर्णाटभाषामयाः—

१) राजशेखरविलासम् २) वृषभेन्द्रविजयम् (बसवराजविजयम्) ३) शबरशङ्करविलासम् ॥

गीर्वाणभाषामयाः —

४) कविकर्णरसायनम् (श्रीचोलभूपालीयम्) ५) शिवाधिक्यरत्नावलिः ६) भक्ताधिक्यरत्नावलिः ॥

लघुकृतयः —

(शिवस्तवमञ्जरी)— ७) नमश्शिवायाष्टकम् ८) श्रीमदनादि-सिद्धलिङ्गस्तवनम् ९) वीरभद्रोदाहरणगद्यम् १०) शिव-स्तोत्रसुमञ्जली ११) इन्दुधरस्तोत्रम् १२) शिवमानसस्तोत्रम्

(१३) इष्टलिङ्गाष्टकम् (१४) इष्टलिङ्गस्तवनम्
(१५) बसवाष्टकम् (१६) नीलाम्बिकास्तोत्रम् (१७) तत्त्वत्रयस्तोत्रम्
(१८) नीलाम्बिकास्तोत्रम् (अपरं) (१९) मङ्गलाष्टकम्
(२०) षडक्षरमन्त्रस्तोत्रम् (भाषात्मकं)
(२१) बसवेश्वरसुप्रभातस्तवनम् (२२) वीरभद्रदण्डकम् ॥

एते एतावत्पर्यन्तमुपलभ्यमानाः अस्य महाप्रबन्धाः लघुप्रबन्धाश्च। संशोधनेन पुनः अन्यान्यपि स्तोत्राणि उपलभ्येरन्। स्तोत्रप्रबन्धेष्वपि काव्यांशस्त्वधिकतया प्रतिभाति। समग्रकृतिपरिशीलनेनास्य सत्कवितारचनासामर्थ्यादिकं शिवाद्वैतविद्याविशारदत्वं शिवागमशास्त्रराशावपारपाण्डित्यं सर्वकलाभिज्ञत्वं च स्फुटीभवति। वीरभद्रदण्डकं केवलमभुद्रितं वर्तते ॥

शिवधर्म-शिवभक्ति-शिवभक्तानां स्थूलपरिचयः—

विदितमेव हि सर्वेषां तत्त्वप्रबोधार्थं जगतां रक्षणार्थं मोक्षार्थं च शिवः स्वलीलया ज्योतिर्लिङ्गरूपेणाविर्भूय अनुग्रहं ददातीति वेदागमपुराणादिषु सुप्रसिद्धं वर्तत[1] इति। ज्योतिर्लिङ्गरूपेणाविर्भूय महत्त्वे त्वहमहमिति विवदमानानां इन्द्रादीनां देवतानां, तृणादपि कनिष्ठा इति गर्वनिरसने कृते 'केन?' इति विस्मितानां तेषां स्वशक्त्या हैमवत्या उमया 'सर्वशक्तस्त्वेको महादेवोऽस्ति। तेनैवेदं सर्वं विभाति' इत्युपदिष्टं किल केनोपनिषदि। महोपनिषदि च ज्योतिर्लिङ्गाविर्भावकथनं विद्यते। तथैव अहमहमिति गर्वितयोरजहर्योर्मध्ये ज्योतिर्लिङ्गरूपेणाविर्भूय तयोर्गर्वनिरसनं कृतवानित्याद्यैतिह्यं शिवधर्मसंहितादिषु

---

[1] वी. मा. सं. भा १ अ १० श्लो २१, ३०, ४६, ९९।

C

वर्तते एव। इत्थं जगदनुग्रहार्थं सौराष्ट्रादिपुक्षेत्रेष्वनादितः सोमनाथादिद्वादश-ज्योतिर्लिङ्गानि शिवलीलारूपाणि विराजन्ते खलु। लिङ्गरूपेणैव शिवस्यो-पासना त्वनादितः प्रचलिता अस्ति। अनादिकालादेतावत्पर्यन्तं भुवनस्य सर्वेषामपि मानवानां नीचोच्च-स्त्रीपुरुष-जात्यादिभेदविरहेण स्वहस्तेनैव द्वादशज्योतिर्लिङ्गानां अर्चनाद्यधिकारसौकर्यं शिवधर्मस्त्वेक एव प्रदत्तवानि-त्येष एव विषयः शिवधर्मस्य जगदुद्धरणमहाकारुण्यस्य तथैव तस्यौदार्यस्य च साक्षीभूतः। विना शिवधर्मं एतादृशधर्मावकाशप्रदानस्य प्राचीनोदाहरणानि वा अर्वाचीनोदाहरणानि वा नान्येषु भुवनस्थितधर्मेषु दृश्यन्ते। काशी-विश्वेश्वरलिङ्गस्य पूजादिकमद्यापि सर्वैस्स्वहस्तैरेव भक्त्या क्रियते[1] इति सुप्रथितमेव।

शिवधर्मोऽयमतीव पुरातनः। अस्य व्याप्तिरपि विशाला विश्वाद्यन्तं विराजिताऽद्यापि भारतेऽत्यधिकभक्तशोभिता विराजते। उदात्तकल्याणगुणो-पेतश्शिवधर्मः विश्वोद्धारकतत्त्वप्रणालिकायुतः। भक्तिरेकैव महासाधनीभूता शिवधर्मस्य। भक्तिरेवास्य धर्मस्य सारभूता। 'शक्तिविशिष्टः शिवः(लिङ्गम्)। भक्तिविशिष्टः जीवः(अङ्गम्)। जगदिदं शिवलीलावैभवात्मकम्। लीलाविशेषाः जीवाः। शिवा(लिङ्गा)श्रिता शक्तिः। जीवा(अङ्गा)श्रिता भक्तिः। शक्त्या जगत्प्रवर्तते। इयं प्रवृत्तिरेव शिवधर्मे अधस्सृष्टिरिति कथ्यते। भक्त्या जगन्निवर्तते। इयं निवृत्तिरेव शिवधर्मे ऊर्ध्वसृष्टिरिति कथ्यते। शिव-जीवयोः (लिङ्गाङ्गयोः) शक्ति-भक्त्योः अभेदश्शिवधर्मे प्रतिपादितः। शक्तिरधोमुखी। भक्तिरूर्ध्वमुखी[2]।' शिवादप्यधिको भक्तः। 'मद्भक्तो हि ममाधिक[3] इत्यस्ति

---

[1] वी. मा. सं. भा. २ अ. ४३–९८, ९९। [2] अ. सू. अ २–२१, २२, २३, २६, २७, २८, ३०, ३१, ३२। [3] वी. मा. सं. भा. ३ अ. ७६ श्लो. ९१।

शिववचनम्। तथैव 'शक्तेः भक्तिर्गुणाधिका[1]' 'क्रियाज्ञानोभयात्मिका भक्तिः'[2] 'भक्तिः पञ्चमपुरुषार्थः[3]' इति शिवङ्करी सुखकरी शान्तिमती इति च शिवधर्मस्य निर्णयः। अनया भक्त्यैव शिव(लिङ्ग)सामरस्यं जीवः (अङ्ग) साधयतीति सिद्धान्तस्तु शिवधर्मस्य चरमोद्देशः। भक्तिरेव परमं साधनम्। एतद्भक्तिरूप-साधनपरिग्रहविचारे देश-काल-कुलादयः, स्त्री-बाल-पुरुषत्वादयः न बाधकाः। सर्वेषां सर्वदा सर्वत्रावकाशः प्रदत्तः शिवधर्मे। ये केचिद्वा भवन्तु भक्तिमात्रेणालं शिवधर्मसमावेशे। 'यस्यास्ति भक्तिरीशानि! वीरशैवमताश्रये। भक्तिमात्र-पवित्रा हि सर्वे एवाधिकारिणः[4]॥ 'गोत्रं च शिवगोत्रं च नामापि शिवनाम च। सदाशिवौ च पितरौ बान्धवाश्शिवकिङ्कराः[5]' इति शिवेनोद्घोषितं वर्तते॥

'शिवधर्मस्तु परशिवब्रह्मणा कामिकाद्यष्टाविंशत्यागमेषु उपदिष्टः। शिवोक्तत्वात् शिवधर्म इति शिवधर्माश्रितानां शिवभक्ता इति प्रसिद्धिः। शिवेन प्रकृतेः पुरा सृष्टत्वात् अप्राकृतधर्म इति च प्रसिद्धः। पितामहोदित-प्राकृतवर्णाश्रमादिरहितत्वात् अतिवर्णाश्रमधर्म इति। चतुर्मुखब्रह्मसृष्टेः पूर्वं तद्ब्रह्मणः शिक्षणार्थं सृष्टत्वात् प्रथमाः अथवा प्रमथाः इति शिवभक्तानां नामप्राप्तिः। प्रमथाधिप इति शिवनाम च[6]'। भारतीयसंस्कृतेराधारस्तम्भभूताः प्राक्तनाः गौतमादिदर्शनाचार्याः शिवधर्मिणः। पूर्वोत्तरभागाभ्यां शिवधर्मः स्थूलतया द्विधा विभक्तः। आगमोत्तरभागस्तु सिद्धान्त इति शिवधर्मोत्तर इति च प्रथितो वर्तते। यथा वेदः-वेदान्त इति। वेदागमयोस्समप्रामाण्य-मुररीकृतं शिवधर्मे। शैवादिसप्तप्रभिन्नप्रस्थानेषु विद्यमानेष्वप्यस्मिन् शिवधर्मे

---

[1] अ. सू. २–३१। [2] वि. प्र. ३–६। [3] अ. सू. ८–१८। [4] पार प. १ श्लो. ६२। [5] सूक्ष्मा ७–४१। [6] सि. शि. प. १० पूर्वाश्रयनिरसनस्थलं श्लो. ३, ४, ५, ६, ७।

तानि धर्माचारप्रभेदतः स्थलप्रभेदतश्च । न तु सर्वात्मना भेदतः । गुरुकारुण्य-प्रभृति शिवत्वप्राप्तिपर्यन्तं प्रस्थानं प्रभिन्नं वर्तते । तच्च शिवाद्वैतमिति विश्रुतम् । शक्तिविशिष्टे शिवे (लिङ्गे) भक्तिविशिष्टजीवस्य (अङ्गस्य) सामरस्यमेव शिवाद्वैतम् । 'श्रद्धाभक्तिध्यानयोगादवेहि' 'शिव एको ध्येय-स्सर्वमन्यत्परित्यज्य' इत्युक्तरीत्या चरमो ध्येयस्त्वेक एव ।

शिवदर्शने भक्तिरेव गरीयसी । अयमर्थः 'अपि तर्कप्रमाणाभ्यां शक्तेर्भक्तिर्गुणाधिका [1]', 'पञ्चमपुरुषार्थः भक्तिः [2]', 'मोक्षादुपरि शाम्भवी भक्तिर्गुरुतरा भाति [3]' इत्याद्यागमवचनैः 'श्रद्धाभक्तिध्यानयोगादवेहि [4]' इत्युपनिषद्वचनेन 'स स्थाणुः स्थिरभक्तियोगसुलभः [5]' 'मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी [6]' 'न नादप्रियः नापि वेदप्रियः भक्तिप्रियोऽस्मत्कूडल-सङ्गमदेवः [7]' इत्यादि कालिदास-शङ्कराचार्य-बसवेश्वरादिवचनैश्च स्फुटीभवति ।

कविरप्यस्मिन् कविकर्णरसायने "प्रीतोऽस्म्यद्याद्भुततरभवद्भक्ति-भावेन राजन् । किं दातव्यं भवदभिमतं तद्वृणीष्वेत्युवाच । देव'स्सोऽपि त्रिभुवनविभुत्वादिकं नेष्टमन्यत् । त्वद्भक्तिं मे दिश सुखकरीमि'त्यवो चत्प्रजेशः ॥" "नाहं वश्यो जगति तपसा सर्वदा नैव चेष्टया । श्रौतस्मार्त-प्रहितविधिभिर्ध्याननमौनव्रताद्यैः । भक्त्यैव स्यामनितरसुरेन्द्रस्पृशा शान्ति-मत्या । वश्यः क्षिप्रं वहति य इमां मोक्षमस्मै ददामि ॥" इति शिवमानकञ्जा-रयोर्मुखेन भक्तेरतिशयं तथैव "वाञ्छा मे स्यादसुलभतरे वस्तुनि प्रार्थिते त-द्भक्तेनैवाक्षुभितमनसा दीयते निस्पृहेण । 'मत्तो भक्तस्तदधिकतरः' तत्त्वत-

---

[1] अ. सू. २–३१ । [2] अ. सू. ८–७८ [3] अ. सू. ८–७७ । [4] कैवल्योपनिषत् । [5] विक्रमोर्वशीयम् १-१ [6] विवेकचूडामणिः [7] बसवेश्वरवचनगळु (1930) पृ. २७ वचनसंख्या ६८ ।

स्तन्महत्त्वम् । को वा वेत्ति त्रिदशसमितावित्यवादीत्पुरारिः ॥" इत्यनेन च भक्ताधिक्यं च प्रदर्शितवान् । विना भक्तिं नान्यः पन्था विद्यते अयनाय । एषः शिवधर्मस्य सारः । एष शिवधर्मः शिव-गुरु-शिवभक्ताद्यनुग्रहमात्रेण सुसाधनीयः ॥

'माता च पार्वती देवी पिता देवो महेश्वरः । बान्धवाश्शिवभक्ताश्च स्वदेशो भुवनत्रयम्' इत्यात्मकमनोभाववान् एव ऐहिकमपि सर्वं कार्यं शिवप्रीतिकरमेव कुर्वन् जीवन्मुक्तो भवतीति शिवधर्मसिद्धान्तः । शिवात्मकानां सर्वजीवानां दयापरत्वं, नीतिपरत्वं, समानत्वं च शिवधर्मे विद्यमानं वैशिष्ट्यम् ॥

प्रस्तुतकाव्योक्तशिवभक्तानां विचारः

एतादृशशिवधर्मसाधका भक्ता अप्यनन्ताः । नन्द्यादयः सनातनप्रमथगणाः ततश्च कलियुगे तिरुज्ञानसम्बन्धादयः त्रिषष्टिपुरातनाः दाक्षिणात्याः । एते पुरातनाः क्रिस्तीयचतुर्थशतकात् दशमशतकपर्यन्तं द्रविडदेशे अवतीर्णाः महान्तस्सन्तः । 'नायनारा'ख्यया द्रविडभाषायां प्रथिताः । ततश्च कर्णाटदेशे क्रिस्तीयद्वादशशतमाने श्रीबसवेश्वरादयः शिवशरणाः अवतीर्णाः ।

पुरातनेषु शिवशरणेषु च स्त्रियः बालाः वृद्धाः गृहिणः नैष्ठिकाः राजानः भृत्याः सर्वजातीया अपि वर्तन्ते । सर्वेऽपि शिवभक्तिमात्रमवलम्ब्य शिवैकभक्ताः शिवभक्तैकपक्षास्समानत्वेन स्थिताः । कश्चन व्यत्यासोऽप्येतेषु न वर्तते । शिवधर्मपालनाय शिवभक्तगौरवाय सर्वस्वार्पणरूपदिव्यभक्तिप्रपूर्णाः । सर्वेषामेतेषां द्रविडदेशीयानां पुरातनचरितानि शेक्किलार् रचित 'तिरुत्तोण्डर् पुराणे' पेरियपुराणापरनामके द्राविडमहाप्रबन्धे वर्णितानि ।

'शिवभक्त:' इति ख्यात्या जीवनमेवैतेषां सर्वस्वं सार्थकं जीवनोद्देशश्च। एतादृशध्येयोद्देश: विना शिवावतारिण: नान्येषां साध्य:। 'नाशिवस्य शिवोपास्ति: घटते जन्मकोटिभि:[1]' 'रुद्रो भूत्वा रुद्रमर्चयेत्' 'प्रसादादेव सा भक्ति: प्रसादो भक्तिसम्भव:[2]' इत्यादिवचनै: सर्वेऽप्येते शिवावतारिणो गणा: इति सिद्धयति। लोकानुग्राहका: सन्त: एते अन्ते गणपदवीं शिवपदवीं च सम्प्राप्य शोभन्ते।

एतादृशेषु त्रिषष्टिपुरातनेष्वन्तर्भूतौ कविकर्णरसायनोक्तौ श्वशुर-जामातृभूतौ मानकञ्जार-सुन्दरचोलभूपालौ[3]। एकस्सम्राट् अपरश्च नृपालोऽपि कुबेराधिकश्रीयुत:। सौन्दरचोलपिता तु विक्रमचोल: शिवभक्तोऽपि न पुरातनेष्वन्तर्गत:। मानकञ्जारसुन्दरचोलावुभावपि शिवभक्तवरेण्यौ महात्यागिनौ। त्यागोऽपि शिवायैव शिवभक्तेभ्य एव। मानकञ्जार: आगताय जङ्गमरूपिणे शिवाय तदिच्छानुसारेण, विवाहमण्डपे आशीर्वादार्थं विवाहवेदिकामलङ्कृतवत्या: अपरक्ष्माभुजे दत्ताया: नवोढाया: स्वपुत्र्या: मालालङ्कृतं केशपाशं निश्शङ्कं क्षिप्रमेव छित्वा, भक्तया तत्पादमूले समर्प्य आनन्दितवान्। सुन्दरचोळोऽपि स्वापराधनिमित्तकृत्तस्य जटाभस्मरुद्राक्ष-विभूषितस्य शिवभक्तरुण्डस्य साम्राज्यपट्टाङ्कितमकुटविराजितस्वशिरस्समर्पणं कृत्वाऽनन्दित:। अनयोरुभयो: कर्मभ्यां शिवङ्करश्शङ्कर: सुप्रसन्नो भूत्वा सर्वानप्यानन्द्य अन्ते अनुजग्राह। अनयोर्भक्तिरद्भुता अनन्यसदृशी वर्तते। शिवकारुण्यसम्पादनादृते नास्त्यधिकमन्यदिति भावनैवानयोर्भक्तयोर्जीवनसार:। एतयोर्जीवनं तु विशुद्धं अनघं धर्मयुतं आदर्शमयं च वर्तते।

---

[1] अ. सू. २–१५, १६। [2] अ. सू. ८-३१। [3] अयं सुन्दरचोळ एव द्रविडदेशभूषितेषु प्रख्यातनवचोलेष्वन्यतमस्सन् 'पुगल्चोल:' 'पगल्चोल:' इति भाषप्राबन्धेषु प्रथित:॥

एतयोर्जीवनसारचित्रणमेव कवेर्ध्येयम्। ध्येयसाधने तु प्रतिभासम्पन्नः महाकविरसौ षडक्षरिदेशिकेन्द्रः कान्तासम्मिततया लोकानुग्रहकामनया एलालवङ्गमरीचमिश्रितपानकरसन्यायेन लोकरञ्जनरूपकाव्यवाण्या शृङ्गारादिनव-रसयुतं भक्तिरसप्रपूर्णं कविकर्णरसायनाख्यं शिवधर्मोद्बोधकं महाकाव्यं विनिर्ममे ॥

रसविचारः

कविकर्णरसायनमहाकाव्यवर्णिताः शृङ्गारादयो रसास्सर्वेऽपि आनुषङ्गिका एव। भक्तिरस एवात्र प्रधानः। अत्र किञ्चिदवधेयम्—भक्तिर्नाम कीदृशी? भक्तिः रसो वा भावो वा? भक्तिरसमप्युररीकुर्वन्ति वा न वा? इति विचारे किञ्चित्प्रस्तुमः— तत्र भक्तिविचारः 'सा त्वस्मिन् परमप्रेमस्वरूपा[1]' 'सा परानुरक्तिरीश्वरे[2]' 'द्रुतस्य भगवद्धर्मात् धारावाहिकतां गता। सर्वेशे मनसो वृत्तिः भक्तिरित्यभिधीयते[3]।' 'लिङ्गाश्रिता शक्तिः' अङ्गाश्रिता भक्तिः[4]' 'पञ्चमपुरुषार्थः भक्तिः[5]' 'मोक्षादुपरि शाम्भवीभक्तिर्गुरुतरा भाति[6]' 'अपि तर्कप्रमाणाभ्यां भक्तिरेव गरीयसी[7]' 'ज्ञानक्रियोभयोरैक्यं वर्तते भक्तिरीश्वरि![8]' 'क्रियाज्ञानात्मिका भक्तिः' 'भक्तिरूर्ध्वगा' 'श्रद्धाभक्ति-ध्यानयोगादवेहि' '— स स्थाणुः स्थिरभक्तियोगसुलभः[9]' मोक्षसाधन-सामग्र्यां भक्तिरेव गरीयसी[10]' '—न नादप्रियः, नापि वेदप्रियः, भक्ति-प्रियोऽस्मत्कूडलसङ्गमदेवः[11]' '—मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च

---

[1] नारदभक्तिसूत्रम्। [2] शाण्डिल्यभक्तिसूत्रम्। [3] भक्तिरसायनम्।
[4] अ. सू. २–२२, २३। [5] अ. सू. ८–७८। [6] अ. सू. ८–७७।
[7] अ. सू. २–३१। [8] वि. प्र. अधि उ–६। [9] विक्रमोर्वशीयम् १–१।
[10] वि. चू.। [11] ब. वचन (1930) पृ. २७ सं. ६८।

तत्साधनम्[1], 'अहमित्यभिमानात्मककर्मकाण्डात् नाहमित्यभिमानात्मक ज्ञानकाण्डादपि, नाहं कर्ता न साक्षी च शिव एवेति कर्मणोः । द्वयाभिमान-राहित्यं भक्तिकाण्डोऽयमुच्यते' ।। इत्युक्तभक्तिकाण्ड एव वलीयान् श्रेयः-प्रदश्च।[2] ' 'भक्त्या केवलं वश्योऽहम्। भक्तस्य मोक्षं ददामि। मद्भक्तो हि ममाधिकः' इत्यादीनि शिववचनानि च भक्तिस्वरूपप्रदर्शकानि वर्तन्ते ।।

अलङ्कारशास्त्रे रसविचारः—

"भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः । विकारः प्रकृतेर्जातः पुनस्तत्रैव लीयते ।। स्वं स्वं निमित्तमासाद्य शान्तात् भावः प्रवर्तते। पुनर्निमित्तापाये तु तस्मिन्नेव प्रलीयते[3] ।।" "वीरादयो मिथ्यारसप्रवादाः। शृङ्गार एवैकः चतुर्वर्गैककारणं रस इति[4]" एको रसः करुण एव निमित्त-भेदात् भिन्नः पृथक्पृथगिहाश्रयते विवर्तान्[5]" इत्यादि भरत-भोज-भवभूत्यादि वचनैः रसविचारः जटिलस्त्वनेकधा वर्तते इति विज्ञायते ।। तथैव भक्तिरस-वादिनः रूपगोस्वाम्यादयस्तु भक्तिमपि रसत्वेन उररीकुर्वन्तीति न विदुषामगोचरम् ।।

बहुश्रुतः निजगुणशिवयोगीत्वस्मिन् रसविषये इत्थमभिप्रैति[6]

"शृङ्गारादिलौकिकनवरसाः—

ततश्च रति-हास-शोक-कोपोत्साह-भय-जुगुप्सा-विस्मय-शमा इति क्रमेण शृङ्गारादिनवरसानां बीजभूताः स्थायिभावाः दक्षिणादिनायकहृदयेष्वभि-

---

[1] माध्वाः। [2] अ. सू. ८-२०, २१, २२। [3] नाट्यशास्त्रम् (1926) Vol. I अ. ६-१०७। [4] शृङ्गारप्रकाशः (1955) Vol. I पृ. २। [5] उत्तररामचरितम् ३-४७। [6] वि. चिं. प्रक. ४. पृ. ३९५, ६,७ (1867) मद्रास्।

व्यक्तास्सन्तः, ततश्च स्वकीय-परकीय-सामान्येति नायिकानामुचितैस्तथ्यात-थ्यडम्भादिचाटुवृत्तिभेदाख्यैस्सालम्बनविभावैः स्थायिभावाः अङ्कुरितास्सन्तः, ततश्चेन्दु-मन्दानिल-पद्म-पल्लव-भृङ्ग- लता - मेघ-कोक - सैकत-बिम्ब - प्रवाळ - पुष्प-गन्ध-ताम्बूल-शय्या-सामीप्याद्युद्दीपनविभावैश्च प्रकाशिताः परहृदयगोचरास्सन्तः, तत्तद्रसकार्यत्वेन रसानन्तरभाविभिः स्तम्भ-स्वेद-रोमाञ्च-स्वरभेद-कम्पन-विवर्णताऽ-श्रुप्रळयाख्यैरष्टविधसात्त्विकभावैः, दरहास-कटाक्षेक्षण-भ्रूविक्षेपण-कुचशिखर-चालनादिचेष्टाविशेषाख्यैरनुभावैः, ग्लानि-लज्जा-आवेग-शङ्का-मरण-चपलता-हर्ष-निर्वेद-दैन्य - स्मृति - मोहालस्य - गर्व - श्रम- मद - जडता-अज्ञान-सुप्ति-निद्रा-धृति-तर्कोन्माद - बोध - आमय - भयविषादौत्सुक्यामर्षचिन्ताऽसूयावहित्थोग्रताऽप स्माराख्यैः त्रयस्त्रिंशत्सञ्चारिभावैः परिवृद्धः, ततश्च शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-बीभत्साद्भुत-शान्ताख्यां नवरसावस्थां प्राप्नोतीति रसज्ञतया लौकिकरसलुब्धैर्नागरिकैः [निर्णीतम्] ॥

॥ वैदिकनवरसाः ॥[रसः] रत्यात्मकतमनोवृत्तिवैकल्यम् ॥

ततश्च परमार्थतस्त्वनुरागरूपरतिरेकैव तत्तदुपाधिविषयभेदात् तत्तत्स्थायिभावान्तरसंज्ञां प्राप्य, विषयवैलक्षण्येन बहुरूपा वर्तते । तत्कथमिति चेत् —रतिरेकैव कान्तादिविषयकत्वेन रागमयत्वात् शृङ्गारसंज्ञां, पुत्रादि-विषयत्वेन वात्सल्यमयत्वात् वात्सल्यनामधेयं, मित्रादिविषयत्वेत स्नेहमयत्वात् स्नेहनामधेयं, बन्धुविषयकत्वेन प्रेमात्मकत्वात् प्रेमाह्वयं, नृप-गुरु-देवतादि विषयकत्वेन भक्तिरूपत्वात् भक्त्याख्यां, स्वात्मविषयकत्वेन परतरप्रीतिविषय-त्वात् परमप्रीत्याख्यां, पुनश्चाप्राप्तवस्तुविषयकत्वेन तदिच्छारूपत्वात् इच्छाभिधानं [तत्तदभिधानं] प्राप्नोति । ततश्च हसितव्य-शोच्य-द्वेष्य-प्रतिभट-भीषण-जुगुप्सनीय-आश्चर्य-साम्यास्पदत्वेन रसाष्टकरूपा सती,

तत्तद्वाच्यं [हास्यादिकं] भवतीति वैदिक[अलौकिक]नवरसनिपुणैर्विपश्चिद्भिः [निर्णीतम्]"।। इति निजगुणशिवयोगी लौकिक-वैदिकनवरसस्वरूपं विशदीकृतवान् विवेकचिन्तामण्याख्ये भाषाकोशे चतुर्थपरिच्छेदे ॥

"'सर्वरसेषु शृङ्गारस्यैव लोकरञ्जकत्वेन प्राथम्यं प्रदत्तमि'त्यादिना तत्प्रभेदं प्रदर्श्य '.......... एवं रीत्या भक्त्यादयो योज्या' इत्याह कर्णाटरसरत्नाकरकारस्साळ्वोऽपि ॥ "

एतेन वैदिकरसविन्मते भक्तेः रसत्वमेव नतु भावत्वमित्यवगम्यते। भक्तिरपि शृङ्गाररूपविशेष एवेति स्पष्टं भवति। भक्तिमपि रसत्वेन चैतन्यानुयायी रूपगोस्वामी 'भक्तिरसायनसिन्धौ' तथा 'उज्ज्वलनीलमणौ' च भक्तिरेव मुख्यो रसः इतरेत्वङ्गभूताः इति सिद्धान्तितवान् ॥

काव्यस्थ विक्रमचोळ-सुन्दरचोळ-मानकञ्जारादिषु सर्वत्र सार्वदिक्याः शिवभक्तेस्सकलसन्दर्भेष्वपि सन्दर्शनात् तत्रापि कथानायके सौन्दरचोळे नायिकादर्शन-मधुसन्दर्शन-वीणानादश्रवण-अभ्रवीक्षणादिष्वपि शिवचरणध्यानाविच्छेदात् अस्मिन् कविकर्णरसायनमहाकाव्ये मणिषु सूत्रमिव प्रवहन् भक्तिरस एव प्रधानः इतरे गौणाः इत्यवगन्तव्यमित्यलमतिविस्तृतभक्तिरसमीमांसया ॥

महाकाव्यलक्षणसमन्वयः—

"सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्। आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम् ॥ १४ ॥ इतिहासकथोद्भूतमितरद्वा सदाश्रयम्। चतुर्वर्गफलायत्तं चतुरोदात्तनायकम् ॥ १५ ॥ नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः। उद्यानसलिलक्रीडामधुपानरतोत्सवैः ॥ १६ ॥ मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि ॥ १७ ॥ अलङ्कृतमसंक्षिप्तं रसभावनिरन्तरम्। सर्गैरनतिविस्तीर्णैः

श्रव्यवृत्तैः सुसन्धिभिः ॥ १८ ॥ सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जनम् । काव्यं कल्पान्तरस्थायि जायते सदलङ्कृति ॥ १९ ॥ न्यूनमप्यत्र यैः कैश्चिदङ्गैः काव्यं न दुष्यति । यद्युपात्तेषु सम्पत्तिराराधयति तद्विदः ॥ २० ॥[1] " इति दण्डिकृत-काव्यादर्शोक्तरीत्या सर्वलक्षणसम्पत्तिरप्यस्मिन् महाकाव्ये वर्तते एव । 'इतरद्वा सदाश्रयम्' अर्थात् इतिहासभिन्नसत्पुरुषाश्रयत्वं तथा सत्यभूत-वृत्तान्ताश्रयत्वं न तु असत्पुरुषाश्रयत्वं कल्पितवृत्तान्ताश्रयत्वं वा इत्युक्तलक्षण-रीत्या अस्मिन् कविकर्णरसायनमहाकाव्ये सत्पुरुषाणां विक्रमचोळ-सुन्दरचोळ-मानकञ्जाराणां शिवभक्तानामाश्रयत्वं तथा तेषां भूतपूर्वाणां सत्यभूत (वास्तविक) वृत्तान्तानां आश्रयत्वं च वर्तते न तु कल्पितपुरुषाश्रयत्वं कल्पितवृत्तान्ताश्रयत्वं वा विद्यते । तथैव 'चतुर्वर्गफलायत्तम्' इत्युक्तलक्षणं अस्मिन् महाकाव्ये शिवानुग्रहसम्पत्तिवर्णनात् सम्यक् साधितं वर्तते । शिवानुग्रहसाधकं लोक-रञ्जकं सदलङ्कृति अष्टादशवर्णनरञ्जितं कल्पान्तरस्थायि महाकाव्यं साधितं महाकविना षडक्षरिदेशिकेन्द्रेण । कथानायकस्सुन्दरचोळश्च "दयालुरनहङ्कारः क्षमावानविकत्थनः । महासत्त्वोऽतिगम्भीरो धीरोदात्त इतीरितः[2] ॥" इत्युक्त-लक्षणरीत्या धीरोदात्तनायक[3] एव । अतः सर्वप्रकारेण महाकाव्यलक्षणसम्पत्ति-रस्मिन् महाकाव्ये वर्तते एव ॥

वस्तुक-वर्णककाव्यविचारः—

काव्यमिदं वर्णककाव्यम् । वस्तुककाव्यं-वर्णककाव्यमिति द्विधा विभक्तं काव्यम्[4] । भाषायामेव तत्रापि कर्णाटेष्वेवानयोरुभयोः पदयोः प्रयोगो

---

[1] काव्यादर्शः १—१४, १५, १६, १७, १८, १९, २० । [2] शृङ्गारमञ्जरी. परि. ३–६१ । [3] क. क. र. ५–११४ । [4] किटल्कोशे वस्तुककन्ति-वस्तुककविकृति-वस्तुक-वर्णकपदानां विवरणं पश्यत ।

भूयान् दृश्यते। तत्र वस्तुकपदप्रयोगस्त्वस्मिन् काव्ये "नृपेन्द्र-सत्येन्द्रसुवृत्तरम्यं काव्यद्वयं वस्तुकमेव चक्रे। कर्णाटवाण्या स्तवनीयमार्यैरुद्यद्रसं यस्सुभगं गुणौघैः। १-५५॥" इति पद्ये दृश्यते। वस्तुकस्योदाहरणरूपयोः चम्पूकाव्ययोः भाषारूपयोः नामनी अपि प्रदर्शिते वर्तेते। व्याख्याकृदपि 'वस्तुकं = गद्यपद्यात्मकम्' इति वस्तुकपदस्य व्याख्यां कृतवान्। पूर्वं भाषायां वस्तुकमेव काव्यद्वयं विनिर्ममे। अद्य तु वस्तुकभिन्नं वर्णककाव्यं प्रसन्नगीर्वाणगिरा करोमीति "सोऽहं प्रसादात्परमेश्वरस्य प्रबन्धमेकं रचयामि रम्यम्। श्रीचोळराजस्य गुणैरुदारैः प्रसन्नगीर्वाणगिराऽद्य युक्तम्॥ १-५७॥ अस्मिन् पद्ये कविरेव उक्तवान्।

किं नाम वस्तुकम्? किं नाम वर्णकमिति च परिज्ञानमत्रावश्यकम्। वस्तुकं काव्यमित्युक्ते 'वास्तविककथावस्तुप्रधानं वर्णनाऽप्रधानं गद्यपद्यात्मकं (चम्पू)काव्यं वस्तुकम्'। वर्णकं काव्यमित्युक्ते 'वास्तविककथावस्तव-प्रधानं वर्णनाप्रधानं केवलपद्यात्मकं काव्यं वर्णकम्।' अर्थात् वास्तविक-(सत्यभूत)कथावस्तुघटनानिरूपकं गद्यपद्यात्मकं चम्पूकाव्यं वस्तुकमिति, वास्तविककथावस्तुघटनानां कल्पनाचातुर्येण वर्णनामयं केवलपद्यात्मकं वर्णकमिति च वस्तुकवर्णकयोर्लक्षणपरिज्ञानम्॥ वादिराजकृतयशोधरचरितस्य 'वस्तु-वर्णकविताचतुरस्त्रैः' इति पद्यपङ्क्तेः व्याख्यानावसरे 'यथावस्तुकथनं वस्तुकम्। उपमोत्प्रेक्षावर्णनाङ्किता कविता कवित्वं वर्णकम्' इति व्याख्याकृदपि विशदीकृतवान्[1]।

कविकर्णरसायनं वर्णककाव्यं अर्थात् वास्तविककथावस्तुघटनानां कल्पनाचातुर्येण वर्णनामयं पद्यकाव्यम्। अस्य वर्णकस्य वैशिष्ट्यं कल्पना-

---

[1] कन्नडदल्लि काव्यतत्व. पृ. ७९।

चातुर्यप्रदर्शनमेव । अतः समुचितोद्देशेन कविना कवीनां कर्णरसायनत्वेन अर्थात् श्रवणसङ्गतिद्वारा सहृदयहृदयाह्लादजनकत्वेन स्वप्रतिभा अस्मिन् महाकाव्ये प्रदर्शिता । अत एव 'चोळभूपालीयम्' इत्याख्यमिदं काव्यं 'कविकर्णरसायनम्[1]' इत्यन्वर्थनाम्ना प्रथितं वर्तते । एतदनुसारेणैवास्मिन् काव्ये विक्रमचोळ-सुन्दरचोळ-मानकञ्जाराणां शिवभक्तानां वास्तविककथावस्तु-घटनानि कल्पनाचातुर्येण प्राचुर्येण वर्णितानि । अत एवास्मिन् काव्ये कथांशः अल्पीयानेव । प्रतिभाप्रदर्शकवर्णनांश एव भूयान् इति काव्याव-लोकनेन विदुषां सुव्यक्तं भवति । "सुवर्णबद्धं स्फुरदर्थरत्नं सुवृत्तमौज्ज्वल्य-गुणप्रयुक्तम् । कृतं सुकाव्यं श्रवणोचितं तत् बुधेन्द्रकर्णाभरणं न किं स्यात् ॥ १-२१ ॥" इति बुधेन्द्रकर्णाभरणत्वेन तथा "स्वात्यम्बुदाम्भः पतितं पयोधेः शुक्तौ च मुक्ताफलतां प्रयाति । तथा सतः कर्णपुटं कवेर्वाक् प्रविश्य मुक्ताफलतां प्रयाति ॥ १-३५ ॥ कवित्वमपि सज्जनाकर्णितं सत् सफलं भवतीति च कव्युक्तरीत्यैव निबद्धं सत्, "परोदितार्थान् अपहृत्य चौर्यात् करोति काव्यं कुकविस्स निन्द्यः । भवेत्सभायां परिवर्जनीयः ततो महद्भिः कविभिः परार्थः ॥ १-३० ॥" इति च कवेरुक्तिवदिदं काव्यं विनानुकरणस्पर्शं परम्परागतामेव कथां स्वप्रतिभामूषायामावर्त्य, प्राक्तनमहा-कवीनां मार्गमनुसरन्नपि ईशप्रसादलब्धेन अनन्यलभ्येन नूत्नेन जगन्नुतेन कवित्वेन, स्वकीयविशिष्टप्रतिभानेन, सुगमश्लेषादिनिबन्धनचार्व्या प्रसन्नमधुर-गम्भीरवैदर्भशैल्या च कवीनां कर्णं काव्यामृतधारया सन्तर्पयन् श्रीचोळ-भूपालीयाख्यकाव्यस्यास्य 'कविकर्णरसायनाभिधानम'न्वर्थं चकार सत्कविता-प्रगल्भः कलावित् षडक्षरीशः । स्वस्य कर्णाटकृतिषु स्थितान्यनेकानि पद्यानि

---

[1] प्रतिसर्गान्तगद्ये तथैव व्याख्यातुः पीठिकायाः एकादशतमपद्ये च एतन्नाम वर्तते ।

क्वाचित्कतया यथावत् अस्यां संस्कृतकृतावप्यनूदितानि दृश्यन्ते। किन्तु सर्वमेतत् स्वोपज्ञं नत्वत्रान्यानुकरणपङ्कलेशशङ्कावकाशः ॥

सङ्ग्रहेण कथावस्तुकथनम् —

कविकर्णरसायनस्य कथानायकः श्रीसुन्दरचोळमहीशः[1]। सोऽयं चोळः त्रिषष्टिपुरातनानामन्यतमः। द्रविडदेशान्तर्गतकरिपुराधीश्वरस्य श्रीविक्रमचोळसार्वभौमस्य पुत्रः। सार्वभौमपदे अभिषिक्तश्च। जननी तु कलावती। सचिवो गाङ्गेयः। श्वशुरस्तु तद्देशीयकुसुमपुरवास्तव्यः 'स्वसुताविवाहसमये तत्केशार्थिने शिवाय स्वपुत्र्याः केशपाशं दत्वा शिवानुग्रह-पात्रतां गतः मानकञ्जाराख्यः पुरातनानामन्यतमः'। सुन्दरचोळमहाराजमहिषी तु मानकञ्जारसुता शिवानुग्रहपात्रभूता सोमप्रभाख्या। सार्वभौमस्यास्य सुन्दरचोळस्य करनिराकरणात् पाण्ड्यभूपश्शत्रुतामुपगतः। तेन साकं युद्धाय पितुः गुरोश्च अनुज्ञां आशिषं च प्राप्य प्रस्थितोऽभूदित्येतावत् द्वादशसर्गेषु स्थितं कथावस्तु ॥

पाण्ड्यराजेन साकं तुमुलं युद्धमभूत्। एकैकस्याप्यरिरुण्डस्यैकैकं सुवर्णं दास्यामीति सुन्दरचोळमहाराजेन घोषिते सति, स्वसैन्येनानीतानामरि-रुण्डानां मध्ये जटाभस्माद्यङ्कितमेकं शिवभक्तशिरो दृष्ट्वा, महान् प्रमादः कृतो मयेति शिवैकनिष्ठश्शिवभक्तैकपक्षस्सुन्दरचोळमहाराजस्तस्यापराधस्यात्मनः सार्वभौमचिह्नाङ्कितमकुटभूषितशिरस्समर्पणमेवोचितं प्रायश्चित्तं मन्यमानः तथैव कृतवान्। तदैव शिवः प्रसन्नो भूत्वा, शिवभक्तप्राणांश्च दत्वा अन्ते पुनर्गणपदवीं (रुद्रपदवीं) अनुगृहीतवानिति भाषाप्रबन्धेषु उपलभ्यमानं उपरितनकथावस्तु ॥

---

[1] अयमेव भाषाप्रबन्धेषु 'पुगल्चोळः' 'पगल्चोळः' इति प्रथितः ॥

शिवस्य शिवभक्तस्य शिवभक्तेश्च माहात्म्यचित्रणमस्य काव्यस्य वैशिष्ट्यम् ॥

काव्यविचारः —

विक्रमचोळ-सुन्दरचोळ-मानकञ्जार-पाण्ड्यराजानां संक्षिप्ता कथा अस्मिन् महाकाव्ये वर्तते। काव्याङ्गभूतवर्णनान्येव बहुधा वर्तन्ते वर्णनेष्वपि लोककल्याणकारिणी काचिन्नीतिरप्यस्ति। विक्रमचोळादयस्सर्वे शिवभक्ताः। सुन्दरचोळमानकञ्जारावुभावपि द्रविडदेशीयत्रिषष्टि-पुरातनान्तर्गतौ। काव्यनायकस्सुन्दरचोळः धीरोदात्तः पितृभक्तः गुरुभक्तश्च। नायिकानिरीक्षण-मधुमन्दर्शन-वीणानादश्रवण-अभ्रवीक्षणादिष्वपि शिवैकतान-हृदयः शिवचरणसमर्पितसर्वस्वः महान् शिवभक्तः। एतेषां समग्रजीवन-निरूपणोद्देशेन नात्र ग्रथितं काव्यम्। परन्तु तेषां जीवनस्थितशिवभक्ति-सदाचार-सुज्ञानादिनिरूपणमेव प्रमुखं ध्येयं कवेः ॥

विक्रमचोळ-सुन्दरचोळ-मानकञ्जाराः गुणनिधयः। तत्रापि कथा-नायकस्सुन्दरचोळः शौर्यौदार्यादिगुणसम्पन्नः महाशिवभक्तश्च। मानकञ्जार-महानुभावस्तु शिवस्य अनन्यभक्तः। पाण्ड्यराजस्त्वेकः मत्तः नयविवेकरहितः अत एव तस्य जीवनं प्रभ्रष्टं नान्ते सुखं वा शिवानुग्रहं वा प्राप। विना पाण्ड्यं शिष्टानां त्रयाणामपि जीवनं लोकादर्शप्रायम्। सचिवो गाङ्गेयः स्वामिभक्तः कार्यदक्षश्च। राजकुमार्याः सोमप्रभायाः आप्तसखी सुभाषिणी अन्वर्थनाम्नी इङ्गितज्ञा हितैषिणी च ॥

शैव-माहेश्वरविचारः—

काव्येऽस्मिन् 'शिवगणाङ्घ्रिसमर्चनलोलुपौ (४--२७)' 'तदनु निद्रितया सुखमागतस्तव भविष्यति सूनुरिति ब्रुवन्। चरवपुर्मृड एव विलोकितः स हि

तयाऽहितयागहृद्व्रतः ४--३४' 'शिवगणाङ्घ्रिसमर्चनसम्भ्रमः ४--५३' 'गुरुभिरेत्य शिवोक्तविधानतः ४--५६' इति कलावती-विक्रमचोळौ, 'शिव-मतोचितदेशिकदीक्षितः सकलवाङ्मयवारिधिपारगः। गुरुचरेशसमर्चनतत्परः हरमते रमते जनपात्मजः ॥ ४--६७ ॥' 'अथ हस्तपीठगतमिष्टमीश्वरं परभक्ति-युक्तमनसा महीपतिः। विविधोपचारततिभिस्समर्चयन् स्तुतिमाततान तत सात्त्विकोदयः ॥ १२--८ ॥' इति सुन्दरचोळं, 'स्थाणुस्तावत् धृतचरवपुः भस्मलिप्तो जटावान्। रुद्राक्षाङ्कः कनकरुचिमद्दूलकलस्सस्मितास्यः। बिभ्रत्पाणौ वृषभविलसत्केतनः प्रादुरासीत् भक्तेरस्य प्रकटनपरो मानकञ्जारनाम्नः ॥ ७--५२ ॥' इति च मानकञ्जारं च माहेश्वर(वीरशैव)धर्माश्रितान् गुरु-लिङ्ग-जङ्गमार्चनतत्परान् चित्रितवान्। 'हस्तपीठगतमिष्टमीश्वरं' इत्यत्र तु करपीठे गुरुदत्तेष्टलिङ्गयजनं प्रस्फुटं प्रदर्शितम् ॥

अस्यौचित्यप्रदर्शनाय शैव-माहेश्वरधर्मपरिज्ञानमावश्यकम्। अतः इदमत्रावधेयम् —

'शैवाः माहेश्वराः नात्यन्तं भिन्नाः[1]। 'लिङ्गधारणं द्विधा वर्तते बाह्यमाभ्यन्तरञ्चेति[2]'। तत्र अन्तर्यज्ञरताः शैवाः हृदि चिद्रूपलिङ्गध्यानादिकं कुर्वन्तः बहिः गृहे वा देवालये वा स्थावर(स्थिर)लिङ्गोपासकाश्च भवन्ति। बहिर्यज्ञरताः माहेश्वराः (वीरशैवाः) हृदि भावलिङ्ग-प्राणलिङ्गध्यानादिकं कुर्वन्तः गुरुणा दीक्षाकाले 'प्राणवद्धारणीयं तत्प्राणलिङ्गमिदं तव। कदाचित्कुत्र-चिद्वापि न वियोजय देहतः ॥[3]' इत्युपदिश्य प्रदत्तमिष्टलिङ्गं (चरलिङ्गं)

---

[1] सि. शि. लिङ्गधारणस्थलम् परि. ५ श्लो. १९, २०, २१। [1] सि. शि. परि. ६. श्लो. ९, १०, १८, २०, २७। [3] सि. शि. परि. ६. श्लो. ५।

देहोपर्यविनाभावेन धारयन्तः करपीठे तदुपासनां च कुर्वन्ति[1], दीक्षारहितः लिङ्गं नाप्नोति। दीक्षा नाम लिङ्गप्रदानसंस्कारः। उभावपि शैव-माहेश्वरौ[2] शिवार्चारूपकर्मानुष्ठानपरौ। क्रिया-ज्ञानसमसमुच्चयवादिनौ। शैवेषु पितृ-पुत्रभावेन, पुत्र-मातृभावेन, परस्परमित्रभावेन स्वामि-दासभावेन, पति-पत्नीभावेन च शिवोपासना तथैव शिवगणत्वप्राप्तिरूपमुक्तिरेव प्रायो दृश्यते। सालोक्यसामीप्यसारूप्यसायुज्यसार्ष्टचरूपाणि मुक्तिसोपानानि च वर्तन्ते। माहेश्वरेषु पुनः सती-पतिभावाश्रयेण साक्षात् लिङ्गाङ्गसामरस्य-रूपमुक्तिप्राप्तिर्दृश्यते। अविरळशिवैक्यप्राप्तिरूपपरमफलसाधनानि भक्ता-द्यैक्यस्थलान्तानि षट्स्थलसोपानानि एतन्मते वर्तन्ते॥

स्थिरलिङ्गार्चकाः शैवाः। देहो देवालय इति भावनया देहे इष्टादि-त्रिलिङ्गोपासकाः (चरलिङ्गोपासकाः) माहेश्वराः। माहेश्वराणामपि स्थावर-लिङ्गादीनां सत्यपाये प्राणान् विहायापि परिहारः कर्तव्य इति शिवधर्मनियमः अस्ति। शिवस्य-शिवभक्तस्य शिवचिह्नस्य अभिमानिनः सन्तः तदवने प्राणाः अपि प्रदेयाः इति उभयोस्समानरूपः शिवधर्मनियमोऽपि वर्तते। अतः शैवाः माहेश्वराः परस्परं नात्यन्तं भिन्नाः। परस्परमुभयोरपि समानगौरवं विद्यते। कर्णाटदेशीयाः बसवादिमाहेश्वराः द्रविडदेशीयत्रिषष्टिपुरातनशैवानां विषये परां भक्तिं प्रकटीचक्रुः। "आद्याः" इति शैवानां "आद्यानां वचनं स्पर्शमणिः[3]" इति तद्वचनानां गौरवमपि प्रदर्शितवन्तः।

शिवागमपूर्वभागोक्तः शैवधर्मः शिवागमोत्तरभागोक्तः माहेश्वर (वीरशैव) धर्मः। कर्णाटदेशीयाः माहेश्वराः (वीरशैवाः) द्रवीडदेशीयाः पुरातनशैवाश्च

---

[1] सि. शि. परि. ६, श्लो. ३२, ३३। [2] शैव-माहेश्वरविचारः सिद्धान्तशिखामणौ शिवागमेषु च द्रष्टव्यः। [3] बसवेश्वरन वचनगळु (१९३०) पृ. २६. सं ५८. तथैव पृ. ४७ सं. ६३।

शिवधर्मिण एव । कर्णाटदेशीयमाहेश्वरेषु अद्यापि स्थावरलिङ्गानां विषये अभिमानोऽप्यतीव वर्तते एव । शैव-माहेश्वरावुभावपि द्रविड-कर्णाट-देशयोः भक्तिप्रकर्षमुत्पादयामासतुः । 'उत्पन्ना द्राविडे भक्तिः कर्णाटे वर्धिता पुनः' इति एतयोः भक्तिप्रसारविषयः उद्घोषितः वर्तते । 'शिवो महेश्वरश्चेति नात्यन्तमिह भिद्यते । यथा तथा न भिद्यन्ते शैवा-माहेश्वरा अपि[1]' इत्युक्तेः कर्णाटदेशीयः तत्रापि शिवधर्मसिंहासनारूढः 'अश्रान्तश्रीशिवलिङ्ग-सङ्गतमहामाहेश्वरो[2]'ऽयं षडक्षरिदेशिकेन्द्रः स्वकाव्येऽस्मिन् कथानायकं तत्पितरौ तच्छ्वशुरं च गुरु-लिङ्ग-जङ्गमार्चनतत्परान् इष्टलिङ्गधरान् माहेश्वरधर्माश्रितान् चित्रितवान् । अत्यन्तभेदाभावात् एवं रीत्या चित्रणमपि नानौचित्यं भजतीत्यलमतिविस्तरेण । अस्य कृतिषु विद्यमानं शिवलिङ्गाङ्कितमस्मिन् महाकाव्येऽपि प्रतिसर्गान्तगद्यभागे विद्यते ॥

महाकविरयं एतेषां शिवभक्तानां जीवननिरूपणं काव्यात्मना सुन्दरं न्यरूपयत् । कविरयं शिवधर्मसिंहासनासीनसद्गुरुत्वात् लोकानुग्राहकपदवी-प्रतिष्ठितत्वात् लोककल्याणमनसा ऐहिकामुष्मिकाभिलाषिणां उचितानि लोकवर्तनानि शिवभक्त्यादीनि रमणीयतया चित्रितवान् । काव्यस्थानि सर्वाणि वर्णनान्यपि विशिष्टतया सहृदयहृदयान्यनुरञ्जयन्ति । कवेस्सामर्थ्यादिकं त्वमेयं वर्तते । तदपि 'ईशप्रसादात्[3]' इति कवेर्वचनं तस्य विनयाधिक्यं व्यनक्ति । तथैव जगतः काव्यमिदं शिवङ्करं शिवानुग्रहकरं च वर्तते । महाकविरयं महागुरुरप्यतोऽस्य विचारविमर्शनेऽपि महान्तः विबुधा एव समर्थाः ।

---

[1] सि. शि. परि. ५—१९, २०. । [2] रा. वि. आ. १४—१७२ । [3] क. क. र. १—५६ ।

राजशेखरविलासादिकर्णाटमहाप्रबन्धेष्विव संस्कृतमहाकाव्येऽस्मिन्नपि अप्रतिबद्धवाक्प्रवाहेणोभयभाषाकोविदस्सन् सव्यसाचीति प्रथामगात्। गीर्वाण-कर्णाटभाषयोः महाकाव्यकर्मणि समानप्रतिभाशक्तयः कवयः अत्यन्तं विरळाः। दार्शनिकः महाकविः धर्मोद्धारकः (सद्गुरुः) षडक्षरीशः निसर्गभिन्नास्पदमपि गुणचयं युगपद्वहन् आद्यशङ्करादीनां पङ्क्तौ गणनामर्हति ॥

कवेः प्रभावः —

अस्य कर्णाटमहाकृतीनां प्रभावः अनेकेषां समकालिकानां तदनन्तराणां च कृतिषु दृश्यते। क्रिस्तीय १९ तमशतकीयस्य अभिनवकालिदासबसवप्प-शास्त्रिणः "उभयकविताविशारदः अभवगणेन्द्रप्रबन्धकरः अमलयशोविभ-वैकनिधिष्षडक्षरविभुः कुर्याद्गभीरवाग्विभूतिमस्मासु[1]" ॥ इति स्वीयरेणुक-विजय [भाषारूप] स्थोक्तिरेवालमस्य प्रभावप्रदर्शने।

वर्णनाधिक्येन भक्तिरसप्रधानं प्रसादगुणभूयिष्ठमिदं काव्यं प्रायः उपमारूपकोत्प्रेक्षाऽर्थान्तरन्यासालङ्कारा एव नितान्तमलङ्कुर्वन्ति। काव्यार्थानु-गुणच्छन्दांस्येव उपयुक्तानि। महाकाव्यलक्षणमप्यत्र सर्वात्मना साधितम्। परन्तु काव्यमिदं समग्रमद्यापि नोपलब्धम्। युद्धे कृत्तस्य जटाभूषितशिवभक्त-रुण्डस्य साम्राज्याङ्कितमकुटविभूषितस्वशिरस्समर्पणरूपा उत्तरकथात्वत्र नोप लभ्यते। पाण्ड्यराजेन साकं योद्धुं प्रस्थितः इत्यन्तमेव काव्यमुपलब्धम् ॥

पुरतस्सर्गद्वयं सर्गचतुष्टयं सर्गषट्कं वा लुप्तमिति प्रतिभाति ॥

---

[1] रेणुकविजयं. पृ. ११, पद्यं १६।

प्रतिभाप्रदर्शनम्—

काव्येऽस्मिन् सर्वाणि वर्णनानि हृद्यानि कविप्रतिभाप्रमापकानि विराजन्ते। तेषु स्थालीपुलाकन्यायेन इमानि पुनः उदाहरणार्थं सन्दर्शयामः—

[१] काव्यादिमभागे वर्तमानसदसत्कविकाव्यादिमीमांसारूपः पीठिकाभागः कविकाव्यादिविमर्शनव्यापारस्य दर्पण इव संशोभते ॥

[२] चूतवर्णनमेव पश्यत —

पवनभूरिव [२-४६], गोवर्धनधारी अच्युत इव [२-४७], मन्थाचलेन्द्र इव [२-४८], कुजात इव [२-४९], मारप्रशस्ति, कृतिपुस्तकमिव [२-५०], गायन्निव [९-९], चैत्राब्धिनौरिव [९-५९], भैरव-पतिरिव [९-६०], मन्मथरथ इव [९-६६], काम इव [९-६७], किंशुक इव [९-७०], आत्तफलजम्बुरिव [९-७०], तमाल इव [९-७०] इत्यादिपद्येषु ; २-४३, ५३, ६०, ६१; ९-४, ५, ६, ७, ८, १०, ११, १२, २६, ३२, ३४, ५६, ५७, ६१, ६२, ६४, ६५, ६८ ६९ ; १०-१४ इत्यादिषु च असङ्ख्याभिर्विधाभिः एक एव चूतः वर्णितोऽत्र कविनेति प्रतिभावैशाल्यं न पृथगुक्तिमपेक्षते ॥

[३] सोमप्रभाऽऽप्तसख्याः सुभाषिण्याः [६-२०तमपद्यात् षट्त्रिंशत्तमपद्यपर्यन्तं] वचनानि सुभाषिणीनाम्नः अन्वर्थता-साधकानि वर्तन्ते ॥

[४] तथैव वनदर्शने कयाचित् विदग्धया कृतः वनपरिचयः [९-५८ तमपद्यात् षडशीतितमपद्यपर्यन्तं] नूनं वाग्वैदग्ध्यप्रकाशकस्सन् द्यो वर्तते ॥

[५] नायकेन नायिकाप्रथमदर्शने तथैव कविना च विवाहावसरवधू-वर्णने च नायिका सोमप्रभा, देवी पार्वती कालिदासेन इव पादमारभ्य शिरःपर्यन्तं वर्णिता । एतेन नायिकायाः पूज्यता व्यज्यते ॥

कथावस्तुवैलक्षण्यविचारः—

क्रिस्तीयचतुर्थशतकादूर्ध्वं द्रविडदेशेऽवतीर्णाः त्रिषष्टिपुरातनाः ऐतिहासिकमहापुरुषाः । एतेषां चरितानि द्रविडभाषायां तत्रापि 'पेरियपुराणे' वर्तन्ते ।

कर्णाटे हरिहर[हरीश्वरः]-तटाकपद्मरसादयः एतेषां केषांचित् चरितानि रघटादिकाव्यात्मना चित्रितवन्तोऽप्याकरादिकं नासूचयन् । कर्णाटकविस्सुरङ्गः स्वीयं 'त्रिषष्टिपुरातनविलासाख्यं' [भाषात्मकं] काव्यं लिङ्गपुराणाधारेण रचितमित्युक्तवान् । परन्तु अस्य कालादिकमद्यापि याथातथ्येन न निश्चितम् । तथैव मुद्रितेषु लिङ्गपुराणेषु एतेषां चरितानि नोपलभ्यन्ते ।

संस्कृते एतेषां सम्बन्धी उपमन्युप्रोक्तः 'शिवभक्तविलासाख्यः'[1] ग्रन्थः वर्तते । अस्य आकरादिकमस्मिन न सूचितम् । अपरः अगस्त्यमुनिप्रोक्तो 'भक्तविलासाख्यः'[2] ग्रन्थश्च विद्यते । अत्र वर्णितपुरातनानां कथाः स्कान्दपुराणान्तर्गता इत्यध्यायान्ते अवगम्यते ।

एते ऐतिहासिकपुरुषाः कथं-कदा-कैर्वा पुराणपुरुषाः कृताः इत्यादिकं न ज्ञायते । एतेषां द्रविडदेशीयानां त्रिषष्टिपुरातनानां चरितस्य द्रविडभाषैव

---

[1] S.B 1157/1 (O.R I. M.s.) [2] S.B. 1157/2 (O.R.I. M.S.)

मूलम्। तत्रापि पेरियपुराणम्। कर्णाट-संस्कृतभाषयोस्तु द्रविडभाषाधारेणैवै- तेषां चरितं समागतम्। भाषायाः भाषान्तरागमनकाले तत्तत्कवीनामुद्देशानु- रोधेन प्रकरणानुसारेण वा कानिचित्परिवर्तनान्यपि सम्भवन्तीति सहजमेव। अतः प्रकृते त्रिषष्टिपुरातनान्तर्गतयोरनयोस्सम्बन्धि कविकर्णरसायनकाव्यवस्तु- वैलक्षण्यप्रदर्शनं पुनः नात्रोपयुक्तमित्यस्माभिस्त्यक्तम्। द्रविड-कर्णाट-संस्कृत- षात्रयकोविदा एवास्मिन् विचारे समर्था इति संसूच्य विरमामः॥

व्याख्याकारयितुः मुदियमहीपालस्य परिचयः—

'धर्मसंस्थानमि[1]'ति प्रथितस्य 'हागलवाडिसंस्थानस्य राजसु नवमः चेन्नबसवप्पनायकपुत्रः द्वितीयमुदियप्पनायकः शकाब्दे १६४२ तमे कीलक- संवत्सरे निजवैशाखशुद्धदशम्यां [क्रिस्तीये १७२०] पट्टाभिषिक्तः। अस्य पुत्रौ मुद्दुवीरनायक-प्रसन्नरामप्पनायकौ। अयं विद्वद्भ्यः ग्रामान् वितीर्य धर्मरीत्या राज्यं शासत्काश्यां धर्मसत्रं कल्पयित्वा, सकलशास्त्रनैपुण्यं सम्पाद्य, वीरशैवधर्मनिष्ठस्सन् 'अशाश्वतोऽयमैहिकव्यापारः' इति निश्चित्य आमु- ष्मिकसिद्धये महाज्ञानिनं मुद्दुवीरस्वामिनामानं जङ्गमवरेण्यं काशीक्षेत्रादानीय, तस्मात् तत्त्वोपदेशं गृहीत्वा, कालज्ञानादिबोधकान् सप्तशततत्त्वग्रन्थान् अर्थात् [स्वरवचनानि] गेयपद्यानि स्वयमेव भाषायां विरच्य, सर्वा अपि प्रजाः स्वदेशस्थाः जीवन्मुक्ता भवन्त्वित्याशयेन देशाद्यन्तं ज्ञानिनः तत्त्वप्रचारार्थं नियोजितवान्। तथैव सङ्गीतज्ञानपि तत्र तत्र देशे नियम्य सङ्गीतमपि प्रोत्साह- यामास। एवं स्वस्य राज्यं सुस्थितिं नयमानः सर्वजीवदयापरः, निर्धनान् भाग्यशालिनः कुर्वन्, जङ्गमानां ब्राह्मणानामप्युदाराश्रयं दत्वा, धर्मतापाप-

---

[1] हागलवाडि, पाळयगाररु अ. ९. पृ. २६। [2] हा. पा. पृ. १८, १९, २०।

नोदनाय आरामादीन् तटाकादींश्च निर्मितवान् । राज्ये कारागारे बद्धानां अपराधिनां च माहिषं दधि, गजेन्द्रभोगान्नं च प्रदातुं व्यवस्थाप्य, तथैव कारागृहशिक्षावध्यनन्तरं मन्त्रिभिः तान् समक्षं आनाय्य, तेषां विवेकमुपदिश्य, ततो विमोचनं कर्तव्यमिति चाज्ञाप्य, जनानां सर्वेषामपि ईतिबाधारहितं राज्यं शास्तिस्म ।

वितरणशाली महानुभावोऽयं मुदियमहीपालः राज्यं परिपालयन्नपि सिद्धपुरुषाणां सहवासे वर्तमानः, तपसि सिद्धे सति पुत्रे राज्यं निधाय, सर्वमपि साम्राज्यं सकलैश्वर्ययुक्तं सन्त्यज्य विरतस्सन् वल्कलं धृत्वा, नीतिं धर्मं च बोधयन् देशयात्रामकरोत् ।[1] अस्य विषये अयमंशस्त्वविस्मरणीयो वर्तते । असौ उत्तमरीत्या प्रशासत्परलोकसिद्धिं सम्पादितवान् । नळ-मान्धातृ-श्रीराम-युधिष्ठिरादीनां धर्मयोगिनां पङ्क्तौ गणनार्होऽयं महान् राजर्षि-र्मुदियमहीपालः । धर्मात्मा कृपालुर्विबुधपक्षपाती राजयोगी चायं महानुभावः । ईदृशानां महानुभावानां नामोच्चारणमप्यस्माकं पापनाशकं भवति[2] ॥

हागलवाडीमहीशाः इति एतद्वंशीयाः प्रथिताः । एषां हागलवाडी प्रधानराजधानी । चिक्कनायकपूः (भाषायां चिक्कनायकनहल्ली) यरघट्टः (भाषायां एरेकट्टे) इत्याख्ये उपराजधान्यौ । हागलवाडिसंस्थानमिति प्रसिद्धेऽस्मिन् आहत्य त्रयोदश राजानः क्रिस्तीय (१४७८-१७७६) काले ३०० वर्षाणि राज्यभारमकुर्वन् । तेषु चतुर्थः ज्येष्ठमुदियप्पनायकः (क्रि. श. १५७८-१६४८); नवमः द्वितीयमुदियप्पनायकः (क्रि. श. १७२०–१७४०);

---

[1] हा.पा.पृ. १८, १९, २० । [2] हा.पा.पृ. २१, २२ ।

त्रयोदशः तृतीयमुदियप्पनायकः (क्रि. श. १७७५-१७७६) वत्सरेषु शासनं चक्रुः। एतस्मिन् मुदियप्पनायकत्रये प्रथम-तृतीयौ केवलमुत्तमभूपालौ न तु साहित्यकारौ। तयोस्साहित्याभिरुचिरासीद्वा नवेति न ज्ञायते। द्वितीयस्तु स्वयं साहितीकारः। कालज्ञानादिबोधकं सप्तशतभाषापद्यात्मकमेकं गेयप्रबन्धं (तत्त्वपदात्मकं) स्वयमेव रचितवानिति ज्ञायते। 'महानुभावप्रकाशिके' इति नामकदशविधचक्रविवरणात्मकमेकं ग्रन्थमप्ययं चकार इति अस्य सिद्धरामप्प-नायक इत्यपरनामासीदिति च श्री H. R. महान्तय्य इत्येते सम्पादकाः अभिप्रयन्ति। अयमभिप्रायः विमर्शनीयो वर्तते। अयं मुदियमहीपालः विबुधः इति व्याख्याकृत् स्पष्टं उल्लिलेख कविकर्णरसायनस्य पीठिकावसरे। सोसले रेवणाराध्येनायं शिवमहिम्नस्स्तोत्रस्य महिम्नःप्रदीपिकाख्यां भाषाव्याख्यामकार-यदिति महिम्नस्स्तवटीकान्ते विद्यमानेन 'चिक्कनायकपूष्कर्तुर्मुदिनायकभूभुजः। मुदे टीका कारितेयं सोमशेखरयोगिना॥' इत्यनेन श्लोकेन विज्ञायते। कविकर्णरसायनस्य तथैव सौन्दर्यलहर्याश्च वेङ्कनसुधिया संस्कृतव्याख्यानम-कारयदिति तत्तद्ग्रन्थतोऽवगम्यते॥

व्याख्याकृत् वेङ्कनसुधीः कविकर्णरसायनव्याख्यानारम्भे अस्य शौर्यादि-गुणसम्पत्तिं विद्याविश्रुतत्वं योगकलाविशारदत्वं विद्वज्जनाभिमानित्वं साहित्या-सक्तिं च प्रकटीचकार। यथा "श्रीसालिराजकुलवारिधिपूर्णचन्द्रस्य चेन्नबसव-क्षितिपालमौलेस्तनयोऽयं मुदियक्ष्मामण्डलाखण्डलः योगकलाविशारदः शिवानु-भूतिमहितः सद्विद्यया विश्रुतः मुद्वीरगुरुप्रसादपात्रीभूतो महाज्ञानी योगी उत्तम-महीशश्च इति; सोऽयं षडक्षरीश्वरकवेश्चारु काव्यं विद्वज्जनैर्लालितस्सन् मां बहुधा सम्भाव्य, कविकर्णरसायनस्यास्य महाकाव्यस्य 'सुधोदयाभिख्यां' व्याख्यां मया कारितवान्" इति; "लोके न सन्ति कति वा प्रभुनामभाजः। किं ते भवन्ति मुदियक्षितिपालतुल्याः?" इति चास्य महीशस्य महिमानमपि

प्रदर्शितवान्। अस्य द्वितीयमुद्दियमहीपालस्य शासनकालस्तु क्रिस्तीयः १७२०-१७४०।[1]

व्याख्यातृपरिचयः —

व्याख्याता वेङ्कनसुधीः स्वपरिचयं कापि न प्रदर्शितवान्। बहुश्रुतः वावदूकः कवितामर्मज्ञः। अस्य काव्यस्य प्रथमसर्गीय १, २, ४, ६, ७, ८, १३ पद्यस्थानां, चतुर्थसर्गीय २७, ३४, ५३, ५६, ६७ पद्यस्थानां च पारिभाषिकपदानां तत्रापि 'षडङ्गकल्याणगुणाभियुक्तम् (१-२)' 'चिदङ्गलिङ्गान् (१-८)' इत्युभयपदार्थविवरणेन ; 'अध्वान्तवर्ती (१-१)' 'सोमेशलिङ्गप्रभवः (१-६)' इत्यादिष्वपि प्रदर्शितविवरणेन च अयं वीरशैवः इति व्यज्यते। कविकर्णरसायनव्याख्याप्रवृत्तिरपि महितमुद्दियमहीपालप्रोत्साहेनैवेति व्याख्यानारम्भस्थपीठिकाभागतः स्पष्टीकृतवान्। तथैव सौन्दर्यलहर्याः अप्येकं संस्कृतव्याख्यानमनेन भूपालेनैव प्रोत्साहितस्सन् विरचितवानिति तव्द्याख्यानान्तगद्यभागेन विशदीकृतवान्। व्याख्यासरणिस्सरळा सारभूता सुभगा सुस्फुटा सूक्ष्मा व्युत्पादिका च वर्तते। अस्माभिरुपलब्धमात्रं व्याख्यानमत्र प्रकाशितम्। व्याख्या सुधोदयाभिख्या।

M. कृष्णमाचार्येण विमर्शकेन स्वकीय (History of Classical Sanskrit Literature) हिस्टरि आफ क्लासिकल् स्यान्स्क्रित् लिटरेचर् नामकग्रन्थे १९४ तम पृष्ठे टिप्पण्यां तावत् 'कविकर्णरसायनस्य मधुरा-

---

[1] अस्य चरितं M.S. पुट्टण्णाख्येन रचिते 'हागलवाडि पाळयगाररु' इत्याख्यग्रन्थे तथैव रा.ब.फ.गु. हल्कट्टि इत्येतैः स्वीयशिवानुभवनामकभाषामासपत्रिकायां (संपुट ७ सञ्चिका ४ पृष्ठानि २५०--२६२) प्रकटीकृत 'हागल्वाडि अरसुगळ वृत्तान्त' इत्यनेन लेखनेन च विज्ञायते॥

नगरस्थेनान्ध्रपण्डितेन वेङ्कनाख्येन रचितं व्याख्यानमेकं वर्तते' इति लिखितमस्ति। अयमभिप्रायः नाङ्गीकारार्हः। कविकर्णरसायनद्वितीयसर्गस्थ 'पुन्नागपूगक्रतमालतमालताळ (२-४४)' इति पद्यस्थानां पुन्नागादिपदानां व्याख्यानावसरे संस्कृतपर्यायपदैस्साकं कर्णाटभाषारूपपदान्यपि उल्लिखितवानयं व्याख्याकारः। सर्वासु मातृकास्वपि एकयैव रीत्या भाषापदान्यपि वर्तन्ते। 'तुमकूरु'मण्डलस्य(District)' चिक्कनायकनहळ्ळि 'विभागस्थ(Taluk) 'यरघट्टा'ख्य(एरेकट्टे)राजधान्यां तच्छासकस्य मुदियमहीपतेर्निर्देशेन व्याख्यातमिदं काव्यमिति पीठिकायां व्याख्याकृता स्फुटतया निर्दिष्टत्वात् 'धनुःपुरम् (१-५४)' इति पदस्य 'धनुगूरु'नामकग्रामविशेषः इति कर्णाटभाषया अनूदितत्वात् तथैव पुन्नागादिपदानां भाषापदैस्साकं व्याख्यातत्वाच्च अयं न मधुरानगरस्थः आन्ध्रपण्डितः अपि तु कर्णाटदेशीयः कर्णाटभाषाविदिति सुस्पष्टं भवति।

कुत्रचिदपि आन्ध्रभाषाप्रयोगः कस्यामपि मातृकायां नैवोपलभ्यते। 'वेङ्कनसुधीः' इति विद्यमाननाम्नैवायमान्ध्रः इति वक्तुं न शक्यते। अस्य पूर्वजानां वेङ्गिमण्डलादत्र कर्णाटे आगत्य स्थितत्वात् तस्य वंशस्य वेङ्गीत्युपपदेन प्रसिद्धिरिति ज्ञायते। तेनोपपदेनैवायं व्याख्याकृदत्र विराजते। अस्य नामदेशादिकं नास्माभिरुपलब्धम्। परन्तु कर्णाटभाषावित् कर्णाटदेशीयः विचक्षणः वीरशैवः इति ज्ञायते॥

अत्रैको विचारः —

"स्खलन्ति गच्छन्तो नोपविशन्तः। आलस्यविस्मारणरसावेशादिभिः कविर्व्याख्याता वा कदाचित् द्वित्रेषु स्थलेषु स्खलेत् नान्यथा" इत्याह कर्णाटकमहाकविराघवाङ्कपण्डितः स्वीयहरिश्चन्द्रकाव्याख्यभाषाप्रबन्धे। एवमत्रायं

व्याख्याता वेङ्कनसुधीर्विश्रुतोऽपि प्रथमसर्गीयचतुर्थश्लोकस्य 'पादाङ्गदप्रध्व-निरादिशास्त्रम्' इत्यत्र—" खण्डपरशुताण्डवोत्सवसमये तस्य क्वणन्मञ्जीर-शिञ्जितरूपेण चतुर्दशसङ्ख्याकानि वैयाकरणसूत्राण्याविर्बभूवुरितीतिहासपुराणा-गमेषु बहु प्रसिद्धम् " इति कथञ्चित् स्खलितवानिति ज्ञायते ।

चतुर्दशसूत्राणि माहेश्वराणीति ढक्काध्वनेः समुदभूवन्निति नन्दिकेश्वरः स्वकृतकारिकारम्भे " नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् । उद्धर्तुकामस्सनकादिसिद्धान् एतद्विमर्शे शिवसूत्रजालम् " इति सुस्पष्टं ब्रवीति । एतदेव सर्वेऽपि विबुधाः अभ्युपगच्छन्ति । तस्मात् पादाङ्गदप्रध्वनेः चतुर्दश-सूत्रत्वं न प्रामाणिकमाभाति । अपि तु आदिशेषः भगवतो महेश्वरस्य पादाङ्ग-दत्वं प्राप इति प्रसिद्धम् । तस्य महेश्वरस्य सर्पभूषणत्वात् । स च फणिपतिः तत्र सर्वासां वैदिकलौकिकवाचां भगवच्चरणपूजार्थमागतानां याथात्म्यं प्रत्यक्षीकृत्य, पतञ्जलीत्वेनाविर्भूय महाभाष्यं रचयित्वा तासां व्याकरणमकरोत् । तदेव महाभाष्यम् । तस्यैव आदिशास्त्रत्वेन प्रसिद्धिः । अस्मिन् विषये नीलकण्ठदीक्षितः प्रस्पष्टं प्रब्रूते शिवोत्कर्षमञ्जर्याम् —

प्राचीनेत्यधुनातनीति भुवने वाङ्नाम या यावती
ताः सर्वाः परितः परीत्य चरणे यस्यायतीर्विश्रमम् ॥
'श्रृण्वन्नङ्गदतां गतः फणिपतिः शब्दागमं व्याकरोत्'
स स्वामी मम दैवतं तदितरो नाम्नाऽपि नाम्नायते ॥१८॥ इति

पुनश्च—

गन्धर्वागमदेशिकौ तनुभृतां यत्कर्णयोः कुण्डले
'यत्पादाङ्गदनिर्मितं भुवि महाभाष्यं' किल स्त्यायति ॥
पुण्यं पापमिति व्यवस्थितिरियं यद्वाहहेषास्वनः
स स्वामी मम दैवतं तदितरे नाम्नाऽपि नाम्नायते ॥१९॥ इति च॥

अथवा व्याख्यातुरेवंविधाभिप्रायसमर्थकं प्रमाणं इतिहासपुराणागमेषु वर्तेत ॥

ग्रन्थसम्पादने उपयुक्तानां मातृकाणां परिचयः —

प्राच्यविद्यासंशोधनालय(O.R.I)मातृके द्वे । तिपट्टूरुमातृके द्वे । भद्रावतीमातृका एका । आहत्य पञ्चमातृकाः सम्पादनकार्ये उपयुक्ताः । एतासु पञ्चमातृकासु—

१. (क)संज्ञिका प्राच्यविद्यासंशोधनालयस्य (O.R.I.) S A. ४१४ अङ्काङ्किता मातृका, आदितः पञ्चमसर्गपर्यन्तं व्याख्यायुता, परन्तु पञ्चमसर्गे ६०-९९ (आहत्य ४० पद्यानि) लुप्तानि, पञ्चमसर्गात् दशमसर्गपर्यन्तं मूलमात्रवती कर्गजात्मिका । अन्यमातृकातः रक्ताक्षरैस्तुलिता च ॥

२. (ख)संज्ञिका तिपट्टूरुमातृकयोरेका आदितः द्वादशसर्गसमाप्त्यन्ता मूलमात्रवती कर्गजात्मिका ॥

३. (ग)संज्ञिका तिपट्टूरुमातृकयोरपरा आदिमचतुस्सर्गात्मिका सव्याख्या कर्गजात्मिका ॥

४. (घ)संज्ञिका प्रा.वि. संशोधनालयस्य (O R I.) S.A. ६१ अङ्काङ्किता मातृका अशुद्धियुता, केवलं आदितः तृतीयसर्गपञ्चमश्लोकपर्यन्तं व्याख्यायुता कर्गजात्मिका ॥

५. (च)संज्ञिका भद्रावत्याः आदिमसर्गद्वयात्मिका सव्याख्या कर्गजात्मिका मातृका ॥

सर्वा अपि मातृकाः कर्णाटलिपिबद्धाः नातीवशुद्धाः । तत्र 'क.ग. घ.च.'मातृकास्समानाः । एतासु चतसृष्वपि मातृकासु द्वितीयसर्गस्य 'पुन्नागपूगक्रमुकतमालतमालताळ (२-४४)" इत्यादिपद्यस्य पुन्नागादिपदानां व्याख्यानावसरे संस्कृतपदैस्साकं 'सुरहोन्नेमर - अडकेमर - कक्केमर - कद्वाळ (कत्थाळ)मर, पादरिमर' इत्यादिकर्णाटभाषापदान्यपि वर्तन्ते ॥

ख-मातृकैका भिन्ना । द्वितीयसर्गस्य त्रयोदशीय "पङ्कजरेणुरजनी-रचनाङ्गयष्टिः" इति श्लोकव्याख्यानावसरे 'क्वचित्पुस्तकेषु एकोनविंश-श्लोकानन्तरमयं श्लोको लिखितो दृश्यते । सरोवर्णनप्रस्तावे नदीवर्णनस्या-सङ्गतेरत्रैव योजनीयः' इत्याह किल व्याख्याता । (ख) संज्ञिकायामस्यां मातृकायां केवलं अयं श्लोकः व्याख्यातृसूचितवदसङ्गतत्वेन 'कासारसार' इति पद्यानन्तरं संयोजितो वर्तते । अतः इयमेका भिन्नमातृका ॥ किंच (क) मातृकायां (O.R.I.S.A.४१४) पञ्चमसर्गस्य ५९ तम पद्यसमाप्त्यन्तं व्याख्यानं विद्यते । ततो ६० तम श्लोकादारभ्य ९९ तमश्लोकपूर्त्यन्तं आहत्य ४० श्लोकाः लुप्ताः । उत्तरत्र १०० तमश्लोकादारभ्य दशमसर्गान्तं मूलमात्रं वर्तते । परन्त्वस्यां (ख) मातृकायां आदितः द्वादशसर्गान्तं मूलमात्रं वर्तते । (क)पुस्तके पञ्चमसर्गे लुप्ताः ४०. श्लोकाश्चात्र लभ्यन्ते । अतः इयं ख-मातृका सर्वमातृकातः भिन्ना विशिष्टा च । सर्वा अप्यसमग्रा एव । सर्वा अपि मातृकाः उपकारिण्य एवाभूवन् पाठपरिशीलनादिषु । 'ख' मातृकातः अधिकोपयोगसञ्जातः ॥

एतासां पञ्चमातृकाणां पाठभेदानालोच्य औचित्यतः मूलपाठं स्वीकृत्य शिष्टपाठभेदान् तत्र तत्रैवाधोभागे वयं उद्धृतवन्तः । नास्माभिः कुत्रापि समग्रा-सव्याख्या मातृका लब्धा । द्वितीयसर्गसमाप्त्यन्तं पञ्चमातृकाः (क. ख. ग. घ. च) उपयुक्ताः । चतुर्थसर्गसमाप्त्यन्तं तिस्र एव (क. ख. ग.)

मातृका उपयुक्ताः। पञ्चमसर्गाद्दशमसर्गसमाप्त्यन्तं द्वे एव (क. ख) मातृके उपयुक्ते। एकादशद्वादशसर्गयोः केवलं एकैव(ख)मातृका उपयुक्ता। ग्रन्थसम्पादनप्रक्रियायां च प्रायः बहुविद्वत्सम्प्रतिपन्ना रीतिरत्रास्माभिरनुसृता ॥

एतद्ग्रन्थसम्पादने उपयुक्तचिह्नानां स्वरूपमित्थमवधेयम्—[ ] सम्पदकस्य। * अस्फुटाशयस्य। ( ) 'क' मातृकालुप्तभागस्य। अङ्कद्वयं अन्तरालवर्तिपाठभेदसूचकम् ॥

पाठभेदपरिशीलनादयः औचित्येन यथाशक्ति यथामति कृताः। तथापि अनेकेषां पद्यानां पाठान्तराण्यपि अत्यस्फुटतया संशोधयितुमसाध्यान्येव बभूवुः। पाठान्तरेण तानि यथावत्प्रकटितानि। एतासु मातृकासु तिपट्टूरु श्रीवीरशैव गुरुकुलानन्दाश्रमाध्यक्षैः श्रीशिड्लहळ्ळिश्रीसंस्थानाधीश्वरैः हागलवाडिसंस्थानराजगुरुपरम्परागतैः जगद्गुरुपट्टाध्यक्षश्रीकरिबसवदेशिकेन्द्रमहास्वामिभिः कृपया प्रदत्ते द्वे मातृके अप्यतीवोपयोगिन्यौ बभूवतुः। तत्रापि द्वादशसर्गपरिपूर्णा मूलपाठमात्रयुता (ख) मातृका यदि न लभ्येत कृतिरपूर्णा अशुद्धिभूयिष्ठा संशोधयितुमसाध्या जायेत। कविकर्णरसायनसम्पादनविचारं श्रुत्वा, मातृके उपयुज्य (ख. ग) पुनः प्रदातव्ये इत्यादिश्य स्वसंस्थानशारदाभण्डारतः अनुगृहीतवन्तः। अतः महद्भ्यः गुरुभ्यः भक्तिपूर्वकं कार्तज्ञ्यं प्रदर्शयामः। तथैव गोडेकेरेस्थलीयैः भद्रावतीवासिभिः श्री. P. जयदेवमूर्तिभिश्च आदिमसर्गद्वयात्मिका सव्याख्या मातृका प्रदात्ता। अतः तेभ्यश्च कृतज्ञतां सूचयामः ॥

येषु केषुचित् अस्य काव्यस्य मूलमातृकाः यदि वर्तेरन् ते, ताश्च कृपया प्राच्यविद्यासंशोधनालयाय संसूच्य सम्प्रेष्य पुनर्मुद्रणावसरे एतत्काव्यपरिशोधने सहकारिणो भूयासुरित्याशास्महे ॥

कविकर्णरसायनस्य प्रकटनविचारः —

१. क्रिस्तीय १९२५ तमे वर्षे मागडि. S. वीरप्पशास्त्रिभिः सम्पादितायां 'वीरशैवधर्मसङ्ग्रह'नामधेयमासपत्रिकायां भाषारूपायां कविकर्णरसायनं कर्णाटटीकोपेतं मुद्रयितुं प्रथमे प्रयत्ने कृतेऽपि तत्र प्रथमसर्गे ७८ पद्यपर्यन्तमात्रं मुद्रितम् ।

२. द्वितीयतः क्रिस्तीय १९३० तमे वत्सरे वार्सि प्रौढशालामुख्योपाध्यायैः श्री S G. काडदेवरमठ B.A., B.T. इत्येतैः आदिमसर्गद्वयमात्रं सटिप्पणमाङ्गलभूमिकायुतं सम्पादितं मुद्रितं च ।

३. बागलुकोटे बसवेश्वरमहाविद्यालयाध्यक्षाः श्रीयुताः S. C. नन्दीमठ M.A., P.HD. इत्येते आदिमचतुस्सर्गमात्रं मुद्रयितुं प्रयतमानाः सन्तीति शृण्मः ।

४. अधुना मैसूरुविश्वविद्यानिलयाङ्गभूतः प्राच्यविद्यासंशोधनालयः (Oriental Research Institute, University Of Mysore) उभयकविताविशारदस्यास्य षडक्षरीशस्य कविकर्णरसायनमहाकाव्यस्य समग्रतया प्रकटनोद्देशेन प्रवृत्तोऽपि समग्रतया कुत्रापि मातृकाऽलाभात् यावन्मातृका उपलब्धाः तावत्सपरिष्कारं प्रकटीकृत्य विदुषां पुरतः समर्पयति । सम्पादनकर्मणि सूक्तमार्गदर्शनेन सहकृतवतां अस्मदध्यक्षवर्याणां श्री. डा. G. मरुळसिद्धय्य M.A., P.HD. महोदयानां प्रोत्साहनादिकं एतत्काव्यप्रकाशने मूलकारणमिति नातिशयोक्तिः ।

परिशोधनादिषु सहकृतवतां बुधानां सहृदयानां विदुषां श्री. H.V. नागराजराव् इत्येतेषां सहोद्योगिनामुपकारस्त्वविस्मरणीय एव। 'आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्' इत्युक्तरीत्या ग्रन्थस्यास्य सम्पादनं लोकस्य प्रीतिजनकं भवेदित्याशास्महे ॥

षडक्षरीशकृते भाषात्मकबसवेशविजये—

'भुव्येवं चरतां छलेन च बलेनातीव सन्निष्ठया
भक्त्या चैव मनोज्ञया तनुमनःपत्नीतनूजादिकं
मुख्यं वस्तुचयं समर्प्य सुमनोभावेन शम्भौ ह्यहं
भक्तः सौख्यभुजां समस्तशिवभक्तानामुपानद्वहः ॥

(आश्वासः ४२, पद्यं ७७.)

इति विबुधजनविधेयः

विद्वान् M.S. बसवराजय्यः

कविकर्णरसायनस्य कथासारः

(१, २)

मेरोर्दक्षिणदिग्भागे भूवधूटीसुकरमुकुरकल्पः श्रीकलाकेलिवासः सुकृतनिचयकोशः सकलविषयरम्यः सर्वकाम्यवस्तुभिश्चान्वितः विश्रुतस्सन् विराजते चोलदेशः। कनकनगेन्द्रादप्यतिप्रेमसारे सर्वजनपदोत्कृष्टे रमणीयेऽस्मिन् देशे इन्द्रादिनिर्जरैस्स्वतनुजनिजभार्यासङ्गतस्सन् चन्द्रमौलिर्विहरति। एतद्देशीयप्रभवश्च विद्वद्वरानन्ददायिनः साधुसज्जनप्रियाः कामितफलप्रदातारः। जनाश्च सद्वृत्तिनिरताः। नास्मिन् देशे सरोगता अधीरत्वं परस्परवैमनस्यं मन्दत्वं वा जाड्यवृत्तिः मधुपसङ्गतिः विरोधगुणवृत्तिः सुमनःक्षोभवृत्तिः अज्ञानं विमानचरितं वा वर्तते। गोसमृद्धिसार्वर्तुकफलयुतसस्यजलप्रपूर्णतटाकादियुतः। तद्देशीययौवतं च सौन्दर्यविभवयुतम्। नन्दनविहृति-निर्जरवधूक्रीडाऽश्रान्तवर्तनादिभिर्नाकवासिन इव दिव्यभोगास्तद्देशीया जनाः। सर्वत्र तस्मिन् जनपदे शिवयजनं शिवध्यानं शिवकथाश्रवणं विश्वाधिकशिवमहिमप्रशंसा शिवसाक्षात्कारश्च विभाति। पुरुषार्थप्रदात्री पूतजलयुता सकलभुवनविख्याता च कावेरी तस्मिन् देशे प्रवहति। तद्देशीयवनमपि सूर्यस्यावरोधवसतिः मलयानिलधनगृहं कुसुमायुधशरसङ्ग्रहगेहं भृङ्गप्रपा मन्मथविहारस्थानं हंससभानिवासः चक्रवाकविनोदविहरणशाला। कमलकुमुदविराजिताः पद्माकराः। कलमेक्ष्वाम्रनारिकेलादिफलपरिपूर्णक्षेत्रसमृद्धोऽयं चोलदेशः। कलमगोपवधूजनाः प्रपानियुक्तस्त्रियश्चातीव सुन्दर्यः किमुतान्याः। रम्भारसालपूगपुन्नागतमालकृतमालतालहिन्तालपलाशपाटलचन्दनचाम्पेयकपित्थकदम्बबिल्वजम्बुजम्बीरधात्रीकेसर-नारङ्गनारिकेलादिपादपैर्वनमल्लिकादिलताभिश्च युतान्युद्यानानि मयूर-

शुकपिकालिभिश्च परिशोभितानि। एतादृशोद्यानेषु पुरकन्यका विहरन्ति स्म।

इत्थं रुचिरवनौघैस्सिन्धुभिस्तटाकैरारामैर्बहुफलवहसस्यक्षेत्रबृन्दैः मणिगणाञ्चितवप्रैरगेन्द्रैः श्रीसमृद्धैः पुरौघैश्च सर्वदेशातिरम्यस्सन् द्रविडजनपदः (चोलदेशः) चकास्ते।

एतादृशदेशश्रीमुखतिलकवत् करिपुरीति राजधानी शिवभक्तैः कलाविद्भिः आम्नायविद्भिः सरसकविभिः सत्सम्पद्भिः श्रेष्ठसज्जनैश्च युता क्ष्मातले ख्यातियुक्ता विभ्राजते।

(३)

सा तु राजधानी करिपुरी परिघावृता प्राकारावृता उत्तुङ्गहर्म्ययुता बहुलशैवलसद्विजैश्च विराजिता आसीत्। पुरलसद्वणिगापणस्थितकनकराशिः इळास्तनवदराजत। तस्यां राजगृहन्तु चन्द्रकान्तमणिसालदलावृतं कनकहर्म्यकनद्रुचिकर्णिकं सत् पुरसरोवरमध्यस्थितनलिनोपमां वहति स्म। मङ्गलध्वनिपूर्णं मणिमयहर्म्यधराधरपूर्णं शशिशिलानिर्मितं राजगृहं शिखरे कनककलशभूषितमराजत। राजगृहनन्दनन्तु कल्पवृक्षसदृशैस्सार्वर्तुकफलदैर्वनस्पतिभिः अमृतजलपूर्णसरोवरैस्सरोजयुतैः शुकपिकालिरवैश्च व्यराजत।

तस्यां राजधान्यां पुरन्दरविभ्रमः शिवपदाब्जलसन्मदषट्पद, रिपुनृपालमदाभ्रमहानिलः सुजनसम्मदसिन्धुसुधाकरः विशदकीर्तिविराजितदिक्तटः सुकविसूक्तिमणिश्रुतिभूषणः प्रबलपार्थिवसेव्यपदाम्बुजः प्रथितः सूर्यवंश्यः विक्रमचोलाख्यो महीपतिरासीत्। सः निरहङ्कारः दानशौण्डः कुलीनः उत्तमगुणयुतः जडौघविवर्जितः कल्याणसम्पन्नः शिवयुतोऽपि संसारी। तस्य

वचः अमृतवर्षि। करपङ्कजं मनीषिणां सदा कनकवर्षि। द्विषतां विशिखवर्षि च धनुः। यथा वसन्तोदये पुष्पफलादिभिस्सम्पूर्णास्सर्वे महीरुहाः तथा अस्मिन् राज्ञि सितैकच्छत्राधिपत्यं राज्यं शासति मनीषिताशेषविशेषितार्थसम्पन्नाः प्रजा आसन्। सः युद्धवीरः, निरतिशयैश्वर्यसम्पन्नोऽपि सुविवेकशाली। तस्य श्रोत्रं शिवकथाश्रुतिष्वासक्तं नेत्रं शिवदर्शने तत्परं करश्च हरसमर्चनकर्मण्यासक्तः। महेश्वरासक्तचित्तवृत्तिस्सन् एव बाह्यवनितादिविषयोपभोगमनुभवति स्म। प्राकृतजन इव बहिर्विषयभोगलालसोऽप्यन्तश्शिवयोगानन्दसन्धानितान्तरङ्गः सः जनकवत् सुमनुरिव विजय इव राजर्षिरभूत्।

राजर्षेर्विक्रमचोळमहीपस्यास्य महिषी मनोहरा युवतिः शुभगुणा अभिनवरूपविभ्रमा शिवपादकमलार्चनोत्सवा अनुरूपा **कलावत्याख्या** बभूव।

गुणनिधिः विस्तृतकीर्तिः नयवित् शत्रुनृपैरपि प्रणुत्यः स्वामिहितचरितः शिवैकभक्तः शास्त्रवेत्ता शुचिः शत्रुनिग्रहसमर्थः चोळराजप्रभाविस्तारकः धनकोशविस्तारकः सच्चक्रप्रमोदकारी **गाङ्गेयाख्यस्सचिवः** सूर्यस्यारुण इव अस्याभूत्।

एवं सकलधरित्रीनाथकोटीरकोटिप्रकटितमणितेजोनीराजिताङ्घ्रिः गुणसिन्धुः शम्भुपादाब्जभृङ्गस्सन् क्षितिपतिस्तस्थौ।

(४)

सति चैवं मार्कण्डेयकथाश्रवणेन अपुत्रताशोकभरा तनयाभिलाषिण्यभूत् कलावती। प्रियसख्यां स्वस्यानपत्यताशोकं प्रकटयन्ती सुतरहितं सदनं न सदनमिति विललाप। अमितसम्पत्समृद्धाऽपि तल्पे दूयमानाऽभूत्। एकदा अन्तःपुरमागतो राजा दूयमानां तां मनोगदकारणं प्रपच्छ किमर्थमाभरणशून्या

दूयसे इति । तदानीं सखीमुखेन 'मुनिमृकण्डुचरित्रश्रवणात्प्रभृत्यसुतताचिन्तया केतकीवत् पुत्रहीना निष्फला इति व्याकुला' इति श्रुत्वा, राजा कलावतीं प्रति 'भाग्यं प्रत्यस्माकमप्यपेक्षा वर्तते । परशिवयजनात् मृडभक्तिपरायणः सूर्यवंशविवर्धनः पुत्रः प्राप्तुं शक्यः, अतः शिवं भज । पुरा हरिमुखाः शिव-भजनात् पदान्यभजन् किल । तथैवाहमपि शिवपूजया शिवं प्रीणयामि ।

'त्यज शुचं भज शम्भुपदाम्बुजं कुरु विधीरितदानमनेकधा
अचिरमिष्टमुपैष्यसि चेति तां विशुचमाशु च मानधनो व्यधात्' ॥ (४-२५)

पतिवचसा लुप्तमनोगदा धैर्यमवलम्ब्य शिवपदार्चनतत्पराऽभूत् । सोऽपि राजा शिवार्चनपरोऽभूत् । एवं दम्पत्योर्वर्तमानयोः एकदा कामिनी कलावती चतुर्थी-स्नानानन्तरं परिशुद्धा सती सितदुकूलमौक्तिकभूषणादिभिरलङ्कृता चन्द्रकलावद-लक्ष्यत । परमभक्तितः सान्ध्यमृडार्चनं कृत्वा सम्पदा अपास्तशचीविभवा पतिगृहं प्रविष्टा पत्या रतोत्सवसुखमन्वभूत् । तल्पे निद्रितायाः तस्याः स्वप्ने भगवान् शम्भुः जङ्गमरूपेणागत्य 'तव पुत्रो भविष्यती'त्यवदत् । प्रातरुत्थाय स्नात्वा शिवपूजादिकं कृत्वा स्वपतये रात्रिसन्दृष्टस्वप्नविचारं राज्ञी कथयामास । श्रुति-सुखावहं तत्स्वप्नवृत्तान्तमाकर्ण्य पुलकाञ्चितः विक्रमचोलमहीपतिः अचिरादेव इष्टप्राप्तिर्भविष्यतीति स्वप्नफलं तस्यै कथितवान् ।

कालक्रमेण कलावती गर्भिणी बभूव । प्रशस्तकाले सुतमजीजनत् । देवलोके राजगृहे च दुन्दुभयो नेदुः । महीजनाः मुदिताः । राजा पुत्रोत्पत्ति-शुभवार्तानिवेदयित्रे पूर्णपात्रं प्रदत्तवान् । हरालये विशेषपूजोत्सवः आचरितः । गृहे च शिवगणानां पादपूजा कृता । सम्भ्रमेणाचरितश्च पुरि पुत्रमहोत्सवः । सूर्यवंशोद्धरणपुत्रोत्सवेनातीव मुदितः महीपालः बुधचयेभ्यो भूरिधनाभर-णादिकञ्च ददौ ॥ चन्द्रं दृष्ट्वा समुद्र इव पुत्रमुखमवेक्ष्य राजा ननन्द ।

गुरूनाहूय शैवागमविधानतः जातकर्म कारितवान्। संस्कृतः राजपुत्रः मणिदीप इव रराज। राजा सौन्दरचोळ[1] इति च नाम कारयामास। अमृताञ्जनतुल्यपुत्रप्रदानात् प्रमुदितौ दम्पती भक्त्या शिवमभजताम्। पितरौ सौन्दरचोळस्य बाललीलया मुदितौ।

कालेन 'शिवमतोचितदेशिकदीक्षितः सकलवाङ्मयवारिधिपारगः। गुरु-चरेशसमर्चनतत्परो हरमते रमते जनपात्मजः॥' (४-६७) तस्य नयनं शिवनिरीक्षणे श्रवणं ईशकथाश्रवणे मतिः शिवाङ्घ्रिरता च आसीत्। क्रमेण युवाऽभूत्। भस्मधारणादिना पुरारेः पुरातनानां च वर्त्मनि स्वपितुः प्रसिद्धशौर्यौदार्यादीन् गुणान् बिभ्रद्घनयशाः नीतिशास्त्रविचक्षणोऽप्यभूत्। गजहयाद्यारोहणविद्यायां धनुर्विद्यायां शरशस्त्रचमत्कृतौ तथाऽखिलासु कलास्वपि नैपुण्यं लब्ध्वा जनकादपि समर्थः तत्त्वसाक्षात्कारवानप्यभूत्। रूपेण मदन इवासीत्। शिवपूजासक्तावप्यतुल्यः। अस्य शिवपूजाप्रभावेण इन्द्रोऽपि गतनिद्रोऽभूत् 'प्रथितमीशपदार्चनकर्मणा प्रभुमभीक्ष्य पदच्युतिशङ्कया। प्रतिनिशं गतनिद्रतयोषितं मघवताऽघवता दिवि चात्मनः' ॥ (४-७७)

एवं वर्तमानः सौन्दरचोळः एकदा राज्ञः (पितुः) सभां प्रविश्य चरणौ ननाम। 'भुजयुगात्परिरभ्य निजासनं गमयितुं पितुराक्रमतो गळन्। विनयतः पदपीठतले वसन् घनरसो नरसोम इवाबभौ '॥ (४-८१) एतादृशविनयादिगुणसम्पन्नं सूर्यतेजस्कं तरुणं मानुषरूपपरमेश्वरं स्वसुतं राज्यनिर्वहणे समर्थं मन्वानः विक्रमचोळमहाराजः, सचिवे 'अहमस्य भुजे इळाभरणं निक्षिप्य, गतधूः शिवार्चने सुखेन वर्तिष्ये' इत्यालोच्य सुमुहूर्ते बन्धुभूपैस्साकं कुमारस्य

---

[1] अयमेव 'पुगल्चोळः' पगल्चोळः' इति भाषाप्रबन्धेषु प्रथितः ॥

साम्राज्यपट्टाभिषेकं सवैभवं वितन्य साम्राज्यचिह्नं मकुटञ्च सदसि प्रदाय, त्यक्तभोगाभिलाषः उद्बोधः शिवचरणसरोजध्यानयुक्तोऽवतस्थे ॥

(५)

द्रविडदेशे सूर्यवंशीयः सत्प्रियः सत्यवादी विद्याराशिः वितरणनिधिः श्रीयुतः अरिगिरिवज्रः विश्रुतः विशालकीर्तिः मानकञ्जारभूपाख्यः कश्चन शिवभक्त आसीत् ।

तस्य राजधानी कुसुमपुरम् । तस्य प्रेयसी च सौन्दर्यसीमा लावण्यश्रीः कोमलवपुः मनोज्ञा गुणवती आसीत् । एतया साकं संसारसौख्य-मनुभवन् काले 'प्रार्थितेशप्रसादात्' कन्यारत्नमेकं प्राप । पुत्र्याः सोमप्रभेति नाम चकार । सा तु सोमप्रभा सोमप्रतिनिधिमुखी कोमलाङ्गी पित्रोः प्रेमा-स्पदीभूता कल्पवल्लरीव वर्धिता सती, सखीकेळिभिर्मोदमाना शैशवमतीत्य यौवनस्था बभूव ।

प्राप्तयौवनां तां दृष्ट्वा महीशः मानकञ्जारः निजमहिष्या सार्धं पुत्र्याः अनुगुणवरं काङ्क्षमाणः शिवमभ्यर्च्य भक्त्या प्रणमनपरः ययाचे । याचना-नन्तरं क्षणं भावपरवशः भक्त्या ध्यानस्तिमितो बभूव । तदा शम्भुः तस्य भावं बुध्वा तस्य मानसे प्रविष्टस्सन् 'मद्भक्तोऽस्ति प्रणुतगुणवान् सुन्दरश्चोळ-भूपः । तस्मै देया तव तनुभवा' (५-९) इत्यञ्जसा उवाच । शिववचः-परितुष्टान्तरङ्गः तद्वाचं स्वप्रेयस्यै मन्त्रिणे चाकथयत् । पुनरपि शुद्धान्तस्थ-स्सन् मृडमर्चयन्नास ।

एवं स्थिते वसन्तकालस्सम्प्राप्तः । कुसुमपुराधीशश्रीशिवलिङ्गरथोत्सवं प्रतिवत्सरं भक्त्या आचरिष्यमाणः, शिववचश्च मनसि निक्षिप्य, एतच्छिव-

रथोत्सवदर्शनव्याजेन करिपुरपतेर्नन्दनं सुन्दरचोळराजं प्रेम्णाऽऽनेतुं स्वदूतान् प्रेषयामास । दूताश्च तस्य सभां प्रविष्टाः 'महितगुणवानस्माकं नाथो मानकञ्जाख्यः भूभृत् स्वग्रामोत्थशिवरथप्रोत्सवालोकनाय भवन्तमानेतुं समुत्कण्ठया प्रेषितवानस्मान् । तदाज्ञां प्राप्यागतवन्तश्च । बुधजनमुखात् त्वद्यशः भूयो भूयः श्रुत्वा भवन्तं च द्रष्टुं प्रीत्या प्राहिणोत् । तत्प्रार्थनां सफलां करोतु भवानिति सन्देशं धैर्येण प्रोचुः ।

सुन्दरचोळोऽपि प्रार्थनया प्रीतः, चरेभ्यः अर्थजातं दत्वा सम्भाव्य 'शिवभक्तः मानकञ्जारः अस्मद्बन्धुरेव । अस्मान् दिदृक्षुः तथैव शिवरथञ्च दर्शयिष्यमाणः अमून् प्रैषयत् । तद्वचोप्यलङ्घनीयमेव इत्यात्मनि निश्चित्य, सदसः उत्थाय अन्तःपुरस्थं ध्यानयोगाभियुक्तं पितरं प्रणम्य, विज्ञप्तकार्यः तदाशिषो लब्ध्वा अनुज्ञां च प्राप्य सुमुहूर्ते भेरीघोषैर्मुखरितदिक्तटस्सन् ससैन्यः कुसुमनगरीप्रयाणसन्नद्धः ऐरावतोपमगजस्कन्धे निषण्णः मुक्ताछत्रालङ्कृतः मणिमयमकुटशेखरः वन्दिव्रातैस्स्तूयमानः प्रस्थितः । प्रयाणे बहुबलभरात् फणीन्द्रः भुग्नकण्ठोऽभवत् । प्रयाणकाले तत्र तत्र जनपदजनानीतवस्तूपदाः स्वीकुर्वन् द्रविडविषयक्षेत्रस्थशिवलिङ्गान्यवेक्षमाणः भक्त्या अभ्यर्च्य साष्टाङ्गं प्रणम्य तत्प्रसादञ्च गृहीतवान् ।

मार्गे भूकान्तास्तनसदृशरत्नकूटपर्वतं दृष्ट्वा तत्सानुप्रदेशस्थितच्छायाच्छिन्ने शिशिरपुलिने नद्याः रोधसि स्वर्णदूष्यान्तरे घर्मातपनिवारणाय ससचिवैरवनिपैस्सह विश्रान्तिमनुभूय, तत्रस्थनद्यां स्नात्वा विधिवद्भवं सम्पूज्य प्रसादञ्च स्वीकृत्य राजकुमारैस्साकं अश्वारूढस्सन् अरिगजमृगाधिपस्सुन्दरचोलः तस्याद्रेः अतिभीमं कटकविपिनं द्रष्टुकामः लीलावेगात् अभ्रचुम्बिमहीरुहं सिंहगर्जनयुतं मदगजमदपङ्किलं तिमिरमयं गहनं प्रविश्यातिविस्मयमापन्नः । बिल्वाशोकामलकखदिरप्लक्षजम्बीरजम्बूनिम्बाश्वत्थप्रमुखतरुभिः,

सिंहव्याघ्रद्विरदमहिषक्रोडभल्लादिसत्त्वैः, गृध्रोलूककुक्कुरफणिभुक्कङ्कपारावतादिपक्षिनिवहैश्च तदरण्यमाभाति स्म।

दन्तिरदनमुसलैः वैणवतण्डुलान् चन्द्रकान्तशिलोपरि अवहननं कुर्वन्ति स्म मनोहराः शबरयुवतयः। श्रीखण्डस्तम्भघटितासु द्विरदन्तनिर्मितपर्यङ्किकासु मणिमयदोलासु च शबरवनिताः गीतेन हरिणयूथानि आह्वयन्त्यः खेलन्ति स्म। मध्वाज्याक्तं कपित्थं भुक्त्वा तटपतितसुगन्धिपुष्पकम्रं जलं पीत्वा, तद्वनान्ते मृगयाश्रान्तिं शबराः स्ववनिताभिः विनोदयन्ति स्म। अरण्यदेवतेव स्थिता एका शबररमणी। अपरा भैरवीव नृत्यति स्म। एकत्र कपिपातिततालफलपतनखिद्यमानशिरस्कः शबरो दृष्टः। किरातानां सिंह-गज-महिष-किटीनां मृगयाविनोदं, प्रियाकबरीसंस्मरणात् परित्यक्तमयूरवधं किरातजनं एवमाद्यं शबराणां शबरीणां शबरकुमाराणां कुमारीणाञ्च विनोदं पश्यन् तपोवनभूमिमाससाद।

तत्र भस्मरुद्राक्षमालाधरान् चिद्रसानन्दसान्द्रान् कांश्चन, हृदयाम्बुरुहकुहरीमण्डलाग्रे ध्यायतः ज्योतिर्लिङ्गानुसन्धानरतान् यमीन्द्रान्, अङ्गुष्ठाग्रे स्थित्वा ऊर्ध्वबाहून् सतः स्तिमितचित्तेन सूर्यबिम्बे साम्बं पुरुषं पूर्णरूपं पश्यतस्तापसेन्द्रान्, वायुस्तम्भनात् चेतो नियम्य पद्मासने दशविधनादं शृण्वतः, तेजः पश्यतः, योगाभ्यासं, वेदान्तवचोव्याख्यानं, रौद्रीमिष्टिं, श्रौतभस्मानुलिप्तिं, शिवपूजां, जटासंस्कृतिं च कुर्वतः कांश्चन योगीन्द्रानप्यवलोकितवान्। शैवमुद्राभाजः शैवयमीन्द्रान् तानवलोक्य, तत्सपर्यां च भक्त्या कुर्वन्, तेषामाशिषश्चाधिगम्य, तत्प्रसादातिहृष्टः सैन्योपेतस्सन् कुसुमनगरीनन्दनं सञ्जगाम।

तत्र बन्धुभूतः कुसुमनगराधीशः मानकञ्जारभूपतिः भूरिभेरीतूर्यध्वानैस्सह बहुबलैश्चोळावनीशं सम्भ्रमात् स्वागतेनाभिनन्द्य, निजगजस्कन्धमारोप्य राजधानीं प्रावेशयत्।

राजवीथ्यां शिवरथस्य सुवर्णकलशं पश्यन् भक्त्या मुकुलितकरः, गजादवतीर्य, मानकञ्जारभूपेन साकं शिवं सिषेवे। मानकञ्जारेण साकं रथ्यायां शिवरथमनुयास्यन् सान्द्रानन्दः ससचिवः शिवालयं गत्वा लिङ्गाकारं शिवं भक्त्या यजन् तत्प्रसादरूपपुष्पमाल्यञ्च भूपावलिभिस्साकं स्वीकृतवान्। एवं तद्रात्रिं शिवाभ्यर्चनाद्युत्सवेन शिवालये नीत्वा, उषसि पुनर्यजन् प्रसादञ्च लब्ध्वा परितुष्टो बभूव।

ततश्च मानकञ्जारनियोगात् गजारूढस्सन् महेन्द्र इव राजधानीं प्रपेदे। मार्गे कनकरुचयः काश्चित्कन्याः कराग्रैः लाजान् अकिरन्। उभयपार्श्वस्थेन्द्रनीलमणिरचितसौधाग्रसंस्थाः राजकुमारं द्रष्टुं महस्रशो महिलाः सम्मिलिताः; हर्म्येषु जालान्तरेषु वीथ्युभयपार्श्वयोश्च तुमुलीभूय सन्ददृशुः। सोमप्रभाऽपि सौधाग्रे आलोलनेत्रा राजकुमारं सखीभिस्साकं पश्यन्ती आसीत्। तदा लीलाब्जधारिणी लक्ष्मीरिव स्थिता सोमप्रभा 'मूर्तिमाननङ्गः किं? अकलङ्कः मृगाङ्कः? अक्रूरस्सूरो वा? अगोत्रहारी वृत्रहा वा? अकृष्णः कृष्णो वा? कोऽपि न' इत्येकरतया संशयेन दृष्ट्वा, दर्शनकाल एव स्विद्यद्वक्त्रा, कम्पमानोरुयुग्मा, विस्पन्दाङ्गा, सोष्मनिश्श्वासवेगा सती क्षणमात्रेण तीव्रानङ्गपीडिता बभूव। चन्द्रिकारूपं भस्म उपरि विकीर्य तस्याः धैर्यरूपद्रव्यं चोरो मारः अपहृत्यादृश्योऽभूत्।

अब्जसंस्थां साक्षाल्लक्ष्मीमिव सौधाग्रस्थितां तां च साश्चर्यचेताः राजकुमारः सुन्दरचोलोऽपि निर्निमेषं आपादचूडं पश्यन्, पूर्णशोभां निष्पन्दाक्षीं तां वीक्ष्यात्मन्यालोच्य च भूयोऽनुरागात् कन्दर्पतीव्रशरपातैः छिन्नस्वान्तः विस्मृताङ्गश्चाभूत्।

यथाकथञ्चित् धीरोदात्तवर्यः स क्षितीशः आत्मधैर्यात् चेतः मन्दं संहृत्य, स्ववासायोपकल्पितं सौधं प्रविवेश। तत्र सौधे वधूकृतं तौर्यत्रिकसुखमनुभवन् भर्गपूजां च कुर्वन्नवतस्थे॥

इतस्तावत् विपुलमनोजज्वालाकीलाभितप्तां, अत एव मूर्छितां सोमप्रभां किसलयमृदुशय्यया पल्लवान्दोलिकया शिशिरवनं निनाय विषण्णः सखीजनः। तत्र कामतापापनोदनाय क्षिप्रं कुसुममृदुलतल्पं रचयित्वा बालां शाययित्वा हिममलयजमिश्रवार्भिरासिच्य व्यजनैरुपवीज्यापि तापापनोदनसमर्था न बभूवुः।

अतश्च परभावनयानुबद्धः शैलात्मजापतिपदाम्बुजमत्तभृङ्गः सुन्दरोर्वीश्वरोऽपि सौन्दर्यवत्याः सोमप्रभायाः सन्दर्शनेन कामशरतीव्रतापेन हृदि सन्तापमाप ॥

(६)

इतस्तावत् बान्धवप्रियः मानकञ्जारभूपः निजालये आत्मगृहिणीं प्रति प्रीत्या 'अधुनाऽऽगतः सुन्दरचोलभूपालोऽयं अस्मद्बन्धुः, युवा, शक्तिमान् नययुतः हरभक्तः श्रीमांश्च। शिवोक्तिमनुसृत्य साम्प्रतं पुत्रीमस्मै प्रदातुं समुत्सहे' (६-१८, १९) इत्युवाच। गृहिणी च सम्मतिमसूचयत्।

एतावता सुतायास्सखी सुभाषिणी तावन्मानकञ्जारभूपालसन्निधे आगत्य, प्रणम्य 'महीश्वर! अत्रायातचोलभूभुजालोकनात्प्रभृति बिसकाण्डकोमला तव सुता मदनबाधिता, कज्जलादीनि त्यक्त्वा बाष्पपूरिता रोदिति। मारप्रभाविता मूर्छिता वर्तते। यावच्चरमां दशां नैति तावदेव तदसुरक्षणोचितक्रिया चिन्त्यताम्' इति विज्ञापितवती।

तदाकर्णनसमय एव क्षिप्रं सचिवेन सार्धं सर्वं समालोच्य तदसुरक्षणोपायं चिन्तयन् तं सचिवोत्तमं विक्रमचोलं प्रति प्रैषयत्। जवात् सचिवराट् चोलराजपितृसमीपमुपगम्य, प्रणम्य सर्वमपि विनिवेद्य, सोमप्रभा-सुन्दरचोलयोर्विवाहकरणे साध्वनुमतिं च लब्ध्वा, पुनरागत्य स्वमहीशं सर्वं श्रावित-

वान्। राजा तेन सन्तुतोष। विवाहार्थं विक्रमचोलानुमोदनवार्ताश्रवणेन सोमप्रभाऽपि सुप्रसन्ना बभूव। तथैव राजकुमारोऽप्यतीव मुदितोऽभूत्।

अङ्गजतापं शमयितुमिव विमलोदकैस्स्नात्वा, जितस्मरं भगवन्तं धूर्जटिं धूपदीपादिभिर्यथाविध्यपूजयत्प्रभुर्मानकञ्जारः। अथ मौहूर्तिकैः सुतापरिणयसुमुहूर्तं निर्धार्य, बान्धवेभ्यः आह्वानं प्रेष्य, स्वनगरं केतनाद्यैरलङ्कर्तुं भृत्यान् न्ययोजयत्

इतः सौगन्धिकजलस्नातः नवाम्बरधारी मुक्ताहारालङ्कृतः पुष्पमालाविराजितमौलिः प्रलिप्तहरिचन्दनः स युवा सुन्दरचोलः शिवाङ्घ्रिसमर्चकोऽभूत्॥

(७)

विवाहगृहे विवाहवेद्यां सम्भ्रमेण पुरन्ध्र्यः स्वर्णपीठे कन्यामुपवेश्य अभ्यङ्गस्नानं कारयामासुः। बालारुणातपमिव स्थितं वसनं वसानां नीलोर्मिकां मध्यगतेन्द्रनीलमणिकर्णपत्रयुग्मां नासामौक्तिकमणिशोभितां चूडामणिविभूषितां हारावलिशोभितां अवदातक्षौमाम्बरां सौवर्णवर्णरुचिकञ्चुकयुतां च तां संविदधिरे।

इतः सुगन्धिसलिलस्नातं कनकाम्बर-विभूषण-गन्धमाल्यादिभिरलङ्कृतं गजस्कन्धारूढं मन्मथतुल्यं दीप्यमानरत्नाभरणकिरणप्रावृताङ्गं माधूकफलकरतलं काञ्चनाञ्चद्दुकूलं मौलौ बद्धशेखरं युवानं परिणयायागतं वरं सुन्दरचोलं कुसुमनगराधीशः मानकञ्जारः सपरिवारस्ससचिवः भेरीढक्कापटहमुरजकाहलीशङ्खतालघोषैः कलशदर्पणमुक्ताछत्रसहितं पुरन्ध्रीभिस्साकं वैभवेन प्रत्युद्यातः कुम्भिस्कन्धादवरोहयन् वन्दिभिस्स्तूयमानः कल्याणमण्टपं समानीतवान्।

तत्र मधुपर्कप्रदानानन्तरं पित्रादेशात् विवाहमण्टपे कन्यायां आनीतायां शुभमुहूर्ते विध्युक्तरीत्या काण्डपटादि अग्निप्रदक्षिणान्तं विवाहकर्म निर्वर्त्य, आर्द्राक्षतारोपणपूर्वकं आशीर्वादं च कारयामास। परस्परानुरूपदम्पती दृष्ट्वा प्राप्तानन्दाः चतुरवनिताः। दम्पती च परस्परं संहृष्टौ। बन्धुराजततिं स्वग-पात्रानीतैः वसु-वसन-वीटिका-गन्धमाल्यैः, प्रत्येकं सतनयवधूसङ्कुलं च तोषयित्वा ततः विद्वद्भ्यः भूरिद्रविणनिवहं संववर्ष।

मुक्तावलीविलसितवज्रपर्यङ्के पत्युः पार्श्वे अवनतमुखी सोमप्रभा अवर्तत।

एतस्मिन् समये—स्थाणुस्तावत् चरवपुर्धृत्वा भस्म-जटा-रुद्राक्ष-कनकमयवल्कलधरस्सन् सस्मितास्यः पाणौ वृषभध्वजमेकं धारयन् मानकञ्जार-भूपभक्तिं जगति प्रकटयितुं तत्र प्रादुरासीत्॥

भक्तो मानकञ्जारस्तु स्फुरितमहसं तं जङ्गमं दृष्ट्वा सान्द्रानन्दः सपुलकवपुः साष्टाङ्गं प्रणम्य तदङ्घ्री प्रक्षाल्य शिरसि च वहन्, पूतं तं चरपादतीर्थं च स्वशिरसि सम्प्रोक्ष्य जङ्गमयोगिने आसनार्थं दिव्यपीठं उपददौ। तज्जङ्गम-पादाब्जं पुनरपि भक्तिभावात् समभ्यर्चयन् स्वात्मानं पावनं मन्यमानः योगिनमित्थं प्रार्थयामास—

"मोहध्वान्तोच्चयदिनमणिः तापकान्तारवह्निः मेघज्योतिर्दुरितफणिनः, सन्ततप्रार्थितानां कल्पक्ष्मारुड् भवति भवतो दर्शनम्। महद्भिः पुण्यै-र्बहुभिरधुना यन्मया लब्धं भाग्यं तत् स्वर्गिणामप्यलभ्यम्। पुण्यवाराशि-सुधाकरस्त्वत्कटाक्षः। पादाम्भोजाद्विगळितरजोभूतिरेनोग्रहघ्नी। तव सुवचनं सद्भिः श्राव्यम्। शैवतत्त्वप्रदीपस्त्वं। हे कृपाम्भोनिधे! त्वत्प्रभावं वर्णयितुं नाहं समर्थः। चिदग्निनेत्रेण किल दग्धः कामः। क्रोधशार्दूलरक्षः

शान्तं किल त्रिशूलेन। मोहश्च मर्दितः अतः त्वं द्वितीयश्शम्भुरसि। तव पदतलस्पृष्टभूतलमेव सुपावनं क्षेत्रम्। पाददर्शनवानेव धन्यः पुमान्। पादधूलीपरागेणापि भाग्ययोगो भवति। पादधूलीपतितशिरस्कः मुक्तिमाप्नोत्यवश्यम्। वैमल्यकर्त्री देवगङ्गा भूतलस्य दूरा। चन्द्रमास्तु अहस्तापहरणे असमर्थः। सुरतरुश्च देहावसानानन्तरमेव लभ्यते न तु जीवितकाले। त्वं तु नित्यं तापच्छित् इहैव फलदश्च अतः आपास्तोपमानः। हे महन् यमिवर! मां धन्यं कर्तुमेवागतवानसि। बाह्यवस्तुपु नैराश्यं भवतस्सहजमेवानिशम्। अथापि मत्प्रीत्यर्थं किमपि वा कृपया सम्प्रति प्रार्थ्यमानं द्रव्यमहं दास्ये यतः 'जगति हि सतामन्यतोषिप्रवृत्तिः (७-६०)। अतः किं वा दातव्यं वद कृपया इति"॥

एवं वदति भूपतौ, तरसा भस्मभूषितस्तापसस्सप्रमोदः हसन्नाह—"दूरात् तव यशः शृण्वन्नहं त्वां दिदृक्षुरागतोऽस्मि। तव च निस्तुलं भक्तिभावं किं वक्ष्ये? राजानोऽन्ये किमिह न सदा जाग्रति स्वार्थवृत्ताः। श्रीभिर्मत्ताः, त्वमपि न तथा संहृतात्मार्थवृत्तः। शम्भोर्भक्तः परहितरतस्त्वामिह प्रेक्ष्य भूयः। क्षीरोदन्वानिव विधुमहं यामि तोषाभिवृद्धिम्'॥ कर्णस्त्वचं शिबिर्मांसं बलीन्द्रस्स्वाङ्गं जीमूतनृपतिरसून् तथा धीरो दधीचिस्स्वास्थि च दत्तवन्तः परहिताय केवलम्। त्वमपि तादृग्दान्यसि। 'त्रैलोक्यामप्यन्यैर्दातुमशक्यं किमपि वस्तु याचे भवन्तम्। हे नृपते! यामुनाम्भःप्रवाहप्रख्यं त्वदीयकन्याकचभरं छित्वा मह्यं वितर। एतं मदीयवृषभध्वजपटपरिसरे चामररूपेण धर्तुं मदीयवाञ्छा। मम त्वेतद्भिन्ने वस्तुनि नापेक्षा। अतः त्वदीयकन्याकेशपाशं वितर इति'॥"

कपटपटुना तापसेन निर्मर्यादं व्याहृतां उक्तिं शृण्वन् स भक्तवर्यः मानकञ्जारभूपालः 'अचिरं सोत्सवस्त्यक्तशङ्कस्सन् मालाकीर्णां व्यायतां

आत्मजायाः महितकबरीं खड्गेन छित्वा योगिने जङ्गमाय समस्तबान्धवसमक्षं व्यतरत्'। तद्योगिपदयुगलमूले विन्यस्ता सा च नीलालकालिः कबरी पादयुगळावनता काळिन्दीव विराजमाना हे शिवस्वरूपिन् विभो ! त्वन्मौलि-स्थितस्वर्णद्या साकं दक्षिणाक्षिप्रसूतां मामपि त्वन्मौलावावह' इति मधुकरध्वानव्याजविज्ञापनोक्त्या स्थितेव व्यराजत ।

एतादृशपरमां भक्तिमवलोक्य चररूपधारी तु शम्भुस्सपदि त्रिणेत्रः देवगङ्गार्धचन्द्रमौलिः नीलग्रीवः फणिपवलयः शूल-सारङ्गपाणिस्सन् सुन्दरः कृत्तिवासाः भूत्वा प्रत्यक्षोऽभूत्। देवताः पुष्पवृष्टिं ववृषुः, देवदुन्दुभयो नेदुः। श्रीशाजेन्द्राद्यमरसमितिस्सम्भ्रमादाजगाम। त्रिदशगणिका ननृतुः। स्थाणो-र्लीलां कीर्तयन्तः किन्नराः जगुः ॥

तदा देवस्तावत् निजपदनतं चञ्चत्पुलकवपुषं भक्तं तं मानकञ्जारभूपं पाणिनोद्धृत्य भूयो भूयः दोर्भ्यां समालिङ्ग्य च स्वपदं नमतः चोलादींश्च दृक्प्रसादात् तोषयन् तत्कन्यायाः सोमप्रभायाः कचभरमपि स्वपाणिसंस्पर्शनेन यथापूर्वमनुगृहीतवान्। 'हे राजन् मानकञ्जार! तवाद्भुततरभक्तिभावेनाद्य प्रीतोऽस्मि। किं वा दातव्यं भवदभिमतं तद्वृणीष्व' इत्युक्तवान् देवः। तदानीं भक्तवरेण्यो मानकञ्जारभूपोऽपि 'त्रिभुवनविभुत्वादिकं नेष्टमन्यत्' 'सुखकरीं त्वद्भक्तिमेव मे दिश' (७-७०) इत्यवोचत्। मानकञ्जारभक्तस्य एतादृशीं वाणीं श्रुत्वा चन्द्रमौलिः प्रीतस्सन् नन्दिनं प्रति 'प्रियपुत्र्याः सद्मजः भद्रभाजः केशान् प्रकटं प्रच्छेद्यासौ मह्यं प्रदत्तवान्। एतत्समानः भक्तिसम्पन्नः को वा अस्तीति अवोचत्। पुरा अनघः दभ्रभक्तश्चैकः स्वीयं तनयं भक्त्या मह्यं प्रादात्। तथैवापरः अतुलस्सिन्धुवल्लाळभक्तश्च पत्नीं भक्त्या मह्यं अदिशत्। अयं पुनः अपरक्ष्माभुजे प्राग्दत्तायाः प्रियदुहितुस्सु-भगकबरीमिमां प्रच्छेद्य मह्यं प्रदत्तवान्। अस्य भक्तिस्त्वद्भुता वर्तते'।

"वाञ्छा मे स्यादसुलभतरे वस्तुनि प्रार्थिते तद्भक्तेनैवाक्षुभितमनसा दीयते निस्पृहेण। मत्तो भक्तस्तदधिकतरस्तत्त्वतस्तन्महत्वम्। को वा वेत्ति त्रिदशसमिता-वित्यवादीत्पुरारिः (७-७३)"॥ "नाहं वश्यो जगति तपसा सर्वदा नैव चेष्टया। श्रौतस्मार्तप्रहितविधिभिर्ध्यानमौनव्रताद्यैः। भक्त्यैव स्यामनितरसुरेन्द्रस्पृशा शान्तिमत्या। वश्यः क्षिप्रं वहति य इमां मोक्षमस्मै ददामि (७-७४)" इति च वदन् परमकृपादृष्ट्या सुन्दरचोलराजं तस्य भार्यां सोमप्रभामपि पश्यन्, सम्भाव्य च प्रमथैरानीते दीप्यमाने विमाने अनघं विनीतं मानकञ्जार-भक्तमारोह्य कैलासं च नीत्वा तत्र अग्र्यं गणपदमनुगृहीतवान्॥

एतत्समस्तशिवलीलां स्पष्टं दृष्ट्वा, श्रीसुन्दरचोलभूपालः शयनमधि शयानः, स्मृतमृडवचाः, महितश्वशुरस्य भक्तिं च प्रशंसन् शैवमुद्राङ्कितानां योगिनां विषये अतितरां बद्धश्रद्धोऽभवत्। तदुक्तं हि 'चोलश्रेण्याः भवति विदुषां 'प्रत्ययो ह्यार्यवृत्तौ' (७-७६)॥

कुमारश्श्रीसुन्दरचोलः मञ्जुवेषस्सन् निजपरिणयानन्तरं सप्रमोदं कन्तुक्रीडोचितपरिकरे सन्मृदुस्वच्छतल्पे क्रीडावेश्मस्फुटमणिमयपर्यङ्कदेशे स्वकान्तायाः (सोमप्रभायाः) आगमनमपेक्षमाण आसीत्। तावता सान्त्वगीर्भि-र्निजसहचरीसञ्चयैरानीता, लीलागतिजितगजा तुङ्गवक्षोजभारा चञ्चन्मध्या चकितनयना सौरभाहूतभृङ्गा काञ्चीक्वणितरुचिरा बाला (सोमप्रभा) क्रीडा-वेश्मान्तर्विवेश। तस्याः काञ्चनाञ्चन्मञ्जीरध्वनिभिः मेघध्वानैस्तृषितश्चातक इवाभिलाष्यभवत् सुन्दरः। कान्तस्य मञ्चतल्पार्धभागे ह्रीनम्रवदना उपविष्टा कान्ता, कराकर्षणात् स्विन्नपाणिर्बभूव। तामङ्कमारोप्य तस्याः भ्रमरकं अङ्गुलीभिः संवार्य, स्नेहात् मुग्धायाः उरोजयुगलं संस्पृश्य गाढालिङ्गनेन उचितवचनैश्च लज्जामप्युत्सार्य बिम्बाधरं च चुम्बन् कन्तुरागं व्यतनुत। एवं रतिक्रीडासक्तयोस्तयोः दीर्घरात्रिरपि निमिषसमाऽभूत्।

एतावति काले वर्षाकालश्चागतः। स्थिरशुभोदयः शिवमताम्बुरुड्भास्करः श्रीसुन्दरचोलावनीशस्सुहृत्समाजावृतः, सहात्मनवयोषिता सविभवं परमभक्तिभावान्वितस्सन् कपर्दिपदपङ्कजं समाराधयन् तत्र मानकञ्जारपुरे कुसुमनगरे स्थितः ॥

(८)

वर्षर्तौ गगनचुम्बिहर्म्ये, गवाक्षे अङ्गनायुतस्सन् शक्रधनुस्समन्वितं सवर्षं घनाघनं वीक्ष्य मुदं प्राप्तः कर्पूरविमिश्रवारिभिः सुगन्धिभिः कदम्बकुटजपुष्पैश्च अत्यन्तभक्त्या विधिना पुरद्विषस्समर्चनं भृशं व्यधात्। ततः प्रियाभुजाचम्पकदामकन्धरः तदीयवक्षोजमिलद्भुजान्तरः चोलावनीशः सुखान्वितस्सन् हैमागममपि व्यतीत्य, कदुष्णकाश्मीरजलैर्मनोहारिपुष्पैर्धूपदीपादिभिश्च कपर्दिनः पदं पूजयामास। तथैव 'निपीतशीतांशुमुखीसुधाधरस्तदीयबाहाबिसकाण्डकन्धरः। नृपस्समालिङ्गिततत्तनूलतः ततार घर्मागमसम्भवश्रमम्' (८-६५)। उशीरकर्पूरविमिश्रवारिभिः चन्दनगन्धिलिप्तिभिः सरोरुहैः दधीक्षुसारादिरसैश्च उमाप्रियमयजत्। ततः सन्मुहूर्ते ससचिवः प्रबलबलनियुक्तः तूर्यघोषैर्मुखरितहरिदद्रिः स्वीयजायासहायस्सन् इभेन्द्राधिष्ठितः करिनगराय प्रस्थितः ॥

मणिगणमहातोरणमयीं पताकाकीर्णां करिनगरप्रतोलीं निस्तीर्य प्रथितविभवः सुन्दरचोलावनीशः मित्रनृपतीन् सम्प्रेष्य, स्नेहवचसा अन्यसुभटांश्च प्रेष्य, प्रियायुक्तस्सन् इभशिरसः क्षिताववतीर्य, स्नानोत्थितकनककलशादर्शकरैः वधूकदम्बैः प्रत्युद्यातः मनोज्ञं शुद्धान्तं प्रविश्य मुदितहृदयस्सन् पितरौ प्रणम्य तदाश्लेषसुखितः तयोराशीर्वादानविन्दत। वयोरूपशीलगुणादिभिश्शोभितौ नवदम्पती दृष्ट्वा पितरावप्यतीव मुदितौ। तदा असौ सुन्दरचोलोऽपि मुदितः हरपादार्चनरतो बभूव ॥

ततश्च शम्भुपादाब्जभृङ्गश्चोलावनीशस्सुन्दरः 'श्वशुरः श्रीमान् मानकञ्जारः अस्याः सोमप्रभायाः कचौघं प्रच्छेद्य, याचयित्रे भृतचरवपुषे शूलिने विततार। तुष्टस्य तस्य अनुग्रहात् पुनरपि सुतायाः कबरी यथापूर्वमराजत। तद्भक्तवर्यस्य प्रभावं किं वक्ष्ये?। शिवपुरमगात् मानकञ्जारभूपालः श्रीशिवेन सहेति पितृभ्यां स्वश्वशुरमहिमानं निवेदयामास॥

(९)

शिशिरर्तुनिर्गमनानन्तरं पुनर्वसन्तर्तुराजगाम। तस्मिन् काले मलयसमीरणः संववौ। पुष्पितैः माकन्द-पलाश-कर्णिकाराशोक-पाटली-मल्लिका-चम्पक-पुन्नागाद्यैरलङ्कृतः मनोहरः वसन्तः आजगाम। तदा पौरकन्याः वसन्तोत्सवं सम्भ्रमेणाचरितवत्यः।

सुन्दरचोलराजोऽपि कान्ताप्रतान-कविवृन्द-भूभुजां समाजैः वसन्त-केळीं आचरन् देदीप्यमानकटकाङ्गद-तारहार-कोटीरकुण्डलविभूषितः दिव्याम्बराञ्चितवपुः इन्द्रनीलसौन्दर्यसारभवने मणिखचितसिंहासनमारूढः। तस्मिन् काले धृतनिचोलः सौवर्णवेत्रधारी उन्नताङ्गस्सौविदल्लः वनपालकागमनं राज्ञे निवेद्य राज्ञः आदेशतः सपदि तं वनपालकं राजसभामानिनाय।

आगतश्चायं वनपालकः मल्लिकारविन्दाशोकाम्रचम्पकपुष्पप्रवालादीनि रम्भारसालपनसादिफलानि च राज्ञे समर्प्य कृताञ्जलिस्सन् 'हे देव! यतो वनाभ्रं तरुणप्रवालैः सन्ध्यांशुयुक्तमभवत्, मधुकरैरुद्यत्तमोऽभवत्, पुष्पैश्च उडुराजिरम्यमभवत्। भवांश्च राजा (चन्द्रः)। अतः वनं संद्रष्टुं भवतः आगमनं युक्तं वर्तते। चैत्रस्तु कन्तुयुक्तः त्वदागमनं पुष्परेणुरङ्गवल्लीं विरच्य आम्रप्रवालतोरणान्याबध्य निरीक्षते। अतः स्वामी वनदर्शनायागच्छतु'

इति व्यजिज्ञपत् । विज्ञापितवतः वनपालकस्य वचः श्रुत्वा तस्मै वसन-भूषणवित्तादींश्च वितीर्य, सह वन्दिनादैस्सिंहासनादवतीर्य सभां विसृज्य अन्तःपुरान्तरं इयाय ।

तत्र च मणिमन्दिरस्य सोमप्रभादर्शनाय प्रवेशकाले, कायऽपि सख्या मणिकाण्डपटे निरस्ते, सहसा पीठात्समुत्थितवतीं कनकपङ्कजचारुवक्त्रां, स्वर्णाम्बराभरणभूषितकोमलाङ्गीं पीनस्तनीं पृथुनितम्बभराभिरामां मन्दस्मितां मधुकरालकभासमानां सौन्दर्यनिर्जितरतिं चपलायताक्षीं सोमप्रभां ददर्श । दृष्ट्वा प्रहृष्टहृदयस्सहसा तस्याः हस्ताम्बुजं गृहीत्वा तया देव्या साकं मणिमयाञ्चितपीठतल्पे उपविश्य, भ्रमरकं प्रणयात् संवारयन्, हे कल्याणि ! मन्दानिलञ्च मदयन्, मधुभिर्मदालीन् सन्तर्पयन्, उर्व्याः परितोषं प्रजनयन्, वनतरूंश्च संवर्धयन् मधुमासः आगतः । तस्मात् तद्वनं उपेत्य मनोज्ञः मधुः दर्शनीयः । अतः वसन्तोत्सवाचरणाय त्वयाप्यागन्तव्यमिति तां अभ्युपगमय्य तया साकं गजेन्द्रारूढस्सन् सितातपत्रः सुन्दरचोलावनीशः वसन्तोत्सवाचरणाय वनप्रयाणमकरोत् । सार्धं विनियोगभाजः कान्ताश्चान्दोलिकाश्चकरेणूनारुह्य अनुजग्मुः ।

तत्र नागादवरुह्य प्रियया आप्तसखीभिश्च साकं राजा वनं प्रविश्य उद्यानपालनिर्देशानुसारेण वनपरिचयं प्राप्तस्सन् ततः कस्याश्चित् विदग्ध-ललनायाः प्रगल्भमधुराणि वनपरिचयरूपाणि वचांस्यपि शृण्वन्, तरूनवेक्ष्य तुष्टान्तरङ्गः तां चापाङ्गदानैः प्रियवचोभिश्चाहृत्य प्रियया साकं शिशिरमंदिरस्थ-सुमनोगृहं प्रविष्टः । तत्र 'स्रष्टाब्जपीठमिव शारदया वरूथं रत्या च पौष्पमिव पुष्पशरोऽधिरूढः । देव्या स पीठमधिरुह्य सहाचकासीत् लोकेश्वरोचितरतिः प्रमदानुकूलः' (९-८९) ।

ततश्च स्ववध्वा चतुरयोषिद्गोष्ठ्युपेतस्सन् तद्गोष्ठ्यां कस्याश्चिद्वनितायाः वीणावादनश्रवणेनानन्दितः शम्भुपादार्चनार्थं कुसुमावचयाय कान्ताकदम्बमादिदेश । एवं सुन्दरचोलावनीशः शिवपादाम्भोजातचञ्चद्द्विरेफवृत्तिरासीत् ॥

(१०)

राज्ञादिष्टाः कान्ताः कुसुमवाट्यां कमलोत्पलकिंशुककुरवकपाटल्यशोकमाधव्याम्रकाञ्चनयूथिकादिपुष्पपल्लवानि अवचित्य नृपतेस्समर्पयामासुः । पुष्पवीक्षणादेव समुत्सवस्सुन्दरचोलावनीशस्स्नात्वा, धृत्वा च सितविभूतिशिवाक्षमणीन् परमभक्तिसमाहितचेतसा आत्मसमुन्नतसम्पदुचितां ईश्वरपूजां विधिवदकरोत् । शिवार्पितकुसुममालिकाश्च निजाङ्गनया साकं धृतवान् । ततश्च पुष्पावचयजनितश्रमनिवारणार्थं जलक्रीडायां मनो निक्षिप्य प्रियया कनकशृङ्गधराभिः वनिताभिस्साकं सरोवरे संक्रीड्य, क्रीडानन्तरं कोशाध्यक्षैरानीतं सुवस्त्रभूषणादिकं युवतिभिस्साकं धृत्वा अपरमनोज इव रराज ।

वनपालाय अर्थौघं तथा विबुधेभ्यो भूरिद्रव्यं च प्रदाय हर्षितः चोलनृपतिः प्रथमं सखीभिस्साकं महिषीं नगरं प्रति सम्प्रेषितवान् ।

ततः भूरिविभवः ससैन्यः मौलिरत्नघृणिचित्रिताम्बरः करीन्द्राधिरूढः स्फारतूर्यरवपूर्णदिक्तटस्सन् पथि पश्यतां च हर्षं वितन्वन् पुरमगच्छत् ॥

(११)

सविता चास्तं गतः । सन्ध्यारागः प्रकटितः । क्रमेण निशाप्याजगाम । तारकाव्रजमप्युदियाय । 'पूर्वमर्कमपनुद्य सान्ध्यरुग्व्यह्निदग्धगगनक्ष्मातले ।

लाङ्गलीकृततमस्युडुव्रजं कालशूद्रततबीजवद्बभौ'। चन्द्रमा अप्युदितः। तेन चन्द्रिका प्रसारिता। एतस्मिन् समये राजा सुन्दरचोलः चन्द्रिकाविहरणोत्सुकः वेश्यावीथिमेत्य बहुविधं गणिकाविलासं आलोकयन् सहचरैस्सम्भाष्यमाणः तदीयचतुरोक्ति शृण्वन्, मुदितस्सम्राट् प्रसन्नवदनो भूत्वा पुरतः प्रतस्थे। ततश्च सखिनिकुरुम्बं प्रेमतः प्रेष्य, स्वकभवनं उपेत्य प्रेयसीसङ्गताङ्गः मृदुलधवलतल्पे सौख्यसञ्जातनिद्रः शम्भुसम्बन्धचेताः क्षितिपतिः अवतस्थे ॥

(१२)

अथ प्रभाते स्नात्वा पूजागृहे भस्मरुद्राक्षविभूषितः शिवमन्त्रतत्परः हृदि लिङ्गरूपं शिवं ध्यात्वा स्नानादिवन्दनान्तं हस्तपीठगतस्य इष्टलिङ्गस्य पूजां परभक्तियुक्तमनसा कृत्वा तुष्टाव। 'इति स स्तवैश्च बहुभिस्स्तुवन् मृडं, सरसैस्तदाऽऽस सह दासभावतः। पुलकैस्सहाश्रुनयनस्सगद्गदः, परमानुरागभरितः क्ष्मापतिः' (१२-१५) ॥ कुक्कुटश्चुकूज। प्रभातं चाविरभूत्। मङ्गलशङ्खो रराण। कमलानि व्यकसन्। कुमुदानि निमिमीलुः। ववौ मन्दमारुतः। तिमिरालीन् विधूय भगणप्रसूनावचयार्थं दिनश्रिया करधृतमणिपात्रमिव स्थितस्सूर्यश्च पूर्वाद्रौ उदियाय।

राजा सुन्दरचोलः शिवपूजासमाप्त्यनन्तरं राजसभां प्रविश्य तत्र 'वरवन्दिवृन्दनिनदानकस्वनैः, सममध्युवास मणिपीठमुच्छ्रितम्। दिनकृन्महीध्रमिव पूर्वमुर्विभृत्, मणिकुण्डलांशुमिलदाननद्युतिः' (१२-४९) ॥ सभायां कवि-कलाविन्मनीषि-वन्दि-वाग्मि-सामन्तनृप-सचिव-गायक सुभट-नट-विट-युवति-भिषजस्समुपस्थिताः। इन्द्रसभोपमा च सभा आसीत्। कनकमकुटधारिणः आश्रितनृपालाः नृपपादयोः प्रणतवन्तः। एकपार्श्वे पण्यस्त्रियश्च आसन्।

'ततनादशोभि वितितस्वनोल्लसद्घनरावभासि सुपिरस्वराञ्चितम् । नवनृत्यचारुपट्टुताण्डवस्फुरन्मृदुगीतमञ्जुतरमास तत्सदः (१२-५७) ॥ कैशिक-गुर्जर-वङ्ग-मगध-लाळादिदेशीयाश्च सभां व्यभूषयन् । 'इति भासमानसदसि क्षितीशितुः पुर उन्नमय्य कटकाञ्चितं करम् । प्रजजल्पुरुच्चनिनदैस्ससम्मुखं, विरुदं तदीयमभिवन्द्य वन्दिनः (१२-७१)' ॥ "जय राजराज ! शिवमार्गणप्रिय ! साध्वसाध्ववनशिक्षणक्षम ! रणधीर ! धीरसुरभूज ! भूजनस्तुत ! कालकालभजमानमानस ! (१२-७२) रिपुकुम्भिकुम्भदलनद्विपद्विषन् ! (१२-७३) 'कवितासरोजसविता भवान् प्रभो ! । भरताम्बुराशिवरतारकापतिः । अविगीतसाधुरवनीतलस्तुतः । श्रुतिसारसिन्धुततिसारसागरः ॥ (१२-८२) परमेशभक्त ! परमेशभाग्यभृत् ! दानबन्धुर ! सुप्रताप ! जय, विजयीभव, प्रभो ! (१२-८३) इत्यादिविरुदमुच्चैर्घोषयामासुर्वन्दिनः ।

अवनीपतेस्सहजान् महितांश्च गुणान् श्रुत्वा सभास्ताराश्च मुदिताः । तेषां इष्टवसुभूषणादिकं च वितरन् क्ष्माधवः विनोदेन अवसत् । एतस्मिन् समये सचिवस्समागत्य, 'गजवाजिरत्नकनकाद्युपायनं प्रभवे प्रदाय जगद्गुर्जगत्पतिम् । कनकादि पाण्ड्यविभुरेक एव ते मदवान् समेत्य न ददात्युपायनम् (१२-८५) ॥ इति व्यजिज्ञपत् । 'इति भाषितेन वचसाऽरुणेक्षणः सचिवं जगाद स नृपस्तदाशयं । त्वमुपेत्य विद्धि, यदि चेदनानतः, क्षितिभृत्स, याति पवितामसिर्मम (१२-८६)' ॥ इति च जगर्ज ।

नृपादेशात् विचक्षणः सचिवो गाङ्गेयः पाण्ड्यजनपसभां प्रविश्य, ससचिवैर्नृपतिकुमारैः प्रतापिसुभटैस्समावृतं मणिसिंहासनारूढं पट्टुसिंहविक्रमं पाण्ड्यराजमपश्यत् । पाण्ड्यविभुश्च उचितासनं दत्वा किमिहागतोऽसि ?

तव भूपतिः कुशली वा ? इत्यपृच्छत् । सचिवस्तु 'प्रथितप्रतापनिधि-रीशभक्तिमान्, कुशली कलापनृपनीतिकोविदः । बलवानतर्क्यमहिमा च मत्प्रभुः प्रतिपक्षकक्षपटदावपावकः (१२-९२)॥ सकलभूपकदम्बकमपि स्वयमेवागत्य अभिवन्द्य च स्वं स्वं उपायनं ददाति । त्वमेकः केवलं न दत्तवान् । अतः तवानयनार्थं विभुना प्रेषितोऽहम् । तस्मात् त्वमागत्य, मत्प्रभु-पदाम्बुजे निपत्य तस्मै उपदां समर्पय । नो चेत् शत्रोस्तव पुरीं शबरकेलि-गृहं करिष्यति । क्षमान्वितः गुणशाली रिपुदुर्जयः मत्प्रभुः कृतागसं त्वां प्रतिबोधितुं मामत्र प्रेषितवान् । यदि विमुखोऽसि तदा स न क्षमते । सर्वेऽपि सुन्दरचोलचक्रवर्तिनमनुसृतवन्तः । त्वमप्यनुसर । तव कीर्तिश्च विस्तारिता भवति । अन्यथा वृथा विनश्यसि इति अकथयत् ।

तच्छ्रुत्वा मत्तः कुपितश्च पाण्ड्यभूपालः 'चपल ! किं बहुधा परिभाषसे मम पुरस्स्वपतेः पटु पौरुषम् । तव वचः परिशिक्षितमन्यथा प्रकृतिसिद्धमिदं किमिहोच्यताम्' (१२-१०५) ।। 'इतरविद्विषदर्दन-गर्वतस्तव पतिः किल मामपि तादृशम् । स मनुते यदि सङ्गरसङ्गतः सपदि वेत्स्यति मत्करकौशलम्' (१२-१०६) ।। करिकरादिव हंसशिशुर्बिसं मम करात्करमिच्छति ते पतिः । न हि ददामि तमाहवभूतले, प्रतिददामि नखक्षतभूषणम्' (१२-१०७) ।। अतः तेन साकं योद्धुमेव समुत्सहे । एतत्कथय तव प्रभवे इति अमात्यवचांसि बोधरूपाणि धिक्चकार ।

सचिवो गाङ्गेयस्तु 'विधिविवञ्चित एषः' इति मनसि आलोचयन् उत्थाय, द्रुतं करिपुरमागत्य परिमिताप्तजनैस्सहितं विभुं प्रति 'परुषवर्णविवृद्धि-वितर्जिता नृप विसन्धिरपास्तरसस्थितिः । कुकविवागिव दुष्टपदान्विता, गदितवागपि तेन न रोचते (१२-१११)॥ मम वचांसि स कुमतिः

तिरस्कृत्य समरे मनः निक्षिप्तवान् । दुरभिमाननिरस्तनयक्रमः प्रणयवाग्भिश्च न शाम्यति इति न्यवेदयत् ।

इति कथितवचोभिर्मन्त्रिणा स क्षितीशः
सपदि निजभुजाग्रं तिर्यगालोक्य रोषात् ।
करधृतखरखड्गं चालयन् सप्रतिज्ञः
प्रबलरिपुतमोऽर्कः प्रोत्थितस्सिंहपीठात् ॥ (१२-११३)

अथ पितरमुपेत्य स्वीयमन्तःपुरस्थं
यमिवरमभिवन्द्याशेषविज्ञप्तकार्यः
रणकृततदनुज्ञः सम्यगभ्यर्च्य शम्भुं
प्रथितशुभमुहूर्ते प्रस्थितोऽभूत्कुमारः ॥ (१२-११४)

इत्ययं कथासारः कविकर्णरसायनस्य द्वादशसर्गपर्यन्तस्य ॥

प्रस्तावनोदाहृतग्रन्थसङ्केतविवरणम्

अ. सू.	अनुभवसूत्रम् (मायिदेवप्रभुः)
उ. नी. म.	उज्ज्वलनीलमणिः (रूपगोस्वामी)
उ. रा. च.	उत्तररामचरितम् (भवभूतिः)
क. क. च.	कर्णाटककविचरिते (आर्. नरसिंहाचार्य)
क. क. र.	कविकर्णरसायनम् १-२ सर्गौ (एस्. जि. काडदेवरमठ, बार्सी १९३०)
क. क. र. व्या.	कविकर्णरसायनव्याख्या (वेङ्कनसुधीः)
क. क. र. व्या. पी.	कविकर्णरसायनव्याख्यानपीठिका (वेङ्कनसुधीः)
क. का. त.	कन्नडदल्लि काव्यतत्त्व (डा. के. कृष्णमूर्ति)
का. द.	काव्यादर्शः (दण्डी)
किटल्कोशः	किटल्कोशः (डा. रे. एफ्. किटल्)
को. ब. पु.	कोट्टूरुबसवपुराण (बसवलिङ्गकवि)
कै. उ.	कैवल्योपनिषत्
त्रि. पु. वि.	त्रिषष्टिपुरातनविलास (सुरङ्गकवि)
ना. भ. सू.	नारदभक्तिसूत्रम् (नारदः)
ना. शा.	नाट्यशास्त्रम् (भरतः)
प्र. ली. का.	प्रभुलीलाकाव्यम् (सम्पादकः—डा.जि. मल्लसिद्धय्यः मैसूरुविश्वविद्यानिलयः १९६६)

पार.	पारमेश्वरागमः (सोलापूर)
पे. पु.	पेरियपुराणम् (शेक्किळार्)
ब. व.	बसवेश्वरवचनगळु (डा. पि. जि. हळकट्टि बिजापुर)
ब. रा. वि.	बसवराजविजय (षडक्षरीश)
भ. र.	भक्तिरसायनम् (मधुसूदनसरस्वती)
भ. र. सि.	भक्तिरसामृतसिन्धुः (रूपगोस्वामी)
भ. वि.	भक्तविलासः (अगस्त्यः)
भा. म. च. को.	भारतवर्षीयमध्ययुगीनचरित्रकोशः (सिद्धेश्वरशास्त्री चित्रांव पूना १९३७)
म. भा. प्र.	महानुभावप्रकाशिके (सं—एच्. आर्. महान्तय्य, तुमकूरु)
म. स्त. टी.	महिम्नस्तवटीका (सोसले रेवणाराध्य)
मै. डि. शा.	मैसूरुडिस्ट्रिक्ट् शासनगळु भाग २
य. च.	यशोधरचरितम् (वादिराजः)
र.	रगळेगळु (हरिहर-पम्परसरु)
र. र.	रसरत्नाकर (साळ्व)
रा. क.	राजवळीकथे (देवचन्द्र)
रा. वि	राजशेखरविळासम् (क. वि. धारवाड)
रा. वि. प्र.	राजशेखरविलासप्रस्तावने (,,)
रे. वि.	रेणुकविजयचम्पू (अभिनवकालिदास बसवप्पशास्त्री, बेंगळूरु)
लिं. पु.	लिङ्गपुराणम् (व्यासः)

वि.	विक्रमोर्वशीयम् (कालिदासः)
वि. चिं.	विवेकचिन्तामणि (निजगुणशिवयोगि, मद्रास् १८६७)
वि. चू	विवेकचूडामणिः (शङ्कराचार्यः)
वि. प्र.	विशेषार्थप्रकाशिका (मायिदेवप्रभुः)
वी. मा. सं.	वीरमाहेश्वराचारसङ्ग्रहः भाग १, २, ३ (सोलापुर)
वी ध. सं.	वीरशैवधर्मसङ्ग्रह (मासिकभाषापत्रिका सं. मागडि एस्. वीरप्पशास्त्री १९२५)
श. शं. वि.	शबरशंकरविलास (क. वि. धारवाड)
शां. भ. सू.	शाण्डिल्यभक्तिसूत्रम्
शि. भ. वि.	शिवभक्तविलासः (उपमन्युः)
शि. र.	शिवाधिक्यरत्नावलिः (षडक्षरीशः)
शि. ल. व्या.	शिवानन्दलहरीव्याख्या (वेङ्कनसुधीः)
श्री. म. वं.	श्रीमन्महाराजवंशावलि भाग १ (बि. रामकृष्णराव् मैसूरु. १९१६)
शृं. प्र.	शृङ्गारप्रकाशः भाग १ (भोजः, मैसूर. १९५५)
शृं. र. मं	शृङ्गाररसमञ्जरी
सि. शि.	सिद्धान्तशिखामणिः (शिवयोगी, सोलापुर)
सी. पु. ष.	सीमापुरुषषडक्षरदेव (धारवाड)
सूक्ष्मा.	सूक्ष्मागमः (सोलापुर)
सं. रा. वि. उ.	संक्षिप्तराजशेखरविलास उपोद्घात (सं. टि. एन्. चन्नप्प बेंगळूरु)

हा. पा. — हागलवाडि पाळ्यगाररु (एम्. एस्. पुट्टण्ण)

हा. अ. वृ. — हागलवाडि अरसुवृत्तान्त (शिवानुभवमासपत्रिके संपुट ७, संचिके ४, पृ. २५०-२६७, पि. जि. हळकट्टि विजापुर)

History of Classical Sanskrit Literature. (By M. Krishnamacharya)

शुद्धिपत्रिका

१ प्रस्तावनायम्—

पुटः	पङ्क्तिः	अशुद्धपाठः	शुद्धपाठः
7	18	विद्वत्सचिष्वेकः	विद्वत्सचिवेष्वेकः
12	6	शकाब्दे स्थिरवासरे	शकाब्दे कालयुक्ताब्द-फाल्गुनबहुळसप्तम्यां स्थिरवासरे
12	8	२२-१-१६७९	२२-२-१६७९
12	13	२२-१-१६७९	२२-२-१६७९
26	9	भक्तिरसायनसिन्धौ	भक्तिरसामृतसिन्धौ
29	18	–वित्वेन	कवित्वेन

२ ग्रन्थे—

पुटः	पङ्क्तिः	अशुद्धपाठः	शुद्धपाठः
२	३	स्वीयैकसतिसुखं सङ्गमुपैति	स्वीयैकसङ्गतिसुखं समुपैति
३	१५	सांशोभिना	संशोभिना
६१	६	जाड्याभरितः	जाड्यभरितः
६२	४	स्फुरत्तारा मुक्ताखचित	स्फुरत्तारामुक्ताखचित
२०३	१६	पुराद्दशोः	पुरा दृशोः
२८०	३	स्मृतमृ....शूलिन	स्मृतमृडवचः शूलिन
४४२	२	पलाशपिहिताङ्गशुकानने	पलाशपिहिताङ्गशुकाननैश्च

३ पद्यानामाकारादिसूच्याम्—

	अशुद्धपाठः सर्गः-पद्यम्	शुद्धपाठः सर्गः-पद्यम्
अजाण्डभाण्डार्क	५-५०	८-४९
उद्वेजयन्ति	२-१९	२-२९
कान्ताकराम्बुज	-३७	२-३७
कामतोऽहममियामि	११- ४	११-५४
कालचैत्र	११-१८	११-१०
कालरत्न	६-४०	६-४८
निक्वणत्कटक	१०-२६	११-२६
निपीतशीतांशु	८-६६	८-६५

४ कोशाकारादिसूच्याम्—

कुमारः	१-४७	१-९७

विषयानुक्रमणिका

कविकर्णरसायनम्

(चोलभूपालीयम्)

ॐ

षडक्षरीशविरचितं

कविकर्णरसायनम्

(चोळभूपालीयम्)

श्रीमद्वेङ्कनसुधीविरचितसाहित्यसुधोदयसहितम्

व्याख्यातृपीठिका मङ्गलाचरणम्

*श्रीमद्भूधरकन्यकाकरपुटन्यस्ता[1][:][1] क्षणं मस्तके
शम्भोरिन्दुविभूषणस्य जगतां नाथस्य पाणिग्रहे ।
यास्तारा अभिसारिकापदमनुप्राप्ता इवोच्चैर्बभु-
र्मुक्तास्ताः कलयन्तु नः प्रतिकळं कल्याणपारम्परी[2][:][2] ॥ १ ॥

---

* टिप्पणी — व्याख्यातुः श्रीमद्भूधरकन्यकेत्यादिपद्यमारभ्य वर्णाध्वा परिकीर्तित इति प्रथमपद्यव्याख्यानभागान्तं यावत् कघयोर्मातृकयोर्न विद्यते ।

[1] लुप्तः [ग, च]   [2] लुप्तः [ग, च]

गौरीविलोचनसरोज[1][पि][1]धानलीला-
वेळासु यस्य हरिणः करसन्निबद्धः ।
[2][स्वी][2]यैकसतिसुखं सङ्गमुपैति भूयः
[3][श्रे][3]यस्स मे दिशतु कोऽपि महानुभावः ॥ २ ॥

प्रोत्साहयितृमुदियक्षितिपालवंशवर्णनं—तत्पितृगुणवर्णनम्

शैवार्चनेन महतेतरदुर्लभेन
सम्पन्नमान्यमहिमा महनीयकीर्तिः ।
श्रीसालिराजकुलवारिधिपूर्णचन्द्रो
भातिस्म [4][चेन्न][4]बसवक्षितिपालमौलिः ॥ ३ ॥

यस्योदात्तगुणोत्तरस्य महतः प्रज्वाल्य तेजो[5][न][5]तान्
धा[6][रा][6]भिर्भटधीरघोषपटुवैराजिक्ष्मावेदिषु ।
हुत्वेहात्मपशूनरिक्षितिभुजः साङ्गप्रधानं तत-
[7][स्स्वा][7]राज्यैकफलानुभूतिरसिकास्सर्वे भवन्तीक्षणात् ॥ ४ ॥

मुदियमहीपालवर्णनम्

तस्या[8][सौ त][8]नयो विभाति **मुदियक्ष्मामण्डलाखण्डलः**
सत्कीर्तिर्यरघ[9][ट्ट][9]शासनधुरं बिभ्रत्प्रतापोज्ज्वलः ।

---

[1] वि (ग, च) [2] श्वा (ग, च) [3] श्रि (ग, च) [4] चं न (ग, च)
[5] न्न (ग) [6] र्या (ग, च) [7] स्वा (ग, च) [8] भूत्त (ग, च)
ट्टि (ग, च)

श्रीमान् योगकळाविशेषबहुलाभ्यासातिरेकात्सदा
प्रो[1][द्य][1]च्छैवसुखानुभूतिम[2][हि][2]तः सद्धि[3][द्य][3]या विश्रुतः ॥ ५ ॥

लोके न सन्ति कति वा प्रभुनामभाजः
किं ते भवन्ति मुदियक्षितिपालतुल्याः ।
किं वा प्रभाकरमपास्ततमिस्रजालं
खद्योतनामकतया तुलयन्ति कीटाः ॥ ६ ॥

यस्योदग्रयशोदुकूलममलं सद्भिर्गुणै रञ्जितं
संवीतं ततिभिर्दिशां घनतरं नूनं पिधत्तेतराम् ।
भाग्यं वज्रिणि दुष्ट[4][शासनघन][4]प्रौढिं सुते भास्वतो
विख्या[5]तां[5] वरुणे महासरसतां श्रीदे [6]विविश्राणनाम्[6] ॥ ७ ॥

मुदियमहीपालस्य गुरुप्रसादवैभववर्णनम्

दोर्दण्डाञ्चितचण्डविक्रमरविप्रद्योतपोतैः पुनः
श्रीमुद्वीरगुरुप्रसादसुलभस्वात्मप्रकाशैरपि ।
बाह्याभ्यन्तरवैरिणो विनिहताः दुर्वारदुर्वृत्तयो
ये[7][नै][7]वाहतवीरशान्तिगुणसन्धानैकरसं ।शोभिन॥ ८ ॥

---

[1] ज्य (ग, च) [2] ह (ग, च) [3] द्वि (ग, च) [4] सनघन (ग, च)
[5] तं (ग) [6] विविश्राननां (ग) विश्राननां (च) [7] ने (ग, च)

मुदियक्षितिपालकृतव्याख्यातृसम्मानवर्णनम्

[1][सो][1]ऽयं साधुगुणोन्नतिर्मुदियभूपालः कृपालुर्महा-
काव्यं चारु षडक्षरीश्वरकवेर्विद्वज्जनैर्लालितः ।
व्याख्येयं भवतेति यस्य विदधे सम्मानमर्घाधिकै-
र्वि [2][द्धि][2]स्सह[3]वाजि[3]वस्त्रविविधालङ्कारमुख्यैर्मुहुः ॥ ९ ॥

मुदियमहीपतेः सत्कवित्वादिवर्णनम्

विद्वल्लालित ! सत्कवीशरचनाप्रौढे ! श्रुताभ्यन्तरा-
खेल[4]त्कौतुक[4] ! धीस्वयंवरभुवस्सञ्जातसत्सङ्ग ! ते
धीरोदार ! धरामरेन्द्रपरिषच्छ्लाघाभृ[5][तस्स][5]र्वतः
[6][वि][6]ख्यातिं विविधावदानमबलोल्लासाः सदा कुर्वते ॥ १० ॥

कविकाव्यविषये व्याख्यातुरभिप्रायः

कवि[7]कर्ण[7]रसायनसत्काव्यस्य नवामृतरसमधुरस्य ।
सोऽहं कुर्वे व्याख्यां साहित्य[8]सु[धो][8]दयाभिख्याम् ॥ ११ ॥

---

[1] सा (ग, च) [2] द्धिः (ग) ड्डिभ (च) [3] वारिज (च)
[4] त्कोतुल (ग, च) [5] तं स (ग, च) [6] लुप्तः (ग, च)
[7] करण (ग, च) [8] धे (ग, च).

कविकर्णरसायनमहाकाव्यम्

(चोळभूपालीयम्)

प्रथमस्सर्गः

१

यश्शाश्वतैश्वर्यनिधिस्सुधांशु-
कान्तोत्तमाङ्गः प्रणतामरागः ।
अध्वान्तवर्ती सदयो गणेन्द्र-
स्स पातु नन्दीशविभुश्शिवो [1]वः[1] ॥

इह खलु निखिल[2]कला[2]कलापविज्ञानसमधि[3][गतनैपुणी][3]समे[4]धि[4]त-बहुविधमधुरकविताविशारदः शारदसुधाकरचन्द्रिकाविनिर्मलचित्तः चित्तजाराति-कृपामृतरससेचनपरिहृतसंसृतिजनितसन्तापः तापसजनमान्यपुण्यचरितः सक[5][ल][5] सुधीसमूहश्लाघनीयसरससद्वचोविस्तरविन्यासविलासचातुरीधुरीणः कोऽपि महा-कविः षडक्षरिदेवनामा समस्तकामनादिमुक्तोऽपि जगद्धितैक[6][कामनया][6]

---

[1] नः (ग) [2] कळा (च) [3] कतनैकुणि (ग, च) [4] दि (ग, च)
[5] लुप्तः (ग, च) [6] कमननया (ग), कमनया (च)

'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥ '

इत्यनेकफलसाधनभूतमभिनवं महाकाव्यं चिकीर्षुर्निष्प्रत्यूहतत्परिमाप्तये शिष्टाचारानुमि[1][त][1]श्रुतिबोधितकर्तव्यताकं मङ्गलमादौ निबध्नाति—य इति ॥ यः शाश्वतस्य स्थिरतरस्य ऐश्वर्यस्य अणिमादिविभूतेः निधिः निवासः । सुधांशुना चन्द्रेण कान्तं मनोहरमुत्तमाङ्गं शिरो यस्य स तथोक्तः 'उत्तमाङ्गं शिरश्शीर्षमि'त्यमरः । प्रणतः नम्रीकृतः अमराणां सुराणां अगः पर्वतो मेरुर्येन स तथोक्तः मेरुशरासन इत्यर्थः । ' उपसर्गादसमासेऽपि णोपदेशस्ये'ति णत्वम् । अध्वान्ते वर्णाध्वादिषट्कान्ते वर्तत इति तथोक्तः । तदुक्तं मृगेन्द्रे—

' वर्णाध्वा च पदाध्वा च मन्त्राध्वाऽपि ततः परः ।
भुवनाध्वाथ तत्त्वाध्वा कलाध्वेति प्रकीर्तित ' ॥ इति ।

तत्र 'प[2]ञ्चाशद्व[2]र्णात्मको वर्णाध्वा । तदुक्तं 'प[3]ञ्चाशद्व[3]र्णसंयुक्तो वर्णाध्वा परिकीर्तित' इति । [4] 'प्रणवश्चैकाशीतिपदात्मकः पदाध्वा । एकादशमन्त्रात्मको मन्त्राध्वा'[4] । शान्त्यतीतकलायां पञ्चदश भुवनानीत्यादिक्रमेण पञ्चकलाप्रतिष्ठितचतुर्विंशत्युत्तरशतद्वयात्मको भुवनाध्वा । तदुक्तं — 'चतुर्विंशाधिकशतयुग्मेन भुवनाध्वक' इति । भूततन्मात्रादिषट्त्रिंशत्तत्त्वात्मकस्तत्त्वाध्वा ।

---

[1] ति [ग, च] [2] दशद्व [ग] दशद्वव [च] [3] दश [ग, च]
[4] सर्वमातृकासु च लुप्तभागः । वार्सिनगरे मुद्रितग्रन्थटिप्पणीतः संगृहीतः पाठोऽयम् ( )

उक्तञ्च—'षट्त्रिंशत्तत्त्वसङ्घातस्तत्त्वाध्वा परिकीर्तित' इति । कलाध्वा [1]तु[1] निवृत्त्यादिपञ्चकलात्मकः । तदप्युक्तं—

'निवृत्ति[2]श्च[2] प्रतिष्ठा च विद्या शान्तिश्च पञ्चधा ।
शान्त्यतीतेति विख्यातः कलाध्वा शिवसम्मत' ॥ इति ।

सदयः कृपासहितः 'तेन सहेति तुल्ययोग' इति तृतीयान्तेन सहशब्दस्य समासे 'वोपसर्जनस्ये'ति सहेत्यस्य सभावः । गणेन्द्रः प्रमथाधिपः । भवतीति शेषः । नन्दीशस्य नन्दिकेश्वरस्य विभुः स्वामी सः तादृशः शिवः ईश्वरः, वयं च यूयं च यूयं, तान् वः पातु रक्षतु । पा रक्षण इति धातोः प्रार्थनायां लोट् । व इत्यत्र 'त्यदादीनां मिथस्सहोक्तौ यत्परं तच्छिष्यत इति वाच्यमि'त्येकशेषः* ।

अथवा [3]यः[3] शाश्वतैश्वर्यनिधिः स्थिरतरप्रभावशाली सुधांशुश्चन्द्र इव कान्तमुत्तमम् अङ्गं शरीरं यस्य स तथोक्तः । 'अङ्गं गात्रान्तिकोपायप्रतीकेषु प्रधानक' इति विश्वः । प्रणतानां नम्रजनानां 'कर्तरि क्तः' । अमरागः कल्पद्रुमः भक्ताभीष्टफलप्रद इति यावत् । 'शैलवृक्षौ नगावगा'वित्यमरः । अध्वान्तवर्ती सदयः गणेन्द्रः शिवभक्ताग्रेसरः भवति । सः शिवः मङ्गलात्मकः नन्दीश एव विभुः प्रभुः वः पात्विति सम्बन्धः ।

अत्रादौ यवर्णप्रयोगो लक्ष्मीप्रदः । तदुक्तं लक्षणसा[4][रे][4]—'मकारः क्षोभकृद्यस्तु श्रीदो रेफस्तु दाहकृदि'ति । अतएव शाकुन्तले — 'या सृष्टिः

---

[1] नास्ति [ग] [2] श्च [ग, च] * 'पूर्वशेषोऽपि दृश्यतेइति भाष्यम्' इति सिद्धान्तकौमुद्याम् । [3] नास्ति [क] [4] रि [क, ग, च]

स्रष्टुराद्ये'ति कालिदासः । [1]यद्यपि वा युगणे भ्रमति गगनके शून्यमित्युक्तत्वात्[1] (?) आदौ तगणप्रयोगो निन्दितः । तथापि निषेधवचनममित्रगणयुक्ततगणविषयम् । तदुक्तं साहित्यचन्द्रोदये --

'सौम्यग्रहाधिष्ठितत्वात्तगणः सु[2]ग[2]णोऽपि च ।
मित्रामित्रगणैस्साकं शुभाशुभफलप्रद' ॥ इति ।

अतएव चम्पूरामायणे — 'लक्ष्मीं तनोतु नितरामि'ति भोजः । 'अस्ति त्रिनेत्रप्रभव' इत्यगस्त्यकविश्च । उपजातिवृत्तं 'स्यादिन्द्रवज्रा ततजास्ततो गौ'। 'उपेन्द्रवज्रा जतजास्ततो गौ' 'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ता' इति लक्षणात् ॥ १ ॥

२

विश्वाधिको विश्वमयोऽप्रमेयः
षडङ्गकल्याणगुणाभियुक्तः ।
विधोर्विधातुर्वरदः प्रसन्नः
पायात्पतिश्शैलभुवश्शिवो नः ॥

सकृन्मङ्गलाचरणेऽपि [3]कतिषुचिन्निबन्धनेषु निर्विघ्नसमाप्तेरदर्शनात् विघ्नप्राचुर्यशङ्कया नत्यादिरूपाणि बहुविधानि मङ्गलानि पुनस्त्रयोदशभिः श्लोकै-

---

[1] द्यवि वायुगणे भ्रमति गगने शून्यमित्युक्तत्वात् [क] [2] गु [क]
[3] काव्येषु क्वचि [क]

विधत्ते—विश्वेति ॥ विश्वाधिकः सर्वोत्कृष्टः विश्वमयः जगत्स्वरूपः अप्रमेयः प्रमातुमशक्यः षडङ्गानि भक्तमाहेश्वरप्रसादिप्राण[1][लिङ्गिशरणै][1]क्याभिधानानि [2]स्थूलषडङ्गानि[2] भक्तिकर्मक्षयबुद्धिविचारदर्पसंक्षयसम्यग्ज्ञानाख्यानि सूक्ष्मषडङ्गानि वा सर्व[3][ज्ञ][3]शक्तितृप्तिशक्त्यनादिप्रबोधशक्तिस्वतन्त्रशक्त्यलुप्तशक्त्यनन्तशक्त्याख्यानि कारणषडङ्गनि वा तैः कल्याणगुणैरैश्वर्यसमृद्ध्यादिभिर्युक्तः संयुतः विधोर्विष्णोः 'विधुर्विष्णौ चन्द्रमसी'त्यमरः । विधातुर्ब्रह्मणः वरं ददातीति वरदः 'आतोऽनुपसर्गे कः' इति कप्रत्ययः । प्रसन्नः सुमुखः शैलात् पर्वतात् भवति जायत इति शैलभूः गिरिजा तस्याः पतिः शिवः शङ्करः [4]नः[4] अस्मान् पायात् रक्षतु । आशीर्लिङ् । उपजातिवृत्तम् ॥ २ ॥

३

द्विजेन्द्रकोटीरमजेन्द्रवन्द्यं
भुजङ्गभूषाङ्गमजिह्मवृत्तम् ।
गुणाधिकं सर्वगणाधिनाथं
प्रणौमि शम्भुं प्रणवाभिधेयम् ॥

द्विजेन्द्रेति ॥ द्विजेन्द्रश्चन्द्रः कोटीरे मौलौ यस्य सः तथोक्तः तम् । अजः ब्रह्मा विष्णुर्वा 'अजो हरे हरौ कामे विधौ छागे रघोस्सुत' इति विश्वः । इन्द्रः वासवः ताभ्यां वन्द्यं नमस्कार्यम् । भुजङ्गाः सर्पा एव भूषा आभरणानि अङ्गेष्ववयवेषु यस्य स तथोक्तः तं भुजङ्गभूषाङ्गम् । अजिह्मवृत्त-

---

[1] लिङ्गैक्या [क, ग, घ, च] [2] नास्ति [क घ] [3] ग [क, ग, घ, च]
[4] नः इति मूले, वः इति व्याख्याने [क]

मकुटिलचरित्रं 'वृत्तं पद्ये चरित्रे चे'त्यमरः । गुणैरधिकम् उत्कृष्टम् । सर्वेषां गणानां प्रमथानामधिनाथमधिपतिम् । प्रणवस्य ॐकारस्याभिधेयं प्रतिपाद्यम् । शम्भुं शं सुखमस्माद्भवतीति शम्भुः 'तं शङ्करशब्दितं'[1] प्रणौमि नमामि ॥ ३ ॥

४

पादाङ्गदप्रध्वनिरादिशास्त्रं
पात्रं करे स्थानमनादिवाचाम् ।
विद्या भवेद्यस्य परा च शक्तिः
ददातु मे साधुमतिं महेशः ॥

पादेति ॥ यस्य शिवस्य पादाङ्गदप्रध्वनिः पादाङ्गदस्य पादकटकस्य प्रध्वनिः शिञ्जितं 'पादाङ्गदं तुलाकोटि'रित्यमरः । आदि प्रथमं शास्त्रं व्याकरणं भवेत् । खण्डपरशुताण्डवोत्सवसमये तस्य क्वणन्मञ्जीरशिञ्जितरूपेण चतुर्दशसङ्ख्याकानि वैयाकरणसूत्राण्याविर्बभूवुरितीतिहासपुराणागमेषु बहुप्रसिद्धम् । यस्य करे पात्रं भाजनमनादिवाचां श्रुतीनां स्थानमाश्रयः भवेत् । ब्रह्मकपा[2]लधारणा[2]दिति भावः । यस्य विद्या ज्ञानं क्रिया वा परा च शक्तिः परशक्तिर्भवेत् । स इति शेषः । महेशः [3]परमे[3]श्वरः 'आन्महतस्समानाधिकरणजातीययो'रिति महच्छब्दस्याकारोऽन्तादेशः । मे मह्यं सम्प्रदानत्वात् चतुर्थी । साधुमतिं सद्बुद्धिं ददातु वितरतु । डु दाञ् दान इति धातोः प्रार्थनायां लोट् ॥ ४ ॥

---

[1] शङ्करं तं [ग, च] [2] ला [क] [3] महे [क]

५

रमासमासेवितपादपद्मां
उमाममेयाममितप्रभावाम् ।
कुमारहेरम्बसमाश्रिताङ्कां
नमामि देवीं हिमवत्तनूजाम् ॥

रमेति ॥ पादौ पद्मे इवेति नोपमितसमासः । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोग' इति स्मरणात् । अत्र रमासमासेवितेति सामान्यप्रयोगात् । किन्तु पादावेव पद्मे इति समासः । कमलस्यापि लक्ष्मीनिवासत्वात् । रमया लक्ष्म्या समासेविते पादपद्मे यस्यास्तां तथोक्ताम् । अप्रमेयामविज्ञेयाममितप्रभावामपरिच्छिन्नमहिमशालिनीं कुमारहेरम्बसमाश्रिताङ्कां कुमारः स्कन्दः हेरम्बो विनायकः ताभ्यां समाश्रितः अधिगतः अङ्कः यस्यास्तां तथोक्ताम् 'उत्सङ्गचिह्नयोरङ्क' इत्यमरः । हिमवत्तनूजां हिमवतो गिरीन्द्रस्य तनूजां तनयां देवीं देवतात्मकां 'जातेरस्त्रीविषयादयोपधादि'तिं ङीप् । उमामम्बिकाम् 'उमा कात्यायनी गौरी'त्यमरः । नमामि नमस्करोमि । णम प्रह्वत्वे शब्दे चेति धातोर्लट् ॥ ५ ॥

६

कुम्भीभुवो देशिकतोपपन्नः
सन्दर्शिताम्नायशिरोरहस्यः ।
सोमेशलिङ्गप्रभवः शिवात्मा
'श्रीरेणुकः' पातु महागुरुर्मे ॥

कुम्भीति ॥ कुम्भीभुवः कलशसम्भवस्य 'कुम्भीतिपाटलापारिपर्णेपिठरतल्पल (?)' इति विश्वः । देशिकतोपपन्नः [1]देशिकतां गुरुत्वमुपपन्नः[1] प्राप्तः सन्दर्शिताम्नायशिरोरहस्यः सन्दर्शितं बोधितमाम्नायशिरसां वेदान्तानां रहस्यं गूढार्थो येन स तथोक्तः । सोमेशलिङ्गप्रभवः सोमेश इति स्थावरलिङ्गविशेषः तस्मादुत्पन्नः शिवात्मा महेश्वरस्वरूपः मे मम महागुरुर्देशिकः श्रीरेणुकः रेणुकाराध्यः पातु रक्षतु ।

पुरा किल सकलतत्त्वजिज्ञासुनाऽगस्त्येन प्रार्थितः सदाशिवः कुतश्चन स्थावरलिङ्गात् श्रीरेणुकगणेश्वररूपेण प्रादुर्भूतस्तस्मै तत्त्वमुपदिदेशेति कथा प्रसिद्धा । इन्द्रवज्रावृत्तं 'स्यादिन्द्रवज्रा ततजास्ततो गौ' इति लक्षणात् ॥ ६ ॥

७

शिवैकभक्त्युद्गमचञ्चरीकान्
भवानुभावामृतराजहंसान् ।
मृडागमाम्भोजसहस्रभानून्
महागणान् सन्ततमानतोऽस्मि ॥

शिवेति ॥ शिव एवैकस्मिन् भक्तिस्सैव उद्गमः पुष्पम् 'उद्गमः प्रसवः पुष्पमि'ति धनञ्जयः । तस्य चञ्चरीकान् भृङ्गान् निरन्तरशिवभक्तिनिरतानिति

---

[1] देशिकत्वात् गुरुस्समुपपन्नः [क] देशिकत्वगुरुत्समुपपन्नः [घ] देशिकत्वां गुरुत्वमुपपन्नः [च]

भावः । भवानुभावामृतराजहंसान् भवानुभावः शिवानुभाव एव अमृतं सुधा जलं वा तस्य राजहंसान् सितच्छदविशेषान् 'राजहंसास्तु ते चञ्चुचरणैर्लोहितैस्सिता' इत्यमरः । यथा मानसौकसोऽमृतरसैकसेवकास्तथा भवानुभावैकबद्धभावा इति भावः । मृडागमाम्भोजसहस्रभानून् मृडागमाश्शैवशास्त्राण्येवाम्भोजानि राजीवानि तेषां सहस्रभानून् भास्करान् पुण्डरीकषण्डस्फुटीकरणपाण्डितीप्रचण्डमार्तण्डवत् शैवशास्त्रप्रवर्तनप्रथितप्रतिभाशालिन इति भावः । महागणान् प्रमथान् सन्ततं निरन्तरं आनतः नम्रः 'कर्तरि क्तः' अस्मि । अस भुवीति धातोर्लट् । उपेन्द्रवज्रावृत्तम् । 'उपेन्द्रवज्रा जतजास्ततोगा'विति लक्षणात् ॥ ७ ॥

८

वपुर्मनः प्राणहृषीकनित्यं
संमुक्तसद्रूपचिदङ्गलिङ्गान् ।
शिवोक्तसन्मार्गचरान् वरिष्ठान्
नमाम्यहं भक्ति[1]मतो[1]गणेन्द्रान् ॥

वपुरिति ॥ अहं वपुषा शरीरेण मनसा अन्तःकरणेन प्राणैः हृषीकैरिन्द्रियैश्च नित्यं संमुक्ता विनिर्मुक्ता सद्रूपिणी चित् संविदेव अङ्गलिङ्गे येषां तान् तथोक्तान् प्रारब्धकर्ममात्रवशात् शरीरेन्द्रियादिव्यापारवन्त इव लक्ष्यमाणा अपि स्वरसतो लिङ्गाङ्गसामरस्यान्यलक्षणब्रह्मात्म्यैक्यापत्त्या जीवन्मुक्ता एवेति भावः । शिवोक्तसन्मार्गचरान् शिवेन महेशेन उक्ते सन्मार्गे सत्पथे चरन्ति

---

[1] युत इति पाठस्समीचिन इति व्याख्याता ॥

प्रवर्तन्त इति तथोक्तान् शैवानुभावाचारानु[1][वर्तिनः][1] इति भावः । जननमरण-बुद्बुदायमानक्षणिकसुखैकहेतुकर्मैक[निष्ठाकृत्यकृत्यमतिमतो] जनान्तरादतिशय-शालिन इति सन्मार्गचरानिति सच्छब्देन गम्यते । अत एव वरिष्ठान् श्रेष्ठान् 'अतिशायिने तमबिष्ठनौ' इत्यतिशयार्थे इष्ठन् प्रत्ययः । भक्तिमतः भक्तियुक्तान् गणेन्द्रान् प्रमथश्रेष्ठान् नमामि । 'भक्तियुत' इति पाठस्समीचीनः । तदा अहमर्थविशेषणतया स्वारस्यलाभात् । उपजातिवृत्तम् ॥ ८ ॥

९

करीन्द्रवक्त्राय गिरीन्द्रकन्या-
सुताय सूक्त्यब्धिसुधाकराय ।
सुपर्वपूर्वामरसेविताय
नमोऽस्तु निर्विघ्नसुखप्रदाय ॥

करीति ॥ गिरीन्द्रस्य हिमवतः कन्या कुमारी तस्याः सुताय पार्वतीपुत्रायेति यावत् । सूक्त्यब्धिसुधाकराय सूक्तय एव अब्धिरुदधिस्तस्य सुधाकराय चन्द्रायेत्यभेदाध्यवसायः । यथा चन्द्रस्सिन्धु[2]वृद्धिं[2] विदधाति तथा [3]स[3]त्कवितासङ्घटनपटीयानेकदन्त इति भावः । सुपर्वपूर्वामरसेविताय सुपर्वभिः सुरैः पूर्वामरैरसुरैश्च सेविताय । अनेन [4]सुरासुर[4]समूहस[5]मी[5]हित सकल-फलवितरणशक्तिमानयमस्मादृशानामाशास्यमपि विदधा[6]त्येवे[6]ति व्यज्यते ।

---

[1] वर्तत [क घ] [2] मब्धि [क घ] [3] त [क घ] [4] सकलसुर-सुर [क] संकासुरसुर [घ] [5] मा [क] [6] तीति [क]

निर्विघ्नसुखप्रदाय निर्विघ्नं निष्प्रत्यूहं यथा तथा सुखं प्रददातीति तथोक्तस्तस्मै करीन्द्रवक्त्राय गजाननाय नमः अस्तु । 'नमस्स्वस्तिस्वाहास्वधाऽलं वषड्योगाच्चे'ति चतुर्थी ॥ ९ ॥

१०

निरस्तदोषाकरतारकौजाः
प्रभाकरस्सारसभासुरश्रीः ।
तमोहरश्शक्तिधरः करोतु
मनोऽम्बुजातस्य मम प्रबोधम् ॥

निरस्तेति ॥ निरस्तदोषाकरतारकौजाः निरस्तमपाकृतं दोषाणां पापानाम् आकरस्याश्रयस्य तारकस्य तन्नामकदैत्यस्य ओजः सुबलं येन स तथोक्तः । [1]अन्यत्र[1] निरस्तं दोषाकरस्य रजनीकरस्य तारकाणां नक्षत्राणां च ओजः तेजो येन स तथोक्तः । 'दोषस्तु दूषणे पापे दोषा रात्रौ भुजेऽपिचे'ति विश्वः । सारसभासुरश्रीः साराश्श्रेष्ठा सभायां सदसि सुराणां देवानां श्रीः प्रकाशो यस्मात् स तथोक्तः । दुष्टदनुजसंहारेण तेषां भयनिवारणकलनादिति भावः । अन्यत्र सारसानां सरसीरुहाणां भासुरश्रीः लक्ष्मीः यस्य स तथोक्तः तमोहरः शोकनिवर्तकः अन्धकारनिवर्तकश्च । 'तमो राहौ गुणे ध्वान्ते शोक' इति नानार्थरत्नमालायाम् । शक्तिधरः कुमारः 'षाण्मातुरश्शक्तिधरः कुमारः क्रौञ्चदारण' इत्यमरः । स एव प्रभाकरस्सूर्य इति व्यस्तरूपकम् । मम मनोऽम्बुजातस्य मनः मानसमेवाम्बुजात[2]मब्जं[2] तस्य प्रबोधं प्रकृष्टमतिमुन्मीलनञ्च करोतु विदधातु । डुकृञ् करण इति धातोर्लोट् ॥ १० ॥

---

[1] नास्ति [क घ]   [2] मब्जं [ग च]

११

महाप्रतापार्ककरावधूत-
मखागतामर्त्यमदान्धकारः ।
महेशफालानलनेत्रजातः
स नस्सदा रक्षतु वीरभद्रः ॥

महाप्रतापेति ॥ [1]महा[1]प्रतापा एवार्ककराः सूरकिरणास्तैरवधूत-स्तिरस्कृतः मखाय यज्ञायागतानां प्राप्तानाममर्त्यानां देवानां मदो गर्व एवान्ध-कारस्तमो येन स तथोक्तः । महेशफालानलनेत्रजातः महेशस्य फाले ललाटे अनल एव नेत्रं तस्माज्जातः समुत्पन्नः स प्रसिद्धः वीरभद्रः 'वीरभद्रोऽश्वमेधाश्वे वीरश्रेष्ठे च वीरण' इति विश्वः । वीरश्चासौ भद्रश्चेत्यन्वर्थसंज्ञा । नः अस्मान् रक्षतु । रक्षपालन इति धातोर्लोट् ॥

महेश्वरप्रद्वेषिणो दक्षस्य अध्वरमध्ये तत्कृतनिजभार्यावज्ञा[2]ऽऽकर्णन[2]-जनितरुषः परमे[3]श्वर[3]स्य ललाटतटादाविर्भूतो वीरभद्रस्तत्रत्यान् क्रतुभुजस्सर्वा-नप्यवज्ञाय तेषां गर्वनिर्वापणमकरोदिति कथाऽनुसन्धेया ॥ ११ ॥

१२

निरस्तमालिन्यवपुस्त्रिपादः
परास्तकामस्सुमनस्सुसेव्यः ।
शिवैकपक्षः श्रियमातनोतु
भृङ्गीश्वरो नः श्रितचित्रवृत्तः ॥

---

[1] नास्ति [क घ] [2] रण [क घ] [3] श [ग च]

निरस्तेति ।। निरस्तं निराकृतं मालिन्यं कालुष्यं नीलिमा च यस्य तत्तथोक्तं निरस्तमालिन्यं वपुर्यस्य स तथोक्तः निर्मलाङ्ग इति भावः । त्रयः पादा यस्य स त्रिपादः । परास्तकामः परास्तः निराकृतः कामो रागो मदनश्च येन स तथोक्तः । 'कामस्स्मरेऽभिलाषे च कामं रेतोनिकामयोरि'ति विश्वः । सुमनस्सुसेव्यः सुमनोभिर्देवैः पुष्पैश्च सुष्टु सेव्यः 'सुपर्वाणस्सुमनसः' 'स्त्रियस्सुमनसः पुष्पमि'ति चामरः । शिवैकपक्षः शिवः शम्भुरेव एकः पक्षः सहायो [1]गरुच्च[1] यस्य स तथोक्तः । 'पक्षस्सहायेऽपी'ति 'गरुत्पक्षच्छदाः पत्रमि'ति चामरः । अत एव श्रितचित्रवृत्तः श्रितमाश्रितं चित्रमद्भुतं वृत्तं चरित्रं येन स तथोक्तः भृङ्गीश्वरो मधुकरो मलिनाङ्गः षट्पदः कामानुकूलः सुमनस्सेव[2]न[2]परः कृष्णद्विपक्ष इति सार्व[3]जनीनम्[3] । अयं च, भृङ्गीश्वरस्तद्विलक्षणाङ्गगुणक्रियादिमानिति चित्रवृत्त इति भावः । भृङ्गी चासावीश्वरश्च भृङ्गीश्वरः भृङ्गिरिटिः । भृङ्गीणां भ्रमरीणामीश्वरो भ्रमरश्च । नः अस्माकं श्रियं सम्पदं विद्यां वा तनोतु । तनु विस्तार इति धातोर्लोट् ।। १२ ।।

१३

गणाग्रगण्यः कविराजमौलिः
कलाकलापः कलिकल्मषघ्नः ।
गुरुर्गुरूणां गुणरत्नसिन्धुः
'श्रीसोमनाथो'ऽस्तु जयी जगत्याम् ।।

गणेति ।। अग्रे गण्यत इत्यग्रगण्यः श्रेष्ठगणानां शिवभक्तानामग्रगण्यः गणाग्रगण्यः । कविराजमौलिः कवीनां राजानः कविराजाः कवीश्वराः ।

---

[1] गुरुश्च [ग] [2] ना [ग च] [3] नीलः [ग]

'राजाहस्सखिभ्यष्टजि'ति समासान्तष्टच्प्रत्ययः । तेषां मौलिः किरीटभूतः [1][इत्यभेदारोपः][1] कविप्रसिद्धिसम्पादक इति भावः । कलाः विद्याः कलापो-ऽलङ्कारो यस्य स तथोक्तः । कलौ युगविशेषे कल्मषं पापं हन्तीति कलि-कल्मषघ्नः । मूलविभुजादित्वात् साधुः । गुरूणां महतां गुरुः पूज्यः । गुणानामेव रत्नानां सिन्धुस्सरस्वानित्यभेदाध्यवसायः । यथार्णवो बहुतररत्नानामाश्रयस्तथा स समस्तसद्गुणानामाकर इति भावः । श्रिया विद्यया युक्तस्सोमनाथः [2]श्रीसोमनाथः[2] सोमनाथनामकशिवभक्ताग्रेसरः । जगत्यां भुवि 'जगती रत्नगर्भा चे'त्यमरः । जयी सर्वोत्कर्षवान् ।

अन्यार्थस्तु:—गणाग्रगण्यः प्रमथश्रेष्ठः । कविराजमौलिः कं जलं विराजते ऽस्यामिति कविराजमौलिस्संयतकचभरो यस्य स तथोक्तः । गङ्गाजलविराजित जटामण्डल इति भावः । 'अकर्तरि च कारके संज्ञायामि'त्यत्र [अ]संज्ञायामपीत्युक्तत्वात् घञ् । अथवा कविश्शुक्रो राजा चन्द्रस्तौ मौलौ यस्य स तथोक्तः व्योमकेश इति भावः । कला चन्द्रकला कलापो भूषणं यस्य स तथोक्तः । कलिकल्मषघ्नः कलियुगे कलुषाणां प्राचुर्येऽपि तन्निवारक इति भावः । गुरूणां गुरुः 'महतो महीयानि'ति श्रुतेः । गुणरत्नसिन्धुः अनन्तकल्याणगुणपरि-पूर्ण इति भावः । श्रीसोमनाथः सोमेश्वरः जगत्यां जयी जयति [इति] अनेन चास्मिन् भक्ताग्रेसरे शिवात्मकत्वं प्रतीयते ॥ १३ ॥

१४

शिवस्य तद्भक्तततेर्विधाय
कृतीरनेकास्सुकविप्रणुत्याः ।

---

[1] इत्यभेदारोपं [क घ] इत्यभिधारोपः [ग च] [2] नास्ति [क ख]

शिवस्य सायुज्यमिह प्रपन्नो
'हरीश्वर'स्तेन समः कविः कः ॥

शिवस्येति ॥ हरीश्वरनामकमहाकविः इह जगति शिवस्य शम्भो-स्तद्भक्तततेः तद्भक्तानां शिवभक्तानां ततेः समूहस्य सम्बन्धिनीः सुकविप्रणुत्याः प्रशंसनीयाः अनेकाः बह्वीः कृतीः प्रबन्धान् विधाय कृत्वा शिवस्य सायुज्यं सयुजोर्भावस्सायुज्यमैक्यं प्रपन्नः प्राप्तः अत एव तेन हरीश्वरेण समः सदृशः कविः कः ? कोऽपि नास्तीति भावः । शिवस्ये[1]ति[1]शब्दयोर्द्विरावृत्तावपि तद्भक्तततेरित्येतत्समुच्चये[2]नैव[2] शिवशब्दस्य कृतीरित्यनेनान्वयात् केवल-शिवस्यैव सायुज्यमित्यन्वयलाभार्थतया न पुनरुक्तिदोषः ॥ १४ ॥

१५

काव्यानि लोके कवयो वदन्ति
वहन्ति तान्येव हृदा रसज्ञाः ।
पुष्पाण्यनूनं सुवतेऽमरागाः
तान्येव मूर्ध्ना विबुधा वहन्ति ॥

समाप्तिप्रतिबन्धकाशेषविघ्ननिवर्तनक्षमाणि मङ्गलानि विधाय स्वस्य काव्यस्य चातिशयसूचनाय कवीन्द्रान् प्रस्तौति काव्यानीत्यादिना ॥

लोके कवयः कवयितारः काव्यानि कविप्रणीतगुणालङ्कारादियुक्त प्रबन्धान् वदन्ति कथयन्ति । वद व्यक्तायां वाचीति धातोर्लट् । रसं शृङ्गारादिकं

---

[1] त्यत्र [ग, च]   [2] न [क घ]

जानन्तीति रसज्ञाः रसिकाः हृदा चेतसा 'पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छ-कन्नुदन्नासञ्छस्प्रभृतिष्वि'ति हृदयशब्दस्य हृदादेशः । तान्येव काव्यान्येव वहन्ति दधति । वह प्रापण इति धातोर्लट् । अमरागाः कल्पद्रुमाः अनूनमनल्पं यथा तथा पुष्पाणि सुमानि सुवते जनयन्ति । षूञ् प्राणिप्रसव इति धातोर्लट् । विबुधाः सुराः मूर्ध्ना शिरसा तान्येव कुसुमान्येव वहन्ति दधति । यथा स्वर्द्रुमास्सुपर्वशिरश्श्लाघनीयकुसुमशालिनः तथा रसिकजनहृदयादरणीय-काव्यातिशयशालिनः कवय इति भावः ।

बिम्बप्रतिबिम्ब[1]भावेन[1] उपमानोपमेयसाधर्म्यादीनामुपादानाद्दृष्टा-न्तालङ्कारः । 'दृष्टान्तः पुनरेतेषां यद्बिम्बप्रतिबिम्बनमि'ति लक्षणात् ॥ १५ ॥

१६

कलावतस्सन्निधिरेव हेतुः
प्रबन्धवार्धेः परिवर्धनस्य ।
कवेस्तु मन्दस्य बुधस्य नासौ
सुधारसश्रीजननस्थलस्य ॥

कलावत इति ॥ कलावतः रसज्ञस्यैव चन्द्रस्येति श्लिष्टरूपकम् । सन्निधिरेव सन्निधानमेव सुधारसश्रीजननस्थलस्य सुधैव रसश्रीः रससम्पदेव सुधारसः श्रियौ अमृतलक्ष्म्यौ तयोर्जननस्थलस्य प्रबन्धः कृतिरेव वार्धिः जलनिधिः तस्य प्रबन्धवार्धेः परिवर्धनस्य वृद्धेः हेतुः कारणम् । मन्दस्य जडस्य शनेश्च वा 'शनिमन्दौ पङ्गुकाळावि'त्यमरः । बुधः विद्वान् सौम्यश्च तस्य कवेः

---

[1] भावनेन [क घ]

काव्यकर्तुश्शुक्रस्य च असौ सन्निधिस्तु न हेतुः । यथा बुधशुक्रशन्युदयो न समुद्रवृद्धिक्षमः । किन्तु चन्द्रोदय एव । तथा अज्ञस्य प्राज्ञस्य वा कवेस्सन्निधिर्न प्रबन्धप्रकाशनहेतुः । किन्तु रसज्ञस्यैव सन्निधिरिति भावः ॥

अत्र प्रबन्धवार्धेरित्यभेदरूपणाद्रूपकालङ्कारः । 'तद्रूपकमभेदो य उपमानो पमेययोरि'ति लक्षणात् । तच्च सुधारसश्रीजननस्थलस्येति श्लिष्टवाचकनियत-निमित्तकत्वात् श्लिष्टवाचकं परम्परितम् ॥ १६ ॥

१७

निपीतसारस्वतसिन्धुसारः
प्रबन्धृजिह्वाजलदः प्रवर्षी ।
रसस्य रोमोद्गमसस्यवृद्धिः
भवत्यनेनैव बुधाङ्गभूमौ ॥

निपीतेति ॥ निपीतं सारस्वतमेव विद्यैव सिन्धोः समुद्रस्य सारं जलं येन स तथोक्तः 'सारो बले स्थिरांशेऽर्थे न्याये क्लीबं वरे त्रिषु । क्लीबमम्बुनी'ति नानार्थरत्नमालायाम् । प्रबन्धृजिह्वाजलदः प्रबन्धुः कवेः तस्य जिह्वा रसनैव जलदः मेघः रसस्य शृङ्गारादेः जलस्य च । 'रसो गन्धरसे स्वादौ तिक्तादाविह रागयोः । शृङ्गारादौ द्रवे वीर्यदेहधात्वम्बु पारद' (?) इति विश्वः । प्रवर्षी वर्षणशीलः 'कर्तृकर्मणोः कृती'ति कृद्योगात्कर्मणि षष्ठी । अनेन प्रबन्धृजिह्वाजलदेन बुधानां सुधियामङ्गानि शरीराण्येव भूमिः भूः तस्यां रोमोद्गमा रोमाञ्चा एव सस्यानि ओषध्यङ्कुरास्तेषां वृद्धिः भवति । सिन्धु-सलिलं पीत्वा जलप्रवर्षिणो जलदात् यथा सस्यवृद्धिर्भवति तथा गृहीतसारस्वत-

सारात् शृङ्गारादिरसवर्षिणः कविरसनाग्रात् बुधजनशरीरेषु रोमाञ्चवृद्धि-र्भवतीति सहृदयहृदयानन्दकराः कवय इति भावः ।

अत्र सारस्वतमेव सिन्धुसारमित्यादिना अवयवेषु प्रबन्धृजिह्वैव जलद इत्यवयविनि च उपमानोपमेययोरभेदरूपणात्सावयवरूपकालङ्कारः ॥ १७ ॥

१८

इने प्रसन्ने वसुदानशीले
कवीन्द्रसद्वक्त्रसरोरुहाणि ।
सरस्वतीश्रीलसितानि तानि
वचस्सुगन्धान् परितः किरन्ति ॥

इन इति ॥ वसूनामर्थानां दानं शीलं प्रवृत्तं यस्य स तथोक्तः । अन्यत्र वसूनां मयूखानां दानं प्रसारणं शीलं प्रवृत्तिः यस्य स तथोक्तः तस्मिन् । 'देवभेदे ऽनले रश्मौ वसू रत्ने धने वसु' इत्यमरः । इनः प्रभुरेव इनस्सूर्य इति श्लिष्टं रूपकम् । तस्मिन् 'इनस्सूर्ये प्रभावि'त्यमरः । प्रसन्ने अभिमुखे सति कवीन्द्र-सद्वक्त्रसरोरुहाणि कवीन्द्राणां कविश्रेष्ठानां सन्ति रम्याणि वक्त्राण्येव मुखान्येव सरोरुहाणि कमलानि । सरस्वतीश्रीलसितानि सरस्वती भारत्येव श्रीर्लक्ष्मीस्तया लसितानि दीप्तानि तानि कवीन्द्रसद्वक्त्रसरोरुहाणि वचस्सुगन्धान् वचांस्येव सुगन्धाः शोभनगन्धाः तान् 'गन्धस्येदुत्पूतिसुसुरभिभ्यः' इति बहुव्रीहावे-वेकारस्य विधानादिह नेत्वम् । परितः सर्वतः किरन्ति [1]व्यापयन्ति[1] कवीनां रचनोत्साहजनकाः प्रभवः इति भावः । रूपकालङ्कारः ॥ १८ ॥

---

[1] व्याप्नुवन्ति [क घ]

१९

यशो विना यः प्रभुरस्ति जीवन्

दिवा शशीवाशुभताप्रयुक्तः ।

पद्मासना सस्मितमेनमैक्ष्य

सरस्वतीवाप्रियतां तनोति ॥

यश इति ॥ यः प्रभुः यशो विना कीर्तिमन्तरेण जीवन् प्राणन् दिवाऽह्नि शशी चन्द्र इव शशीवेत्येकं पदम् । 'इवेन सह नित्यसमासो विभक्त्यलोपश्च' । अशुभताप्रयुक्तः न विद्यते शुभं यस्य सोऽशुभः । तस्य भावस्तत्ता तया अरिष्टेन प्रयुक्तः संयुतस्सन् अस्ति । अस भुवीतिधातोर्लट् । एनमिमं प्रभुमैक्ष्य दृष्ट्वा [1][पद्मम् आसनम् आश्रयः][1] यस्यास्सा पद्मासना लक्ष्मीः सरस्वतीव भारतीव सस्मितं सहासं यथा तथा अप्रियताम् अनादरतां तनोति करोति । कीर्तिमतः प्रभोरेव सम्पत्सारस्वतसमृद्धिरिति भावः । विनोक्तिरलङ्कारः । 'विनोक्तिस्सा विनान्येन यत्रान्यस्सन्ननेतर' इति लक्षणात् ॥ १९ ॥

२०

प्रागल्भ्यमेतद्भवति प्रभूणां

यशोऽर्थिनां सत्कविरक्षणञ्च ।

येनैव सत्कीर्तिलता दिगन्तं

व्याप्नोति सद्वाक्सलिलाभिषेकैः ॥

---

[1] नास्ति [क, घ, च]

प्रागल्भ्यमिति ॥ किञ्च यशोऽर्थिनां कीर्तिकामानां प्रभूणां एतत् सत्कवीनां रक्षणं पोषणं प्रागल्भ्यं प्रौढ[1]त्वं[1] भवति । [2]येन[2] सत्कविरक्षणेन कीर्तिलता कीर्तिरुचैव लता वल्ली सद्वाक्सलिलाभिषेकैः सत्यः रम्याः वाचः उक्तय एव सलिलानि जलानि तेषामभिषेकैस्सेचनैर्दिगन्तं हरिदन्तं व्याप्नोति । आप्लृ व्याप्ताविति धातोर्लट् । कीर्तिकामानां कविरक्षणं प्रागल्भ्यं भवतीति पूर्ववाक्यस्य येनेत्याद्युत्तरवाक्येन समर्थनात्काव्यलिङ्गमलङ्कारः । 'समर्थनीयस्यार्थस्य काव्यलिङ्ग समर्थनमि'ति लक्षणात् ॥ २० ॥

२१

सुवर्णबद्धं स्फुरदर्थरत्नं
सुवृत्तमौज्ज्वल्यगुणप्रयुक्तम् ।
कृतं सुकाव्यं श्रवणोचितं तत्
बुधेन्द्रकर्णाभरणं न किं स्यात् ॥

सुवर्णेति ॥ सुकाव्यं सुवर्णैश्शोभनाक्षरैर्बद्धं प्रयुक्तं स्फुरत् ज्वलत् अर्थरत्नं श्रेष्ठार्थो यस्मिन् तत्तथोक्तम् । सुवर्णेन बद्धानि कीलितानि स्फुरन्ति अर्थ इव रत्नानि यस्य तथोक्तम् । 'रत्नं श्रेष्ठे मणावपी'ति विश्वः । सुवृत्तं शोभनानि वृत्तानि शिखरिण्यादीनि यस्मिन् तत्तथोक्तम् । अन्यत्र सुवृत्तं सम्यग्वृत्ताकारमौज्ज्वल्यमोज एव गुणः तेन प्रयुक्तं संयुतं यथा तथा कृतं रचितम् । अन्यत्र औज्ज्वल्यगुणेन प्रकाशगुणेन प्रयुक्तं यथा तथा कृतम् । अत एव श्रवणोचितमाकर्णनयोग्यम् । अन्यत्र श्रवणस्य श्रोत्रस्य उचितं योग्यम् । 'श्रवणं श्रुतिकर्णयोरि'ति विश्वः । तत् सत्काव्यं बुधेन्द्राणां सुधीश्रेष्ठानां कर्णाभरणं

---

[1] तरं [क घ] [2] एतत् [क, घ, च]

श्राव्यं कुण्डलञ्च न स्यात् किम्? स्यादेवेत्यर्थः। 'सम्भावनेऽलमिति चेत्सिद्धाप्रयोग' इति लिङ्।

सुवर्णमयरत्नकुण्डलवत्सत्काव्यमपि श्रवणसङ्गतिद्वारा सहृदयाह्लादजनकमिति भावः। सुवर्णबद्धेत्यादिविशेषणानां साभिप्रायत्वात्परिकरालङ्कारः। 'विशेषणै[1]र्यत्साकूतै[1]रुक्तिः परिकरस्तु सः' इति लक्षणात्। स च श्लेषानुप्राणित इति श्लेषपरिकरयोस्सङ्करः॥ २१॥

२२

प्रबन्धसारामृतमेव पीत्वा
कूजत्यसौ कोविदराजहंसः।
दुष्काव्यपङ्काम्बु निपीय हन्त
तत्सन्निधौ गर्जति दुष्टभेकः॥

प्रबन्धसारेति॥ असौ कोविदराजहंसः कोविदः सुधीरेव राजहंसः सितच्छदविशेषः 'राजहंसास्तु ते चञ्चुचरणैर्लोहितैस्सिताः' इत्यमरः। प्रबन्धसारामृतमेव प्रबन्धसारः काव्यार्थ एव अमृतं तत् पीत्वा आस्वाद्य कूजति ध्वनति। कूज अव्यक्ते शब्द इति धातोर्लट्। दुष्टः दुर्जन एव भेकः मण्डूकः दुष्काव्यपङ्काम्बु दुष्काव्यमेव पङ्काम्बु कर्दमोदकं तन्निपीय पीत्वा तत्सन्निधौ तस्य कोविदराजहंसस्य सन्निधौ समीपे गर्जति रसति। गर्ज शब्द इति धातोर्लट्। हन्तेति विषादे। 'हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोरि'त्यमरः। रूपकालङ्कारः। लक्षणन्तूक्तम्॥ २२॥

---

[1] रसानुकूले [क, घ, च]

२३

सलक्षणश्रीमुखचन्द्रजाता
कवेरपूर्वा कृतिचन्द्रिका सा ।
अतर्पयद्धीरचकोरबृन्दं
सङ्कोचयत्याशु खलास्यकञ्जम् ॥

सलक्षणेति ॥ कवेः कवयितुः सलक्षणश्रीमुखचन्द्रजाता लक्षणेन शास्त्रेण [अ]कलङ्कशोभया च सह वर्तत इति सलक्षणश्रीः मुखमेव चन्द्र तस्माज्जाता उत्पन्ना । 'श्रीर्विषे रचना शोभा भारती सरलद्रुम' इति विश्वः । अपूर्वा नवीना कृतिचन्द्रिका कृतिः प्रबन्ध एव चन्द्रिका कौमुदी धीरचकोरबृन्दं धीरा वुधा एव चकोरास्तेषां बृन्दं समूहम् । 'धीरो मनीषी ज्ञः प्राज्ञ' इत्यमरः । अतर्पयत् । तृप तृप्तावित्यस्माल्लङ् । आशु शीघ्रं सा कृतिचन्द्रिका खलस्य दुर्जनस्य आस्यं मुखमेव कञ्जं जलजं सङ्कोचयति निमीलयति । कुच शब्दे तारे इति धातोर्लट् । रूपकालङ्कारः ॥ २३ ॥

२४

भास्वद्गुणे सत्यपि तं विहाय
दोषाभिलाषी खलु दुष्टघूकः ।
कुदृष्टिरास्तां स तु साधुचक्र-
प्रमोद एवात्र परो हि लाभः ॥

भास्वदिति ॥ अलं कृतौ भास्वद्गुणे स्फुरत्सुगुणे अन्यत्र भास्वतस्सूर्यस्य गुणे आवृत्तौ 'गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुष्विति

[वैजयन्ती]। सत्यपि तं भास्वद्गुणं विहाय हित्वा दुष्टघूकः दुष्टः दुर्जन एव घूकः उलूकः । दोषाभिलाषी दोषमघमभिलषति इच्छतीति तथोक्तः दोषैकतत्परः। अन्यत्र दोषा रात्रिमभिलषतीति । तथोक्तः खल्विति जिज्ञासायाम् । 'निषेध-वाक्यालङ्कारजिज्ञासानुनये खल्वि'त्यमरः । यथा सूर्यप्रभाभास्वरं दिनं हित्वा घूको रात्रिमिच्छति तथा दुर्जनोऽपि सद्गुणान् हित्वा दोषानेवाभिलषति इति भावः। कुदृष्टिस्तु कुत्सितदर्शन एव । 'तु स्याद्भेदेऽवधारणे'इत्यमरः । स घूकः आस्तां तिष्ठतु । आस उपवेशन इति धातोर्लोट् । हि यस्मात्कारणात् साधुचक्रप्रमोद एव साधूनां सतां चक्रस्य समूहस्य प्रमोदः सन्तोषः । अन्यत्र साधूनां चक्राणां चक्रवाकानां प्रमोद एव परः उत्कृष्टः लाभः फलं 'चक्रं सङ्घातभेदे स्यादि'ति हलायुधः । 'कोकश्चक्रश्चक्रवाक' इत्यमरः । दुष्ट एव घूक इत्यभेदरूपणाद्रूपकालङ्कारः । स च भास्वद्गुण इत्यादि श्लेषानुप्राणित इति सङ्करः ॥ २४ ॥

२५

प्रबाध्य सत्काव्यरविप्रकाशं
स्वकाव्यविद्युद्द्युतयः स्फुरन्ति ।
कटुस्वरास्ते ह्यपनोदनीयाः
धीरानिलैर्दुष्कविवारिवाहाः ॥

प्रबाध्येति ॥ स्वकाव्यविद्युद्द्युतयः स्वं स्वकं काव्यमेव विद्युद्द्युतिः तटित्प्रभा येषां ते तथोक्ताः कटुस्वराः क्रूरस्वराः दुष्कविवारिवाहाः दुष्कवय एव वारिवाहाः जलधराः । सत्काव्यरविप्रकाशं सत्काव्यमेव रविप्रकाशस्सूर्यालोकः तं प्रबाध्य आच्छाद्य स्फुरन्ति । स्फुर स्फुरणे इति धातोर्लट् । ते दुष्कविवारिवाहा

धीरानिलैः धीरा मनीषिण एवानिला वायवः तैरपनोदनीया वारणीया हि। सावयवरूपकालङ्कारः ॥ २५ ॥

२६

[1]कविस्फुरत्येव सभाप्रदेशे
सत्काव्यसञ्जीवनमन्त्रसिद्धः।
तेनैव चित्रं विबुधास्सुहृष्टाः
सुरद्विषश्चापि भवन्ति खिन्नाः ॥

कविरिति ॥ सत्काव्यसञ्जीवनमन्त्रसिद्धः सत्काव्यमेव सञ्जीवनमन्त्रस्तेन सिद्धः प्रसिद्धः कविः स्फुरत्येव भाति। तेन कविना काव्यकर्त्रा शुक्रेण च विबुधास्सुराः सुहृष्टा एव भवन्ति। अपिच सुरद्विषः खिन्ना दुःखिता भवन्ति। सत्काव्यरचनस्य देवताप्रीतिकरत्वादिति भावः। चित्रमाश्चर्यम्। कविः शुक्रः दैत्यसन्तोषकर इति प्रसिद्धः। अयन्तु कविर्बुधसन्तोषकर इति चित्रमिति भावः। कवेश्शुक्रस्य विबुधसन्तोषणादिविरोधेऽपि तस्मादुत्पत्तेर्वर्णनाद्विभावनालङ्कारः। 'विरुद्धात्कार्यसम्पत्तिर्दृष्टा काचिद्विभावने'ति लक्षणात्। स च श्लेषप्रयुक्त इति तयोरङ्गाङ्गिभावेन सङ्करः ॥ २६ ॥

२७

पीत्वा [सु]काव्यामृतमेव[2] धूर्तः
फणी[2]विमुञ्चन् गरलं मुखेन।

---

[1] खर्परे शरि वा विसर्गलोपो वक्तव्यः (वार्तिकम्) (कविःस्फुरत्येव)

[2] धूर्तफणीति वा पाठ इति व्याख्याता।

विजृम्भते सद्बुधसाधुवादः
तद्वारणे गारुडमन्त्र एषः ॥

पीत्वेति ॥ धूर्तः कितवः फणी सर्प इति व्यस्तरूपकम् । धूर्तफणीति वा पाठः । [सु]काव्यामृतमेव सुकाव्यमेवामृतं पीयूषं तदेव पीत्वा निपीय मुखेन गरलं विषं विमुञ्चन् वमन् सन्विजृम्भते विभ्राजते । जृभिजृम्भगात्रविनाम इति धातोर्लट् । एष सद्बुधसाधुवादः सतां बुधानां सुधियां साधुवादः सद्वचः तद्वारणे धूर्तफणिनिर्हरणे गारुडमन्त्रः । गरुडस्यायं गारुडः । 'तस्येदमि'त्यण् । सचासौ मन्त्रश्च तथोक्तः भवतीति शेषः । रूपकालङ्कारः ॥ २७ ॥

२८

मरुत्सहायोऽम्बुमुचः प्रसारः
शरत्सहायश्शशिनः प्रकाशः ।
विद्वत्सहायश्च कवेः प्रभावः
स्फुरत्यलं नापि च निस्सहायः ॥

मरुदिति ॥ मरुत् वायुरेव सहायो यस्य स तथोक्तः । अम्बुमुचः मेघस्य प्रसारः प्रवृत्तिः अलं भृशं स्फुरति । शरत् शरत्काल एव सहायो यस्य स तथोक्तः शशिनः प्रकाशः द्योतः अलं स्फुरति । विद्वानेव सहायो यस्य स तथोक्तः । कवेः काव्यकर्तुः प्रभावः महिमा च अलं स्फुरति । अपि च निस्सहायः सहायरहितः न स्फुरति । वर्ण्यस्य विद्वत्सहायस्य कविप्रभावस्या-वर्ण्यस्य मरुत्सहायजलदप्रसारादेश्च स्फुरतीत्येकक्रियासम्बन्धवर्णनाद्दीपकालङ्कारः । 'सकृद्वृत्तिस्तु धर्मस्य प्रकृताऽप्रकृतात्मनाम् । सैव क्रियासु बह्वीषु कारकस्येति दीपकमि'ति लक्षणात् ॥ २८ ॥

२९

प्राचां प्रबन्धेषु महत्सु सत्सु
काव्ये नवे नास्ति सतामवज्ञा ।
पुराणपुष्पेषु विराजितेषु
पुष्पं नवं मुञ्चति किं मदालिः ॥

प्राचामिति ॥ महत्सु प्राचां प्राचीनानां प्रबन्धेषु कृतिषु स्थितेषु सत्सु काव्ये नवे नवीने काव्ये सतां सुधियां 'सन् सुधीः कोविदो बुध' इत्यमरः अवज्ञा तिरस्क्रिया नास्ति । पुराणानि पुरातनानि च तानि पुष्पाणि पुरा[ण]पुष्पाणि । तेषु विराजितेषु प्रका[शिते]षु सत्सु नवं पुष्पं कुसुमं मदालिः मत्तमधुकरः मुञ्चति किम् ? न मुञ्चतीत्यर्थः । मुच्लृ मोक्षण इति धातोर्लट् । पुराणपुष्पापेक्षया यथा नवकुसुमे सौरभ्यादिविशेषस्तथाऽत्रापीति व्यज्यते । तेन च कवेस्सर्वोत्कृष्टत्वं गम्यते । दृष्टान्तालङ्कारः । लक्षणं तूक्तम् ॥ २९ ॥

३०

परोदितार्थानपहृत्य चौर्यात्
करोति काव्यं कुकविस्स निन्द्यः ।
भवेत्सभायां परिवर्जनीयः
ततो महद्भिः कविभिः परार्थः ॥

परेति ॥ कुकविः दुष्कविः चौर्यात् चोरवृत्तेः । ब्राह्मणादित्वा'द्गुण-वचनब्राह्मणादिभ्यः कर्मणि चे'ति ष्यञ्प्रत्ययः । हेतौ पञ्चमी । परैरन्यैरुदिता

उक्ता ये अर्थास्तानपहृत्य हृत्वा काव्यं करोति रचयति । डुकृञ् करण इति धातोर्लट् । स कुकविः सभायां सदसि निन्द्यो दूष्यः भवेत् । ततः तस्मात् कारणात् । 'पञ्चम्यास्तसिलि'ति पञ्चम्यन्तात्तसिल् । महद्भिर्महितैः कविभिः परार्थः परस्य अर्थः अभिधेयः परिवर्जनीयः परिहरणीयः । अस्यार्थः चौर्येण कृतकाव्यः कविर्निन्द्य इति [1]पूर्ववाक्यार्थस्य महतामनर्थपरिहरणा[दि]रूपोत्तर-वाक्यार्थहेतुत्वात् काव्यलिङ्गमलङ्कारः । अनेन एतत्काव्यकर्तुरपूर्वचमत्कारकल्पकत्वं गम्यते[1] ॥ ३० ॥

३१

अनेकजन्मार्जितपूर्णपुण्यात्
कवित्वचिन्तामणिरेव लब्धः ।
स्वार्थं परार्थं परलोकसिद्धिं
कीर्तिं प्रमोदं च कवेस्तनोति ॥

अनेकेति ॥ अनेकेषु जन्मसु आर्जितं पूर्णं यत्पुण्यं तस्माल्लब्धः प्राप्तः कवित्वचिन्तामणिः कवित्वमेव चिन्तामणिः कवेस्स्वार्थं स्वकीयप्रयोजनं परार्थं परप्रयोजनं परलोकसिद्धिं कीर्तिं प्रमोदं सन्तोषं च तनोति करोति । तनु विस्तार इति धातोर्लट् । चिन्तामणिवत् सर्वार्थप्रतिपादकः प्रबन्ध इति भावः । तदुक्तं 'काव्यं यशसेऽर्थकृत' इति कवित्वचिन्तामण्योरभेदरूपणाद्रूपकालङ्कारः । अवयवरूपकाभावाच्च निरवयवम् ॥ ३१ ॥

---

[1] [कघ]योर्लुप्तभागः ।

३२

स्खलत्पदा त्यक्तरसा विधातुः
श्लथाङ्गका दुर्ध्वनिरात्तदोषा ।
सदन्ततां त्यक्तवती कृतिस्स्यात्
वृद्धेव हेया खलु दुष्कवीनाम् ॥

स्खलदिति ॥ स्खलन्ति प्रच्युतानि पदानि शक्तशब्दा यस्यां सा तथोक्ता । अन्यत्र स्खलती पदे चरणौ यस्यास्सा तथोक्ता । त्यक्तरसा त्यक्तः रसः शृङ्गारादिर्यस्यास्सा तथोक्ता । अन्यत्र त्यक्तः रसो रागो यस्यास्सा तथोक्ता । विधातुः शब्दयोनिरहिता । अन्यत्र इन्द्रियरहिता 'इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातव' इत्यमरः । श्लथाङ्गका श्लथानि शिथिलान्यङ्गानि गुणादयो यस्यां सा तथोक्ता । रसशब्दार्थादिषु रसस्यैव प्राधान्यमितरेषां तदुपस्कारकत्वेनाङ्गत्वमित्यालङ्कारिकप्रसिद्धेः । अन्यत्र श्लथानि अङ्गानि अवयवा यस्यास्सा तथोक्ता । 'अङ्ग गात्रान्तिकोपायप्रतीकेष्वप्रधानक' इति विश्वः । दुर्ध्वनिः दुष्टा ध्वनयो शब्दशक्तिमूलकादिध्वनयो यस्यां सा तथोक्ता अन्यत्र दुष्टस्वरा आत्तदोषा आत्ताः प्राप्ताः दोषाः श्रुतिकटुत्व च्युतसंस्कृत्यादयो यया सा तथोक्ता । तदुक्तं 'मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः । उभयोपयोगिनस्स्युश्शब्दाद्यास्तेन तेष्वपि सः' ॥ 'दुष्टं पदं श्रुतिकटुच्युतसंस्कृत्यप्रयुक्तमसमर्थमि'त्यादि । अन्यत्र आत्तदोषा मोहादयो यस्यास्सा तथोक्ता । सदन्ततां सतां सुधियामन्तः रम्यस्तस्य भावस्तत्ता तां तथोक्ताम् । 'अन्तः प्रान्तेऽन्तिके नाशे स्वरूपेऽतिमनोहर' इति विश्वः । अन्यत्र सह दन्तैर्वर्तत इति सदन्ता । तस्या भावस्तत्ता तां तथोक्ताम् । 'तसिलादिष्वाकृत्वसुचः' इति । स्त्रियाः पुंवद्भावः । त्यक्तवती विसृष्टवती । दन्तहीनेति यावत् । दुष्कवीनां

कृतिः प्रबन्धः वृद्धेव जरठेव हेया परिवर्जनीया स्यात्खलु । अत्र दुष्कविकृतिः वृद्धेव हेयेति उपमानोपमेयसाधारणधर्मवाचकशब्दोपादानेन साधर्म्यप्रतिपादनात् पूर्णोपमालङ्कारः । स च स्खलत्पदेत्यादिना श्लेषानुप्राणि[तेति त]योरङ्गाङ्गिभावेन सङ्करः । एतेन स्वकाव्यस्य दोषप्रसक्तिरेव नास्तीति व्यज्यते ॥ ३२ ॥

३३

माधुर्यमौदार्यमुदात्तरीतिः
औज्ज्वल्यमङ्गीकृतवृत्तिशोभा ।
स्फुरद्रसोऽलङ्कृतिरस्ति यस्यां
सा सत्कृतिस्स्यात्तरुणीव रम्या ॥

माधुर्यमिति ॥ माधुर्यं माधुर्याख्यगुणविशेषः रमणीयता च । औदार्यमुदारतागुणः महत्त्वञ्च । उदात्तरीतिः उदात्ता प्रगल्भा सा चासौ रीतिः वैदर्भ्यादिः । अन्यत्र प्रौढप्रचारः । औज्ज्वल्यं कान्त्याख्यगुणविशेषः लावण्यविशेषश्च । अङ्गीकृतवृत्तिशोभा अङ्गीकृतानां वृत्तीनां कैशिक्यादीनां [1]नर्त[नादी]नाञ्च (?) शोभा प्रकाशः । स्फुरद्रसः शृङ्गारादिः । अन्यत्र रागः । अलङ्कृतिः उपमादिः हारादिश्च । यस्यां कृतौ अङ्गनायाञ्च सा सत्कृतिः सुकाव्यं तरुणीव रम्या मनोज्ञा । स्यादिति सम्बन्धः । एतादृशगुणयुक्तमेव काव्यं तरुणीव रसिकजनहृदयानन्दकरमिति भावः ॥

माधुर्यादिलक्षणमुक्तमभियुक्तैः — 'या पृथक्पदता वाक्ये माधुर्यं तन्निगद्यते । विकटाक्षरबन्धत्वमौदार्यञ्चेष्यते बुधैः ॥ अत्युज्ज्वलत्वं बन्धस्य

---

[1] वृत्तिशब्दस्य नर्तनार्थं कथमिति चिन्त्यम् ।

काव्ये कान्तिरितीष्यत' इति ॥ रीतिलक्षणमपि तैरेवोक्तम्— 'रीतिर्नाम गुणश्लिष्टपदसङ्घटना मता । वैदर्भी च तथा गौडी[2] [पाञ्चालीति[2] त्रिधा हि सा ॥] [वृत्तिलक्षणमपि]:— 'कैशिक्यारभटी चैव सात्वती भारती तथा । चतस्रो वृत्तयो ज्ञेया रसावस्थानसूचका' इति । रसलक्षणमपि— 'विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः । आनीयमानस्स्वादुत्वं स्थायिभावो रसस्स्मृतः ॥ शृङ्गारहास्यकरुणरौद्रवीरभयानकाः । बीभत्साद्भुतशान्ताश्च रसाः पूर्वैरुदाहृता । इति । अलङ्कारलक्षणमपि—'उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण संश्रिताः' हारादिवदलङ्कारास्तेऽनुप्रासोपमादय' इति । पूर्ववदलङ्कारः ॥ ३३ ॥

३४

कृतिस्तु कान्ता कविरेव कामः
स तां पुरोधाय सतां मनांसि ।
विमोहयत्याशु तदैव तेषां
रतिः परं जायत एव नूनम् ॥

कृतिरिति ॥ कृतिस्तु प्रबन्ध एव कान्ता कामिनी । कविरेव कामः मदनः । स कविकामः तां कृतिकान्तां पुरोधाय पुरस्कृत्य सतां सुधियां मनांसि चेतांसि आशु शीघ्रं विमोहयति भ्रमयति । तदैव तदानीमेव तेषां सतां रतिः अनुरागः परं भृशं जायत एव । नूनं निश्चयः । जनीप्रादुर्भाव इति धातोर्लट् रूपकालङ्कारः ॥ ३४ ॥

---

[2] छां (क घ) चामिति (ग च)

३५

स्वात्यम्बुदाम्भः पतितं पयोधेः
शुक्तौ च मुक्ताफलतां प्रयाति ।
तथा सतः कर्णपुटे कवेर्वाक्
प्रविश्य मुक्ताफलतां प्रयाति ॥

स्वातीति ॥ किञ्च स्वात्यम्बुदाम्भः स्वातीमेघजनितसलिलं पयोधेः समुद्रस्य शुक्तौ मुक्तास्फोटे 'मुक्तास्फोटस्स्त्रियां शुक्ति'रित्यमरः । पतितं गतं सत् मुक्ताफलतां मौक्तिकतां प्रयाति प्राप्नोति । तथा कवेः वाक् कविता सतः विदुषः कर्णपुटे श्रोत्रपुटे प्रविश्य मुक्ताऽफलतां फलस्याभावः अफलम् । मुक्तं त्यक्तम् अफलं यस्याम्सा मुक्ताफला । तस्या भावस्तत्ता तां तथोक्तां साफल्यमिति यावत् । प्रयाति या प्रापण इति धातोर्लट् । यथा स्वातीवर्षजलबिन्दुर्जलनिधिशुक्तिकान्तर्गतिवशान्मुक्तामणिरेव भवति, तथा कवित्वमपि सज्जनाकर्णितं सत् साफल्यं भवतीति भावः । उपमानोपमेयवाक्ययो-र्मुक्ताफलताप्रापणरूपैकसामान्योपादानात्प्रतिवस्तूपमालङ्कारः । 'सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिरि'ति लक्षणात् । सा च मुक्ताफलतामित्यादिना श्लेषसङ्कीर्णा ॥ ३५ ॥

३६

रसज्ञया जातरसाभियुक्तैः
काव्यैः कवीनां मुदिता रसज्ञाः ।
सुधाकरोद्भूतसुधामयूखैः
सुधाब्धिराप्नोति परं प्रमोदम् ॥

रसेति ॥ रसज्ञा रसिकाः कवीनां सम्बन्धिभिः रसज्ञया रसनया 'रसज्ञा रसना जिह्वे'त्यमरः । जातरसाभियुक्तैः काव्यैः जातानि उत्पन्नानि रसाभियुक्तानि शृङ्गारादियुतानि च यानि काव्यानि तैस्तथोक्तैः मृदिताः हृष्टा भवन्तीति शेषः । तथाहि— सुधाब्धिः क्षीराम्बुधिः सुधाकरोद्भूतसुधामयूखैः सुधाकरश्चन्द्रः तस्मादुद्भूताः जाताः सुधास्वरूपा अमृतमया मयूखाः किरणास्तैस्तथोक्तैः 'किरणोऽस्रमयूखांशुगभस्तिघृणिघृष्टय' इत्यमरः । परम् उत्कृष्टं प्रमोदं सन्तुष्टिमाप्नोति [उपैति] । आपलृव्याप्ताविति धातोर्लट् । दृष्टान्तालङ्कारः ॥ ३६ ॥

३७

स्वार्थव्ययात्कीर्तिमुपार्जयन्ति
कवित्वशून्या अपि सत्कविभ्यः ।
कृतीरकुर्वन् सुकृती कथं स्यात्
कवित्वभाग्यो भुवि कीर्तिमान् सः ॥

स्वार्थेति ॥ कवित्वशून्याः कवितारहिता अपि जना इति शेषः । स्वार्थव्ययात् स्वार्थस्य स्वद्रव्यस्य व्ययात् विनियोगात् सत्कविभ्यः कीर्तिमुपार्जयन्ति सम्पादयन्ति । कृतीः प्रबन्धान् अकुर्वन् अकुर्वाणो जनः सुकृती धन्यः कथं स्यात्? न स्यादेवेत्यर्थः । 'सुकृती पुण्यवान् धन्य' इत्यमरः । यः जनः कवित्वं भजतीति कवित्वभाक् सः कीर्तिमान् । अत्र कृतीरकुर्वाणः अधन्य इति हेतुसाध्ययोर्यः कवित्वभाक् कीर्तिमानिति व्यतिरेकव्याप्तेश्च दर्शनादनुमानालङ्कारः । 'अनुमानं तदुक्तं यत्साध्यसाधनयोर्वच' इति लक्षणात् ॥ ३७ ॥

३८

शास्त्रेण हीनाः कवयो भवन्ती-
त्यसारमेतत्कविता हि लभ्या ।
न शास्त्रिणा तत्कविना तु लभ्यं
तद्वैपरीत्यं सुवचस्ततस्स्यात् ॥

शास्त्रेणेति ॥ शास्त्रेण तर्कादिना हीनाः रहिताः कवयः कवयितारः भवन्तीत्येतत् असारम् अयुक्तं हि यस्मात्कारणात् शास्त्रिणा विदुषा कविता न लभ्या न प्राप्या । कविना तु तत् शास्त्रं लभ्यं गम्यम् । ततः कारणात् तद्वैपरीत्यं तस्य पूर्वोक्तस्य वैपरीत्यं व्यत्ययः । कवित्वहीनाः शास्त्रिणो भवन्तीत्येव सुवचः [सुष्ठु] वाच्यं स्यात् । शास्त्रापेक्षया कवितैव महतीति भावः । काव्यलिङ्गमलङ्कारः ॥ ३८ ॥

३९

विमत्सरस्थानविराजितो यः
कवीश्वरः स्वादुसुधारसज्ञः ।
स्फुरत्कलोऽनन्तगतिर्विशुद्धो
घनध्वनौ तस्य रुचिर्विचित्रम् ॥

विमत्सरेति ॥ विगतो मत्सरो विरोधो यस्मिन् तद्विमत्सरं तस्मिन् स्थाने विराजितः प्रकाशितः । अन्यत्र वयः पक्षिणो येषु सन्तीति विमन्ति । 'विविष्किरपतत्रय' इत्यमरः । तादृशानि सरांस्येव स्थानानि तेषु विराजितः

'खर्परे शरि वा विसर्गलोप' इति सरस्थानेत्यत्र विसर्गलोपः । स्वादुसुधारसज्ञः स्वादु मधुरं सुधामिव अमृतमिव रसं शृङ्गारादिकं जानातीति तथोक्तः । अन्यत्र स्वादु मधुरं सुधारसममृतरसं जानातीति तथोक्तः । स्फुरत्कलः स्फुरन्त्यः कला विद्या यस्य स तथोक्तः । अन्यत्र स्फुरन्ती कला कान्तिर्यस्य स तथोक्तः 'कला शिल्पे कालभेदे सुषमा विद्ययोरपी'ति शाश्वतः । अनन्तगतिः अनन्ता अधिका गतिः ज्ञानं यस्य सः तथोक्तः । 'ये गत्यर्थास्ते ज्ञानार्थाः' इति न्यायात् । अन्यत्र अनन्ते अन्तरिक्षे गतिः गमनं यस्य सः तथोक्तः 'अनन्तश्शेषविष्ण्वोस्स्यादनन्तं सुरवर्त्मनि । अनन्तं स्यादनवधौ वाच्यवत्स-मुदाहृतमि'ति विश्वः । विशुद्धः परिशुद्धः । अन्यत्र विशुद्धः अतिशुभ्रः यः कवीश्वरः कवीन्द्रः कवीनां जलपक्षिणां ईश्वरः श्रेष्ठः हंसः अस्तीति शेषः । तस्य कवीश्वरस्य घनध्वनौ घनो महान् ध्वनिः शब्दशक्तिमूलकादिध्वनिः तस्मिन् । अन्यत्र घनध्वनौ मेघगर्जिते रुचिः प्रीतिः भवतीति शेषः । विचित्रमाश्चर्यम् । तस्य कवीश्वरस्य मेघध्वनौ द्वेष एव प्रसिद्ध इति रुचिरिति चित्रमिति भावः । कवीश्वरस्य हंसस्य घनध्वनौ रुचिरिति हंसजात्या घनध्वनिरुचिरूपगुणस्य विरोधाद्विरोधालङ्कारः । कवीश्वरस्य शब्दशक्तिमूलकादिध्वनिषु रुचिरिति विरोधपरिहारः । उत्तमकाव्यस्य ध्वनिप्रधानत्वात् सत्कवेस्तत्रैवाभिरुचिरिति भावः ॥ ३९ ॥

४०

विद्यालता गौरववाक्पयोभिः
संवर्धिता सत्कविता प्रसूना ।
सूते यशोरूपफलं कवीनां
सन्नेतृचैत्राश्रयतः पृथिव्याम् ॥

विद्येति ।। गौरववाक्पयोभिः गुरोरिमा गौरव्यः 'तस्येदमि'त्यण् । गुरुसम्बन्धिन्यः वाच एव पयांसि सलिलानि तैस्संवर्धिता अभिवर्धिताः सत्कविताप्रसूनाः सत्यः प्रशस्ताः कविता एव प्रसूनानि पुष्पाणि यस्यास्सा तथोक्ता विद्येव लता वल्ली विद्यालता पृथिव्यां भूमौ सन्नेतृचैत्राश्रयतः सन् साधुः नेता नायकः 'अधिभूर्नायको नेते'त्यमरः । स एव चैत्रः वसन्तः तस्याश्रयतः [1]आश्रयात्[1] कवीनां काव्यकर्तृणां यशोरूपफलं कीर्तिस्वरूपफलं सूते जनयति । रूपकालङ्कारः ।। ४० ।।

४१

प्रबन्धमालां कुरुते कविर्यः
पदप्रसूनैश्च ततो गरीयान् ।
वचोगुणेनैव सदर्थगन्ध-
मालां प्रकुर्वन् भुवि वावदूकः ।।

प्रबन्धेति ।। किञ्च कविः पदप्रसूनैः पदानि शब्दा एव प्रसूनानि कुसुमानि तैः प्रबन्धमालां प्रबन्धः कृतिरेव माला मालिका तां कुरुते विधत्ते । भुवि भूमौ वावदूकः वाग्मी 'वाचोयुक्तिपटुर्वाग्मी वावदूकोऽतिवक्तरि' इत्यमरः । वचोगुणेन वचः वागेव गुणः तन्तुः तेनैव न तु पदप्रसूनैरिति भावः । सदर्थगन्धमालां सदर्थः अभ्यर्हितार्थ एव गन्धमाला गन्धयुक्तमालिका । 'शाकपार्थिवादित्वादुत्तरपदलोपः' तां च कुर्वन् सन् ततः कवेः 'पञ्चम्यास्तसिल्' । गरीयान् गरिष्ठः भवतीति शेषः । 'प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्र

---

[1] आश्रयार्थी [क घ]

दीर्घवृन्दारकाणां प्रस्थस्फवर्वंहिगर्वर्षित्रब्द्राघिवृन्दाः' इति गुरुशब्दस्य गरादेशः । गुणेनैव मालां प्रकुर्वन्निति हेत्वन्तरासमवधानेऽपि मालारूपकार्यवर्णनाद्विभावनालङ्कारः । 'हेतूनामसमग्रत्वे कार्योत्पत्तिर्विभावने'ति लक्षणात् ॥४१॥

४२

खलस्सदर्थं परिहाय काव्ये
दोषस्पृहस्तद्ग्रहणे प्रवृत्तः ।
सरः प्रविश्याब्जरसं विहाय
भेकः पिबत्यम्बु सपङ्कमेव ॥

खल इति ॥ खलः दुर्जनः 'पिशुनो दुर्जनः खल' इत्यमरः । दोषस्पृहः दोषाभिलाषी सन् स्पृह इच्छायामिति धातोः 'इगुपधज्ञाप्रीकिरः क' इति कर्तरि कप्रत्ययः । [1][काव्ये][1]सदर्थं प्रशस्तार्थं परिहाय हित्वा तद्ग्रहणे दोषग्रहणे प्रवृत्तः यत्नवान् भवतीति शेषः । तथाहि—भेकः मण्डूकः सरः सरसीं प्रविश्य प्राप्य अब्जरसं अब्जानां अम्भोजानां रसं मकरन्दं विहाय त्यक्त्वा सपङ्कं पङ्किलं अम्बु जलमेव पिबति पानं करोति । पा पान इति धातोः 'पाघ्रे'त्यादिना पिबादेशः । अत्र पूर्वोत्तरवाक्यार्थयोर्बिम्बप्रतिबिम्बभावप्रतीतेर्दृष्टान्तालङ्कारः ॥ ४२ ॥

४३

प्रमथ्यमानोऽपि बुधैस्समस्तम्
अर्थं ददात्येव हि काव्यसिन्धुः ।

---

[1] नास्ति [क, ग, घ, च]

तत्रोद्गिरत्येव विषं खलाहिः
सर्वज्ञ एवास्य च यः प्रहर्ता ॥

प्रमथ्यमान इति ॥ बुधैः कविभिः सुरैश्च 'बुधः कवौ सुरे सौम्य' इति विश्वः । प्रमथ्यमानोऽपि मथितोऽपि काव्यसिन्धुः काव्यमेव सिन्धुः समुद्रः समस्तं समग्रम् अर्थमभिधेयम् । अन्यत्र अर्थं वस्तु प्रयोजनं वा 'अर्थोऽभिधेयरै-वस्तु प्रयोजननिवृत्तिष्वि'त्यमरः । ददाति हि वितरत्येव हि । डुदाञ् दान इति धातोर्लट् । तत्र काव्यसिन्धौ खलाहिः खलः दुर्जन एव अहिः सर्पः विषं गरमुद्गिरति वमत्येव । अस्य खलाहेः यः प्रहर्ता संहर्ता 'कर्तृकर्मणोः कृती'ति कृद्योगात्कर्मणि षष्ठी । सः सर्वज्ञ एव ईश्वर एव । काव्ये खलोन्मेषितदोषं सन्त एव दूरीकुर्वन्तीति भावः ॥ ४३ ॥

४४

गुणान्विताऽसौ क्रियते कथञ्चित्
तथाऽपि वक्त्राद्गुणिनं भिनत्ति ।
पश्चात्करोत्येव गुणान् खलालिः
सूचीनिभा तीक्ष्णमुखाभियुक्ता ॥

गुणेति ॥ असौ खलालिः दुर्जनसंहतिः कथञ्चित् केनापि प्रकारेण गुणान्विता गुणयुक्ता । अन्यत्र सूत्रयुक्ता क्रियते विधीयते । तथाऽपि तीक्ष्ण-मुखाभियुक्ता तीक्ष्णेन क्रूरेण मुखेन आस्येन अभियुक्ता संयुता । अन्यत्र तीक्ष्णेन निशितेन मुखेन अग्रेणाभियुक्ता संयुता । 'मुखं प्रधाने प्रारम्भे वक्त्रे निस्सरणेऽपिचे'ति रत्नमालायाम् । अत एव सूचीनिभा सूचीसमा खलालिः

वक्त्रात् मुखात् गुणिनं सुगुणशालिनं गुणिनं पटञ्च भिनत्ति दारयति। भिदिर्विदारण इति धातोर्लट् । गुणान् सूत्राणि च पश्चात्करोति पराकरोति प्रत्यक्करोति च । अत्र सूचीखलाख्योः बिम्बप्रतिबिम्बभावेन सादृश्यप्रतीतेः उपमालङ्कारः ॥ ४४ ॥

४५

मनीषिणा यन्महता च काव्यम्
अङ्गीकृतं तत्र खलेन किं स्यात् ।
किमम्बुजं भानुकरैर्गृहीतं
दोषाकरो म्लानयितुं समर्थः ॥

मनीषिणेति ॥ किञ्च यत् काव्यं महता मनीषिणा विदुषा 'धीरो मनीषी ज्ञः प्राज्ञ 'इत्यमरः । अङ्गीकृतं स्वीकृतं तत्र काव्ये खलेन दुर्जनेन किं स्यात् ? न किमपीत्यर्थः । तदेव दृष्टान्तमुखेन समर्थयति किमिति दोषाकरः चन्द्रः भानुकरैः सूर्यकिरणैः गृहीतं अवमृष्टमम्बुजं कमलं म्लानयितुं ग्लापयितुं समर्थः शक्तः किम् ? दृष्टान्तालङ्कारः ॥ ४५ ॥

४६

विधू रुचाऽर्कस्य निशि प्रकाशं
करोति तत्सन्निधिलुप्तकान्तिः ।
तथाऽन्यजुष्टेन कुकविः करोति
कृतिश्च तत्सन्निधिनष्टतेजाः ॥

विधुरिति ॥ विधुः चन्द्रः 'विधुस्सुधांशुश्शुभ्रांशु'रित्यमरः। अर्कस्य सूर्यस्य रुचा त्विषा निशि रात्रौ 'पद्दन्नि'त्यादिना निशाशब्दस्य निशादेशः। प्रकाशं करोति विदधाति। तत्सन्निधिलुप्तकान्तिः तस्य सूर्यस्य सन्निधौ समीपे लुप्ता नष्टा कान्तिर्यस्य स तथोक्तः भवतीति शेषः। तथा तेनैव प्रकारेण कुकविः दुष्कविः अन्ययुक्त्या परकीययुक्तिभिरित्यर्थः। कृतिं काव्यं करोति। सुकविकल्पितचमत्कृतिमादायैव कुकविः काव्यं विदधातीत्यर्थः। तत्सन्निधिनष्टतेजाः तस्य युक्तिकल्पकस्य सन्निधौ नष्टं लुप्तं तेजः प्रभावो यस्य स तथोक्तः 'तेजः प्रभावे दीप्तौ चे'ति विश्वः। भवति च। विधूरुचेत्यत्र 'रोरी'ति रेफलोपे 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इत्यणोर्दीर्घः। दृष्टान्तालङ्कारः ॥ ४६ ॥

४७

साहित्यविज्ञानविहीनपुंसां
न रोचते जात्वपि सत्प्रबन्धः।
स्तनन्धयैर्निर्दशनाङ्कुरास्यैः
आस्वाद्यते किं मधुरेक्षुखण्डः ॥

साहित्येति ॥ साहित्यविज्ञानविहीनपुंसां साहित्यस्य साहित्यशास्त्रस्य विज्ञानेन परिज्ञानेन विहीनाः शून्याः पुमांसः तेषां जात्वपि कदाचिदपि सत्प्रबन्धः सत्काव्यं न रोचते प्रियो न भवतीत्यर्थः। रुचदीप्ताविति धातोर्लट्। निर्दशानाङ्कुरास्यैः निर्दशनाङ्कुराणि दन्ताङ्कुररहितानि आस्यानि मुखानि येषां तैस्तथोक्तैः स्तनन्धयैः बालैः 'नासिकास्तनयोर्ध्माधेटोरि'ति खशि 'अरुर्द्विषदजन्तस्य मुमि'ति मुमागमः। मधुरेक्षुखण्डः मधुरस्य मधुररसवतः इक्षोः पुण्ड्रस्य 'रसाल इक्षुस्तद्भेदाः पुण्ड्रकान्तारकादय' इत्यमरः। खण्डः छेदः आस्वाद्यते किं ? न खाद्यत इत्यर्थः। दृष्टान्तालङ्कारः ॥ ४७ ॥

४८

काव्यप्रकाशस्तु यदत्र चित्रं
सतां मनोऽम्भोजरुचिं विधत्ते ।
खलस्य चेतोऽर्कमणेस्तनोति
ज्वलन्तमग्निं सुमनोऽनुकूलः ॥

काव्येति ॥ काव्यप्रकाशस्तु काव्यस्य कृतेः शुक्रस्य च प्रकाशः 'काव्यं ग्रन्थे ग्रहे काव्यः काव्या स्यात्पूतनाधियोरि'ति विश्वः (?) सतां सुधियां मनोऽम्भोजरुचिं मनांस्येव हृदयाण्येव अम्भोजानि जलजानि तेषां रुचिं कान्तिं प्रीतिञ्च 'रुचिस्तु किरणे कान्तावभिषङ्गाभिलाषयोरि'ति रत्नमालायाम् । विधत्ते कुरुते । खलस्य दुर्जनस्य चेतोऽर्कमणेः चेतः मन एवार्कमणिः सूर्यकान्तोपलः तस्य ज्वलन्तं प्रज्वलन्तमग्निं वह्निं तनोति विदधाति । सुमनोऽनुकूलः सुमनसां विदुषां देवानाञ्च अनुकूलः सहायः 'सुमनाः पुष्पमालत्योः स्त्रियां देवे बुधे च ना । अयं पुष्पे बहुष्वेवे'ति रत्नमालायाम् । भवतीति यत् । अत्रास्मिन्नर्थे चित्रं आश्चर्यम् । काव्ये शुक्रे, अम्भोजरुचिविधायकत्वादे-रदृष्टत्वादिति भावः । अत एवाब्जरुच्याद्युत्पत्त्यहेतोः काव्यात्तदुत्पत्तिवर्णनात् विभावनालङ्कारः ॥ ४८ ॥

यदास्यतः प्राक्प्रसृता समस्त-
वर्णावलिर्वेदतदङ्गपालिः ।
स एव देवो भुवि लब्धवर्णैः
प्रकीर्तनीयः कविभिर्महद्भिः ॥

यदिति ॥ समस्तवर्णावलिः समस्ता निखिला अक्षरपङ्क्तिः । वेद तदङ्गपालिः वेदानां श्रुतीनां तदङ्गानां शिक्षादिवेदाङ्गानाञ्च पालिः पङ्क्तिः "पालिः कर्णलताग्रे स्यात्पङ्क्तिवंशप्रभेदयोरि'ति विश्वः[1] । यदास्यतः यस्य शिवस्य आस्यतः मुखतः प्राक् प्रथमं प्रसृता प्रवृत्ता । भवतीति शेषः । स एव देवः भुवि भूमौ लब्धवर्णैः विचक्षणैः महद्भिः महनीयैः कविभिः प्रकीर्तनीयः वर्णनीयः । 'शास्त्रयोनित्वादि'त्यधिकरणे वेदादिकर्तृत्वस्य परमेश्वरे निर्णीतत्वात् स एव वर्णनीय इति भावः । स एव [प्र]कीर्तनीय इति स्वतस्सिद्धार्थशक्त्या परशिवस्य गम्यमानत्वे यदास्यत इत्यादिना स्वकार्यद्वारा भङ्ग्यन्तरेण प्रतिपादनात्पर्यायो[क्ता]ऽलङ्कारः । 'पर्यायोक्तं विना वाच्यवाचकत्वेन वस्तुनः' इति लक्षणात् ॥ ४९ ॥

५०

अनाश्रितेशानपदं यदुर्व्यां
गुणैर्गरीयोऽपि कदाऽपि काव्यम् ।
न शोभते सद्गुणमप्यनर्क-
पादाश्रितं किं नलिनं विभाति ॥

अनाश्रितेति ॥ अनाश्रितेशानपदं अनाश्रितं अनासादितं 'न लोपो नञः' इति नकारस्य लोपे 'तस्मान्नुडची'ति नुडागमः । ईशानस्य शिवस्य पदं चरणं येन तत्तथोक्तं यत् काव्यं अस्ति तदिति शेषः । तत्काव्यं गुणैः

---

[1] नास्ति (क घ)

माधुर्यादिभिः गरीयोऽपि गरिष्ठमपि उर्व्यां कदाऽपि कदाचिदपि न शोभते न राजते । शुभ शोभन इति धातोर्लट् । अनर्कपादाश्रितं अर्कपादान् सूर्यकिरणान् अ । श्रितमर्कपादाश्रितं तन्नभवतीत्यनर्कपादाश्रितं 'पादरश्म्यङ्घ्रितुर्यांशा'इत्यमरः । नलिनं कमलं सद्गुणमपि सन् प्रशस्तः गुणः शुक्लसौरभ्यादिगुणो यस्य तत्तथोक्तमपि विभाति किम् ? । न विभातीत्यर्थः । भा दीप्ताविति धातोर्लट् । अत्रैकमेव दीप्त्यभावरूपं सामान्यं न शोभते किम् ? विभातीति शब्दभेदेन वाक्यद्वयेऽप्युपात्तमिति प्रतिवस्तूपमालङ्कारः । लक्षणं तूक्तम् ॥५०॥

५१

वाग्वृत्तिरल्पाऽपि महेश्वराङ्घ्रि
समर्पिता श्लाघ्यत एव मूर्ध्ना ।
बुधैः कवेरर्कतरुप्रसून-
मालेव शम्भोश्चरणे प्रणीता ॥

वागिति ॥ अल्पाऽपि स्वल्पाऽपि महेश्वराङ्घ्रिसमर्पिता महेश्वरस्य अङ्घ्रौ चरणे समर्पिता निहिता कवेः वाग्वृत्तिः वाक्परिणतिः कवितेति यावत् शम्भोः चरणे प्रणीता समर्पिता अर्कतरुप्रसूनमालेव अर्कतरोरर्कवृक्षस्य प्रसूनानां कुसुमानां मालेव मालिकेव बुधैः सूरिभिः देवैश्च मूर्ध्ना शिरसा श्लाध्यते अभिनन्द्यत एव । यथा परमेश्वरचरणे नतिमन्तस्सुराः तत्समर्पितार्ककुसुममालिकां शिरसा वहन्ति तथा शम्भुपदसमर्पितवाग्वृत्तिमपि सुधियो मूर्ध्ना श्लाघन्त इत्यर्थः । अत्र बिम्बप्रतिबिम्बभावेन बुधशिरश्श्लाघनारूपसामान्यमादाय वाग्वृत्त्यर्क-कुसुममालयोः सादृश्यप्रतीतेरुपमालङ्कारः ॥ ५१ ॥

५२

तदैहिकामुष्मिकसौख्यहेतोः
परं कवीन्द्रैः कृतिभिः कृतार्थैः ।
शिवः प्रणुत्यो भुवनैकनाथः
तदङ्घ्रिभक्तश्च गुणाभियुक्तः ॥

तदिति ॥ तत्तस्मात्कारणात् ऐहिकामुष्मिकसौख्यहेतोः इह लोके भवमैहिकममुष्मिन् परलोके भवमामुष्मिकञ्च यत्सौख्यं तस्य हेतोः 'षष्ठी हेतुप्रयोग' इति षष्ठी । ऐहिकामुष्मिकसुखनिमित्तमित्यर्थः । कृतिभिः प्रबन्धैः कृतार्थैः कृतकृत्यैः कवीन्द्रैः भुवनैकनाथः भुवनानां जगतां एकः केवलः मुख्यो वा नाथः पतिः 'एके मुख्यान्यकेवला' इत्यमरः । शिवः शर्वः प्रणुत्यः स्तोतव्यः । गुणैरभियुक्तः महितः तद्भक्तः तस्य शिवस्य भक्तश्च प्रणुत्य इति सम्बन्धः । अत्र सर्वोत्कृष्टेन परमेश्वरेण समीकृत्य स्तुत्यतया शिवभक्तस्य वर्णनात्तुल्ययोगितालङ्कारः । 'गुणोत्कृष्टैस्समीकृत्य वचोऽन्या तुल्ययोगिते'ति लक्षणात् ॥ ५२ ॥

५३

शिवेति नामाशु समस्तपापं
निहन्ति यस्याऽस्य महाप्रबन्धः ।
किमद्भुतं श्रोतृजनस्य सद्यः
समस्तमेनोनिवहं क्षिणोति ॥

शिवेति ॥ यस्य शम्भोः शिवेति नाम शिवशब्दः आशु द्रुतं समस्तपापं सकलकिल्बिषं निहन्ति संहरति । हन हिंसागत्योरिति धातोर्लट् ।

अस्य शिवस्य महाप्रबन्धः महाकाव्यं श्रोतृजनस्य शृण्वतः सद्यः सपदि 'सद्यस्सपदि तत्क्षण' इत्यमरः । समस्तमशेषं एनोनिवहं एनसां दुरितानां निवहं समूहं 'कलुषं वृजिनैनौघमंहो दुरितदुष्कृतमि'त्यमरः । क्षिणोति नाशयति । क्षि क्षये इति धातोर्लट् । किमद्भुतं किमाश्चर्यम् । अत्र शिवेति वर्णद्वयात्मकं नाम सकलदुरित[1]ह[1]रणक्षमम् । अतः किमु वक्तव्यं [2]महाप्रबन्धः पापं क्षिणोतीत्यत्रेति[2] कैमुत्येनार्थसिद्धिवर्णनादर्थापत्तिरलङ्कारः । 'कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते' इति लक्षणात् ॥ ५३ ॥

५४

'धनुःपुरोद्दानयतीन्द्रवंश्यः'
'श्रीचिक्कवीरेश्वर'पाणिजातः ।
'षडक्षरीशाख्यतया' प्रसिद्धः
कलाविदास्ते कविताप्रगल्भः ॥

लोके कीर्त्यनुवर्तनाय स्वातिशयं वर्णयाति धनुरिति ॥ धनुः पुरोद्दानयतीन्द्रवंश्यः धनुःपुरं 'धनुगूरु' नामको ग्रामविशेषः तस्मिन् स्थितः उद्दानयतीन्द्रः उद्दानदेवाख्यो यतिवर्यः तस्य वंश्यः वंशे भवः श्रीचिक्कवीरेश्वर-पाणिजातः श्रीयुक्तस्य चिक्कवीरेश्वरस्य चिक्कवीरेश्वराभिधानस्य गुरोः पाणेः हस्ताज्जातः सम्भूतः, कविताप्रगल्भः कवितायां प्रगल्भः प्रतिभायुक्तः 'प्रगल्भः प्रतिभान्वितः' इत्यमरः । कलावित् शास्त्रज्ञः षडक्षरीशाख्यतया 'षडक्षरीश' इत्याख्या नाम यस्य स तथोक्तस्तस्य भावस्तत्ता तया 'आख्याह्वे अभिधानञ्च

---

[1] ता [क, घ] [2] लुप्तभागः [क, घ]

नामधेयञ्च नाम च' इत्यमरः । 'प्रसिद्धः प्रख्यातः आस्ते तिष्ठति । आस उपवेशन इति धातोर्लट् । अत्र कृतिकर्तरि कवीन्द्रे विद्यादिसमृद्धिवर्णनादुदात्तालङ्कारः । 'उदात्तं वस्तुनस्संपन्महतां चोपलक्षणमिति लक्षणात् ॥५४॥

५५

'वृषेन्द्र-सत्येन्द्रसुवृत्तरम्यं'
काव्यद्वयं वस्तुकमेव चक्रे ।
'कर्णाटवाण्या' स्तवनीयमार्यैः
उद्यद्रसं यस्सुभगं गुणौघैः ॥

वृषेन्द्रेति ॥ यः षडक्षरीशः गुणौघैः गुणानां श्लेषादिगुणानामोघैः समूहैः सुभगं रुचिरमार्यैः साधुभिः 'गौर्यामार्या त्रिषुत्वेष कुलीनन्यायसाधुष्वि'ति रत्नमालायाम् । स्तवनीयं स्तुत्यमुद्यद्रसमुद्यन्तः उज्ज्वलाः रसाः शृङ्गारादयो यस्मिन् तत्तथोक्तं वृषेन्द्रसत्येन्द्रसुवृत्तरम्यं [1]वृषेन्द्र सत्येन्द्राविति महापुरुषौ तयोः सुवृत्तैः सच्चरित्रैः रम्यं रमणीयं*वस्तुकं [एव]गद्यपद्यात्मक[मेव] काव्यद्वयं [1]प्रबन्धद्वयं कर्णाटवाण्या कर्णाटभाषया चक्रे चकार । अत्रापि कविता-समृद्धेर्वर्णनादुदात्तालङ्कारः ॥ ५५ ॥

५६

यस्यास्ति 'भाषाद्वयसत्कवित्वं'
जगन्नुतं नूत्नमनन्यलभ्यम् ।

---

[1] लुप्तभागः [क, घ] * वस्तुकं नाम गद्यपद्यात्मकं वास्तविकघटना-निरूपकं चम्पूकाव्यम् । वर्णकं नाम वास्तविकघटनानां कल्पनाचातुर्येण वर्णितं केवलं पद्यात्मकं काव्यम् इत्यवगन्तव्यम् ॥ पश्यत प्रस्तावनायाम् ।

नैपुण्यमीशागमशास्त्रराशौ
ईशप्रसादात्परिलब्धमुर्व्याम् ॥

यस्येति ॥ यस्य कवेः अन्यलभ्यं न भवतीत्यनन्यलभ्यं अनितरसाधारणं जगन्नुतं जगति नुतं प्रशस्तं नूत्नमपूर्वं भाषाद्वयसत्कवित्वं भाषयोः संस्कृतकर्णाटवाण्योः द्वये, सत् प्रशस्तं कवित्वं कविता अस्ति । किञ्च ईशागमशास्त्रराशौ ईशागमानां [1]शैवागमानां[1] शास्त्राणाञ्च राशौ समूहे 'स्यान्निकायः पुञ्जराशी' इत्यमरः । नैपुण्यं निपुणता ईशप्रसादात् ईश्वरानुग्रहात् उर्व्यां भुवि यस्य परिलब्धं प्राप्तम् । उदात्तालङ्कारः ॥ ५६ ॥

५७

सोऽहं प्रसादात्परमेश्वरस्य
प्रबन्धमेकं रचयामि रम्यम् ।
श्रीचोलराजस्य गुणैरुदारैः
प्रसन्नगीर्वाणगिराऽद्य युक्तम् ॥

स इति ॥ सोऽहं प्रसन्नगीर्वाणगिरा प्रसन्नया प्रसादगुणयुक्तया गीर्वाणगिरा संस्कृतभाषया परमेश्वरस्य प्रसादात् अनुग्रहात् श्रीचोलराजस्य चोलभूपालस्य 'राजाहस्सखिभ्यष्टजि'ति समासान्ते टच् प्रत्ययः । उदारैर्महद्भिः गुणैः शौर्यादिभिः युक्तं तत्प्रतिपादकमित्यर्थः । रम्यं रमणीयमेकम् प्रबन्धमद्य अस्मिन् दिने रचयामि करोमि ।

---

[1] नास्ति [क, घ]

अत्रेशप्रसादरूपकारणान्तरयोगेन प्रबन्धरचनारूपकार्यसौकर्यप्रतीतेः समाधिरलङ्कारः । 'समाधिः कार्यसौकर्यं कारणान्तरयोगत' इति लक्षणात् ॥५७॥

५८

प्रमादतोवाऽऽगतमत्र धीराः
शिवैकभक्ताश्शिवताप्रपन्नाः ।
स्खालित्यमुत्सार्य निजानुभावात्
विनीयतां काव्यमिदं भवद्भिः ॥

प्रमादत इति ॥ शिवैकभक्ताः शिवस्य एकस्य केवलस्य भक्ताः अत एव शिवताप्रपन्नाः [1]शिवात्मकतापन्नाः मङ्गला[1]त्मकतापन्ना वा । हे धीराः हे मनीषिणः अत्र काव्ये प्रमादतः अनवधानाद्वा आगतं प्राप्तं स्खालित्यं सन्धिसमासादि प्रच्युतिं निजानुभावात् स्वकीयप्रभावात् उत्सार्य निवार्य भवद्भिः इदं काव्यं कृतिः विनीयतां सम्बध्यताम् ॥

अत्र शिवभक्ता इत्यादिविशेषणानां साभिप्रायत्वात् परिकरालङ्कारः । '[2]अलङ्कारः[2]परिकरः साभिप्राये विशेषण' इति लक्षणात् ॥ ५८ ॥

५९

सुदुर्लभं प्राप्य कवित्वरत्नं
तदप्युमेशाय समर्पणीयम् ।

---

[1] शिवप्रयुक्ताः शिवात्म [ग, च]   [2] लुप्तः [क, घ]

अन्यार्पितं तद्धि भवत्यवश्यं
निरर्थकं स्यादिति मे मनीषा ॥

सुदुर्लभमिति ॥ सुदुर्लभं लब्धुमशक्यं कवित्वरत्नं कवित्वमेव रत्नं मणिं प्राप्य कविनेति शेषः । तदपि कवित्वमपि उमेशाय पार्वतीपतये समर्पणीयं निवेदनीयम् । हि यस्मात्कारणात् अन्यार्पितं अन्यस्मै अर्पितं समर्पितं तत् कवित्वरत्नं अवश्यमगत्या निरर्थकं व्यर्थं स्यादिति मे मम मनीषा बुद्धिः भवति ॥ अत्र पूर्ववाक्यार्थस्योत्तरवाक्यार्थहेतुत्वात्काव्यलिङ्गमलङ्कारः ॥ ५९ ॥

६०

ब्रह्मादयो न प्रभवन्ति वक्तुं
भवैकभक्तस्य महामहत्त्वम् ।
कियानहं भक्तिवशात्तथाऽपि
यथामति स्तोतुमिदं वदामि ॥

ब्रह्मादय इति ॥ ब्रह्मादयः चतुर्मुखादयः भवैकभक्तस्य केवलशिवभक्तस्य महामहत्त्वं महाप्रभावं वक्तुं वर्णयितुं न प्रभवन्ति न शक्नुवन्ति । भवैकभक्तस्य महामहत्त्वं वक्तुमहं कियान् ? कियद्भक्तिमानित्यर्थः । तथाऽपि भक्तिवशात् मतिं बुद्धिमनतिक्रम्य यथामति । 'अव्ययीभावश्चे'त्यव्ययत्वम् । स्तोतुं स्तोत्रं कर्तुमिदं काव्यं वदामि कथमामि । 'वर्तमानसामीप्ये वर्तमानवद्वे'ति वद व्यक्तायां वाचीति धातोः वर्तमानसामीप्ये लट् ॥

अत्र स्वाननुरूपशिवभक्तमहिमस्तुतिघटना प्रतीतेर्विषमालङ्कारः । 'विषमं वर्ण्यते यत्र घटनाननुरूपयोरिति लक्षणात् ॥ ६० ॥

६१

श्रियो जन्मस्थानं सुररिपुपुरीदुर्गपरिघा
बलद्विड्भीताद्रिप्रकरलसदज्ञातसदनम् ।
विधोश्शय्यावासश्शितघृणिमहामज्जनसरः
क्षमाकाञ्चीदामप्रथितमहिमा भाति जलधिः ॥

अथ कथामारभमाणः प्रथमं समुद्रं वर्णयति श्रिय इत्यादिना ॥ श्रियः लक्ष्म्याः जन्मस्थानं जननभूमिः सुररिपुपुरीदुर्गपरिघा सुररिपूणां राक्षसानां पुरी लङ्का तस्याः दुर्गा दुर्गमा 'सुदुरोरधिकरणे' इति गमेर्डप्रत्यये डित्वाट्टिलोपः । परिघा परिघातः 'परिघो मुद्गरेऽर्गले । घटके परिघाते स्त्री योगे प्राकारगोपुर' इति रत्नमालायाम् । बलद्विड्भीताद्रिप्रकरलसदज्ञातसदनं बलद्विषः इन्द्रात् भीतानां त्रस्तानां 'भयभीतभीतिभीभिरिति वाच्यमि'ति पञ्चमीसमासः । अद्रीणां गिरीणां प्रकरस्य समूहस्य लसत् स्फुरत् अज्ञातसदनं गूढवसतिः । विधोः शौरेः 'विधुर्विष्णौ चन्द्रमसी'त्यमरः । शय्यावासः शयनस्थानम् । शितघृणि-महामज्जनसरः शिताः तीक्ष्णाः घृणयो मयूखा यस्य स शितघृणिस्सूर्यः 'किरणोऽस्रमयूखांशुगभस्तिघृणिघृष्टय' इत्यमरः । तस्य मज्जनाय स्नानार्थं सरः वापी । दिनान्ते सूर्यस्य तत्प्रवेशनादितिभावः । क्षमाकाञ्चीदाम क्षमायाः भुवः काञ्चीदाम मेखला 'स्त्रीकट्यां मेखला काञ्ची'त्यमरः । समुद्रस्य भूमण्डलपरिवेष्टनादिति भावः । 'प्रथितः प्रख्यातः महिमा प्रभावो यस्य स तथोक्तः । जलं धीयते अस्मिन्निति जलधिस्समुद्रः । 'कर्मण्युपपदेऽधिकरणे चे'ति किप्रत्ययः । भाति विराजते ॥

अत्र लक्ष्मीविष्णुप्रभृतीनां महतामङ्गत्ववर्णनात् 'मज्जनसरस्तादिना'[1] समुद्रस्य निरूपणाच्च रूपकोदात्तयोस्संसृष्टिः ।

इतः प्रभृतीनि शिखरिणीवृत्तानि — 'रसै रुद्रैश्छिन्ना यमनसभलागश्शिखरिणी'ति लक्षणात् ॥ ६१ ॥

६२

मिलत्फेनावर्तो भ्रमदहिचलद्वीचिनिचयः
प्रसर्पद्ग्राहोऽम्भश्चरमकरकूर्मौघकलितः ।
पयःपानासक्तप्रबलजलदस्पर्धिकलभः
प्रवालप्रद्योतस्फुटमणिगणोऽयं जलनिधिः ॥

मिलदिति ॥ मिलन्ति संवलन्ति फेनानि डिण्डीरा येषां ते तथोक्ताः मिलत्फेनावर्ता यस्मिन् स तथोक्तः । 'आवर्तः पयसां भ्रमः । पूरस्स्यादम्भसां वृद्धिः फेनं डिण्डीर उच्यत' इति हलायुधः । भ्रमदहिचलद्वीचिनिचयः भ्रमद्भिः सञ्चरद्भिः अहिभिः जलव्यालैश्चलन्तीनां वीचीनां तरङ्गाणां निचयः समूहो यस्मिन् स तथोक्तः । प्रसर्पद्ग्राहः प्रसर्पन्तः प्रवर्तमानाः ग्राहाः तुरङ्गास्या मत्स्यविशेषाः । 'अवहारोऽपि च ग्राह' इति हलायुधः । अम्भश्चरमकरकूर्मौघकलितः अम्भश्चराणां जलचराणां मकराणां जलजन्तुविशेषाणां कूर्माणां कमठानामोघैः बृन्दैः कलितः संयुतः । पयःपानासक्तप्रबलजलदस्पर्धिकलभः पयसां जलानां पानेष्वासक्तैः लालसैः प्रबलैः महद्भिः जलदैः मेघैः स्पर्धन्त इति तथोक्ताः तत्समा इत्यर्थः । कलभाः जलकरिणो

[1] अब्धिवरगुप्तादिना [क] अब्धिवरमज्जनसरस्तादिना [य]

यस्मिन् स तथोक्तः । प्रवालप्रद्योतः प्रवालैः विद्रुमैः प्रद्योतते प्रकाशत इति तथोक्तः । द्युत दीप्ताविति धातोः कर्तरि घञ् प्रत्ययः । स्फुटमणिगणः स्फुटः व्यक्तः मणिगणः रत्नसमूहो यस्य स तथोक्तः । अथवा प्रवालप्रद्योतेन विद्रुमशोभया स्फुटं व्यक्तं मणिगणा यस्मिन् स तथोक्तः । अयं जलनिधिः समुद्रः भातीत्यनुषज्यते ॥

अत्र मिलत्फेनावर्त इत्यादिना असाधारणसमुद्रसंस्थानवर्णनात् स्वभावोक्तिरलङ्कारः । 'स्वभावोक्तिस्तु डिम्भादेस्स्वक्रियारूपवर्णनम्' इति लक्षणात् ॥ ६२ ॥

६३

पयोधे जम्भारेररिगिरिचयं मुञ्च सहसा
पिबामस्ते नो चेद्वयमिह भवज्जीवनमिदम् ।
इति स्फूर्जद्विद्युज्ज्वलदसिलतामेघसुभटाः
स्फुटं गर्जन्तीव स्तनितनिनदैरस्य निकटे ॥

पय इति ॥ पयोधे हे समुद्र जम्भारेरिन्द्रस्य अरिगिरिचयम् अरीणां शत्रूणां गिरीणां पर्वतानां चयं समूहं मुञ्च विसृज । नो चेत् न यदि वयमिह अत्र भवत् वर्तमानं ते तव इदं जीवनं जलं वृत्तिञ्च 'जीवनं वर्तने नीरे पुत्रजीवे च जीवनमि'ति विश्वः । पिबामः पा पान इति धातोः 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्छधौशीयसीदा' इति पिबादेशः । 'आशङ्कायामि'ति भविष्यदर्थे लट् । इत्येवं प्रकारेण 'इति हेतुप्रकरणप्रकर्षादिसमाप्तिष्वि'त्यमरः । अस्य समुद्रस्य निकटे समीपे मेघसुभटाः मेघाः जलदा एव सुभटाः सुयोधाः 'भटा योधास्तु योद्धार'

इत्यमरः । स्फूर्जन्त्यः स्फुरन्त्यः विद्युत एव ज्वलन्त्यः असिलताः खड्गलता येषां ते तथोक्तास्सन्तः स्तनितनिनदैः स्तनितानि गर्जितान्येव निनदाः ध्वनयस्तैः । शेषाहीत्यादिवत् सामान्यविशेषभावान्न पुनरुक्तिः । गर्जन्तीव घोषयन्तीवेत्युत्प्रेक्षा । 'मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः । उत्प्रेक्षाव्यञ्जकास्तद्वदिवशब्दोऽपि कथ्यत' इति स्मरणात् ॥ अत्र भयङ्करत्वादिरूपधर्मसम्बन्धेन घनगर्जितेषु महाभटावलीकृतभीषणघोषणतादात्म्याध्यवसायादुत्प्रेक्षालङ्कारः । 'सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यदि'ति लक्षणात् । जीवनमित्यत्र श्लेषेण स्फूर्जद्विद्युदित्यादौ च रूपकेण श्लिष्टत्वात् श्लेषरूपकोत्प्रेक्षाणामङ्गाङ्गिभावेन सङ्करः ॥ ६३ ॥

६४

हरिर्मे सर्वस्वं हरतु तदमित्राद्रिशरणं
यतोऽहं कुम्भीभूः पिबतु यदियं मामुपगता ।
सरिद्भार्या तस्य ध्रुवमुचितमेतत्तु स मुधा
ममन्थ [1]श्रीशो[1] हीत्यवददिव घोषैर्जलनिधिः ॥

हरिरिति ॥ हरिः इन्द्रः 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिष्वि'त्यमरः । मे मम सर्वस्वं समस्तधनं 'स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धन' इत्यमरः । हरतु गृह्णातु । कल्पवृक्षोच्चैश्रवःप्रभृतीनामिन्द्रेण गृहीतत्वादिति भावः । यतः कारणात् अहं तदमित्राद्रिशरणं तस्य इन्द्रस्य अमित्राणां शत्रूणां अद्रीणां मैनाकादीनां शरणमावासः रक्षिता वा 'शरणं गृहरक्षित्रोः' इत्यमरः । किञ्च कुम्भीभूः

---

[1] श्रीराट् इति व्याख्यातृसूचितः पाठान्तरः ।

अगस्त्यः मां पिबतु पानं करोतु यत् यस्मात् कारणात् तस्यागस्त्यस्य भार्या जाया इयं सरित् कावेरी मामुपगता उपेता । एतत् पूर्वोक्तमुचितं युक्तं ध्रुवं निश्चितं 'ध्रुवो भभेदे क्लीबे तु निश्चितेऽपि च शाश्वत' इत्यमरः । किन्तु प्रसिद्धः श्रीशो विष्णुः 'श्रीराडि'ति पाठः केवलं यौगिकः । मां मुधा व्यर्थं ममन्थ मथितवान् । हि प्रसिद्धौ । इति इत्थं जलनिधिः समुद्रः घोषैः ध्वानैः अवददिव अकथयदिवेत्युत्प्रेक्षा । वद व्यक्तायां वाचीति धातोर्लुङ् ॥ ६४ ॥

६५

सभृङ्गाब्जं वक्त्रं तिलकलसितं फेनभसितं
कपालं चावर्तः प्रकटितजटाविद्रुमलताः ।
सविद्युत्पाथोदो हरिणरिपुचर्माम्बरमभूत्
परं यस्याम्भोधेः स्फुरति स हि कापालिक इव ॥

सभृङ्ग इति ॥ यस्य अम्भोधेः समुद्रस्य सभृङ्गाब्जं सभृङ्गं भ्रमरसहितं यदब्जं कमलं तत् तिलकलसितं तिलकेन विशेषकेण लसितं विराजितं वक्त्रं मुखमभूत्, यस्य फेनं डिण्डीर एव भसितं भस्म अभूत्, यस्य आवर्तः अम्भसां भ्रमः कपालं कर्परमभूत् । यस्य विद्रुमलताः प्रवालवल्यः प्रकटितजटाः प्रकटिताः प्रकर्षेणातिशयिताः जटाः सटाः । प्रपूर्वात्कटशब्दादित-च्प्रत्ययः । 'कटःश्रोणौ क्रियाकारे करजेऽतिशये कल' इति विश्वः । अथवा प्रकटिताः प्रकाशिताः जटास्तथोक्ताः अभूवन्निति वचनविपरिणामः । यस्य सविद्युत्पाथोदः सविद्युत् तटित्सहितः पाथोदः जलदः, हरिणरिपुचर्माम्बरं हरिणरिपोः व्याघ्रस्य चर्म अजिनमेव अम्बरं वसनमभूत् । व्याघ्राजिनस्य शारवर्णतया तच्चाद्रूप्यलाभाय सविद्युदिति विशेषणम् । सः अम्भोधिः कपालेन

संस्कृतः कापालिकः, भैरवीयन्नतीव 'संस्कृतमि'ति तृतीयान्ताट्ठक्प्रत्ययः। परं भृशं स्फुरति हि ॥

अत्रोपमोत्प्रेक्षयोस्साधकबाधकप्रमाणाभावेन सन्देहात्सङ्करः। तदुक्तं काव्यप्रकाशे— 'अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वन्तु सङ्करः। एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः ॥ स्फुटमेकत्र विषये शब्दार्थालङ्कृतिद्वयम्। व्यवस्थितं च तेनासौ त्रिरूपः परिकीर्तितः' [इति] ॥ ६५ ॥

६६

सरत्नालङ्कारस्फुरितबहुलावण्यवपुषे
समर्यादौदार्यप्रथितनिजगाम्भीर्यमहते।
सरिद्योपिद्दत्ताङ्गुलिचयकचौधा इव बभुः
प्रवालाब्दाः प्रेम्णा समरससमुद्रात्मपतये ॥

सरत्नेति ॥ प्रवालाब्दाः प्रवालाः विद्रुमाः अब्दा मेघाश्च कर्तारः सरत्नालङ्कारस्फुरितबहुलावण्यवपुषे रत्नान्येवालङ्काराः आभरणानि तैः सहितं सरत्नालङ्कारं स्फुरितं प्रकाशितं बहु अधिकं लावण्यं लवणरसो यस्य तत्तथोक्तं सरत्नालङ्कारस्फुरितबहुलावण्यं वपुर्यस्य सः तथोक्तः। सरत्नैः रत्नसहितैः अलङ्कारैराभरणैः स्फुरितं बहु लावण्यं कान्तिर्यस्य तद्बहुलावण्यं तादृशं वपुर्यस्य स तथोक्तः। तादृशाय। समर्यादौदार्यप्रथितनिजगाम्भीर्यमहते, मर्यादया वेलया धारणया च 'मर्यादा धारणासीम्नोरि'ति रत्नमालायाम्। औदार्येण महत्त्वेन दातृत्वेन च सहितं समर्यादौदार्यं तादृशेन प्रथितेन प्रसिद्धेन निजेन नित्येन 'स्वके नित्ये निजं त्रिष्वि'त्यमरः। गाम्भीर्येण गम्भीरत्वेन महते महनीयाय समरससमुद्रात्मपतये, समः समानः रसौ जलं रागश्च यस्य स तथोक्तः समुद्र

एव आत्मनः स्वस्याः पतिः प्रियः तस्मै तथोक्ताय पतिशब्दस्य समासे घि संज्ञा । प्रेम्णा प्रीत्या सरिदेव योषित् वनिता तया दत्ता निहिता अङ्गुलिचयाः अङ्गुलिसमूहाः कचौघाः चिकुरसंहतयश्च तथोक्ता इव बभुः रेजुः। समरस-रागौत्कण्ठ्येन कचग्रहणाङ्गुलिसंस्पर्शनादिक्रीडा कामिषु सम्भवतीति समुद्रे प्रवालपयोमुचां तद्रूपेण सम्भावनादुत्प्रेक्षालङ्कारः ॥ ६६ ॥

६७

सदाम्भस्स्थायित्वं जनिरपिच पङ्के जलरुहां
परं राजद्वेषश्चपलमधुपैस्सङ्गतिरपि ।
तथाऽपि स्तूयन्ते स्फुटमिह मुहुस्तानि कविभिः
'श्रिया युक्तस्स्तुत्यो भवति हि सदोपोऽपि जगति' ॥

सदेति ॥ जलरुहां सरोजानां सदाम्भस्स्थायित्वं सदा सर्वदा अम्भसि जले तिष्ठन्तीति तथोक्तानि तेषां भावस्तत्त्वं दम्भ एव दाम्भः कापट्यं तेन सहिताः सदाम्भाः । स्वार्थेऽण्प्रत्ययः । तेषां स्थायित्वं दाम्भिकस्थितिरिति व्यङ्ग्यार्थः । जनिरपि उत्पत्तिरपि 'जनिरुत्पत्तिरुद्भवः' इत्यमरः । पङ्के कर्दमे किल्बिषे च 'पङ्कः कर्दमपापयोरि'त्यमरः । परं भृशं राजद्वेषः चन्द्रविरोधः नृपविरोधश्च 'राजा । मृगाङ्के क्षत्रिये नृपे' इत्यमरः । सङ्गतिरपि सहवासश्च चपलमधुपैः चपलाश्चञ्चलाश्च ते मधुपा भृङ्गाश्च तथोक्ताः चपलाश्चोराः 'चपलः पारदे मीने चोरके प्रस्तरान्तरे । चपलं क्षणिके शीघ्रे चपलश्चिकुरे चले' इति विश्वः । मधुपाः मद्यपायिनश्च तथोक्तैः 'मधु मद्ये पुष्परसे' इत्यमरः । तथापि इह जलधौ तानि जलरुहाणि कविभिः कवीन्द्रैः मुहुः शश्वत् स्तूयन्ते

प्रशस्यन्ते । स्फुटं तथाहि—जगति भुवने श्रिया लक्ष्म्या च युक्तः सदोषोऽपि दोषयुक्तोऽपि स्तुत्यः प्रशंसनीयो भवति ।

अत्र दाम्भिकवृत्तिपापजातिराजद्वेषप्रमत्तसङ्गतिमतामपि श्रीमतां प्राशस्त्यमुपपन्नमिति सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः श्लेषसङ्करश्च । 'सामान्यं वा विशेषो वा तदन्येन समर्थ्यते । यत्र सोऽर्थान्तरन्यासस्सामान्येनेतरेण वे'ति लक्षणात् ॥ ६७ ॥

६८

श्रियं दत्वा पुत्रीं बलभिदनुजायाम्बुधिरमुं
निवेश्यात्मस्थाने सह तनुभुवा द्वीपसदने ।
सुतं पश्यन्वृद्धिं भजति सकलाङ्गं कृशतनुं
पुनरतं क्षीणाङ्गो भवति'न रुचिः कस्य तनये' ॥

श्रियमिति ॥ अम्बुधिः समुद्रः पुत्रीं सुतां श्रियं लक्ष्मीं बलभिदनुजाय बलभिदः इन्द्रस्य अनुजायावरजाय उपेन्द्राय 'उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुज' इत्यमरः । दत्वा वितीर्य तनुभुवा सुतया सह अमुं विष्णुं आत्मस्थाने स्वकीयस्थाने द्वीपसदने द्वीप एव अन्तरीपमेव सदनं गृहं तस्मिन् 'द्वीपोऽस्त्रियामन्तरीपमि'त्यमरः । निवेश्य स्थापयित्वा सकलाङ्गं सकलं सम्पूर्णमङ्गं शरीरं यस्य तं तथोक्तं 'समग्रं सकलं पूर्णमि'त्यमरः । सुतं तनुजं चन्द्रमित्यर्थः । पश्यन् विलोकयन् वृद्धिं भजति लभते । कृशतनुं पुनः क्षीणाङ्गन्तु चन्द्रं पश्यन् क्षीणाङ्गः कृशाङ्गो भवति । तथा हि—- तनये सुते कस्य रुचिः प्रीतिः 'रुचिस्तु किरणे कान्तावभिषङ्गाभिलाषयो'रिति रत्नमालायाम् । नास्ति ? सर्वस्याप्यस्त्येवेति भावः ।

अत्र लक्ष्मीसमीपवासचन्द्रवैवृद्ध्याद्यनुसरणरूपस्य समुद्रगतस्य विशेषस्य सामान्येन समर्थनादर्थान्तरन्यासोऽलङ्कारः ॥ ६८ ॥

६९

नदीनार्यो वन्ध्याश्चिरमिति सभाग्यस्स्ववपुषा
प्रसूतश्श्रीचन्द्रौ दिविजहृतभाग्योऽथ जलधिः ।
हरीशाभ्यां तावप्यदिशदुरुभङ्गो हि भुवने
'दरिद्रत्वे को वा भरति तनयान् जाड्याभरितः' ॥

नदीति ॥ नदीनार्यः नद्यः सरित एव नार्यः चिरं बहुकालं वन्ध्याः सुतहीना इति हेतोः सभाग्यः भाग्यवान् जलधिः समुद्रः स्ववपुषा स्वशरीरेण श्रीचन्द्रौ लक्ष्मीचन्द्रमसौ प्रसूतः उत्पादितवान् अथानन्तरं दिविजैः देवैः 'प्रावृट् शरत्कालदिवाञ्जे' इति सप्तम्या अलुक् । हृतमपहृतं भाग्यं सम्पद्यस्य स तथोक्तस्सन् हरीशाभ्यां हरिहराभ्यां 'चतुर्थी सम्प्रदाने' इति चतुर्थी तौ श्रीचन्द्रावपि अदिशत् ददौ । दिश अतिसर्जने इति धातोर्लङ् । तथा हि, जगति उरुभङ्गः उरवो महान्तो भङ्गा विपर्यासाः तरङ्गाश्च यस्य स तथोक्तः 'भङ्गस्तरङ्गे रुग्भेदे भेदे जातिविपर्ययोरि'ति विश्वः । जाड्यभरितः [1][जडस्य अज्ञस्य शीतस्य च][1]भावो जाड्यं 'सुषीमशिशशिरो जडः । जडोऽज्ञेऽनेड-मूकस्त्वि'ति चामरः । तेन भरितः पूरितः 'गुणवचनब्राह्मणादिभ्यः कर्मणिचे'ति भावे ष्यञ् । को वा को नु दरिद्रत्वे दारिद्र्ये सति तनयान् सुतान् भरति बिभर्ति भृञ् भरण इति धातोर्लट् । 'भरतेर्जुहोत्यादित्वाभावान्न श्लुः' अतो न

---

[1] जाड्यस्याज्ञत्वस्य शीतत्वस्य (क घ)

धात्ववयवस्य द्विर्भावः । कोऽपि न रक्षतीति भावः । अत्र सिन्धुगतप्रहरण-लक्षणविशेषस्य सामान्येन समर्थनात्सामान्येन विशेषसमर्थनरूपोऽर्थान्तर-न्यासः ॥ ६९ ॥

७०

स्फुरत्तारा मुक्ताखचितकमनीयस्य महतो
नभश्छत्रस्येव स्फुटतरदिशा पल्लवयुजः ।
दधौ भास्वद्रोचिः कनकमयदण्डश्रियमयं
सुमेरुश्छायाधःकृततरुणघर्मांशुकिरणः ॥

अथ षड्विंशतिश्लोकैर्मेरुं प्रस्तौति —

स्फुरदिति ॥ भास्वद्रोचिः भास्वत् भास्वरं रोचिः कान्तिर्यस्य स तथोक्तः अत एव छायया कान्त्या 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्ब-म[1]नातपम्' इत्यमरः । अधः कृतः तिरस्कृतः घर्मांशोः सूर्यस्य किरणः मयूखो येन स तथोक्तः अयं सुमेरुः मेरुगिरिः 'मेरुस्सुमेरुर्हेमाद्रिरि'त्यमरः । स्फुरन्त्यः तारास्तारका एव मुक्ता मौक्तिकानि तैः खचितं व्याप्तं अत एव कमनीयञ्च मनोज्ञमिति विशेषणोभयपदकर्मधारायः । तस्य स्फुटतरदिशापल्लवयुजः स्फुटतरा अतिशयेन व्यक्ताः दिशा एव पल्लवाः दलानि तैर्युज्यत इति तथोक्तस्तस्य । [2]हलन्ताद्वेति दिक्शब्दस्य टाप्प्रत्ययः । गगनमाकाशमेव

---

[1] अनातप इति च अमरपाठः ॥

[2] वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः । आपञ्चैव हलन्तानां यथा वाचा निशा दिशा (सिद्धान्तकौमुदी ॥

छत्रमातपत्रं तस्य कनकमयस्य सुवर्णविकारस्य दण्डस्य श्रियं शोभां दधौ धृतवानिव ।

अत्र सुमेरोस्तारामुक्ताविलसितनभश्छत्रकनकदण्डतादात्म्येनोत्प्रेक्षणादुत्प्रेक्षालङ्कारः । स च रूपकानुप्राणित इति तयोरङ्गाङ्गिभावेन सङ्करः ॥७०॥

७१

सुवर्णश्रीयुक्तोऽप्यधिगतकुजातिस्मयकरः
सदाऽभ्रान्तस्थाय्यप्यनुगतमनोज्ञस्थिररुचिः ।
मरुत्केलीवासोऽप्यविकलमहानागमहितः
स्फुरत्पञ्चास्योऽप्यच्युतिमदगजोऽयं सुरगिरिः ॥

सुवर्णेति ॥ अयं सुरगिरिः मेरुः सुवर्णश्रीयुक्तोऽपि सुवर्णस्य सुजातेः श्रिया सम्पदा युक्तोऽपि अधिगतकुजातिस्मयकरः अधिगता प्राप्ता कुजातिः कुत्सितजन्म यस्य स तथोक्तः । तस्य स्मयं गर्वं करोतीति स तथोक्त इति विरोधः जातिमहतो हीनजातिव्यापारस्य विरुद्धत्वादिति भावः । 'स्मयो गर्वेऽद्भुते ज्ञेयः' इति विश्वः । सुवर्णश्रिया कनकशोभया युक्तस्सहितः अधिगतैः कुजैः द्रुमैः अतिस्मयकरः अत्याश्चर्यकर इति विरोधपरिहारः । 'कुजा द्रुनरकाङ्गाराः' इति [नानार्थ]रत्नमालायाम् । सदा सततं अभ्रान्तस्थाय्यपि अभ्रस्य मेघस्य अन्तः अन्तरे तिष्ठतीति तथोक्तः । 'खर्परे शरि वा विसर्जनीयलोपः' इति विसर्गलोपः । अनुगतमनोज्ञस्थिररुचिः अनुगता प्राप्ता मनोज्ञा रम्या स्थिरा अचञ्चला रुचिः कान्तिर्यस्य स तथोक्त इति विरोधः । मेघमण्डलान्तर्गतस्य विद्युदादेः स्थिररुचित्वविरोधादिति भावः । अभ्रान्ते

गगनपर्यन्ते तिष्ठतीति तथोक्त इति विरोधपरिहारः। गगनपर्यन्तोन्नतिमान् कमनीयशाश्वतकान्तिश्चेति भावः। अविकलमहानागमहितोऽपि अविकलैः सङ्कुलैः महानागैः महासर्पैः महितः महनीयोऽपि मरुत्केलीवासः मरुतः समीरणस्य केलीवासो विहारस्थानमिति विरोधः। सर्पाणां पवनाशनत्वादिति भावः। अविकलैस्सङ्कुलैर्महानागैरैरावतादिभिः महितः 'गजेऽपि नागमातङ्गा-वि'त्यमरः। मरुतां सुराणां केलीवासो विहारवसतिरिति विरोधपरिहारः। 'मरुतौ पवनामरौ' इत्यमरः। स्फुरत्पञ्चास्योऽपि स्फुरन्तः उल्लसन्तः पञ्चास्याः सिंहाः यस्मिन् स तथोक्तोऽपि अच्युतिमदगजः न विद्यते च्युतिर्येषां ते अच्युतयः अनाहताः मदगजाः यस्मिन् स तथोक्त इति विरोधः। गजानां सिंहसहभावासम्भवादिति भावः। स्फुरन् पञ्चास्यः शम्भुर्यस्मिन् स तथोक्तः अत एव अच्युतिमती अवर्जनीया अगजा पार्वती यस्मिन् स तथोक्तः इति विरोधपरिहारः। पार्वतीपरमेश्वरयोरयं विहारवास इति भावः। भवतीति शेषः। अत एव विरोधाभासालङ्कारः। 'आभासत्वे विरोधस्य विरोधाभास इष्यत' इति लक्षणात् ॥ ७१ ॥

७२

सुरक्ष्माजाधस्थां स्फटिकमणिवेदीमुपगता-
स्समास्थायां प्राञ्चद्गुणयुतविपञ्चीश्रुतियुताः।
जगुर्नानारागैर्ललितरवगन्धर्वललनाः
पुरारातेर्लीलाकथनमभितः प्राप्तहरिणाः ॥

सुरेति ॥ ललितः मधुरः रवो ध्वनिर्यासां तास्तथोक्ताः गन्धर्वललनाः गन्धर्वस्त्रियः सुरक्ष्माजानां कल्पवृक्षाणां अधस्थामधस्थितां स्फटिकमणीना-

कोपलानां वेदीं वितर्दिकामुपगता उपयातास्सत्यः समास्था[1]यां[1] स्थि[2]त्यां[2] प्राञ्चद्भिः प्रकाशमानैः गुणैः तन्त्रीभिः युतानां युक्तानां विपञ्चीनां वीणान 'वीणा तु वल्लकी । विपञ्ची सा तु तन्त्रीभिस्सप्तभिः परिवादिनी'त्यमरः । श्रुतिभिः स्वरारम्भकावयवविशेषैर्युताः । श्रुतिलक्षणन्तु सङ्गीतसुधाकरे* — ....इति नादस्य लक्षणमुक्तम् । 'नादादुत्पद्यते श्रुतिः । पवनाघट्टनात्तन्त्र्या यः प्रागुत्पद्यते ध्वनिः । श्रवणप्रीतिहेतुत्वाच्छ्रुतिरित्यभिधीयते । मन्द्रमध्यमताराख्य-स्थानभेदेन सा श्रुतिः' । 'एकैकस्मिन् स्वरस्थाने त्रिविधेत्येकविंशतिः । कृत्रिमा सहजाप्येका द्वाविंशतिरुदीरिता । श्रुतिलक्षणमित्युक्तं श्रुतिभ्यस्स्वरसम्भवः' इति । अत एव अभितः समन्तात् प्राप्ताः समागताः हरिणाः मृगाः यासां ताः तथोक्तास्सत्यः नानारागैः भूपाल्यादिभिरित्यर्थः । पुराणामरातेः शत्रोः शङ्करस्य लीलाकथनं दक्षिणामूर्त्यादिपञ्चविंशतिलीलाकथां जगुः अगायन् । गै शब्द इति धातोर्लिट् । गान्धारग्रामेण गानमकुर्वन्निति भावः । तदुक्तं सङ्गीतसुधाकरे—'षड्जमध्यमनामानौ ग्रामौ गायन्ति मानुषाः' । 'न तु गान्धारनामानं स लभ्यो देवयोनिभिरि'ति । अत्र गन्धर्वललनानां चारुतया असाधारणगानरूपक्रियावर्णनात्स्वभावोक्तिरलङ्कारः ॥ ७२ ॥

७३

प्रणेतारं त्यक्त्वा प्रणयकलहादाशुगतया
प्रविश्याम्भोवाहं नभसि कबरीभारगलितैः ।
लतान्तैर्नेत्रान्तप्रचलरुचिभिर्वार्मृदुपल-
प्रवृष्टिर्विद्युद्भिस्सह विरचिता तज्जलमुचः ॥

---

[1] य (घ) [2] त्वा (घ) * इति । नादस्य लक्षणमुक्तं (ग घ च) परन्त्वत्र नादलक्षणं तु कास्वपिमातृकासु न विद्यते । नादलक्षणं तु लुप्तम् ॥

प्रणेतारमिति ।। प्रणयकलहात् प्रणयकोपात् प्रणेतारं प्रियं त्यक्त्वा विहाय आशु शीघ्रं नभसि गगने अम्भोवाहं जलधरं प्रविश्य गतया गच्छन्त्या कयाचिदिति शेषः(कत्र्या) । कबर्याः केशपाशस्य भारात् गलितैः स्रस्तैः लतान्तैः कुसुमैः (करणैः) 'लतान्तः प्रसवः पुष्पमि'ति धनञ्जयः । नेत्रान्तयोरपाङ्गयोः प्रचला[1]भिश्चञ्चलाभिः[1] रुचिभिः कान्तिभिरेव तज्जलमुचः तज्जलधरस्य विद्युद्भिस्सह तटिद्भिस्साकमिति व्यस्तं रूपकम् । वार्मृदुपलानां [1]वर्षोपलानां प्रवृष्टिः वर्षं [वि]रचिता कृता ।

अत्र कबरीगलितकुसुमपातानां विद्युत्त्वेन रूपितापाङ्गरुचिसहितानां वर्षोपलवर्षत्वेनोत्प्रेक्षणादुत्प्रेक्षालङ्कारः । स च व्यञ्जकाप्रयोगाद्गम्यः ।।७३।।

७४

प्रियाकृष्टे मोहाज्जघनवसने मुग्धललनाः

प्रविश्यास्तेऽम्भोदं तटिदिव तदीया पुनरसौ ।

क्षणं तन्निश्श्वासाद्गलितजलदा सा च ददृशे

[2]तदोत्खाता[2] कोशाच्चलदसिलतेवेक्षुधनुषः ।।

प्रियेति ।। तत् तत्र जघनवसने कटिस्थितांशुके मोहात् रागात् प्रियेण वल्लभेन आकृष्टे गृहीते सति मुग्धललना नवोढा 'उदययौवना मुग्धा लज्जाविजितमन्मथे'त्यभियुक्तोक्तेः । अम्भोदं जलदं प्रविश्य क्षणं क्षणमात्रं

---

[1] श्चञ्चलास्ताभिः (ग च) [2] सरोत्खाता इति (क) मूलपाठः ! व्याख्यानपाठस्तु तदोत्खाता इत्येव । व्याख्यातृसूचितपाठभेदस्तु सरोत्खाता इति कान्चित्कः ।।

तदीया मेघसम्बन्धिनी 'त्यदादीनिचे'ति वृद्धिसंज्ञायां 'वृद्धाच्छ' इति छ-प्रत्यये 'आयनेयीनीयियः' इत्यादिना तस्येयादेशः। तटित्सौदामिनीव आस्ते तिष्ठति। आस उपवेशन इति धातोर्लट्। पुनश्चासौ ललनानिश्श्वासात् नासामारुतात् गलितः निर्गतः जलदो मेघो यस्यास्सा तथोक्ता सती तदा तस्मिन् काले कोशात् खड्गपिधानात् उत्खाता उद्धृता इक्षुधनुषः मदनस्य 'वा संज्ञायामि'ति बहुव्रीहौ धनुषो अनङादेशस्य संज्ञायां विभाषितत्वादनङादेशो न। चलदसिलतेव उच्चलत्खड्गलतेव ददृशे दृष्टा। 'स्मरोत्खाता कोशाच्चल-दसिलतेवोज्ज्वलवपु'रिति क्वचित्पुस्तकेषु दृश्यते।

अत्र घनविनिर्मुक्ततदन्तर्गतवनितायां मोहत्वादिधर्मसम्बन्धेन कोशोन्मुक्तमदनखड्गलतातादात्म्योत्प्रेक्षणादुत्प्रेक्षालङ्कारः ॥ ७४ ॥

७५

प्रियः पश्चादेत्य स्वकरयुगलाल्लोचनयुगं
तरुण्याः प्रच्छाद्य प्रणयरसिकस्तत्र निवसन्।
प्रकोष्ठे रोमाञ्चं युवतिरुपसंस्पृश्य रमणं
विदित्वा तन्नामग्रहणविधिनाऽऽमोदमकरोत् ॥

प्रिय इति ॥ तत्र प्रणये विस्रम्भे 'विस्रम्भः प्रणयेऽपि च' प्रणयास्त्वमी। विस्रम्भयाच्ञाप्रेमाणः' इत्यमरः। रसिकः रागवान् 'अत इनि ठनौ' इति मत्वर्थे ठन्प्रत्यये 'ठस्येक' इतीकादेशः। प्रियः पतिः पश्चात्पृष्ठभागादेत्य आगत्य स्वकरयुगलात् निजहस्तद्वयात् तरुण्याः रमण्याः लोचनयुगं नयनयुगलं प्रच्छाद्य आच्छाद्य निवसन् स्थितः अभवदिति शेषः। युवतिः तरुणी प्रकोष्ठे

कूर्पराधोभागे 'प्रकोष्ठस्तस्य चाप्यधः' इत्यमरः । रोमाञ्चं रोमोद्गममुपसंस्पृश्य परिमृज्य रमणं प्रियं विदित्वा ज्ञात्वा तस्य प्रियस्य नामग्रहणमेव विधिः व्यापारः तेन आमोदं सन्तोषं अकरोत् कृतवती । प्रकोष्ठे रोमाञ्चो यस्य तं तथोक्तं प्रियमुपस्पृश्य विदित्वेति वाऽन्वयः । 'अमूर्धमस्तकात्स्वाङ्गादकाम' इति सप्तम्या अलुक् । अत्र नेत्रावलोकनरूपक्रियायाः प्रतिषेधेऽपि प्रियविज्ञानलक्षण-कार्योत्पत्तेर्विभावनालङ्कारः । 'क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावने'ति लक्षणात् ॥ ७५ ॥

७६

तुरङ्गास्या काचित्प्रणयिनि रुषा कुञ्जभवनं
प्रविश्याथागन्तुं प्रकटितमुखी पश्यति दिशः ।
तदा सप्ताश्वस्तन्मुखमभिमुखं प्रेक्ष्य मुमुदे
रथस्याश्वो मे स्यात्समुचित इति क्ष्माधरतटे ॥

तुरङ्गास्येति ॥ क्ष्माधरस्य मेरोः तटे सानौ काचित्तुरङ्गास्या अश्वमुखी प्रणयिनि प्रिये रुषा [1]रोषेण[1] कुञ्जः निकुञ्ज एव भवनं गृहं 'निकुञ्ज कुञ्जौ वा क्लीबे लतादि पिहितोदरे' इत्यमरः । प्रविश्य अथानन्त-रमागन्तुं बहिरायातुं प्रकटितं प्रकाशितं मुखं यस्यास्सा तथोक्ता 'स्वाङ्गाच्चोप-सर्जनादसंयोगोपधादि'ति ङीप्प्रत्ययः । दिशः ककुभः पश्यति । दृशिर् प्रेक्षण इति धातोः 'पाघ्राध्मे'त्यादिना पश्यादेशः । तदा तस्मिन् काले सप्ताश्वः सूर्यः अभिमुखं सम्मुखं तस्याः तुरङ्गवक्त्रायाः मुखं वक्त्रं प्रेक्ष्य दृष्ट्वा मे मम

---

[1] कोपेण (क घ)

रथस्य स्यन्दनस्य समुचितः योग्यः अश्वः तुरङ्गः स्यात् भवेदिति मुमुदे सन्तुष्टः । मुद हर्षे इति धातोर्लिट् ।

अत्र भास्वतः तुरङ्गमुख्यामश्वभ्रान्तिप्रतीतेः भ्रान्तिमदलङ्कारः । 'भ्रान्तिमान् अन्यसंवित्तत्तुल्यदर्शने' इति लक्षणात् ॥ ७६ ॥

७७

मृगाङ्कग्रावाग्रोच्चलितबलिसद्मोरगपति-
स्फटारत्नारक्तद्युतिमधिगता व्याघ्रशिशवः ।
समीक्ष्यासृग्भ्रान्त्या विवृतवदना नम्रशिरसः
लिहन्त्यद्रेरग्रे क्षुदुपनिहताः क्षुब्धमनसः ॥

मृगाङ्केति ॥ अद्रेः मेरोरग्रे शिखरे क्षुधा क्षुधया उपनिहताः हताः अत एव क्षुब्धमनसः क्लिष्टचेतसः व्याघ्रशिशवः शार्दूलशावकाः मृगाङ्कग्रावाग्रेषु चन्द्रकान्तोपलप्रान्तेषु उच्चलिताः समुद्गताः बलिसद्मनि पाताले उरग-पतीनां सर्पश्रेष्ठानां स्फटासु फणासु 'स्फटायां तु फणा द्वयोरि'त्यमरः । रत्नानां मणीनाम् आरक्ताः समन्ताद्रक्तवर्णा द्युतयः कान्तयः ताः समीक्ष्य विलोक्यासृग्भ्रान्त्या रुधिरभ्रमेण अधिगताः प्राप्ताः नम्राणि नतानि शिरांसि येषां ते तथोक्ताः विवृतानि विस्तृतानि वदनानि मुखबिलानि यैस्ते तथोक्ता-स्सन्तः लिहन्ति आस्वादयन्ति । लिह आस्वादन इति धातोर्लट् । निखिललोकावलम्बोऽयमिति भावः ।

अत्र पातालस्थफणिफणारत्नद्युतिषु व्याघ्रशिशूनां रुधिरभ्रान्तिवर्णनाद् भ्रान्तिमदलङ्कारः ॥ ७७ ॥

७८

शशाङ्काश्मालम्बप्रहितवपुषं वीक्ष्य रमणं
स्वकीयाङ्गं तत्र प्रतिफलितमालोक्य सविधे ।
परां कान्तां मत्वा रुषमुपगता मुग्धललना
कटाक्षैरारक्तैररुणमकरोदच्छमुपलम् ॥

शशाङ्केति ॥ तत्र मुग्धललना मुग्धाङ्गना 'मुग्धस्सुन्दरमूढयोरि'त्यमरः। मुग्धेति विशेषणं भ्रान्त्युपपादनार्थं शशाङ्काश्मा चन्द्रकान्तोपल एव आलम्ब आश्रयः तत्र प्रहितं सक्तं वपुः शरीरं यस्य तं तथोक्तं रमणं प्रियं विलोक्य सविधे समीपे 'सदेशाभ्याशसविधसमर्यादसवेशवदि'त्यमरः। तत्र शशाङ्कोपले प्रतिफलितं प्रतिबिम्बितं स्वकीयाङ्गं निजशरीरम् आलोक्य अवेक्ष्य परामन्यां कान्तां रमणीं मत्वा ज्ञात्वा रुषं रोषमुपगता प्राप्ता सती आरक्तैस्समन्तादरुणैः कटाक्षैः दृष्टिनिक्षेपैः 'ईक्षणं दर्शनं दृष्टिद्योतनं च समं मतम् । कटाक्षो दृष्टि-निक्षेप' इति हलायुधः। अच्छं स्वच्छमुपलं चन्द्रकान्तशिलामरुणं रक्तवर्ण-मकरोत् विदधे।

अत्र चन्द्रकान्तोपलस्य स्वीय धावल्यगुणपरित्यागेन प्रियालम्बनशिला-प्रतिफलितनिजाङ्गावलोकनजनितपराङ्गनाभ्रान्तिकृतरोषातिशयरक्तमुग्धाङ्गनाकटा-क्षकृतारुणिमगुणप्राप्तिवर्णनात्तद्गुणालङ्कारः । 'स्वमुत्सृज्य गुणं योगादत्युज्ज्वल-गुणस्य यत् । वस्तु तद्गुणतामेति भण्यते स तद्गुण' इति लक्षणात् ॥७८॥

७९

तमस्तोमेनोच्चैर्निबिडवनमध्यस्थितिवलात्
त्विषां पत्युः प्राप्ताः कतिपयरुचस्तत्र सहसा ।

प्रकृष्यान्तर्बद्धा इव रुरुचिरे चारु महसः
स्फुरज्ज्योतिर्वल्यः क्षितिधरसभादीपसदृशः ॥

तम इति ॥ क्षितिधरस्य मेरोः सभायामास्थाने दीपैः प्रदीपैः सदृशः समानाः चारुमहसः रम्यकान्तयः स्फुरन्त्यः भासमानाः ज्योतिर्वल्ल्यः ज्योतिर्लताः (कर्त्र्यः) तत्र मेरौ प्राप्ताः स्थिताः निबिडस्य सान्द्रस्य वनस्य मध्ये स्थितिबलात् अवस्थानबलात् तमस्तोमेन तिमिरबृन्देन सहसा बलात्कारेण प्रकृष्य गृहीत्वा उच्चैः दृढं बद्धाः परिणद्धाः त्विषां रुचां पत्युः भर्तुः सूर्यस्य 'ख्यत्यात्परस्ये'ति ङसोऽकारस्योकारादेशः । कतिपयरुचः कतिचित्त्विषः इव रुरुचिरे रेजिरे । रुच दीप्ताविति धातोर्लिट् ।

अत्र ज्योतिर्लतासु मेरूपान्तवर्तिघनतरवनमध्यस्थिततमःपटलबलात्करा-कृष्टबद्धभास्कररुचितादात्म्योत्प्रेक्षणादुत्प्रेक्षालङ्कारः । तमस्स्तोमेन बद्धाः सूर्यरुच इति तमसश्शत्रुभूतसूर्यसम्बन्धिरुचिरूपजायासु पराक्रमप्रतीतेः प्रत्यनीकालङ्कारः । 'प्रत्यनीकं बलवतश्शत्रोः पक्षे पराक्रम' इति लक्षणात् । सभादीपसदृश इत्यत्रोपमालङ्कारः । एतेषां च संसृष्टिः ॥ ७९ ॥

८०

हरिद्वर्णान्प्रोद्यन्मणिशिखरलग्नांश्च दिनकृ-
त्तुरङ्गानाक्रष्टुं शुकततिधिया धावति पुरः ।
वनोतुस्तत्काले विवृतमुखमुद्वेजयति तं
सुवर्णाद्रेर्वप्रे खरकिरणसूतः स्मितमुखः ॥

हरिदिति ॥ सुवर्णाद्रेः मेरोः वप्रे तटे वनोतुः वनमार्जालः

'ओतुर्बिडालो मार्जारः' इत्यमरः । 'ओत्वोष्ठयोस्समासे वे'ति पररूपत्वम् । प्रोद्यन्त उद्गताः मणयो मरकतानि यस्य तत्तथोक्तं तस्मिन् शिखरे शृङ्गे लग्नान् व्यासान् हरिद्वर्णान् हरितरूपान् दिनकृतः सूर्यस्य तुरङ्गान् अश्वान् शुकततिधिया कीरसंहतिज्ञानेन वर्णसाम्यादिति भावः । आक्रष्टुं ग्रहीतुं पुरः अग्रे धावति सत्वरं गच्छतीत्यर्थः । सृ गताविति धातोः 'पाघ्राध्मे'त्यादिना धौ इत्यादेशः । मार्जालस्य शुकविरोधित्वादिति भावः । तत्काले मार्जाल-धावनसमये खरकिरणस्य सूर्यस्य सूतः सारथिररुणः । स्मितं मुखं यस्य स तथोक्तस्सन् विवृतमुखं विस्तृतवदनबिलं तं मार्जालं उद्वेजयति वारयति । अत्र वनमार्जालस्य सू[1]र्याश्वेषु[1] शुकभ्रान्तिवर्णनाद्भ्रान्तिमदलङ्कारः ॥ ८० ॥

८१

शशाङ्कग्रावाग्रे मृगमदमृगेष्वर्जुनरुचौ
उषित्वा निर्यातेष्वलिकुलवृतस्तत्सुरभितः ।
कुभृत्कूटाहत्या च्युतमिव कलङ्काञ्चितवपुः
विधोर्बिम्बं तत्र स्फुरति परिवृत्तस्तदुपलः ॥

शशाङ्केति ॥ तत्र मेरौ अर्जुना धवला रुचिः कान्तिर्यस्य तस्मिन् तथोक्ते शशाङ्कग्रावाग्रे चन्द्रकान्तोपलशिखरे उषित्वा स्थित्वा मृगमदमृगेषु कस्तूरीमृगेषु निर्यातेषु निर्गतेषु सत्सु तत्सुरभितः तस्य मृगमदस्य सुरभितः सौरभ्यात् पञ्चम्यास्तसिल् प्रत्ययः । अथवा तत्सुरभितः तेन मृगमदेन सुरभितः आमोदितः अत एव अलीनां भृङ्गाणां कुलेन समूहेन वृतः

---

[1] र्यत्वेन (क घ)

व्याप्तः परिवृत्तः वर्तुलः तदुपलः शशाङ्कोपलः कुभृतः गिरेः कूटस्य शृङ्गस्य आहत्या क्षत्या च्युतं पतितं कलङ्केन लाञ्छनेन अञ्चितं अङ्कितं वपुश्शरीरं यस्य तस्य तथोक्तस्य विधोः चन्द्रस्य बिम्बं मण्डलमिव स्फुरति भाति। अत्रालिकुलसङ्कुलचन्द्रकान्तोपलस्य कुभृत्कूटाहतिच्युताङ्कशशाङ्कबिम्बतादात्म्येन सम्भावनादुत्प्रेक्षालङ्कारः ॥ ८१ ॥

८२

खचर्या गायन्त्यास्सरसरवमकार्णितवतः
मृगस्योत्थैस्सद्यः पुलकनिकरैर्घृष्टवपुषः ।
महापीयूषौघे स्रवति सविधे शीतमहसः
[1]पिबन्ति स्वच्छन्दं तमपि फणिनस्तत्र परितः[1] ॥

खचर्या इति ॥ तत्र मेरौ गायन्त्याः गानं कुर्वन्त्याः खचर्याः किन्नर्याः सरसरवं मधुरस्वरं सविधे समीपे आकर्णितवतः श्रुतवतः 'कर्तरिकृदि'ति कर्तरि क्तवतुप्रत्ययः। मृगस्य हरिणस्य सम्बन्धिभिः परितः समन्तात् सद्यः सपदि उत्थैरुत्पन्नैः, पुलकनिकरैः रोमाञ्चोत्करैः घृष्टवपुषः क्षुण्णमूर्तेः शीतमहसः चन्द्रात् महत्यधिके पीयूषौघे अमृतसमृद्धौ स्रवति प्रवहति सति, फणिनः सर्पाः तं पीयूषौघं स्वच्छन्दं यथेष्टं पिबन्ति लिहन्ति। सङ्गीतमाधुर्यातिशयस्य मृगादेरप्यानन्दकरत्वादिति भावः।

अत्र खचरीसरससङ्गीतश्रुतिसमानन्दितमृगरोमाञ्चे संघृष्टचन्द्रबिम्बान्तर्निर्गलदनर्घसुधारसधारापानासंम्बन्धेऽपि फणिषु तत्सम्बन्धोक्तेरतिशयोक्तिर-

[1] ।ामेत्य शृण्वन्तस्तमपि फणिनः पान्ति परितः इति क्वचित् दृश्यतेति व्याख्याता।

लङ्कारः। 'समेत्य श्रुण्वन्तस्तमपि फणिनः पान्ति परित' इति क्वचिद्दृश्यते। पानार्थक पा धातोर्लटि पान्तीति रूपं चिन्त्यम् ॥ ८२ ॥

८३

ज्वलद्भास्वत्प्रांशुप्रहतिचलिता मुग्धललना
त[1]रुच्छा[1]यामेत्य स्वतनुरुचिभिस्तामभिहताम्।
समीक्ष्य स्वर्णाभा तरुरयमपच्छाय इति तं
विसृज्यान्यान्वृक्षान् श्रयति च तथा सन्त्यजति च ॥

ज्वलदिति ॥ तत्र स्वर्णाभा स्वर्णस्य सुवर्णस्याभेवाभा यस्यास्सा तथोक्ता। 'सप्तम्युपमानपूर्वपदस्य बहुव्रीहिर्वाच्यः वा चोत्तरपदलोपश्चे'ति समासः। मुग्धललना मुग्धाङ्गना ज्वलतां दीप्यमानानां भास्वतस्सूर्यस्य प्रांशूनां प्रकृष्टांशूनां 'प्रादयो गताद्यर्थे प्रथमया' इति समासः। [2][प्रहतिचलिता][2]- प्रहतिभिः क्षतिभिः चलिता चञ्चलिता सती। तरुच्छायां तरोः वृक्षस्य छायामनातपं 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपमि'त्यमरः। एत्य प्राप्य स्वतनुरुचिभिः निजशरीरकान्तिभिः अभिहतां निहतां तां छायां समीक्ष्य विलोक्य अयं तरुः वृक्षः अपगता छाया अनातपो यस्य स तथोक्तः 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपश्चे'ति समासः। इति एवं मत्वेत्यर्थः। गम्यमानत्वादप्रयोगः। तं वृक्षं विसृज्य विहाय अन्यान् वृक्षान् तथा तेन प्रकारेण श्रयति आश्रयति च सन्त्यजति च जहाति च।

---

[1] रोच्छा (ग, च) [2] नास्ति (क, ग, घ, च)

अत्र वनितायाः छायावस्त्वेव तरुषु तदभाववत्त्वभ्रान्तिप्रतिपादनाद्भ्रान्तिमदलङ्कारः। स च स्वीकृततरुणीतनुरुचिसम्बन्धकृतच्छायागतनीलिमगुणपरित्यागकृत इति तद्गुणालङ्कारेण सङ्कीर्णश्च। 'स्वमुत्सृज्य गुणं योगादत्युज्ज्वलगुणस्य यत्। वस्तु तद्गुणतामेति भण्यते स तु तद्गुण' इति लक्षणात् ॥८३॥

८४

प्रहर्तुं मन्देहान् द्युमणिमणिशाणोपलतटे
निघृष्टस्यार्केण स्वकरखरखड्गस्य परितः।
स्फुलिङ्गाः प्रोत्कीर्णा इव शिखिकणास्तस्य[1] निभृतं[1]
विरेजुर्मध्याह्ने दवदहनबीजप्रतिभटाः॥

प्रहर्तुमिति॥ मध्याह्ने मध्यंदिने 'राजाह' इत्यादिना टचि 'अह्नोऽह्न एतेभ्य' इत्यहन्शब्दस्याह्नादेशः। दवदहनस्य वनहुताशनस्य बीजानां प्रतिभटाः समाना इत्यर्थः। तस्य सूर्यकान्तोपलस्य शिखिकणा अग्निकणाः(कर्तारः)मन्देहान् राक्षसविशेषान् प्रहर्तुं हन्तुमर्केण सूर्येण द्युमणिमणिः सूर्यकान्तोपल एव शाणं कर्षोपलः तस्य तटे निघृष्टस्य उत्तेजितस्य स्वकरखरखड्गस्य निजहस्तस्थितशितकौक्षेयकस्य अथवा स्वकरः निजकिरण एव खरं निशितं खड्गं तस्य सम्बन्धिनः परितः समन्तात् प्रोत्कीर्णाः उद्गताः स्फुलिङ्गाः अग्निकणा इव निभृतमधिकं विरेजुः बभुः।

अत्र मध्याह्नसमयसञ्जातसूर्यकान्तशिलातलोत्थितेषु शिखिकणेषु शाणोल्लेखनसमुद्भूतसूर्यकिरणखरखड्गसम्बन्धिस्फुलिङ्गतादात्म्योत्प्रेक्षणादुत्प्रेक्षा-

---

[1] 'किरत' इति व्याख्यातृसूचितपाठभेदः।

लङ्कारः । तस्य निभृतमित्यत्र 'तस्य किरत' इति पाठे किरतः उद्गमतः तस्येत्यन्वयः ॥ ८४ ॥

८५

सुधारुग्ग्रावाग्रे निबिडतरपत्रान्तरगता
प्रभा भानोर्भाति द्रुमसुमरजोभिः प्रमिलिता ।
तदीयाभिर्भिन्ना द्युतिभिरमलाभिर्नगसुता-
कुचार्द्रश्रीखण्डद्रवयुतभुजेवाङ्गजरिपोः ॥

सुधेति ॥ तत्र सुधारुग्ग्राव्णः चन्द्रकान्तोपलस्य अग्रे अन्ते द्रुमाणां वृक्षाणां सुमरजोभिः पुष्परेणुभिः प्रमिलिता संयुता निबिडतराणामत्यन्तसान्द्रतराणां पत्राणां पर्णानामन्तरमवकाशं गता प्राप्ता भानोस्सूर्यस्य प्रभा कान्तिः वक्ष्यमाणसादृश्यलाभाय विशेषणद्वयम् । तदीयाभिः गिरिजासम्बन्धिनीभिः अमलाभिः स्वच्छाभिः द्युतिभिः कान्तिभिः भिन्ना युक्ता अङ्गजरिपोः शिवस्य सम्बन्धिनी । नगसुतायाः पार्वत्याः कुचयोः स्तनयोः आर्द्रस्य सिक्तस्य श्रीखण्डस्य चन्दनस्य द्रवेण पङ्केन युता संयुता भुजा बाहुरिव भाति राजते । भुजशब्दस्याबन्तत्वमपि सम्भवति । 'दोः प्रवेष्टो भुजो बाहुर्भुजा च स्मर्यते बुधैरि'ति हलायुधाभिधानात् । उक्तं च श्रीभोजराजेन — 'गच्छता दशरथेन निर्वृतिं भूभुजामसुलभां भुजाबलादि'ति ।

अत्र परागकलितपर्णान्तप्रसृतार्करुचा पार्वतीकुचासिक्तचन्दनपङ्कानुलिप्तहरभुजसादृश्यप्रतिपादनादुपमालङ्कारः॥ ८५ ॥

८६

गजस्कन्धासीनः कपिरुपगतः क्ष्माजशिखरात्
चलल्लाङ्गूलाग्रस्सपदि शितिजम्बूफलधिया ।
स्पृशन्भृङ्गान्गण्डे मदरसविषक्तान्प्रचलितान्
ततः पश्यन्नानाविकृतिमगमत्साध्वसवशात् ॥

गजेति ॥ तत्र कपिः वानरः क्ष्माजशिखरात् वृक्षाग्रात् उपगतः आगतः गजस्य द्विपस्य स्कन्धे ग्रीवायामासीनः उपविष्टः 'स्कन्धो वायुविभागेऽसे प्रकाण्डे संहतौ नृपे' इति नानार्थरत्नमालायाम् । शितिजम्बूफलस्य नीलजाम्बवस्य भ्रान्त्या भ्रमेण 'शितिः कृष्णे सिते भूर्जे' इति विश्वः । चलत् चञ्चलं लाङ्गूलस्य वालस्याग्रं अन्तो यस्य स तथोक्तः । गण्डस्य कटस्य मदरसे मदास्वादने विषक्तान् आसक्तान् 'गजदानं गर्वहर्षरेतो मृगमदा मदा' इति [नानार्थ] रत्नमालायाम् । भृङ्गान् भ्रमरान् स्पृशन् ततः अनन्तरं प्रचलितान् चलान् पश्यन् सन् विलोकयन् सन् सपदि तत्क्षणे साध्वसवशात् त्रासवशात् नानाविकृतिं बहुविध[वि]क्रियामगमत् जगाम । अत्र गजगण्डमदास्वादनलुब्धमधुकरेषु क[पेः] जम्बूफलभ्रान्तिवर्णनाद्भ्रान्तिमदलङ्कारः ॥८६॥

८७

सुधास्फीतं गीतं खचरसुदृशामुन्नतमुदं
वहन्त्याश्शृण्वन्त्यास्स्तनभरगलत्सारपयसाम् ।
प्रवाहे स्वर्धेनोश्श्रुतिपरवशे स्वाङ्कहरिणे
पतन्मज्जन्नस्मादभवदमृताङ्गो मृगधरः ॥

सुधेति ॥ तत्र स्वाङ्कहरिणे निजकलङ्कभूतमृगे श्रुत्या गीत्या (करणेन) परवशे मोहिते सति मृगधरः चन्द्रः सुधास्फीतं सुधेव अमृतमेव स्फीतं श्रेष्ठं खचरसुदृशां किन्नरस्त्रीणां गीतं गानं शृण्वन्त्याः आकर्णयन्त्याः अत एव उन्नतमुदमुत्कृष्टानन्दं वहन्त्याः स्वर्धेनोः कामधेनोः स्तनभरात् पयोधरभारात् गलतां स्रवतां साराणां मधुराणां पयसां क्षीराणां प्रवाहे स्रोतसि पतन् प्रविष्टः मज्जन् निमग्नस्सन् अस्मात् पयः प्रवाहमज्जनवशात् अमृताङ्गः अमृतं अमृतमयं अङ्गं वपुर्यस्य स तथोक्तः अभवत् ।

अत्र चन्द्रस्य किन्नरीगीताकर्णनानन्दकृतस्वर्धेनुपयःपरिवाहमज्जनाद्यसम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरलङ्कारः ॥ ८७ ॥

८८

विलीनोऽयं माभूद्दिनकरनिपातादिति धिया
सभार्द्रैरम्भोभिस्सितपटशतैरावृत इव ।
विधात्रा विज्ञात्रा जलदपटलैरावृततटो
महान्मेर्वद्रीन्द्रः स्फुरति विततामर्त्यविभवः ॥

विलीन इति ॥ विततः विस्तृतः अमर्त्यानां सुराणां विभवः वैभवः यस्मिन् स तथोक्तः महान् मेर्वद्रीन्द्रः मेरुगिरिवरः जलदपटलैः मेघमण्डलैः आवृताः आच्छादिताः तटाः सानवो यस्य स तथोक्तस्सन् * 'प्रपातस्तु तटो भृगुरि'त्यमरः । अत एव अयं मेरुः दिनकरनिपातात् सूर्यप्रसरणात् विलीनः

---

* प्रपातस्तु तटो भृगुरिति पाठे 'प्रपत्यते यतस्तटात्स भृगुः । बिभर्ति भुज्यते वा भृगुः इति क्षीरस्वामी ॥

द्रुतो मा भूत् न भवतु । 'माङि लुङ्' इति लुङि 'न माङ्योगे' इति अडागमनिषेधः । इति धिया इति बुद्ध्या विज्ञात्रा विवेकवता विधात्रा ब्रह्मणा अम्भोभिर्जलैः समार्द्रैस्सम्यक्सिक्तैः सितपटशतैः धवलवस्त्रशतैः आवृत इव आच्छादित इव स्फुरति भाति ।

अत्र मेघपरिवृतमेरुतटे [1][समा][1]र्द्रपटश[2]तावृततादात्म्योत्प्रेक्षणादुत्प्रेक्षा-लङ्कारः[2] ॥ ८८ ॥

८९

करी कश्चिद्दृष्टः कनकनगवत्तत्तटसरः-
पयस्स्नानाल्लग्नस्फुटनलिनधूलिप्रपिहितः ।
बृहत्कुम्भः कूटः कटतटरटद्भृङ्गपटलं
पयोभृद्यस्यासीत्पविरपि रदः पीवरवपुः ॥

करीति ॥ तत्र तटसरसः तटस्थितसरस्याः पयस्स्नानात् जलमज्जनात् लग्नानां व्याप्तानां स्फुटानां प्रफुल्लानां 'प्रफुल्लोत्फुल्लसम्फुल्लव्याकोचविकचस्फुटा' इत्यमरः । नलिनानामरविन्दानां धूलिभिः रेणुभिः प्रपिहितः प्रकर्षेणावृतः कश्चित् करी गजः कनकनगवत् सुवर्णाद्रिरिव 'तेन तुल्यं क्रियाचेद्वतिरि'ति वतिप्रत्ययः । दृष्टः ईक्षितः जनैरिति भावः । यस्य गजस्य बृहत्कुम्भः [3]पृथुशिरः[3] 'कुम्भौ घटेभमूर्धानावि'त्यमरः । कूटः शृङ्गं कटतटे गण्डस्थले 'गजगण्डे कटतटावि'त्यमरः । रटतां ध्वनतां भृङ्गाणां मधुलिहां पटलं समूहः पयोभृत् जलधरः पीवरं पृथुलं वपु[4]राकारो[4] यस्य स तथोक्तः । रदः दन्तोऽपि पविः अशनिः आसीत् अभूत् ।

---

[1] ना (क घ) सा (ग च) [2] लुप्तभागः (क घ) [3] लुप्तः (क घ) [4] यो (क घ)

अत्र कुम्भादितादात्म्येनारोपितशृङ्गादिसाधारणधर्मवत्तया पद्मपरागावृत-तदीयवर्णसम्बन्धेन च कनकनगसादृश्यस्य व्यक्तं करिणि प्रतीतेरुपमालङ्कारः। ककारटकारादीनामसकृदावृत्तेर्वृत्त्यनुप्रासश्शब्दालङ्कारः। तयोः परस्परनैरपेक्ष्यात् संसृष्टिः। लक्षणन्तु वक्ष्यते ॥ ८९ ॥

९०

कुभृद्वप्रक्रीडाप्रतिघटितधात्वञ्चितरदः
परासृक्पृक्तोद्यद्बलमुसलवद्यस्य शुशुभे।
कटप्रान्तश्च्योतन्मदसुरभिमग्नालिविततिः
बहुश्रीशक्राश्मावलिरिव समायाति स गजः ॥

कुभृदिति ॥ तत्र यस्य गजस्य कुभृतः मेरोः वप्रेषु तटेषु क्रीडया खेलया प्रतिघटितैः सङ्घटितैः धातुभिः गैरिकादिभिः 'धातुर्मनश्शिलाद्यद्रेर्गैरिकं तु विशेषतः' इत्यमरः। अञ्चितः महितः रदः दन्तः 'रदना दशना दन्ता रदा' इत्यमरः कर्ता परेषां शत्रूणां असृग्भिः रुधिरैः पृक्तं व्याप्तमुद्यत् उन्नतं बलस्य बलभद्रस्य मुसलं मुसलायुधं तद्वत् तदिव 'तेन तुल्यमि'त्यादिना वति प्रत्ययः। शुशुभे रेजे। कटस्य गण्डस्य प्रान्ते निकटे च्योततः स्रवतः मदस्य दानरसस्य सुरभौ सौरभे मग्नानां संसक्तानाम् अलीनां भृङ्गाणां विततिः पङ्क्तिः बहुश्रियां अधिककान्तीनां शक्राश्मनां इन्द्रनीलमणीनामाव[लिरि]व श्रेणिरिव शुशुभे। सः गजः द्विपः समायाति सञ्चरति।

अत्र गैरिकादिधातुसम्पृक्तस्य गजदन्तस्य शात्रवरक्तसिक्तबलभद्रकर-कलितमुसलायुधेन कटनिमग्नषट्पदसंहतेश्च नीलमणिश्रेण्या च व्यक्तं सादृश्य-प्रतिपादनादुपमालङ्कारः ॥ ९० ॥

९१

सरस्स्नातः पद्मस्फुटनवरजोभिस्सुरभितः
सरोजातोत्तंसो दशनरुचिहाराञ्चितगलः ।
कटस्थालीन्द्रा[1]श्माभरण[1]कलितश्शैवलपटः
करेण्वग्रे कश्चिद्वहति विटलीलां मदगजः ॥

सर इति ॥ तत्र सरसि सरस्यां स्नातः मग्नः पद्मानामरविन्दानां स्फुटैः व्यक्तैः नवैः नव्यैः रजोभिः परागैः सुरभितः परिमलितः सरोजातं जलजमुत्तंसः शिरोभूषणं यस्य स तथोक्तः 'उत्तंसः कर्णभूषायां शेखरे चावतंसवदि'ति विश्वः । दशनयोः दन्तयोः रुचिभिः दीप्तिभिरेव हारैः अञ्चितः महितः गलः कण्ठो यस्य स तथोक्तः । कटस्थाः गण्डस्थिताः अलयः भृङ्गा एव इन्द्राश्मनामिन्द्रनीलमणीनामाभरणानि भूषणानि तैः कलितः अलङ्कृतः शैवलः शैवालमेव पटः अंशुकं यस्य स तथोक्तः 'जलनीली तु शैवालं शैवलो' इत्यमरः । कश्चित् मदगजः मत्तेभः करेणोः करिण्याः अग्रे पुरतः 'करेणुरिभ्यां स्त्रीनेभ' इत्यमरः । विटस्य षिद्गस्य लीलां विलासं वहति बिभर्ति । यथा विटः स्नानाङ्गविलेपनादिभिर्हारनीलमणिकर्णावतंसादिभिश्च विलसितः प्रियासमीपमुपयाति तथा गजोऽपि तादृशस्सन्नेव करिणीमुपयातीति भावः । अन्यधर्मस्यान्यत्रासम्भवेन विटलीलेव लीलेत्युपमाकल्पकवस्तुसम्बन्धवर्णनान्निदर्शनालङ्कारः । निदर्शना । *'अभवमद्वस्तुसम्बन्ध उपमापरिकल्पकः' इति लक्षणात् । क्वचित् 'कटस्थालीन्द्राश्मश्रवणभरण' इति पाठः ॥९१॥

---

[1] श्मश्रवणभरण इति च व्याख्यातृसूचितपाठभेदः ।

* सम्भवद्वस्तुसम्बन्ध उपमापरिकल्पितः इति व्याख्यानपाठः । उपरिनिर्दिष्टः काव्यप्रकाशपाठः ।

९२

पयश्श्रीयुक्तत्वाद्भवति बिसकाण्डो न रदनः
करोऽयं नैवाहिः प्रकिरति विषं यत्स्वमुखतः ।
श्रुतिर्नासौ मेघस्स्फुरितचपलत्वात्पुनरयं
न चेभेन्द्रः प्रोद्यत्कटकमहितत्वात्क्षितिधरः ॥

य इ ।ि अयं पयश्श्रिया जलसमृद्ध्या क्षीरसदृशशोभया च युक्तत्वात् 'पयस्तु नीरक्षीरयोरि'ति विश्वः । रदनः दन्तः न भवति किन्तु बिसकाण्डः कमलनालः अयं करः शुण्डादण्डः 'करो वर्षोपले पाणौ शुण्डायां किरणे बलावि'ति [नानार्थ]रत्नमालायाम् । न भवति किन्तु अहिस्सर्पः यत् यस्मात् कारणात् स्वमुखतः विषं जलं गरलञ्च 'विषं तु गरले तोय' इति विश्वः । प्रकिरति क्षिपति । कॄ विक्षेप इति धातोर्लट् । असौ स्फुरित-चपलत्वात् स्फुरितं दीप्तं च तत् चपलत्वं चञ्चलत्वञ्च तत्तथोक्तं तस्मात् । अन्यत्र स्फुरिताः चपला विद्युतो यस्मिन् स तथोक्तः तस्य भावस्तत्त्वं तस्मात् । 'तटित्सौदामिनी विद्युच्चञ्चला चपलाऽपिच' इत्यमरः । 'गोस्त्रियोरुप-सर्जनस्ये'ति ह्रस्वः । श्रुतिः कर्णः न किन्तु मेघः जलदः पुनरयमयं पुनस्त्वर्थः । कटकैर्दन्ताभरणैः अथवा कटकाभ्यां गण्डस्थलाभ्यां स्वार्थे कप्रत्ययः । सानुभिश्च महितः अञ्चितः तस्य भावस्तत्त्वं तस्मात् 'कटकं वलये सानौ राजधानी नितम्बयोः । समुद्रलवणे दन्तमण्डने दन्तिनामपि' इति विश्वः । इभेन्द्रः गजश्रेष्ठः न च, किन्तु क्षितिधरः पर्वतः । अत्र प्रकृत गजादिकमप-ह्नुत्यान्यपर्वताद्यभेदसाधनादपह्नवालङ्कारः । 'प्रकृतं यन्निषिध्यान्यत्साध्यते सात्वपह्नुतिरि'ति लक्षणात् । स च युक्तिपूर्वकत्वाद्धेत्वपह्नवः ॥ ९२ ॥

९३

समुन्मुक्तो हस्ताज्जरदजगरः केन करिणा
सरत्यभ्रे मुञ्चन्गवयपललं पूर्वगिलितम् ।
गराग्निं वक्त्राग्रादिव रविरमुं प्रेक्ष्य चकितः
तमोभ्रान्त्या तार्क्ष्यस्तमहिमपजह्रे परिगतः ॥

समुन्मुक्त इति ॥ तत्र जरदजगरः वृद्धसर्पः 'तिलित्सस्स्यादजगरे शयुर्वाहस इत्युभौ' इत्यमरः । केनचित् करिणा गजेन हस्तात् करात् समुन्मुक्तः उत्क्षिप्तः पूर्वगिलितं पूर्वकालभक्षितं गवयस्य मृगविशेषस्य पललमामिषं 'पललं क्रव्यमामिषमि'त्यमरः । गराग्निं विषाग्निमिव वक्त्राग्रात् मुखाग्रात् मुञ्चन् उद्गिरन् सन् अभ्रे व्योम्नि सरति गच्छति । सृ गताविति-धातोर्लट् । 'त्वरगत्यर्थत्वाभावान्नेह धावि'त्यादेशः । तदा रविः सूर्यः अमुमजगरं प्रेक्ष्य विलोक्य तमोभ्रान्त्या राहुभ्रमेण 'तमस्तु राहुस्स्वर्भानुरि'त्यमरः । चकितः भीतः । तार्क्ष्यः गरुडः परिगतः समुपेतस्सन् तमहिमजगरमपजह्रे अपहृतवान् । हृञ् हरण इति धातोर्लिट् ।

अत्र विषाग्निपललयोस्सादृश्यवर्णनात् तस्मिन् फणिनि सूर्यस्य राहुभ्रान्तिप्रतिपादनादुपमाभ्रान्तिमतोरङ्गाङ्गिभावेन सङ्करः ॥ ९३ ॥

९४

पयः पातुं तीरे प्रतिनिवसतां सारसरसः
प्रतिच्छायास्त्वन्तस्सलिलमुपलग्ना ददृशिरे ।
गजानां संलक्ष्याः करिण इव पातालनिलयाः
तदम्भस्स्वच्छान्तात्पृथुवसुमतीभारभरणाः ॥

पय इति ॥ तत्र सारसरसः श्रेष्ठसरस्याः पयः जलं पातुं पानं कर्तुं तीरे तटे प्रतिनिवसतां तिष्ठतां गजानां द्विपानां सलिलस्यान्तः अन्तस्सलिलं जलाभ्यन्तरे 'तृतीया सप्तम्योर्बहुलमि'ति मुमभावः। उपलब्धाः व्याप्ताः प्रतिच्छायाः प्रतिबिम्बानि तु 'प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाये' इत्यमरः। तदम्भसः सरोजलस्य स्वच्छान्तात् निर्मलान्तःप्रदेशात् संलक्ष्यास्सम्यक्दृश्यमानाः पृथुं महान्तं वसुमतीभारं बिभ्रतीति तथोक्ताः 'कृत्यल्युटो बहुलमि'ति कर्तरि ल्युट्प्रत्ययः। पातालनिलयाः रसातलवासिनः करिणः गजा इव ददृशिरे विलोक्यन्ते स्म।

अत्र जलपानासक्तगजप्रतिबिम्बेषु दिग्गजतादात्म्योत्प्रेक्षणादुत्प्रेक्षालङ्कारः ॥ ९४ ॥

९५

खुराग्रेणोल्लिख्य स्फुरितवपुरद्रेस्तटभुवं
विषाणादुत्कीर्य प्रहततटनिर्यन्मणिगणान् ।
रणत्कारैः कण्ठीरवमुखमृगौघं चपलयन्
महोक्षस्सन्दृप्यत्ककुदगनिभस्तत्र शुशुभे ॥

खुरेति ॥ तत्र गिरौ अगनिभः शैलसदृशः सन्दृप्यत् पुष्टं ककुदमंसकूलो यस्य स सन्दृप्यत्ककुत्। 'अंसकूलस्तु ककुदमि'त्यमरः। ककुदस्यावस्थायां लोप' इति समासेऽन्त्यलोपः। महांश्चासावुक्षाच महोक्षः वाहः महावृषभः। 'अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहऋक्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिश्श्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः' इति निपातनात्साधुः। स्फुरितवपुः विजृम्भिततनुस्सन् खुराग्रेण शफाग्रेण 'शफं क्लीबे खुरः पुमान्' इत्यमरः।

अद्रेः मेरोः तटभुवं सानुप्रदेशमुल्लिख्योत्पाट्य प्रहतादुत्खातात् तटात् सानोः निर्यतः निर्गच्छतः मणिगणान् रत्नसमूहान् विषाणात् शृङ्गात् उत्कीर्योत्क्षिप्य रणत्कारैः शब्दविशेषैः कण्ठीरवः सिंहो मुखं प्रधानं येषां तथोक्ताः 'मुखं प्रधाने प्रारम्भे वक्त्रे निस्सरणेऽपि च । उपाये द्वारिताग्रेऽर्थे'ति रत्नमालायाम् । तादृशानां मृगाणामोघं समूहं चपलयन् सन्त्रासयन् सन् शुशुभे रेजे ।

अत्र महोक्षस्य क्रीडाकृतमहीतलोल्लेखनमणिगणसमुत्क्षेपणादिक्रियाया रमणीयतया प्रतिपादनात्स्वभावोक्त्यलङ्कारः । लक्षणंतूक्तम् ॥ ९५ ॥

९६

स्फुरद्दंष्ट्राभीमस्फुटमुखचलद्दीर्घरसनः
प्रजृम्भद्व्याजृम्भारवचकितधात्रीध्रभिदिभः ।
पविस्पर्धिस्फारोन्मुखनखविनिर्भिन्नकलभः
शिवावाहस्तत्र व्यरुचदुरुकण्ठीरवपतिः ॥

स्फुरदिति ॥ तत्र मेरौ स्फुरन्तीभिः दंष्ट्राभिः दन्तविशेषैः 'एकार्थः कथ्यते दशनद्विजदन्तदंष्ट्रारदनरदा' इति हलायुधः । भीमः भयङ्करः स्फुटं व्यक्तं यथा तथा मुखे वदने चलन्ती चञ्चला दीर्घा आयता रसना जिह्वा यस्य स तथोक्तः प्रजृम्भता प्रकाशमानेन व्याजृम्भारवेण जृम्भणारवेण चकितः भीतः धात्रीं भूमिं धरन्तीति धात्रीध्राः पर्वताः मूलविभुजादित्वा'न्मूलविभुजादेश्चे'ति क प्रत्ययः । अत एवाह वामनः — 'महीध्रादयो मूलविभुजादय' इति । तान् भिनत्तीति धात्रीध्रभित् इन्द्रः 'सुत्रामा गोत्रभिद्वज्री' इत्यमरः । 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्'

इति क्विप्प्रत्ययः । तस्येभः ऐरावतो येन स तथोक्तः पविस्पर्धिभिः कुलिशसदृशैः स्फारं भृशमुन्मुखैः उन्नतैः नखैः विनिर्भिन्ना: विदलिताः कलभाः त्रिंशद्वर्षगजाः येन स तथोक्तः । 'त्रिंशद्वर्षस्तु कलभ' इत्यमरः । शिवायाः शर्वाण्याः वाहः वाहनः उरुकण्ठीरवपतिः महासिंहश्रेष्ठः व्यरुचत् रराज ।

अत्रातिरमणीयतया सिंहजातिक्रियावर्णनात्स्वभावोक्तिरलङ्कारः ॥९६॥

९७

इति विलसितमेरोर्दक्षिणाशाविभागे
विपुलतरनिवेशो विश्रुतश्चोलदेशः ।
सुकृतनिचयकोशश्शोभते भूवधूटी-
सुकरमुकुरकल्पश्श्रीकलाकेलिवासः ॥

इतीति ॥ इति उक्तप्रकारेण विलसितमेरोः विराजितमेरुनगस्य दक्षिणाशाविभागे दक्षिणदिग्भागे विपुलतराः अतिविशालाः निवेशा आलया यस्मिन् स तथोक्तः 'निवेशश्शरणं क्षय' इत्यमरः । सुकृतनिचयः पुण्यसमूह एव कोशः अर्थौघो यस्य स तथोक्तः । 'कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोरि'त्यमरः । भूः भूमिरेव वधूटी वनिता 'वधूटी स्यात्सुवासिन्यामि'ति कुमारः । तस्याः सुकरस्य समीचीनस्य मुकुरस्य दर्पणस्य कल्पः सदृशः भूवधूटीसुकरमुकुरकल्पः 'दर्पणे मुकुरादर्शावि'त्यमरः । 'ईषदसमाप्तौ कल्पब्देश्यदेशीय रः' इति कल्पप् प्रत्ययः । श्रियां सम्पदां कलानां विद्यानां 'कला शिल्पे कालभेदे सुषमा विद्ययोरपी'ति [1]विश्वः[1] । केलिवासः विहारस्थानं

---

[1] शाश्वतः (ग च)

विश्रुतः प्रसिद्धः । 'प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः' इत्यमरः । चोलदेशः द्रविडदेशः शोभते राजते ।

अत्र वर्णानामसकृदावृत्तिदर्शनादवृत्त्यनुप्रासश्शब्दालङ्कारः । तदुक्तं काव्यप्रकाशे — 'वर्णसाम्यमनुप्रासः छेकवृत्तिगतो द्विधा । सोऽनेकस्य सकृत्पूर्वः एकस्याप्यसकृत्परः' इति । मालिनीवृत्तं 'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणात् । सर्गान्तत्वादेतत्प्रभृतिवृत्तभेदः । तदुक्तं दण्डिना— 'सर्गैरनतिविस्तीर्णैश्श्राव्यवृ[त्तैस्सुसन्धिभिः] । सर्वत्रभिन्नसर्गान्तैरुपेतं लोकरञ्जकमि'ति ॥ ९७ ॥

९८

सकलविषयरम्ये सर्वकाम्यातिसौम्ये
विहरति हरिमुख्यैर्निर्जरैरेव यस्मिन् ।
सह कनकनगेन्द्रादप्यतिप्रेमसारे
स्वतनुजनिजभार्यासङ्गतश्चन्द्रमौलिः ।

सकल इति ॥ कनकनगेन्द्रात् मेरोरपि अतिप्रेमसारे अत्यन्तः प्रेमसारः प्रेमातिशयो यस्मिन् स तथोक्तः तस्मिन् । सकलैः समस्तैः विषयैरिन्द्रियार्थैः रम्ये रमणीये 'विषया गोचरा अमी । गोचरा इन्द्रियार्थाश्चे'त्यमरः । अथवा सकलेभ्यो विषयेभ्यो देशेभ्यो रम्ये सर्वजनपदोत्कृष्ट इत्यर्थः । 'नीवृज्जनपदौ देशविषयौ तूपवर्तनमि'त्यमरः । सर्वैः सकलैः काम्यैः काम्यवस्तुभिः 'ऋहलोर्ण्यत्' इति हलन्ताण्ण्यत्प्रत्ययः । अतिसौम्ये अतिरम्ये 'सौम्यो बुधे मनोज्ञे स्यादि'ति विश्वः । यस्मिन् चोलदेशे चन्द्रमौलिः शिवः स्वतनुजैः स्वकीयतनयैर्विनायकादिभिः निजभार्यया स्वजायया च सङ्गतः सहितस्सन्

हरिमुख्यैर्विष्णुप्रमुखैरिन्द्रमुख्यैर्वा ‘यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिष्वि’त्यमरः । निर्जरैः देवैस्सह ‘सहयुक्ते ऽप्रधाने’ इति तृतीया । विहरति क्रीडति । हृञ् हरण इति धातोर्लट् । सकलदेवताविहारभूरयं प्रदेश इति भावः ।

अत्र परमेश्वरप्रभृतीनां वर्ण्यमानदेशापेक्षयाऽङ्गत्वप्रतिपादनादुदात्ता-लङ्कारः । ‘उदात्तं वस्तुनस्सम्पन्महताञ्चोपलक्षणमि’ति लक्षणात् । [1]मकार-युक्तयकार[1]स्यासकृदावृत्तेर्वृत्त्यनुप्रासश्च । लक्षणन्तूक्तम् । अनयोश्च तिलतण्डुलवत् परस्परनैरपेक्ष्यात्संसृष्टिः । तदुक्तम्—‘शेषा संसृष्टिरेतेषां भेदेन यदिह-स्थितिरि’ति । मालिनीवृत्तम् ॥ ९८ ॥

९९

[2]क्षपाकरकलाधरं[2] कपिशरुग्जटामण्डलं
मृदुस्मितमुखाम्बुजं मुनिवरेण्यसंवित्प्रदम् ।
प्रणौमि फणिभूषणं प्रणवगं त्रयीभाषणं
वटद्रुमतटस्फुटस्फटिकवेदिकाविष्टरम् ॥

‘मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणी’त्यभियुक्तो-क्तेस्सर्गान्तेऽपि मङ्गलाचरणस्य श्रेयस्करत्वात् परमेशप्रणत्यात्मकं मङ्गलं वाचिकमाचरति क्षपाकरेति ॥ वटद्रुमस्य न्यग्रोधवृक्षस्य तटे प्रान्ते स्फुटानां व्यक्तानां स्फटिकानामर्कोपलानां वेदिका वितर्दिरेव विष्टर आसनं यस्य तं तथोक्तं ‘विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनमि’त्यमरः । त्रयी वेदत्रयं

---

[1] मकारयकार (क घ) [2] कलाधरकलाधरं इति व्याख्यातृसूचितः पाठः ॥

भाषणं वाग्यस्य तं तथोक्तं 'स्त्रियामृक्सामयजुषी इति वेदास्त्रयस्त्रयी' इत्यमरः । अथवा त्रयीं भाषत इति त्रयीभाषणं कर्तरि ल्युट् । प्रणवगं ॐकारगम्यं । 'अन्यत्रापि दृश्यते' इत्युक्तेर्गमेर्डप्रत्ययः । फणिनः सर्पाः भूषणान्याभरणानि यस्य तं तथोक्तं मुनिवरेण्यानां मुनिश्रेष्ठानां संविदं ज्ञानं प्रददातीति तथोक्तः तम् । 'प्रेदाज्ञः' इति प्रपूर्वात् ज्ञा धातोः क प्रत्ययः । 'प्रेक्षोपलब्धिश्चित्संविदि'त्यमरः । मृदु मन्दं स्मितं हसितं यस्य तं तथोक्तं [1]मुखमम्बुजमिव मुखाम्बुजं वदनकमलं मृदुस्मितं मुखाम्बुजं यस्य तं तथोक्तं ।[1] कपिशरुक् कपिलकान्तिमत् जटामण्डलं जटाजूटो यस्य तं तथोक्तं । क्षपाकरकलाधरं चन्द्रकलाधरं शिवं । 'कलाधरकलाधरमि'ति पाठस्साधुः वर्णावृत्तिलाभात् । अहमिति शेषः । गम्यमानत्वादप्रयोगः । प्रणौमि नमामि । 'उपसर्गादसमासे नोपदेशस्ये'ति नकारस्य णत्वम् ।

अत्र वर्णानामसकृदावृत्तिदर्शनाद्वृत्त्यनुप्रासोऽलङ्कारः पृथ्वीवृत्तम् । 'जसौजसयलावसुग्रहयतिस्स पृथ्वी गुरुरि'ति लक्षणात् ॥ ९९ ॥

इति सकलभुवनैकवल्लभनिखिललेखनायकनिकायसन्ततसमर्चित-
परम'शिवलिङ्ग'पादारविन्दषट्पदायमानलसदुभयकविता-
विशारद'श्रीषडक्षरिदेव'विरचिते 'चोलभूपालीये'
'कविकर्णरसायनाख्ये' महाकाव्ये [2]पीठिका-
रचन-समुद्र-सुमेरुवर्णनं नाम[2]
प्रथमस्सर्गः ॥

---

[1] लुप्तभागः (क घ) [2] व्याख्याविरहितभागः

अथ वर्ण्यवस्तुनाम-स्वनाम-ग्रन्थनामप्रतिपादनपूर्वकं सर्गसमाप्तिं गद्येन कथयति इतीति ॥ इति समाप्तौ इति हेतुप्रकरणप्रकारादिसमाप्तिष्वि'त्यमरः। सकलभुवनैकवल्लभस्य निखिललोकैकभर्तुः, निखिललेखानां नायकानां सकल-सुरवराणां निकायेन समूहेन 'स्यान्निकायः पुञ्जराशी' इत्यमरः। सन्ततं निरन्तरं समर्चितस्य परमशिवलिङ्गस्य सम्बन्धिनः पादारविन्दस्य चरणसरोजस्य षट्पद इव भृङ्ग इवाचरतीति षट्पदायमानः आचारार्थकक्यजन्ताल्लटश्शानच्प्रत्यये 'आनेमुक्, इति मुगागमः। तादृशेन लसदुभयकविताविशारदेन संस्कृत-प्राकृतोभयविधकवित्वपरिज्ञानवता श्रीषडक्षरिदेवेन षडक्षरीश्वरनामकविवर्येण विरचिते चोलभूपालीये प्रतिपादकतया तत्सम्बन्धिनि 'वा नामधेयस्य वृद्धसंज्ञा' इति वृद्धसंज्ञायां 'वृद्धाच्छ' इति छप्रत्ययः। कविकर्णरसायनाख्ये कवीनां कर्णयोः रसायनभूतमित्यन्वर्थसंज्ञा। महाकाव्ये, अत्र सर्वलक्षणसम्पत्तिर्महच्छब्देन गम्यते। प्रथमः आदिमः सर्गः ग्रन्थपरिच्छेदः 'सर्गः स्वभावनिर्मोक्ष-निश्चयाध्यायसृष्टिष्वि'त्यमरः। समाप्तः इति शेषः। एवमुत्तरत्राप्यनुसन्धेयम् ॥

इति समस्तसुजनस्तोमसंस्तूयमाननिस्तुलगुणग्रामाभिरामश्रीमत्सालिराज-
कुलकलशजलनिधिपूर्णकलाधरश्रीचेन्नबसवनृपतनूभवश्रीमुदिय-
महीपालप्रोत्साहित'श्रीवेङ्कनसुधी'विरचितायां
कविकर्णरसायनव्याख्यायां 'साहित्य-
सुधोदयाभिख्यायां'
प्रथमस्सर्गः ॥

द्वितीयस्सर्गः

१

सूर्यप्रमोदरचना नलिने कुजाति-
वृद्धिर्मधौ जडजनाभिरतिः श्रियाञ्च ।
कव्यप्रदानविधिरध्वरिणि प्रदोष-
[1]वृत्तिस्तमस्यपि किलास्ति[1] न चास्ति तस्मिन् ॥

[2][आ]सर्गसामाप्तेः[2] चोलदेशं वर्णयति सूरीति ॥ सूरीणां विदुषाम् । अप्रमोदरचना असन्तोषविधानं सूर्यस्य प्रमोदरचना सन्तोषविधानञ्च 'प्रमोदामोद-सम्मदा' इत्यमरः । नलिने पद्मे सूर्यस्य पद्मास्तत्वादिति भावः । कुजातीनां कुत्सितजातिमतां महीरुहां च वृद्धिः अभिवृद्धिः मधौ वसन्ते 'चैत्र वसन्त मधुद्रुमदैत्यविशेषेषु पुंसि मधुशब्द' इति रत्नमालायाम् । जडजनाभिरतिः जडजनेषु मूर्खजनेषु 'जडो मूर्खे हिमग्रस्त' इति विश्वः । अभिरतिः आसक्तिः लडयोरभेदात् जडजं कमलं तन्नाभौ यस्य स जडजनाभिः विष्णुः । तस्मिन्नभिरतिः रागश्च । श्रियां लक्ष्म्यां कव्यप्रदानविधिः कविभ्यः काव्यकर्तृभ्यः अप्रदानविधिः दानक्रियाभावः । अन्यत्र कव्यं हविर्विशेषः 'हव्यकव्ये दैवपित्रे

---

[1] 'वृत्तिस्तमरूपि तदास्ति' इति व्याख्यातृ सूचितः पाठः ।
[2] अथ सर्गे समस्त (क)

अन्ने ' इत्यमरः । तस्य प्रदानविधिः दानक्रिया अध्वरिणि यज्ञकर्तरि प्रदोष-वृत्तिरपि प्रदोषस्य वृत्तिः स्थितिः । अन्यत्र प्रदोषे रजनीमुखे वृत्तिरवस्थानं ' प्रदोषः कालभेदे स्यात्प्रदोषो दोष इष्यत ' इति विश्वः । तमसि तमिस्रे अस्ति । किलेति वार्तायां तस्मिन् चोलदेशे नास्ति अस्मिन् देशे विद्वद्वरानन्द-विधायिनः प्रभवः सज्जनानामेवाभिवृद्धिः साधुजनप्रिया एव जनाः कविकामित-[1]सक[1]लार्थप्रदा[2]तारः जना[2]स्सर्वेऽपि सद्वृत्तिनिरता इति भावः । ' वृत्तिस्तमस्यपि तदस्ती'ति क्वचित्पाठः ।

अत्र सूर्यप्रमोदरचनादीनां देशे निषिध्य नलिनवसन्तादिषु निवेशनात्परिसङ्ख्यालङ्कारः । ' किञ्चित्पृष्टमपृष्टं वा कथितं यत्र कल्प्यते । तादृगन्य-व्यपोहाय परिसङ्ख्या तु सा स्मृते'ति लक्षणात् ।

अस्मिन् सर्गे वसन्ततिलकवृत्तानि । ' उक्ता वसन्ततिलका तभजा जगौग ' इति लक्षणात् ॥ १ ॥

२

ग्रामच्युतिर्विकलगीतरवे सरोग-
तापस्थितिर्जलरुहे विधृतिर्महीजे ।
संवत्सरेऽपि बहुधान्यविरोधिता च
मन्दत्वमस्ति रविजे विषये न तस्मिन् ॥

ग्रामेति ॥ ग्रामाणां संवसथानां च्युतिर्नाशः ' समौ संवसथग्रामावि' त्यमरः । अन्यत्र ग्रामस्य स्वरसमुदायविशेषस्य च्युतिः ' जातिश्रुतिस्वराणां

---

[1] फला (क) [2] राजान (क)

च समुदायस्स उच्यते। ग्रामस्स तु द्विधा षड्जमध्यमोपपदो भवेदि'ति सङ्गीत—सुधाकरे। विकलगीतरवे हीनगानस्वरे अस्ति। सरोगतापस्थितिः सरोगतापानां व्याधिसन्तापयुक्तानां स्थितिरवस्थानाम्। अन्यत्र सरसि गता आपस्सरोगतापः 'ऋक्पूरब्धूःपथामानक्षे' इति समासान्तोऽप्रत्ययः। तस्मिन् स्थितिः अवस्थानम्। जलरुहे कमले विधृतिः अधीरत्वम्। वीनां पक्षिणां धृतिर्धारणं च 'धृतिर्धारणधैर्ययोरि'त्यमरः। मह्यां भूमौ जायत इति महीजः। 'सप्तम्यां जनेर्ड' इति डप्रत्ययः। तस्मिन् वृक्षे बहुधा बहुप्रकारेण अन्यैः विरोधिता विद्वेषः अन्यत्र बहुधान्यश्च विरोधी च[1]तथोक्तौ[1] तयोर्भावस्तत्ता संवत्सरे वत्सरे बहुधान्यविरोधिनाम्नोः प्रभवादिसंवत्सरगणमध्यपाठादितिभावः। मन्दत्वं मूढत्वं अपटुत्वं वा अभाग्यत्वं वा 'मूढाऽल्पाऽपटुनिर्भाग्या मन्दाः' इत्यमरः। अन्यत्र मन्दस्य शनेर्भावः मन्दत्वं 'शनिमन्दौ पङ्गुकालौ' इत्यमरः। रविजे शनैश्चरे अस्ति तस्मिन् विषये देशे 'नीवृज्जनपदौ देशविषयौतूपवर्तनमि'त्यमरः नास्ति।

अत्र ग्रामच्युत्यादीनां देशे निषिध्य विकलगीतरवादिषु नियन्त्रणात्परिसङ्ख्यालङ्कारः ॥ २ ॥

३

जाड्यस्थितिर्मधुपसङ्गतिरब्जषण्डे
जाले विरोधगुणवृत्तिरलिप्रताने।
क्षोभक्रिया सुमनसां वसतिप्रमोहः
तर्के विमानचरितं दिवि नैव देशे ॥

---

[1] बहुधान्यविरोधिनौ (क)

जाड्येति ॥ जाड्यस्य मौर्ख्यस्य स्थितिः वृत्तिः लडयोरभेदात् । जडं जलं जडमेव जाड्यं स्वार्थेष्यञ् प्रत्ययः । तस्मिन् स्थितिः अवस्थानं मधुपानां मद्यपायिनां मधुकराणां च सङ्गतिः सम्बन्धश्च अब्जषण्डे कमलसमूहे 'अब्जादिकदम्बे षण्डमस्त्रियामि'त्यमरः । विरोधगुणवृत्तिः विरोधो वैरमेव गुणः तस्य वृत्तिः वर्तनम् । वीनां पक्षिणां रोधाय बन्धनाय गुणानां सूत्राणां वृत्तिः 'गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुष्वि'ति[1][वैजयन्ती][1] । जाले आनाये 'आनायः पुंसि जालं स्यादि'त्यमरः । सुमनसां बुधानां पुष्पाणां च 'सुमनाः पुष्पमालत्योस्स्त्रियां देवे बुधे च ना । अयं पुष्पे बुहुष्वेवे'ति रत्नमालायाम् । क्षोभक्रिया संक्षोभव्यापारः अलिप्रताने भृङ्गसमूहे प्रमोहः अज्ञानं प्रमाणं च प्रत्यक्षादिप्रमितीनामूहः कल्पनं तर्के आन्वीक्षिक्यां विमानचरितमवज्ञाचरणं देवयानसञ्चारश्च 'नपुंसके भावे क्त' इति क्तप्रत्ययः । 'आर्धधातुकस्येड्वलादेरि'ति तस्येडागमश्च । दिवि व्योम्नि वसति तिष्ठतीति सर्वत्र सम्बन्धः । देशे चोलदेशे न वसत्येव ।

अत्र जाड्यस्थित्यादीनां देशे निषिध्य कमलषण्डादौ प्रतिपादनात्परिसङ्ख्यालङ्कारः ॥ ३ ॥

४

गोमण्डलीबहुसुधाधरणीसमृद्ध-
सस्यावहा सततपूर्णपयस्तटाकः
सार्वर्तुकं वनमराजत तत्र सार-
सौन्दर्यविभ्रमयुतस्तरुणीसमूहः ॥

---

[1] वीत्यमरः (क ग)

गोमण्डलीति ॥ तत्र देशे गवां मण्डली समूहः * 'मण्डलं त्रिषु कुट्ये स्यादुपसूर्यकदेशयोः । बिम्बे द्वादशराजौघे निकुरुम्बे' इति रत्नमालायाम् । बहुसुधा बह्वी सुधा क्षीरं यस्यास्सा तथोक्ता सती अराजत बभाविति सर्वत्र सम्बन्धः । धरणी भूमिः समृद्धानि सम्पूर्णानि सस्यानि फलानि आवहति विदधातीति तथोक्ता सती अराजत । 'वृक्षादीनां फलं सस्यमि'त्यमरः । तटाकः पद्माकरः सततं निरन्तरं पूर्णं समृद्धं पयः जलं यस्मिन् तथोक्तस्सन् अराजत । वनं सर्वेषु ऋतुषु फलतीति सार्वर्तुकं सत् 'कालाट्ठञि'ति ठञ् प्रत्यये 'इसुसुक्तान्तात्कः' इति ठस्य कादेशः । अराजत तरुणीनां स्त्रीणां समूहः सन्दोहः । सारसौन्दर्यविभ्रमाभ्यां रूपविलासाभ्यां युतः युक्तस्सन् अराजत । [1]अ[1]त्र गवादिसकल[2]वस्तु[2]समृद्धिवर्णनादुदात्तालङ्कारः ॥ ४ ॥

५

स्यान्नन्दने विहृतिरप्यमृतैकवृत्तिः
क्रीडा तु निर्जरवधूषु च यज्जनानाम् ।
अभ्रान्तवर्तनजुषस्सुमनस्त्वयुक्ताः
ते नाकवासिन इवाश्रितदिव्यभोगाः

स्यादिति ॥ यज्जनानां यस्मिन् देशे जनानां नन्दने सुते इन्द्रोद्याने च विहृतिः विहारः 'नन्दनं वासवोद्याने नन्दने हर्षके सुते' इति विश्वः ।

---

*मण्डली ना राज्ञि सूर्ये शक्रे हौश्वबिडालयोः । 'मण्डलं न द्वयोः कुष्ठेप्युपसूर्यकमेकयोः । बिम्बे द्वादशराजौघे निकुरुम्बे' इति मुद्रितनानार्थरत्नमालायाम् ॥

[1] त (क ग). [2] नास्ति (क)

'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति ल्युप्रत्यये 'युवोरनाका'वित्यनादेशः। अमृतमयाचितमेव एका केवला वृत्तिर्जीवनमथवा अमृतेमोक्षे एकस्मिन् वृत्तिर्वर्तनम्। अन्यत्रामृतं पीयूषमेव एकवृत्तिः मुख्यजीवनमपि 'अमृतं यज्ञशेषे स्यात् पीयूषे सलिलेऽपि च। अयाचिते च मोक्षे च धन्वन्तरिसुपर्वणोरि'ति विश्वः। अपि च निर्जरा जरारहिता वध्वः देवतास्त्रियश्च तासु। तु अवधारणार्थे। 'तु स्याद्भेदेऽवधारणे' इत्यमरः। क्रीडा च केलिरपि स्यात् भवति। अस भुवीति धातोः 'जातुयदोर्लिङ्' इति लिङ्। भ्रान्ता न भवन्तीत्यभ्रान्ताः विवेकिनः। तेषां वर्तनं शीलम्। अभ्रस्य गगनस्यान्ते प्रान्ते वर्तनं वृत्तिं च जुषन्ते भजन्तीति तथोक्ताः। कर्तरि क्विप् सुमनस्त्वेन'वैदुष्येण'[1] दैवत्वेन च युक्ताः संयुताः ते जनाः नाकवासिनः नाके स्वर्गे वसन्तीति तथोक्ताः देवा इव 'ताच्छील्ये णिनिः' आश्रिताः प्राप्ताः दिव्याः मनोज्ञाः दिवि भवाश्च 'दिगादिभ्यो यदि'ति यत्प्रत्ययः। भोगाः सुखानि यैस्ते तथोक्ताः 'भोगस्सुखे स्त्र्यादिभृतावहेश्च फणकाययोरि'त्यमरः। भवन्तीति शेषः।

अत्र बिम्बप्रतिबिम्बभावेन जनानां सुरसादृश्यप्रतिपादनादुपमालङ्कारः ॥ ५ ॥

६

क्वापि त्रिनेत्रयजनं क्वचिदिन्दुमौलेः
ध्यानं महेश्वरकथाश्रुतिरन्यदेशे।
विश्वाधिकस्य महिमातिशयप्रशस्तिः
अन्यत्र भाति च परत्र शिवानुभूतिः ॥

---

[1] पाण्डित्येन युक्ताः (ग)

क्वेति ।। तत्र देशे । क्वापि कुत्रचित् 'किमोत्' इति किमस्स-प्तम्यन्तादत्प्रत्यये क्वातीति किमः क्वभावः त्रिनेत्रस्य शिवस्य यजनं पूजनं यज देवपूजासङ्गतिकरणदानेष्विति धातोः 'कृत्यल्युटो बहुलमि'ति भावे ल्युट् प्रत्ययः । क्वचिदत्र देशे इन्दुमौलेः शम्भोः ध्यानं निदिध्यासनमन्यदेशे इतर-प्रदेशे महेश्वरस्य शिवस्य कथायाश्चरितस्य श्रुतिः श्रवणम् । अन्यत्र अन्यस्मिन् [1][देशे][1]प्रदेशे विश्वाधिकस्य सर्वोत्कृष्टस्य 'विश्वाधिको रुद्रो महर्षिरि'ति श्रुतेः । महिमातिशयप्रशस्तिः प्रभावातिशयप्रशंसा । परत्र च अपरस्मिन् प्रदेशे शिवानुभूतिः शिवसाक्षात्कारः भाति राजते । भा दीप्ताविति धातोर्लट् ।। ६ ।।

७

रोधस्थितैर्द्विजवरैर्नववनन्दनौघैः
चामीकराब्जकुहरस्थितराजहंसैः ।
तत्रास्ति पूतसलिला पुरुषार्थदात्री
ख्याता कवेरतनया महिला महाब्धेः ।।

अथ कावेरीं वर्णयति रोध इति ।। रोधसि तीरे स्थितैः वर्तमानैः द्विजवरैः पक्षिश्रेष्ठैः ब्राह्मणोत्तमैर्वा 'दन्तविप्राण्डजा द्विजा' इत्यमरः । नवानां नूतनानां नन्दनानां वनानामोघैस्समूहैः अथवा नवो बालः नन्दनानामप-त्यानामोघो, येषामिति राजहंसविशेषणम् । चामीकराब्जानां कनककमलानां कुहरेषु विवरेषु स्थितैः वर्तमानैः राजहंसैः श्वेतच्छदविशेषैः 'राजहंसास्तु ते

---

[1] नास्ति (क. ग. च)

चञ्चुचरणैर्लोहितास्सिता ' इत्यमरः उपलक्षिता । पूतं पवित्रं सलिलं जलं यस्यास्सा तथोक्ता पुरुषार्थानां धर्मादीनां दात्री प्रतिपादयित्री दाञ् दान इति धातोः कर्तरि तृचि 'ऋन्नेभ्यो ङीप्' इति ङीप् प्रत्ययः । याजकादित्वात् षष्ठीसमासः । महाब्धेः समुद्रस्य महिला जाया ख्याता प्रसिद्धा कवेरतनया कावेरी तत्र देशेऽस्ति ।

अत्र सकलभुवनविख्यातायाः महत्याः कावेर्याश्चोलदेशाङ्गत्ववर्णनादुदात्तालङ्कारः । लक्षणन्तूक्तम् ॥ ७ ॥

८

आवृत्य तुङ्गपृथुशैलनितम्बबिम्बं
आबद्धसिन्धुवसनस्य धराङ्गनायाः ।
दीर्घाञ्चलस्य पिहिताद्रिपयोधरस्य
धत्ते श्रियं सरिदुदात्तगुणाभियुक्ता ॥

आवृत्येति ॥ उदात्तैरुत्कृष्टैः गुणैः पावनत्वादिभिः तन्तुभिश्चाभियुक्ता संयुता सरित् कावेरी धरा भूरेवाङ्गना कान्ता तस्यास्सम्बन्धिनः तुङ्गः उन्नतः पृथुः महान् शैलः पर्वत एव नितम्बः तस्य नितम्बस्य श्रोण्या बिम्बं मण्डलं 'बिम्बोऽस्त्री मण्डलं त्रिष्वि'त्यमरः । आवृत्याच्छाद्य आबद्धस्य धृतस्य सिन्धोरेव वसनस्य अंशुकस्य सम्बन्धिनः पिहितः आच्छादितः अद्रिः शैल एव पयोधरः स्तनो येन सः तथोक्तस्य 'स्त्रीस्तनाब्दौ पयोधरावि'त्यमरः । दीर्घस्यायतस्याञ्चलस्य अन्तस्य श्रियः शोभां धत्ते दधाति ।

अत्र धराङ्गनाबद्धसिन्धुरूपितचेलाञ्चलश्रियस्सरित्यसम्भावितायाः श्रिय-मिति सदृशवस्तुकल्पितायाः प्रतिपादनान्निदर्शनालङ्कारः रूपकेण सङ्कीर्णः। लक्षणमुक्तम् ॥ ८ ॥

९

शैवालवालमहिता शफरेक्षणा च
फेनास्यफेनकलिता तटभूजशृङ्गा।
सिन्धुः पयोधिमहिषी लसितासिताब्ज-
कोशस्तनी मकरवत्सवती बभासे ॥

शैवालेति ॥ शैवालं शैवालमेव 'जलनीली तु शैवालमि'त्यमरः। वालः लाङ्गूलं तेन महिता महनीया शफरः मत्स्य एव ईक्षणं चक्षुर्यस्यास्सा तथोक्ता शफरेक्षणा मीननेत्री फेनास्यफेनकलिता फेनः डिण्डीर एव आस्यफेनः मुखसमुद्गतफेनः तेन कलिता युक्ता तथोक्ता तटभूजशृङ्गा तटभूजः तीरस्थिततरुरेव शृङ्गं विषाणं यस्यास्सा तथोक्ता। लसिता उज्ज्वलाः असिताब्जानां नीलोत्पलानां कोशाः कोरका एव स्तना यस्यास्सा तथोक्ता 'स्वाङ्गाच्चोपसर्जनादसंयोगो-पधादि'ति ङीप्। मकरः जलजन्तुविशेषः 'तद्भेदाश्शिशुमारोद्रशङ्कवो मकरादयः' इत्यमरः। स एव वत्सोऽस्यास्तीति तथोक्ता 'तदस्यास्त्यस्मिन्नि'ति मतुप्। मादुपधायाश्च मतोर्वोऽयवादिभ्य इति मतुपो मस्य वादेशः। 'उगितश्चे'ति ङीप्। अत एव पयांसि धीयन्तेऽस्मिन्निति पयोधिरर्णवः 'कर्मण्यधिकरणेचे'ति किप्रत्ययः तस्य महिषी भार्या पयोधिः क्षीरवती। महिषी सैरिभीति व्यङ्ग्यार्थः। 'महिषी नृपपत्न्यां च सैरिभ्यामौषधीभिदी'ति विश्वः। सिन्धुः नदी बभासे रेजे। भासृ दीप्ताविति धातोर्लिट्। 'लिटस्तझयोरेशिरेच्' इति लिडादेशतकारस्य एशादेशः।

★

अत्र शैवलादीनां वालत्वादिना रूपणात् शैवालेत्यादीनां महिषीत्व-समर्थनहेतुत्वात् महिष्यादेश्च श्लिष्टत्वाद्रूपककाव्यलिङ्गश्लेषाणामङ्गाङ्गि-भावेन सङ्करः ॥ ९ ॥

१०

नीवीश्लथोर्मिरुदबिन्दुमिलत्सरोजं

स्विद्यन्मुखं विपदचिह्नितसैकतश्च ।

यस्या बभूव स नखाङ्कनितम्बबिम्बं

रत्यन्तयोषिदिव भाति सरित्पयोधेः ॥

नीवीति ॥ यस्याः सरितः श्लथोर्मिः शिथिलवीचिः नीवी जघनांशुकं 'नीवी परिपणे ग्रन्थौ स्त्रीणां जघनवाससी'ति विश्वः । बभूव भू सत्तायामिति धातोर्लिट् । धात्ववयवस्य द्विर्भावे ह्रस्व इति ह्रस्वः । 'भवतेरः' इत्यभ्यासो-कारस्याकारः । 'अभ्यासे चर्चे'ति जश्त्वञ्च । उदकस्य बिन्दव उदबिन्दवः मन्थौदनसक्तुबिन्दुवज्रभारे'त्यादिना उदकशब्दस्योदादेशः । तैर्मिलत् व्याप्तं, सरोज कमल स्विद्यत् स्वेदयुक्तं मुखमाननं बभूव । वीनां पक्षिणां पदैः चरणैः चिह्नितं अङ्कितं सैकतं पुलिनं च 'तोयोत्थितं तत्पुलिनं सैकतं सिकतामयमि' त्यमरः । सनखाङ्कनितम्बबिम्बं नखक्षतसहितश्रोणीमण्डलं बभूव चेति शेषः । नितम्बस्य नखपदास्पदत्वं तु रतिरहस्ये— 'कण्ठवंशकुचपार्श्वभुजोरुश्रोणि-सक्थिषु नखाङ्कनमाहुरि'ति । सरित् नदी पयोधेरर्णवस्य रत्यन्तयोषिदिव सुरतान्ततान्तकान्तेव भाति राजते ।

अत्रोर्मिप्रभृतिषु नीव्यादितादात्म्यनिरूपणपूर्वकं सरितः सुरतश्रान्तकान्ता तादात्म्योत्प्रेक्षणादुत्प्रेक्षारूपकयोः सङ्करः ॥ १० ॥

११

चञ्चत्तरङ्गचलबाहुविराजमाना
किञ्चिच्चलद्विकचपद्ममुखाभिरामा ।
भाति क्वणन्मधुपकिङ्किणिका नटीव
मीनेक्षणा वनवयस्स्वनवाद्यनादा ॥

चञ्चदिति ॥ चञ्चत्तरङ्गः स्फुरत्कल्लोल एव चलबाहुः चलद्भुजः तेन विराजमाना भासमाना किञ्चिच्चलत् ईषच्चञ्चलं विकचं विकसितं पद्ममेव मुखमास्यं तेनाभिरामा मनोज्ञा । क्वणन्तः मधुपाः भृङ्गा एव किङ्किणिकाः क्षुद्रघण्टिकाः यस्यास्सा तथोक्ता । वने आरामे वयसां पक्षिणां 'वयो बाल्यादिपक्षिणोरि'त्यमरः । स्वनः रुतमेव वाद्यनादो मृदङ्गादिध्वनिर्यस्यास्सा तथोक्ता मीनौ मत्स्यावेव ईक्षणे नेत्रे यस्यास्सा तथोक्ता । अन्यत्र मीनाविव ईक्षणे यस्यास्सा तथोक्ता अत एव सरित् नटीव नर्तकीव भाति ।

अत्र तरङ्गादिषु भुजादितादात्म्यारोपणेन सरिति नटीसादृश्यप्रतिपादनादुपमारूपकयोस्सङ्करः ॥ ११ ॥

१२

भास्वद्विधूपलसिताऽनिमिषालियुक्ता
प्रोद्यत्कवीश्वरयुता गुरुपुष्पकाढ्या ।
विभ्राजमानघनभङ्गयुतापगेयं
आभाति विभ्रमवती गगनस्थलीव ॥

भास्वदिति ॥ भास्वन् विराजमानः विधूपलः चन्द्रकान्तमणिरिव सिता निर्मला । अन्यत्र भास्वता सूर्येण विधुना चन्द्रेण उपलसितोल्लसिता

अनिमिषाणां मत्स्यानां देवानां च 'देवमत्स्यावनिमिषावि'त्यमरः। आलिभिः पंक्तिभिः युक्ता संयुता प्रोद्यद्भिरुज्ज्वलैः कवीश्वरैः जलपक्षिवर्यैः हंसादिभिः युता युक्ता। [अन्यत्र] कवेश्शुक्रस्य ईश्वरेण विभवेन युता 'ईश्वरो विभवे चाढ्ये प्रभौ स्वामिनि मन्मथ' इति विश्वः। पुष्पाण्येव पुष्पकाणि कमलादीनि गुरुभिः महद्भिः पुष्पकैः आढ्या प्रशस्ता, अन्यत्र महाविमानयुक्ता अथवा गुरोः बृहस्पतेः पुष्पकेण व्योमयानेन आढ्या, विभ्राजमानैः शोभमानैः घनैः सान्द्रैः भङ्गैः तरङ्गैः युता युक्ता, अन्यत्र विभ्राजमानानां घनानां मेघानां भङ्गैः खण्डैः युताः 'भङ्गः खण्डे पराजये। तरङ्गे रोगभेदे चे'ति रत्नमालायाम्। विभ्रमवती विशेषजलनिर्गमवती 'भ्रमस्तु जलनिर्गम' इत्यमरः। अन्यत्र वीनां पक्षिणां भ्रमः सञ्चारस्सोऽस्यामस्तीति तथोक्ता। इयम् अपां समूहो आपं तस्य समूह इत्यण्प्रत्ययः। तेन गच्छतीत्यापगा सरित्, गगनस्थलीव व्योमस्थलमिव आभाति।

अत्र श्लेषमुखेन विधूपलसितेत्यादिना सरितो गगनस्थलीसादृश्य-प्रतिपादनादुपमालङ्कारः॥ १२॥

१३

पङ्केजरेणुरजनीरचनाङ्गयष्टिः
'पद्मेक्षणाक्तमधुपाञ्जनसल्ललामा[1]।
हंसार्भका मधुसुधारसपद्मकोश-
पीनस्तनी लसति सूतवतीव सिन्धुः॥

---

[1] पद्मास्यलग्नमधुपाञ्जनसल्ललामेति क्वचित्पाठ इति व्याख्यातृदर्शितपाठभेदः।

पङ्कजमिति ॥ सिन्धुः सरित् पङ्कजानां नलिनानां 'तत्पुरुषे कृति बहुलं' इति अलुक् । रेणुः पराग एव नालचूर्णमेव रजनीरचना हरिद्राचूर्णं तस्य लेपोऽङ्गयष्ट्यां यस्यास्सा तथोक्ता 'निशाख्या काञ्चनी पीता हरिद्रा वरवर्णिनी' इत्यमरः । पद्मे एव ईक्षणे तयोः अक्तं रचितं मधुपा भृङ्गा एवाञ्जनं तेन सल्ललामं प्रशस्तालङ्कारो यस्यास्सा तथोक्ता 'ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्य केतुष्वि'त्यमरः । 'पद्मास्यलग्नमधुपाञ्जनसल्ललामे'ति क्वचित्पाठः । हंस एवार्भकशिशुर्यस्यास्सा तथोक्ता मधुमकरन्द एव सुधारसः पयः ययोस्तौ तथोक्तौ, पद्मकोशौ अब्जमुकुलावेव पीनौ स्थूलौ स्तनौ कुचौ यस्यास्सा तथोक्ता सूतवती 'षूङ् प्राणिप्रसवे' इति धातोर्भूते क्तवतु प्रत्ययः । अथवा सूतं प्रसूतिः 'भावे निष्ठा नपुंसके' इति भावे क्तप्रत्ययः । तदस्या अस्तीति मतुप् प्रत्यये 'उगितश्चे'ति ङीप् । नवप्रसूतिरिव लसति भाति नवप्रसवस्त्रियाः विशेषतो हरिद्रालेपनाञ्जनप्रसाधनादेस्स्तन्यधारणादेश्च लोक-सिद्धत्वादिति भावः ।

अत्र पङ्कजपरागादिकं रजनीलेपाद्यात्मना निरूप्य सादृश्यसाधारणधर्म-निमित्तेन सरिति प्रसूतिरूपधर्मोत्प्रेक्षणादुत्प्रेक्षारूपकयोस्सङ्करः ।

*क्वचित्पुस्तकेषु एकोनविंशतिश्लोकानन्तरमयं श्लोको लिखितो दृश्यते । सरोवर्णनप्रस्तावे नदीवर्णनस्यासङ्गतेरत्रैव योजनीयः ॥ १३ ॥

१४

अर्कावरोधवसतिर्मलयानिलस्य
कोशस्स्मरस्य शरसङ्ग्रहसारगेहम् ।

* अत्र सूचितरीत्या 'ख' पुस्तके एकोनविंशतिश्लोकानन्तरं अयंश्लोको लीखितः ॥

भृङ्गप्रपा वनमनङ्गविहारशाला
देशेऽत्र यद्भवति हंससभानिवासः ॥

अर्केति ॥ अत्र देशे यत् यत्र सरिति निपातत्वादव्ययत्वम् । वनमारामः अर्कस्य सूर्यस्य अवरोधः वसतिः अन्तःपुरनिवेशः 'स्त्र्यगारं भूभुजामन्तःपुरं स्यादवरोधनम् । शुद्धान्तश्चावरोधश्चे'त्यमरः । पद्मिनीवल्लभस्यार्कस्य प्रियाणां कमलिनीनामावास इति भावः । मलयात् मलयपर्वतात् आगतोऽनिलः मलयानिलः, शाकपार्थिवादित्वात् मध्यमपदलोपी समासः तस्य कोशः धनगृहं शैत्यसौरभ्यनिवेश इति भावः । स्मरस्य कुसुमायुधस्य शराणां बाणानां सङ्ग्रहे सङ्ग्रहणे सारं श्रेष्ठं गेहं गृहमशोकादीनामाकर इति भावः । भृङ्गप्रपा भृङ्गाणां भ्रमराणां प्रपा पानीयशाला [1]चक्रस्य चक्रवाकस्य वनं 'जातिविवक्षायामेकवचनोक्तिः'[1] । अनङ्गविहारशाला मन्मथविहारस्थानं । हंससभानिवासः *हंसानां श्वेतच्छदानां सभायास्सदसः निवासः वासस्थानं [2]भवति । भू धातोः 'कर्तरि शबि'ति शप्प्रत्यये 'सार्वधातुकार्धधातुकयोरि'ति गुणेऽवादेशः[2] ।

अत्र वनस्यार्कावरोधवसत्यादिरूपेण बहुधोल्लेखनादुल्लेखालङ्कारः ॥१४॥

१५

श्रीरञ्जितानि कमलानि च पुष्पकाणि
तारातति: कुमुदराजिरुपेतहंसः ।

---

[1] लुप्तभागः (क. च. घ).

* टिप्पणीः हंसानां सभा समाजः तस्याः निवासः वासस्थानम् ॥

[2] लुप्तभागः (क. च. घ).

चन्द्रो विचित्रविहगावलिरभ्रमाला
यस्मिन्विभाति स नभस्थलवत्तटाकः ॥

अथास्मिन् देशे तटाकं प्रस्तौति श्रीति ॥ श्रिया लक्ष्म्या रञ्जितानि विराजितानि कमलानि नलिनान्येव पुष्पकाणि विमानानीति व्यस्तं रूपकम् । कुमुदानां कैरवाणां 'सिते कुमुदकैरवे' इत्यमरः । राजिः पङ्क्तिरेव तारातति: नक्षत्रसंहतिः उपेतः प्राप्तः हंसः श्वेतगरुत् स एव चन्द्रः सुधाकरः विचित्राणां विविधानां विहगानां पक्षिणामावलिः श्रेणिरेव अभ्रमाला मेघपङ्क्तिः यस्मिन् तटाके विभाति स तटाकः पद्माकरः 'पद्माकरस्तटाकोऽस्त्री'त्यमरः । नभस्थलवत् गगनस्थलमिव 'तेन तुल्यं क्रिया चेद्वतिरि'ति वति प्रत्ययः विभाति । 'एतत्तदोस्सुलोपोऽकोरनञ्समासे हली'ति स नभ इत्यत्र सुलोपः ।

अत्र कमलादीनि पुष्पकाद्यात्मना निरूप्य तटाके गगनसादृश्यवर्णनादुपमारूपकयोस्सङ्करः ॥ १५ ॥

१६

भृङ्ग्युत्सवेन कमलासनराजहंस-
चक्राङ्कविभ्रमयुताऽनिमिषप्रवृत्त्या ।
विभ्राजितश्शिवसदस्समतामियाय
पद्माकरो भुवनविश्रुतवैभवेन ॥

भृङ्गीति ॥ भृङ्गीणां भ्रमरीणां उत्सवेनोत्साहेन अन्यत्र भृङ्गिणः भृङ्गीश्वरस्य उत्सवेन नर्तनरूपोत्सवेन भुवनेन जलेन विश्रुतं प्रसिद्धं वैभवमतिशयः

यस्य तेन अन्यत्र भुवनेषु लोकेषु विश्रुतं वैभवं यस्य तेन 'भुवनं विष्टपे लोके सलिले च वियत्यपि' इति विश्वः। कमलेष्वासत इति कमलासनाः कर्तरि ल्युट्। अथवा कमलान्यासनानि विष्टराणि येषां ते तथोक्ताः पद्माश्रिताः राजहंसाः हंसविशेषाः चक्रमिति अङ्को लक्ष्म येषां ते चक्राङ्काः ते च ते वयश्च तथोक्ताः चक्रवाकाः भ्रमयुताः भ्रमणयुताश्च ते अनिमिषाम त्स्याश्च तेषां प्रवृत्त्या प्रचारेण। अन्यत्र कमलासनस्य ब्रह्मणः राज्ञश्चन्द्रस्य 'राजा। मृगाङ्के क्षत्रिये नृपे' इत्यमरः। हंसस्य सूर्यस्य 'भानुर्हंसस्सहस्रांशुरि'त्यमरः। चक्राङ्कस्य सुदर्शनलक्ष्मणो विष्णोः विभ्रमयुतानां विलासयुक्तानामनिमिषाणाममराणां च प्रवृत्त्या प्रवेशेन कमला[1]सनादीनामुत्कर्षविवक्षयाऽनिमिषेभ्यः पृथङ्नि[1]र्देशः विभ्राजितः राजितः पद्माकरः तटाकः शिवसदस्समतां परमेश्वरसभासादृश्यमियाय प्राप्तवान्।

अत्र श्लेषमुखेन पद्माकरे शिवसभासादृश्यप्रतिपादनादुपमाश्लेषयोस्सङ्करः ॥ १६ ॥

१७

स्नात्वा सरोऽम्भसि तरङ्गलसद्दुकूलं
आवृत्य सैकतनितम्बभरे स्थितायाः।
केशावलीव शुशुभे चलषट्पदालिः
स्मेरास्यवल्लसति पङ्करुहं नलिन्याः ॥

स्नात्वेति ॥ सरोऽम्भसि सरसीजले स्नात्वा स्नानं कृत्वा सैकतं पुलिनमेव नितम्बभरः श्रोणीभरः तस्मिन्तरङ्ग ऊर्मिरेव लसदुज्ज्वलं दुकूलं

[1] लुप्तभागः (क. च. घ.)

क्षौममावृत्य आच्छाद्य स्थितायाः नलिन्याः पद्मिन्याः केशावलीव कचसंहतिरिव 'कृदिकारादक्तिन' इति ङीप् । चलानां चलनां षट्पदानां भृङ्गाणां आलिः शुशुभे रेजे । शुभ शोभन इति धातोर्लिट् । पङ्करुहं कमलं 'तत्पुरुषे कृति बहुलमि'ति बहुलग्रहणात् 'सुपोधातुप्रातिपदिकयोरि'ति ङेर्लुक् । स्मेरास्यवत् हसन्मुखमिव लसति भाति ।

अत्र भृङ्गावल्यादेः स्त्रीत्वेन व्यज्यमाननलिनीकेशसंहतितादात्म्योत्प्रेक्षणादुत्प्रेक्षालङ्कारः ॥ १७ ॥

१८

व्यालग्नपक्षयुगलस्सरजोमरन्द-
पङ्के मदालिनिकरः कनकाब्जमध्ये ।
उद्वर्तनाय सरसो नवहेमपात्र-
विन्यस्तकुङ्कुममृगोद्भववद्विरेजे ॥

व्यालग्नेति ॥ रजोमरन्दयोः परागपुष्परसयोः पङ्कः कर्दमः तेन सह वर्तत इति सरजोमरन्दपङ्कः तस्मिन् । सरसः सरस्याः कनकाब्जमध्ये व्यालग्नं सक्तं पक्षयोः गरुतोः युगलं युग्मं यस्य स तथोक्तः मदालीनां मत्तमधुपानां निकरस्समूहः उद्वर्तनाय विलेपनाय हेम्नो विकारः पात्रं हेमपात्रं 'सिद्धातविकारषष्ठ्याश्चोत्तरपदलोपश्चेतिसमासः '(?) नवे हेमपात्रे सुवर्णपात्रे विन्यस्ते निक्षिप्ते कुङ्कुमे काश्मीरगन्धे मृगोद्भववत् कस्तूरीव विरेजे बभासे । राजृ दीप्ताविति धातोर्लिट् । 'फणां सप्तानामि'ति एत्वाभ्यासलोपौ ।

अत्र कमलमध्यगतपरागपङ्कलग्नमधुकरनिकरस्य हेमपात्रमध्यगत कुङ्कुमान्तरविन्यस्तकस्तूरीसादृश्यवर्णनादुपमालङ्कारः ॥ १८ ॥

१९

वीच्यग्रपातनमदुन्नमदब्जयुग्म-
चञ्चत्करद्वयकृताहतिभिर्नलिन्याः ।
पद्मान्तरस्थमधुतैलरसार्द्रभृङ्ग-
केशौघमर्दनकरीव बभौ सरःश्रीः ॥

वीचीति ॥ वीच्यग्राणां तरङ्गाग्राणां पातेन नमत् नतमुन्नमदुन्नतं च 'पूर्वकालैकसर्वजरत्पुराणे'त्यादिना समासः । अब्जयुग्ममेव चञ्चत् चलत् करद्वयं हस्तयुग्मं * तेन कृताभिः आहतिभिः ताडनैः उपलक्षिता सरश्रीः कासारसम्पन्नलिन्याः पद्मलतायाः पद्मान्तरस्थं कमलमध्यस्थितमन्यकमले वा तिष्ठतीति तथोक्तम् । तादृशेन मधुना मकरन्देनैव तैलरसेन तैलद्रवेण 'गुणे रागे द्रवे रस' इत्यमरः । आर्द्राणां सिक्तानां भृङ्गावलीनामेव केशानां कचानामोघस्य संहतेः मर्दनमुद्वर्तनं करोतीति तथोक्तेव । करीत्यस्य 'कृञो हेतुताच्छील्यानुलोम्येष्वि'ति टप्रत्यये 'टिड्ढाणञि'त्यादिना ङीप् । बभौ रेजे । भा दीप्ताविति धातोर्लिट् । 'आत औणल' इति णल औकारादेशः । अत्र नमदुन्नमदब्जे लक्षितायास्सरःश्रियः भृङ्गात्मना रूपितकचौघमर्दनासक्तकर-द्वयाहतिविधानव्यग्रकान्तातादात्म्योत्प्रेक्षणादुत्प्रेक्षारूपकयोस्सङ्करः ॥ १९ ॥

२०

कासारसारसरसे स्नपनं विधाय
किञ्जल्कगन्धरजसां गणमादधानः ।

---

* तस्य तताभिः विस्तृताभिः आहतिभिः क्षतैः (ग)

भृङ्गेन्द्रनीलमणिभृन्मरुदाचचाल
मन्दं रसालनवपल्लवपीतवासाः ॥

कासारेति ॥ मरुत् पवनः कासारे सरसि सारसानां सरोजानां 'सारसं सरसीरुहमि'त्यमरः । रसे मकरन्दे स्नपनं स्नानं विधाय कृत्वा किञ्जल्कगन्धरजसां केसरगन्धयुक्तचूर्णानां गणं निचयमादधानः आसमन्तादधानः विलेपनं कुर्वाण इत्यर्थः । भृङ्गा मधुव्रता एव इन्द्रनीलमणयः तान् बिभर्तीति तथोक्तः । रसालस्य चूतस्य नवपल्लवाः बालकिसलयान्येव पीतवासः हेमाम्बरं यस्य स तथोक्तस्सन् मन्दं शनैश्चचाल सञ्चचाल । चलसञ्चलन इति धातोर्लिट् । णलादेशे 'अत उपधाया' इत्युपधावृद्धिः । एतेन मरुति शैत्यसौरभ्यादिकं व्यज्यते । सकलयुवजनस्पृहणीयविहार[1]योग्योऽ[1]यं देश इति भावः ।

अत्र प्रस्तुतमरुद्वर्णनेन मज्जनविलेपनवसनाभरणधारणाद्यर्थशक्तिमहिम्नाऽप्रस्तुतविलासव्यापारप्रतीतेस्समासोक्तिरलङ्कारः । 'परोक्तिर्भेदकैः श्लिष्टैस्समासोक्तिरि'ति लक्षणात् ॥ २० ॥

२१

पाथश्शकुन्तनिवहध्वनिवन्दिनादः
श्वेतातपत्रितविकासि सहस्रपत्रः ।
पार्श्वोदफेनविसराहितचामरान्त-
स्स्थायी सरस्सदसि खेलति राजहंसः ॥

---

[1] भूर (ग)

पाथइति ।। पाथश्शकुन्तानां जलपक्षिणां निवहस्य समूहस्य ध्वनिः रुतमेव वन्दिनां स्तुतिपाठकानां 'वन्दिनस्स्तुतिपाठकाः' इत्यमरः । नादः शब्दो यस्य स तथोक्तः । श्वेनातपत्रितं श्वेतच्छत्रीकृतं विकासि विकासितं सहस्रपत्रं कमलं यस्य स तथोक्तः । उदकस्य फेनानि उदफेनानि 'उदकस्योदस्संज्ञायामि' त्युदकशब्दस्योदादेशः । पार्श्वयोरुदफेनानां डिण्डीराणां विसरा निवहा एव आहिते आसादिते चामरे तयोरङ्कस्थायी मध्यस्थितः 'ग्रहादित्वाण्णिनिः' राजहंसः सितच्छदविशेषः 'राजहंसे नृपश्रेष्ठे' इति रत्नमालायाम् । सरः कासार एव सदः सभा तस्मिन् खेलति क्रीडति खेलृ चलने(?) इति धातोर्लट् ।

अत्र जलजशकुन्तरुतादिषु वन्दिनादादितादात्म्यारोपपूर्वकं हंसनृपवरयोरेकेन राजहंसशब्देन प्रतिपादनाच्छ्लेषरूपकयोस्सङ्करः । विशेष्यस्य श्लिष्टत्वे श्लेषः विशेषणानामेव श्लिष्टत्वे समासोक्तिरिति नियमात् 'श्लेषस्सवाक्य एकस्मिन्यत्रानेकार्थता भवेदि'ति लक्षणात् ॥ २१ ॥

२२

वातोद्धूताम्बुकणशुक्तिजबद्धसिन्धु-
काञ्चीमिलत्पुलिनतुङ्गनितम्बवत्या ।
क्षित्या परीतहरिदंशुकवद्वराज
क्षेत्रं समृद्धकलमोन्नतसस्यपूर्णम् ॥

वातेति ॥ समृद्धानां समृद्धिमतां कलमानां शालीनां 'रक्तशालिर्महाशालिः कलमश्चेति शालय' इति हलायुधः । उन्नतैरुच्छ्रितैस्सस्यैः पूर्णं समृद्धं क्षेत्रं केदारं वातेन वायुना 'नभस्वद्वातपवनपवमानप्रभञ्जना' इत्यमरः ।

उद्धृता उद्गताः । *वातोद्धतेति वा पाठः । अम्बुकणाः शीकरा एव शुक्तिकानि मौक्तिकानि तैः बद्धा नद्धा सिन्धुः सरिदेव काञ्ची मेखला 'स्त्रीकट्यां मेखला काञ्ची'त्यमरः । तया मिलत् पुलिनं सैकतमेव तुङ्गः उन्नतः नितम्बः श्रोणिः सोऽस्या अस्तीति तथोक्ता । तया क्षित्या धरित्र्या परीतहरिदंशुकवत् आवृतहरिताम्बरमिव रराज बभौ ।

अत्र स्त्रीरूपेण व्यज्यमानधरणीपरिवृतहरिदंशुकसादृश्यप्रतिपादनादुपमायां धरणीवृतांशुकस्यासिद्धत्वादभूतोपमेति केचित् । [1][अभूतोपमा नास्तीति][1] अभूतोपमास्थले सर्वत्रोत्प्रेक्षालङ्कार एवेत्यन्ये ॥ २२ ॥

२३

शाखाचरप्रचयपातितनारिकेल-
सारैश्च कीरदलिताम्ररसप्रवाहैः ।
पर्णाग्रघृष्टदलदैक्षवसारपूरैः
संवर्ध्यते कलमकोमलसस्यवृन्दम् ॥

शाखेति ॥ शाखाचराणां वानराणां प्रचयेन समूहेन पातितानामधस्ताद्गमितानां नारिकेलानां नारिकेलफलानां 'फलेलुगि'ति फलप्रत्ययस्य लुक् । सारैरम्बुभिः 'सारो बले स्थिरांशेऽर्थे पुमान्न्याये वरे त्रिषु । क्लीबमम्बुनी'ति रत्नमालायाम् । कीरैः शुकैः दलितानां निर्भिन्नानामाम्राणां सहकारफलानां रसस्य प्रवाहैरोघैः पर्णाग्राणां पत्रान्तानां घृष्टेन सङ्घर्षेण भावे क्तप्रत्ययः । दलतः

---

* वातोद्धतेति व्याख्यातृसूचितपाठभेदः ।

[1] नास्ति (क. ग. घ. च).

विदलितस्य ऐक्षवस्य पुण्ड्रसमूहस्य 'तस्य समूह' इत्यण्प्रत्ययः। सारस्य रसस्य पूरैश्च समृद्धिभिश्च कलमानां व्रीहीणां कोमलसस्यानां फलानां वृन्दं समूहस्संवर्ध्यते अभिवर्ध्यते वृधु वृद्धाविति धातोः कर्मणि लट्। नितान्त-फलिततरुवरसमृद्धोऽयं देश इति भावः।

इक्षुषु पर्वाग्रमात्रदलनप्रतिपादनेना'तिमार्दवं व्यज्यते। कोमलसस्येति कोमलशब्देन भूमेरुत्तमक्षेत्रत्वं गम्यते।

अत्र कमलसस्याभिवृद्धेः नालिकेरसारादिकर्तृकत्वासम्बन्धेऽपि तत्सम्बन्ध वर्णना[1]दतिशयोक्तिरलङ्कारः। 'सम्बन्धातिशयोक्तिस्स्यादयोगे योगकल्पनमि'ति लक्षणात्॥ २३॥

२४

वातप्रपातविनमच्चलशालिभेदाः
पद्मान्विमुच्य निजसौरभपातिभृङ्गान्।
व्यानम्य सोढुमलसा इव सौकुमार्यात्
धून्वन्ति सत्फलशिरांसि मुहुस्स्वकानि॥

वातेति॥ वातस्य वायोः प्रपातेन प्रकृष्टपतनेन विनमन्तः नम्राः चलाः चञ्चलाः शालिभेदाः व्रीहिविशेषाः *चलगन्धशाल्य इति पाठश्चिन्त्यः। 'शालयः कलमाऽऽद्याश्च षष्टिकाद्याश्च पुंस्यमी' इत्यभिधानात् पुलिङ्गताऽपि। [पद्मान्-कमलानि] विमुच्य विहाय निजसौरभाय स्वकीयगन्धार्थं पतन्तीति तथोक्ताः ते च ते भृङ्गाश्च तथोक्तास्तान् सोढुं क्षन्तुं धर्तुमिति भावः।

---

[1] नास्ति (च) * व्याख्यातृसूचितः पाठभेदः

सौकुमार्यात् कोमलत्वात् अलसा अशक्तास्सन्तः स्वकानि निजानि सत्फलान्येव शिरांसि व्यानम्य नम्राणि कृत्वा मुहुः शश्वत् धून्वन्ति [इव] कम्पयन्तीव ।

सकलसुधान्यप्रभवप्रसिद्धसुभूमिरयं देश इति भावः । उत्प्रेक्षालङ्कारः ॥ २४ ॥

२५

व्रीहेः फलानि परिचर्वितुमेत्य तत्र
कीरावलिः प्रथमदत्तपयोभिरब्दैः ।
आनेतुमेव कलमानि हरेः स्वभर्तुः
सम्प्रेषिता स्फुरति शक्रधनुर्लतेव ॥

व्रीहीति ॥ तत्र क्षेत्रेष्वेव कीरावलिः शुकपङ्क्तिः (कर्त्री) व्रीहेः व्रीहीणामिति भावः जातिविवक्षायामेकवचनता । फलानि परिचर्वितुमत्तुं एत्यागत्य प्रथमं पुरा दत्तं प्रतिपादितं पयः जलं यैस्ते तथोक्तैः अब्दैः मेघैः स्वभर्तुः निजनायकस्य इन्द्राधीनत्वान्मेघानामिति भावः । हरेरिन्द्रस्य कलमानि व्रीहिफलानि 'फले लुगि'ति फलप्रत्ययस्य लुक् । आनेतुं नीत्वा समर्पयितुमित्यर्थः सम्प्रेषिता सम्यक्प्रसारिता शक्रधनुरिन्द्रायुधमेव लता वल्लीव स्फुरति भाति ।

लोके धान्यनेतारो लताः रश्मीन्वा प्रसार्य तैर्व्रीह्यादि फलानि बध्नन्तीति भावः । प्रथमदत्तपयोभिरित्येतत् अन्यदीयफलग्रहणेऽनौचित्यसूचनाय लोके केदारादीनां जलं प्रतिपाद्य फलेषु कञ्चिद्भागं स्वीकुर्वतां केषाञ्चिद्दर्शनादिति भावः ।

अत्र शुकावल्यां समानवर्णसम्बन्धनिमित्तेनेन्द्रधनुर्लतातादात्म्योत्प्रेक्षणादुत्प्रेक्षालङ्कारः ॥ २५ ॥

२६

कञ्जावतंसकमनीयमुखाम्बुजाताः
कल्हारहारकलितस्तनकुम्भरम्याः ।
मार्णालतन्तुकृतवस्त्रनितम्बबिम्बाः
सन्तस्थिरे कलमगोपवधूकदम्बाः ॥

कञ्जेति । कञ्जान्यम्बुजानि कमितिमान्तमव्ययम् । जनेर्डप्रत्ययः । 'कं शिरोऽम्बु सुखे क्लीबे, तत्रैव च कमव्ययमि'ति रत्नमालायाम् । तान्येवावतंसाः कर्णपूराः 'पुंस्युत्तंसावतंसौ द्वौ कर्णपूरेऽपि शेखरे' इत्यमरः । तैः कमनीयानि रम्याणि मुखाम्बुजातानि वदनारविन्दानि येषां ते तथोक्ताः । कल्हाराणि रक्तोत्पलान्येव हाराः स्रजः 'सौगन्धिकन्तु कल्हारं हल्लकं रक्तसन्ध्यकमि'त्यमरः। तैः कलितौ व्याप्तौ स्तनौ कुम्भाविवेत्युपमितसमासः । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोग' इति स्मरणात् । ताभ्यां रमणीयाः मार्णालैः मृणालसम्बन्धिभिः 'तस्येदमि'त्यणि आदिवृद्धौ 'उरण्रपर' इति रपरत्वम् । तन्तुभिः सूत्रैः कृतानि वस्त्राणि येषां ते तथोक्ताः नितम्बबिम्बाः श्रोणिमण्डलानि येषां ते तथोक्ताः कलमगोपानां व्रीहिक्षेत्रपालकानां वधूनां स्त्रीणां कदम्बाः संहतयः 'कदम्बौ नीपसंहती' इति रत्नमालायाम् । सन्तस्थिरे स्थितवत्यः । ष्ठा गतिनिवृत्ताविति धातोर्लिट् । अत्र कलमगोपीनामतिरमणीयविलासवर्णनात्स्वभावोक्तिरलङ्कारः । 'स्वभावोक्तिस्स्वभावस्थक्रियाजात्यादिवर्णनमि'ति लक्षणात् ॥२६॥

२७

वल्गत्कुचाश्चलकटाक्षरुचः प्रकम्प-
पीनोरुवृत्तजघनाः श्लथकेशबन्धाः ।

गोप्योऽवगत्य तरसा करताडनेन
सन्तर्जयन्ति कलमाश्रितताम्रतुण्डान् ॥

वल्गदिति ॥ गोप्यः शालिपालिकाः वल्गन्तौ चलन्तौ कुचौ यासां तास्तथोक्ताः । चलाश्चञ्चलाः कटाक्षाणामपाङ्गदर्शनानां रुचयः रुचयो यासां तास्तथोक्ताः । पीनोरू पीवरसक्थिनी तौ च वृत्तजघनञ्च वर्तुलकटिपुरोभागश्च पीनोरुवृत्तजघनं प्राण्यङ्गत्वात् 'प्राणितूर्ये'त्यादिना एकवद्भावे 'स नपुंसकमि'ति क्लीवता । प्रकम्पं प्रकृष्टचलनं पीनोरुवृत्तजघनं यासां तास्तथोक्ताः सत्यः तरसा त्वरयाऽवगत्य गत्वा करताडनेन हस्तताडनेन कलमान् व्रीहीन् आश्रिताः आगताः ताम्रतुण्डाः शुकाः तान् सन्तर्जयन्ति निर्भर्त्सयन्ति । तर्ज भर्त्सन इति धातोर्लट् । स्वभावोक्तिरलङ्कारः ॥ २७ ॥

२८

चक्रौ कुचौ कचभरं शिखिनञ्च पद्मे
नेत्रे चलद्भ्रमरकं भ्रमरञ्च मत्वा ।
तासां विहाय भयमन्तिकतश्शुकास्ताः
पश्यन्ति दष्टकणिकाः समदाः पुरस्तात् ॥

चक्राविति । समदाः मदयुक्ताः शुकाः कीराः तासां शालिगोपीनां कुचौ स्तनौ चक्रौ चक्रवाकौ कचभरं केशपाशं शिखिनं मयूरं नेत्रे नयने च पद्मे सरोजे चलन् लोलः भ्रमरकः ललाटवर्तिकुन्तलः 'अलकाश्चूर्णकुन्तलाः । ते ललाटे भ्रमरका' इत्यमरः । तं च भ्रमरं भृङ्गं मत्वा ज्ञात्वा भयं भीतिं विहाय हित्वा पुरस्तादग्रे अन्तिकतः समीपतः दष्टाः सन्दष्टाः कणिकाः

★

धान्यकणा यैस्ते तथोक्तास्सन्तः 'कणिका धान्यमञ्जरी'ति वैजयन्ती। ताः शालिगोपीः पश्यन्ति विलोकयन्ति। दृशिर्प्रेक्षण इति धातोर्लट्। 'पाघ्रे'त्यादिना पश्यादेशः। अत्र शुकानां शालिगोपीकुचादिषु चक्रादिभ्रान्तिवर्णनाद्भ्रान्तिमदलङ्कारः ॥ २८ ॥

२९

उद्वेजयन्ति विरहे गलगर्जनेन
सम्भूय नः स्मरहितत्वमुपेयिवांसः।
कीरा इतीव सरुपः परितर्जयन्ति
तानेव गर्जनरवेण तु शालिगोप्यः ॥

उद्वेजयन्तीति ॥ कीराः शुकाः स्मरहितत्वं मन्मथसहकारित्वमुपेयिवांसः प्राप्तास्सन्तः 'उपेयिवाननाश्वाननूचानश्च' इति क्वसन्तत्वेन निपात्यते। सम्भूय पुञ्जीभूय गलगर्जनेन कण्ठस्वरेण विरहे वियोगे नः अस्मान् उद्वेजयन्ति त्रासयन्ति। ओविजी भयसञ्चलनयोरिति धातोर्लट्। शुकादीनामुद्दीपकत्वादिति भावः। इति हेतोः सरुषः रोषयुक्ताः शालिगोप्यः कलमपालिकाः 'गोपी गोपालमहिला गौर्यम्बारक्षिकासु चे'ति विश्वः। गर्जनरवेणोच्चैर्घोषेण तान् शुकानेव परितर्जयन्ति भर्त्सयन्तीव।

शालीफलभक्षणासक्तशुकनिवारणव्यग्रगोपीजनभर्त्सनेषु प्रियवियोगकालकृततदीयवित्रासनजनितक्रोधहेतुकत्वोत्प्रेक्षणादुत्प्रेक्षालङ्कारः ॥ २९ ॥

३०

काचित्करेण कमलं पुरतस्समूलं
उन्मूल्य षट्पदरवाञ्चितमामुमोच।

कीरान्प्रतिप्रचलितेन तदाऽन्वकारि
तेनात्तभीङ्कृतिचलस्मरबाणलीला ॥

काचिदिति ॥ काचित् कलमगोपी, करेण हस्तेन पुरतोऽग्रे षट्पदस्य भ्रमरस्य रवेण ध्वनिना अञ्चितं महितं कमलं नलिनं समूलं मूलसहितं यथा तथा उन्मूल्य उत्पाट्य कीरान् शुकान् प्रति आमुमोच प्रयुयुजे । तदा तस्मिन् काले प्रचलितेन गतेन तेन कमलेनात्ता प्राप्ता भीङ्कृतिः भीङ्कारशब्दो येन स तथोक्तस्तादृशस्य चलस्य गच्छतः स्मरबाणस्य मदनशरस्य लीलाविलासः अन्वकारि अनुकृता । डुकृञ् करण इति धातोः कर्मणि लुङ् । लक्ष्यं प्रति [प्र]युक्तस्य [बाणस्य] भीङ्कारप्रवृत्तिदर्शनादिति भावः । अनेन कलमगोपीकृत-लीलामवलोकयतो युवजनस्य रत्या स्थायीभावो व्यज्यते । अत्र कलम-पालिकानिर्मुक्तकमले असम्भवन्त्या[:] सम्भवत्सदृशान्तरकल्पिताया लीलायाः वर्णनान्निदर्शनालङ्कारः पदार्थवृत्तिः ॥ ३० ॥

३१

कीरान्प्रचालयितुमागतया कयाचित्
दृग्रुङ्मृगाङ्करुचिसङ्कुचितं सरोजम् ।
व्यामुक्तमन्तरलिरावमिषेण भानोः
आक्रोशमादधदिवोच्चलितं बभासे ॥

कीरानिति ॥ कीरान् शुकान् प्रचालयितुं वारयितुमागतया ऽऽगच्छन्त्या कयाचित्कलमगोप्या व्यामुक्तं प्रयुक्तं दृशोः शालिपालिका-नेत्रयोः रुचा शोभयैव मृगाङ्करुच्या चन्द्रिकया सङ्कुचितं सरोजं कमलमन्तर-

लीनामन्तरस्थितमधुकराणां रावमिषेण ध्वनिव्याजेन भानोस्सूर्यं प्रतीत्यर्थः शेषत्वविवक्षायां षष्ठी । आक्रोशमाक्रन्दं आदधत् कुर्वदिव उच्चलितमुद्गतं सत् बभासे रेजे ।

लोके केनचित्कश्चिद्विपदं प्रापितः स्वविभुं प्रति निवेदयतीति भावः । ललनालोचनमरीचिषु धावल्यस्य कविसम्मतत्वादत्र दृङ्मृगाङ्करुचीति तादात्म्यारोपस्सम्भवदुक्तिकः । तदुक्तमभिनवकालिदासेन भागवतचम्पूप्रबन्धे — 'यद्वा दयारसझरीपरिपूरितेन । मन्दारमाल्यनिकुरुम्बसहोदरेण । गौरीकटाक्षनिकरेणे'ति । दृङ्मृगाङ्करुचीति रूपकानुप्राणितायाः [अ]लिरावमिषेणे[1][त्यपह्नवविशिष्टायाः][1] कलमगोपीविनिर्मुक्तकमलमुकुले आक्रोशकर्तृतादात्म्योत्प्रेक्षायाः प्रतीतेः रूपकापह्नवोत्प्रेक्षणां सङ्करः ॥ ३१ ॥

३२

विम्बोष्ठमीक्ष्य सुदृशः परिपक्वबिम्बं
मत्वा समेत्य परिचर्वितुमाहसन्त्याः ।
दन्तांश्च दाडिमधिया शुकशावकोऽभूत्
तस्याः कटाक्षरुचिवागुरया निबद्धः ॥

विम्बेति ॥ शुकशावकः कीरशिशुः 'पृथुकरशाबकशिशु'रित्यमरः । आहसन्त्या ईषद्धसनं कुर्वन्त्याः सुदृशः कलमगोप्याः बिम्बमिवोष्ठः बिम्बोष्ठः 'ओत्वोष्ठयोस्समासे वे'ति पररूपम् । वीक्ष्य विलोक्य परिपक्वबिम्बं पक्वबिम्बिकाफलं 'बिम्बाफले बिम्बिकायां प्रतिबिम्बे च मण्डल' इति विश्वः ।

---

[1] वाक्श्लिष्टतया च [क]

मत्वा ज्ञात्वा दन्तान् रदान् दाडिमधिया दाडिमबीजभ्रान्त्या च परिचर्वितुं भक्षयितुं समेत्य आगत्य तस्याः स्त्रियाः कटाक्षरुचयः अपाङ्गदृष्टिमरीचय एव वागुरा जालविशेषः तया निबद्धः नद्धः तया प्रीतिपूर्वकं दृष्ट इति भावः। अभूत्। भू सत्तायामिति धातोर्लुङ्। 'इतश्चे'तीकारलोपः 'लुङ्लङ्लृङ्क्ष्वडुदात्त' इत्यडागमः। 'च्लिलुङी'ति च्लिप्रत्यये 'च्लेस्सिजि'ति सिजादेशः। 'गातिस्थे'त्यादिना सिचो लुक्। भूसुवोस्तिङी'ति गुणनिषेधः।

अत्र शुकशावकस्य कलमपालिकाऽधरादिषु बिम्बादिभ्रान्तिवर्णनाद्भ्रान्तिमदलङ्कारः। कटाक्षरुचिवागुरयेति रूपकेण च सङ्करः। जनसामीप्यकृतभयस्य बिम्बादिभ्रान्त्या निवृत्तावपि पुनर्वागुराबन्धनप्रयुक्तं भयं तस्य प्राप्तमिति व्यज्यते ॥ ३२ ॥

३३

जेतुं जगत्त्रयमिदं तनयस्य नालं
एकेक्षुचापमिति भूरमया विचिन्त्य।
लब्धानि तादृशधनूंषि सहानि तत्र
मन्यामहे वनमहीजनितेक्षुदण्डान् ॥

जेतुमिति ॥ वनमह्यामारामभुवि जनिता इक्षुदण्डास्तान् (कर्माणि) तनयस्य सुतस्य मदनस्येत्यर्थः। एकेक्षुचापमेककादम्बधनुः 'कोदण्डं धन्वकार्मुकं चापं शरासनं ज्ञेयमि'ति हलायुधः। इदं जगत्त्रयं जेतुं जयाय नालं न क्षममिति विचिन्त्य आलोच्य भूरेव रमा लक्ष्मीः तया लब्धानि संपादितानि तत्र जगद्विजये सहानि क्षमाणि तादृशधनूंषि ऐक्षवशरासनानि मन्यामहे विद्महे। मन्यतेः 'दिवादिभ्यश्श्यन्' इति श्यन् प्रत्ययः।

अत्र वनमध्यसञ्जातेक्षुकाण्डेषु त्रिभुवनविजिगीषुमदनविजयोपयुक्त-भूरमार्जितानेककार्मुकतादात्म्योत्प्रे[क्षणा]दुत्प्रेक्षालङ्कारः ॥ ३३ ॥

३४

स्वाङ्गैकदेशमधुरा भुवि सन्ति भूजाः
सर्वाङ्गकेषु मधुरा वयमेव चेति ।
प्रख्यापयन्ति विरुदं निवसन्ति तत्र
पान्थश्रमापनयने चतुरास्तरुण्यः ॥

स्वाङ्गेति ॥ तत्रेक्षुवनप्रान्ते अथवा तत्र प्रपायामिति वक्ष्यमाणाभि-प्राय[1]तया त[1]च्छब्दः । पान्थानां पथिकानां श्रमस्यायासस्यापनयने निवारणे चतुराः निपुणाः तरुण्यः पानीयशालानियुक्ता युवतयः निवसन्ति वर्तन्ते। भुवि स्वाङ्गैकदेशे निजशरीरैकभागे फलकाण्डादौ मधुरा मधुररसवन्तः भूजा महीरुहास्सन्ति । वयमेव सर्वाङ्गकेषु सर्वावयवेषु मधुराः रम्या इति विरुद-मतिशयद्योतकाभरणादिकं प्रख्यापयन्ति प्रकटयन्ति च । लोकोत्कृष्टसौन्दर्य-सीमानः श्यामाः पानीयशालानियुक्ता इति भावः ।

प्रपानियुक्तस्त्रीणामेव तादृशसौन्दर्यमन्यासां कामिनीनां किमु वक्तव्य-मिति कैमुतिकन्यायेन सौन्दर्यातिशयो व्यज्यत इत्यलङ्करेणार्थापत्तिरूपालङ्कार-ध्वनिः ।

अत्र पानीयशालायां तादृशयुवतिजनासम्बन्धेऽपि तत्सम्बन्धोक्तेरति-शयोक्तिरलङ्कारः ॥ ३४ ॥

---

[1] यकस्त [ग]

३५

एलालवङ्गसदुशीरसुगन्धिशैत्य-
माधुर्यशोभिजलसम्भृतहेमकुम्भान् ।
पाण्यम्बुजैस्समवलम्ब्य समीक्ष्य वारि
तास्सुस्रुवुः पथिकपाणिपुटेषु कान्ताः ॥

एलेति ॥ ताः कान्ताः प्रपागतवनिताः एलाभिः 'पृथ्वीका चन्द्रबालैला निष्कुटिर्बहुलाथ से'त्यमरः । लवङ्गैः देवकुसुमैः 'लवङ्गं देवकुसुम'मिति वैजयन्ती । सदुशीरैः प्रशस्तलामज्जकैः 'स्याद्वीरणं वीरतनं मूलेऽस्योशीरमस्त्रियामि'त्यमरः। सुगन्धिशोभनगन्धवत् 'गन्धस्येदुत्पूतिसुसुरभिभ्य' इति गन्धशब्दस्येकारोऽन्तादेशः । शैत्यमाधुर्याभ्यां शोभत इति तथोक्तं च जलमुदकं तेन संभृतान् पूरितान् हेमकुम्भान् सुवर्णकलशान् पाण्यम्बुजैः करकमलैः समवलम्ब्य आलम्ब्य समीक्ष्य अपाङ्गदृष्ट्येति भावः । पथिकानां पान्थानां पाणिपुटकेष्वञ्जलिषु वारि जलं सुस्रुवुः मुमुचुः । स्रु गताविति धातोर्लिट् । परस्मैपदानां णलतुसुस्थलतुसणल्वमाः' इति झेरुसादेशः । द्रवद्रव्यकर्तृकएवायमकर्मकः । अन्यकर्तृत्वे तु द्रवद्रव्यकर्मक इति स्रवतिरत्र सकर्मकः । अत एव 'चरणयुगमसुस्रवत्पदेषु स्वरसमसमलक्तकच्छलेने'ति माघकविः ।

अत्रातिरमणीयतया तत्रत्यकान्तासु सलिलप्रदानक्रियावर्णनात्स्वभावोक्तिरलङ्कारः ॥ ३५ ॥

३६

चन्द्राश्मकल्पितकनत्कलशस्तरुण्याः
चञ्चत्पयाः करपयोजधृतश्चकाशे ।

वक्त्रांशुतस्कर इतीव निगृह्यमाणः
तन्व्या तया तरलजीवनभृन्मृगाङ्कः ॥

चन्द्रेति ॥ तरुण्याः युवत्याः करपयोजधृतः करकमलाबद्धः चञ्चत् चलत् पयः जलं यस्मिन् स तथोक्तः चन्द्राश्मना चन्द्रकान्तोपलेन कल्पितः कृतः कनन्नुज्ज्वलः कलशः कुम्भः (कर्ता) वक्त्रांशूनां वदनश्रियां तस्करः चोरः* कस्कादित्वात् सः (?)। तया तन्व्या तरुण्या निगृह्यमाणः नितरां गृह्यमाणः अथवा निगृह्यमाणः निराक्रियमाणः अत एव तरलं चञ्चलं जीवनं जीवं सलिलञ्च बिभर्तीति तथोक्तः मृगाङ्कश्चन्द्र इव चकासे रेजे काशृ दीप्ताविति धातोर्लिटि अभ्यासे 'कुहोश्चुः' इत्यभ्यासस्य कोश्चुत्वम् ।

अत्र वनिताकरगतचन्द्रकान्तकलशे धावल्यादिधर्मसम्बन्धेन करतलाबद्धचन्द्रतादात्म्योत्प्रेक्षणादुत्प्रेक्षालङ्कारः ॥ ३६ ॥

३७

कान्ताकराम्बुजसमुद्धृतकुम्भवारि
पीतञ्च पान्थवदनेन तदक्षि तस्याः ।
वक्षोजकुम्भरुचिवारि पपौ वितृष्णं
पूर्वं बभूव न बभूव पुनर्द्वितीयम् ॥

---

* 'पारस्करप्रभृतीनि च संज्ञायाम्' इति सूत्रस्थितेन 'तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च' इति वार्तिकेन सुडागमः तलोपश्चेति बोध्यम् । 'कस्कादित्वात्' इति तु चिन्त्यम् । 'कस्कादिषु च' इत्यत्र कस्कादिगणमध्ये तस्करशब्दो नोक्तः ॥

कान्तेति ॥ पान्थस्य पथिकस्य वदनेनास्येन कान्तायाः कराम्बुजेन हस्तकमलेन समुद्धृते उत्क्षिप्ते कुम्भे कलशे वारि जलं पीतं पानं कृतम् । तदक्षि पान्थदृष्टिश्च तस्याः कान्तायाः वक्षोजौ स्तनावेव कुम्भौ कलशौ तयोः रुचिः शोभैव वारि जलं तत् पपौ पानं कृतवत् । पा पान इति धातोर्लिट् । णल औकारः । पूर्वं वदनं वितृष्णं शान्तपिपासं बभूव । द्वितीयं पुनः तदक्षि-वितृष्णमासक्तिरहितं निष्पिपासं च 'तृष्णा स्पृहा पिपासे द्वे' इत्यमरः । न बभूव न जातम् । कान्तायाः करगतकलशजलपानात्पान्थस्य पिपासा निवृत्ता[व]पि वक्षोजरुचिवारिपानादृशः तृष्णा प्रबलतरैवाभू[दि]त्यनेन स्तन-मण्डलदर्शनासक्तिर्गम्यत इति चक्षुःप्रीतिरूपावस्था सूच्यते । तल्लक्षणं तु 'आदरादर्शनं चक्षुःप्रीतिरित्यभिधीयत' इति । अत्र कुम्भद्वयगतजलपानरूप-कारणसम्पत्तावपि तृष्णाशान्तिरूपकार्यानुत्पत्तिवर्णनाद्विशेषोक्तिरलङ्कारः । विशे-षोक्तिरखण्डेषु कारणेषु फलावचः' इति लक्षणात् ॥ ३७ ॥

३८

ऊर्ध्वानिमेषनयनेन तदाननेन्दु-
लावण्यवारि पिबतः पथिकस्य चेतः ।
तद्भ्रूलता धनुषि संहिततत्कटाक्ष-
लोलांशुतीक्ष्णविशिखैर्बिभिदे मनोभूः ॥

ऊर्ध्वेति ॥ ऊर्ध्वमूर्ध्वमुखमनिमिषं निमिषवर्जं नयनं नेत्रं तेन, तस्याः कान्तायाः आननेन्दोः मुखचन्द्रस्य लावण्यं सुषमैव वारि जलं तत् पिबतः पानं कुर्वतः । पा धातोश्शतृप्रत्यये शित्त्वात् 'पाघ्रे'त्यादिना पिबादेशः । पथिकस्याध्वनीनस्य चेतः मनः (कर्म), मनोभूः मदनः तस्याः भ्रूलतेव भ्रूलता

'उपमितं व्याघ्रादिभि'रिति समासः। [1]सै[1]व धनुः कार्मुकं तस्मिन् संहिताः बद्धाः तस्याः कान्तायाः कटाक्षाणामपाङ्गदृष्टीनां लोलाः चञ्चलाः अंशवः मरीचयः एव तीक्ष्णाः निशिताः विशिखाः शराः तैः बिभिदे। भिदिर् विदारण इति धातोः कर्तरि लिट्। 'लिटस्तझयोरेशिरेच्' इति तस्यैशादेशः। तदीय-वदनदर्शनात्पथिकस्य अतीव मदनोद्रेकोऽभूदिति भावः।

अनेन मनस्सङ्गरूपद्वितीयावस्था व्यज्यते। लक्षणं तु 'मनस्सङ्गः प्रियतमे नित्यं चित्तस्य विभ्रम' इति।

अत्र कान्ताकटाक्षादिषु मदनविशिखादितादात्म्यारोपणाद्रूपकाल-ङ्कारः ॥३८॥

३९

पाण्युद्धृतेन कलशेन पयो विमुच्य
पान्थं प्रतर्पितवती प्रमदेत्यनङ्गः।
नेत्राध्वगं स्वयमतर्पयदुत्सवेन
तस्यापि तत्कुचलसत्कलशांशुवार्भिः॥

पाणीति॥ प्रमदा कान्ता 'प्रमदा मानिनी कान्ते'त्यमरः। पाणिना करेण उद्धृतेनोत्क्षिप्तेन कलशेन कुम्भेन पयः जलं विमुच्य त्यक्त्वा पान्थं पथिकं प्रतर्पितवती सन्तर्पणं कृतवती इत्यालोच्य अनङ्गः मदनोऽपि तस्याः कुचौ स्तनावेव लसन्तौ उज्ज्वलौ कलशौ तयोरंशवः रुचय एव वारि जलानि तैः तथोक्तैः 'आपस्स्त्री भूम्नि वार्वारि'त्यमरः। तस्य पथिकस्य नेत्रं नयनमेव अध्वगं पान्थं स्वयं स्वकीयेनोत्सवेन कौतुकेन अतर्पयत् सन्तर्पितवान्।

---

[1] शै (क)

मनसस्तत्सङ्गरूपकार्यान्तरव्यग्रतया सहकार्यसन्निधानाच्चक्षुस्तृप्तिर्जातेति भावः ।

अत्र मदनकृतपथिकनयनसन्तर्पणस्य कान्ताकृतपथिकसन्तर्पणानिमित्तत्वेऽपि तन्निमित्तत्वोत्प्रेक्षणादुत्प्रेक्षालङ्कारः । स च व्यञ्जकाप्रयोगाद्गम्यः ॥ ३९ ॥

४०

नेत्राध्वनेयमबला हृदयं गता मे
चेतोभवाग्नित इमां परिपालयामि ।
इत्यम्बु भूरि पिबतीव स चाध्वताप-
शान्त्यै मुहुस्सलिलपानरतः प्रपायाम् ॥

नेत्रेति ॥ किञ्च अध्वना जनितस्तापः अध्वतापः मार्गश्रमः तस्य शान्त्यै शमनाय प्रपायां पानीयशालायां 'प्रपा पानीयशालिके'त्यमरः । सलिलपाने रतः आसक्तः स पथिकः इयमबला कान्ता मे मम नेत्राध्वना दृङ्मार्गेण हृदयं मानसं गता प्राप्ता चेतोभवाग्नितः मदनाग्नेः पञ्चम्यास्तसिः 'भीत्रार्थानां भयहेतुरि'ति पञ्चमी । इमामबलां परिपालयामि रक्षामि पा रक्षण इति धातोर्लट् चुरादित्वाण्णिच्प्रत्ययः । इतीव भूरि बहु अम्बु जलं मुहुः शश्वत् पिबति पानं करोति ।

अत्राध्वश्रमशान्त्यर्थकभूरिजलपानस्य मनोभवाग्निपरिहारपूर्वकतत्कामिनीपरिपालनाफलकत्वेऽपि तत्फलकत्वोत्प्रेक्षणात्फलोत्प्रेक्षालङ्कारः ॥ ४० ॥

४१

मार्गश्रमः परिहृतः पयसा त्वयैव
भान्वातपेन जनितोऽद्य मनोभवेन ।
जातस्तु दुष्परिहरस्स च तेन नारि !
चन्द्रामृतेन शमयेति जगाद पान्थः ॥

मार्गेति ॥ हे नारि कान्ते भान्वातपेन जनितः उत्पन्नः मार्गात् श्रमः मार्गश्रमः मार्गायासः त्वयैव (कर्त्र्या) पयसा जलेन (करणेन) परिहृतः निवारितः । अद्य मनोभवेन जातः स तु श्रमः तेन जलेन दुष्परिहरः दुर्निवारः 'ईषद्दुस्सुषुकृच्छ्राकृच्छ्रार्थेषु खल्' इति खल्प्रत्ययः । 'इणष्पः' इति विसर्जनीयस्य षत्वम् । चन्द्रामृतेन विषयनिगरणान्मुखवचनेनेत्यर्थः । वाक्यामृतेन शमय परिहरेति पान्थो जगाद अवदत् । गद व्यक्तायां वाचीति धातोर्लिट् । सल्लापसंश्लेषादिकमन्तरेण स्मरतापो न निवर्तत इति भावः ।

अत्र प्रकृतवचनस्य विषयीभूतामृतशब्दोपादानेन निगीर्याध्यवसानादतिशयोक्तिरलङ्कारः ॥ ४१ ॥

४२

प्रायः पिबन्नसि पयः पथिक त्वदङ्ग-
तापस्तथाऽपि शमितो न च तत्प्रयाहि ।
निद्रालुबर्हिवनमस्ति तमालमालि
शान्तो भविष्यति स चेति जगाद काचित् ॥

प्राय इति ॥ हे पथिक पान्थ त्वं प्रायः भूयः पयः जलं त्वं पिबन्

पानं कुर्वन् असि भवसि । तथापि त्वदङ्गं तवाङ्गं 'प्रत्ययोत्तरपदयोश्चे'त्येकार्थवाचिनो युष्मदो मपर्यन्तस्य त्वदादेशः । तस्य तापः सन्तापः शमितः शान्तः न च भवति । निद्रालवः निद्रिताः ' स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ' इति ताच्छील्ये निपूर्वकात् द्रा धातोः आलुच् प्रत्ययः । बर्हिणो मयूरा अस्मिन् तत्तथोक्तं जनसञ्चाररहित्यमनेन व्यज्यते । तमालमालि तमालानां तापिञ्छतरूणां माला अस्मिन् सन्तीति तथोक्तं यस्मिन् ; अनेन च [1]निरालोकवदद्दश्यस्थानं अतएवावयोः[1] विहारयोग्यमिति सूच्यते । वनं अस्ति । तद्वनं प्रयाहि [2]गच्छ । या प्रापणे इति धातोर्लोट् । 'सेर्ह्यपिच्च' इति ह्यादेशः । स च तापः शान्तः निवृत्तो भविष्यतीति काचित्कान्ता जगाद उक्तवती ।

अत्र तादृशविहारयोग्ये[2] तस्मिन्नावयोस्सम्भोगो भविष्यतीति निजतात्पर्यस्य गूढत्वाद्गूढोत्तरालङ्कारः । ' किञ्चिदाकूतसहितं स्याद्गूढोत्तरमुत्तरमि'ति लक्षणात् ॥ ४२ ॥

४३

राजद्रसालसमुदञ्चितमञ्जुघोषं
रम्भादिखेलनयुतप्रमदालिरम्यम् ।
दिव्यागवत्सुरभिशोभिमरुत्प्रयुक्तं
उद्यानमेकमवहत्सुरनन्दनत्वम् ॥

अथास्मिन्देशे वनं प्रस्तौति **राजदिति** ॥ राजत्सु प्रकाशमानेषु रसालेषु सहकारतरुषु समुदञ्चिताः सङ्गताः मञ्जुघोषा मधुरस्वनाः कोकिला

---

[1] (ग) पुस्तकपाठोऽयम् । [2] ग पुस्तकपाठः

यस्मिन् तत्तथोक्तं *'वसन्तघोषोऽन्यभृतस्ताम्राक्षो मधुरस्वरः कलकण्ठः काकपुष्ट' इति वैजयन्ती (?) अन्यत्र राजद्भिः रसैः शृङ्गारादिभिः अलसा रम्याः मुदा हर्षेण अञ्चिता युक्ता मञ्जुघोषा अप्सराङ्गनानां विशेषो यस्मिन् तत्तथोक्तं 'घृताची मेनका रम्भा ऊर्वशी च तिलोत्तमा। सुकेशी मञ्जुघोषा च कथ्यन्तेऽप्सरसो बुधैरि'ति हलायुधः। रम्भादिषु कदलीप्रभृतिषु खेलनयुतैः प्रमदैः प्रकृष्टमदैः अलिभिः भ्रमरैः रम्यम्। अन्यत्र रम्भा रम्भानामकाप्सराङ्गना सैव आदिर्यासां तासां खेलनयुतानां विहारासक्तानां 'रम्भा कदल्यप्सरसोः' इति §विश्वः। प्रमदानां स्त्रीणां 'प्रमदस्सम्मदः पुंसि त्रिषु मत्ते स्त्रियां स्त्रियामि'ति रत्नमालायाम्। आलिभिः पङ्क्तिभिः रम्यं रमणीयम्। अत्र †'मञ्जुघोषारम्भादी'ति पाठान्तरम्। तदा प्रकृतार्थे मञ्जुघोषस्य मधुरध्वनेरारम्भः। आदिर्येषां खेलनानामित्यर्थः। समुदञ्चितेति घोषविशेषणम्। अन्यत्र मञ्जुघोषा च रम्भा च तथोक्ते अनुपसर्जनत्वान्न पुंवद्भावः। ते एवादी यासां प्रमदानामित्यर्थः। समुदञ्चितेति प्रमदाविशेषणम्। दिव्याः कमनीयाः अगाः वृक्षाः क्रीडाशैला वा अस्मिन् सन्तीति तथोक्तम्। 'शैलवृक्षौ नगावगावि'त्यमरः। अन्यत्र दिवि स्वर्गे भवा दिव्याः अगाः पारिजातादयो यस्मिन् सन्तीति तथोक्तम्। सुरभौ वसन्ते शोभते भासत इति तथोक्तम्। यद्वा सुरभिभिः सुगन्धिभिः शोभत इति तथोक्तमथवा सुरभिभिश्चम्पकैः शोभत इति तथोक्तम्। अन्यत्र सुरभ्या कामधेन्वा सुरभिणा सुगन्धिना वा शोभत इति तथोक्तम्। कामधेनोस्सञ्चारदेशत्वादिति भावः।

---

* काकपुष्टस्त्वन्यभृतस्ताम्राक्षः कोकिलः पिकः। वसन्तघोषो मधुवाक्कलकण्ठो वनप्रियः॥ इति मुद्रितवैजयन्तीपाठः।

§ वैजयन्तीति (क. घ. च.)

† व्याख्यातृसूचितपाठभेदः

'सुरभिश्चम्पके स्वर्णे जातीफलवसन्तयोः। गन्धे फले सौरभेय्यां सल्लकी मातृभेदयोः। सुगन्धौ च मनोज्ञे च वाच्यवत्सुरभिस्स्मृतः' इति विश्वः। 'सुरभिर्गवि च स्त्रियामि'ति चामरः। मरुता मंदानिलेन प्रयुक्तं संयुतं अन्यत्र मरुद्भिस्सुरैः प्रयुक्तं युतमासञ्चितं वा। 'मरुतौ पवनामरावि'त्यमरः। एकं मुख्यमुद्यानं क्रीडावनं सुरनन्दनत्वं देववनत्वं 'नन्दनं वांसवोद्यानम्' इति विश्वः। अथवा सुरनन्दनत्वं जयन्तादिभावमवहत् वहतिस्म। वह प्रापण इति धातोर्लङ् 'इतश्चे'तीकारलोपः। 'लङ् लुङ्' इत्यादिनाडागमश्च। सुरवनसदृशयुवजनविहारयोग्यरमणीयोद्यानमहितोऽयं देश इति भावः।

अत्रोद्याने नन्दनताद्रूप्यारोपाद्विशेषणानां श्लिष्टत्वाच्च श्लेष-रूपकयोस्सङ्करः ॥ ४३ ॥

४४

पुन्नागपूगकृतमालतमालताल-
हिन्तालपाटलरसालपलाशवृक्षाः।
चाम्पेयचन्दनकपित्थकदम्बविल्व-
जम्बीरकेसरशिरीषकुजा विरेजुः ॥

पुन्नागेति ॥ पुन्नागाः देववल्लभाः 'पुन्नागः पुरुषस्तुङ्गः केसरो देववल्लभ' इत्यमरः। (कर्णाटभाषायां) 'सुरहोन्ने'। पूगाः क्रमुकाः 'घोण्टा तु पूगः क्रमुक' इत्यमरः। 'अडकेमर'। कृतमालाः आरग्वधाः *'आरग्वध-व्याधिघातकृतमाला' इत्यमरः। 'कक्केमर'। तमालाः तापिञ्छाः 'काल-

---

* आरग्वधे राजवृक्षसम्पाकचतुरङ्गुलाः। आरेवतव्याधिघातकृतमालसुवर्णकाः इति मुद्रितामरपाठः।

स्कन्धस्तमालस्स्यात्तापिञ्छ' इत्यमरः । [§]कद्वालमर । तालास्तृणराजाह्वयाः 'तृणारजाह्वयस्ताल' इत्यमरः [ताळेय मर] । हिन्तालाः । पाटलानां पाटली-वृक्षाणां समूहाः पाटलानि 'तस्य समूह' इत्यण् । 'पाटलिः पाटलामेव' इत्यभिधाने स्त्रीलिङ्गानुशासनात् पाटलीति पाठः । 'पादरिमर' । रसालाः माकन्दाः । 'माविन मर' । पलाशाः किंशुकाश्च 'पलाशे किंशुकः पर्णो वातपोथ' इत्यमरः । 'मुत्तुकद मर' । वृक्षाः तरवः रेजुः । चाम्पेयाः चम्पकाः 'चाम्पेयश्चम्पको हेमपुष्पकमित्यमरः । 'सम्पिगेय मर' । चन्दनाः भद्रश्रियः 'भद्रश्रीचन्दनद्रुम' इत्यमरः । 'श्रीगन्धद मर' । कपित्थाः दधित्थाः । 'बेलवद मर' । कदम्बाः नीपा त एव 'नीपप्रियक कदम्बास्तु हरिप्रिये' इत्यमरः । 'कडवलद मर' । बिल्वाः मालूराः । 'बेल्लवत्तद मर' । जम्बीराः दन्तशठाः 'स्युर्जम्बीरे दन्तशठजम्भजम्भीरजम्बला' इत्यमरः । 'निम्बेय मर' । केसराः नागकेसराः 'चाम्पेयः केसरो नागकेसरः काञ्चनाह्वय' इत्यमरः । 'नागकेसरद मर' । शिरीषकुजाः कपीतनवृक्षाः 'शिरीषस्तु कपीतन' इत्यमरः । 'बागेमर' । विरेजुः ।

अत्र वर्णानामसकृदावृत्तेः वृत्त्यनुप्रासश्शब्दालङ्कारः । 'वर्णसाम्यमनु-प्रासश्छेकवृत्तिगतो द्विधा । सोऽनेकस्य सकृत्पूर्वः एकस्याप्यसकृत्पर' इति लक्षणात् ॥ ४४ ॥

४५

यत्कण्टकानविगणय्य भुजङ्गभोग—

सक्तामपि स्वलिरुदञ्चितकेतकीं च

---

§ कथ्थाळमर (ग)

निर्भीतिरेत्य रसतस्सुतरां चुचुम्ब
‘कान्तानुरागचपलस्य कुतोऽस्ति भीतिः’ ॥

यदिति । किञ्च । यत्रालिः भृङ्गः कण्टकान् अविगणय्य तु अगणयित्वैव ‘तु स्याद्भेदेऽवधारण’ इत्यमरः । भुजङ्गस्य सर्पस्य भोगेन [1]शरीरेण सक्तां युक्तामपि[1] उदञ्चितकेतकीं विकसितकेतकीकुसुमं ‘पुष्पमूलेषु बहुलमि’ति प्रत्ययस्य लुक् । निर्गता भीतिर्यस्मात्स तथोक्तस्सन् एत्य रसतः रागात् सुतरामतीव चुचुम्ब चुम्बितवान् । तथाहि कान्तायामतिमुक्तलतायां तरुण्यां च ‘कान्तारसविशेषे स्यादतिमुक्तलतान्तर’ इति विश्वः । ‘कान्ता ललना च नितम्बिनी’त्यमरः । अनुरागेणासक्त्या चपलस्य चञ्चलस्य भीतिर्भयं कुतः कथमस्ति नास्त्येवेति भावः ।

पाणिकण्टकादिसंवलितकेत[2][की][2]चुम्बनस्य निर्भयकृतस्य विशेषस्य कान्तानुरागेत्यादिना सामान्येन समर्थनादर्थान्तरन्यासोऽलङ्कारः ॥ ४५ ॥

४६

चञ्चत्प्रवालमहितः पवनोपलाल्यो
लङ्कारिकामसचिवस्सुमनोमनोज्ञः ।
शाखिष्वधिष्ठितपदः फलवत्प्रवृत्तिः
चूतद्रुमः पवनभूरिव सत्त्वयुक्तः ॥

---

[1] फणेन सक्तां संयुक्तां भोगसक्तां फणासक्तां इति (ग)
[2] क (ग. व. च.)
★

चञ्चदिति ॥ चञ्चद्भिः प्रवालैः पल्लवाङ्कुरैः 'प्रवालः पल्लवाङ्कुर' इति हलायुधः । महितो महनीयः । अन्यत्र चञ्चता चञ्चलेन प्रवालेन प्रकृष्टवालेन लाङ्गूलेनेत्यर्थः महितः पवनेन बीजादानेन उपलाल्यः आदरणीयः । एकत्र बीजान्यादाय सूक्ष्मबीजसहकारोऽयमुत्तम इति जनैर्लालनीय इति भावः । अथवा पवनेन मारुतेनोपलाल्यः कम्पितः । अन्यत्र पवनेन वायुना उपालाल्यः लालनीयः आत्मजत्वादिति भावः । 'पवनाख्या कुलालस्य पाकस्थानेऽपि मारुते । निष्पावे चापि पवनबीजादानेऽपि मण्डने' इति विश्वः । अलं पर्याप्तं वारणं वा करोत्यलङ्कारी । जगज्जिगीषुः तत्करोतीति ण्यन्तात्ताच्छील्ये णिनिः । तादृशस्य कामस्य सचिवः सहायः । अन्यत्र लङ्कारेः रामभद्रस्य कामसचिवः इष्टसखः । सुमनोभिः पुष्पैः मनोज्ञः । अन्यत्र सुमनसा शोभनहृदयेन मनोज्ञः रम्यः अथवा सुमनस्सु साधुषु मध्ये मनोज्ञ इति वा । शाखिषु वृक्षेषु मध्ये अधिष्ठितं अधिकृतं पदं प्रतिष्ठा यस्य स तथोक्तः । अन्यत्र शाखिष्वधिष्ठितं स्थापितं पदं पादविन्यासो येन स तथोक्तः । फलवद्यथा [तथा] प्रवृत्तः स्थितः स फलवानितिभावः । अन्यत्र फलवत्सु सस्यवत्सु क्षेत्रेषु प्रवृत्तः प्रविष्टः शाखामृगत्वादितिभावः । सत्त्वयुक्तः पक्ष्यादिजन्तुसहितः । अन्यत्र सत्त्वयुक्तो बलयुक्तः 'सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः । आत्मनि व्यवसाये च चित्ते प्राणेषु जन्तुष्वि'ति विश्वः । चूतद्रुमः रसालतरुः पवनभूरिव हनुमानिव स्फुरतीति शेषः ।

अत्र श्लिष्टविशेषणसाधर्म्येण रसालस्य हनुमत्सादृश्यप्रतिपादना-दुत्प्रेक्षालङ्कारः ॥ ४६ ॥

४७

व्याप्तद्विरेफरुचिमेचकरुक्प्रवाल-
पीताम्बरः पिककलध्वनिवेणुनादः ।

चूताच्युतस्स्फुरति*चूतरजोऽग्रदेशे
गोवर्धनाद्रिरिव तेन धृतश्चकासे ॥

व्याप्तेति ॥ व्याप्तानां परिवृतानां द्विरेफाणां भृङ्गाणां रुचिः रोचिरेव मेचकरुक् नीलकान्तिर्यस्य स तथोक्तः । श्रीकृष्णस्य श्यामलाङ्गत्वादिति भावः । प्रवालाः पल्लवाङ्कुरा एव पीताम्बरं काञ्चनवसनं यस्य स तथोक्तः । पिकानां कोकिलानां कलध्वनिः अव्यक्तमधुरस्वर एव वेणुनादः मुरलीनादो यस्य स तथोक्तः चूतः रसाल एवाच्युतश्श्रीकृष्णः स्फुरति भाति । तेनाच्युतेन अग्रदेशे शिरः प्रदेशे 'शिरोऽग्रं शिखरं वा ना' इत्यमरः । धृतः भृतः गोवर्धनाद्रिः गोवर्धनाचल एव चूतरजः रसालपरागः 'जातरज' इति पाठस्साधुः । चकासे बभौ ।

अत्राग्रप्रदेशसञ्जातरजःपुञ्जे रसालतादात्म्येन रूपिताच्युतधृत गोवर्धनाचलतादात्म्योत्प्रेक्षाणादुत्प्रेक्षारूपकयोस्सङ्करः ॥ ४७ ॥

४८

मन्थाचलेन्द्र इव चूतकुजो बभासे
मल्लीलता फणिवरेण्यगुणेन बद्धः ।
यो हि श्रियं जनयति स्म वने मरुद्भिः
सञ्चालितस्सपदि माधवधर्मपत्नीम् ॥

मन्थाचलेति ॥ चूतकुजः रसालतरुः मन्थाचलेन्द्र इव मन्थानपर्वत इव बभासे रेजे । यः रसालतरुः मल्लीलतैव फणिवरेण्यः शेषः स एव गुणः

* जातरज इति व्याख्यातृसूचितपाठः ।

रज्जुः तेन बद्धः नद्धः वने उद्याने जले च 'वनं काननीरयोरि'ति विश्वः । मरुद्भिः अनिलैस्सुरैश्च सञ्चालितः कम्पितस्सन् सपदि तत्क्षणे माधवस्य वसन्तस्य विष्णोश्च धर्मपत्नीं भार्यां 'माधवस्तु वसन्ते स्याद्वैशाखे गरुडध्वज' इति विश्वः । वसन्तस्य वल्लभत्वेन कविव्यवहारादिति भावः । श्रियं शोभां रमाञ्च 'पद्मा संपत्तिशोभासु लक्ष्मी श्रीरिव कथ्यत' इति शाश्वतः । जनयति स्म हीत्यवधारणे ।

अत्र मन्दराचलसादृश्यस्य पूर्ववा[1][क्यार्थ][1]स्य श्रियं जनयतीत्यपर-वाक्यार्थेन समर्थनात् श्रियमित्यादिना श्लिष्टत्वात् मल्लिकायां फणि[वरेण्य]गुण-तादात्म्यरूपणाच्च काव्यलिङ्गश्लेषरूपकाणां सङ्करः ॥ ४८ ॥

४९

माकन्दराजपरिरम्भणलालिताऽपि
मल्लीवधूर्मधुपरागवती बभूव ।
ज्ञात्वाऽपि तत्कुटिलतां न जहाति चूतः
'प्रायः कुजातनिवहे हि कुतोऽभिमानः ॥

माकन्देति ॥ माकन्दः रसालतरुः 'रसालसहकारमाकन्दा' इति हलायुधः । स एव राजा नृपः माकन्दराजः 'राजाहस्सखिभ्यष्टच्' इति समासान्तष्टच्प्रत्ययः । तस्य परिरम्भणेनालिङ्गनेन लालिता आदृतापि मल्ली मल्लिकैव वधूः जाया 'वधूर्जाया स्नुषा स्त्री चे'त्यमरः । मधु मकरन्दः परागः पुष्परजः तावस्यास्त इति तथोक्ता । मधु पिबन्तीति तथोक्ताः मधुपेषु

---

[1] क्यस्य (क. ग. घ. च.)

मद्यपायिषु रागः अनुरागोऽस्या अस्तीति तथोक्तेति व्यङ्ग्यार्थः । मधुपेषु भ्रमरेषु रागवतीति वा बभूव जाता । चूतः रसालः तस्याः मल्लिकायाः कुटिलतां वक्रतां कपटत्वं च ज्ञात्वा विदित्वापि न जहाति न त्यजति । तथाहि । प्रायः प्राचुर्येण कुजातानां वृक्षाणां कुत्सितमतानां च 'जातिर्जातं च सामान्यमि'त्यमरः । निवहे समूहे अभिमानः मानः कुतः ? नास्तीत्यर्थः । अत्र ज्ञात्वेत्यनेन सन्निधानमात्रमुपचर्यते अचेतनस्य ज्ञानासंभवात् ।

अत्र रसालकर्तृकमल्लिकापरित्यागराहित्यस्य कुजातनिवह इत्यादिना सामान्येन समर्थनात् सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ४९ ॥

५०

मारप्रशस्तिकृतिपुस्तकमेव चूतः
षट्पादपङ्क्तिलिपिराजिविराजितानि ।
पत्राणि तत्र हि पठन्ति शुकाश्शृणोति
चैत्रस्समं द्विजवरैर्मुदितान्तरङ्गैः ॥

मारेति ॥ चूतः रसालतरुः मारप्रशस्तेः मदनप्रशंसायाः कृतेः प्रबन्धस्य पुस्तकमेव कोश एव । तत्र चूते शुकाः कीराः षट्पदानां भृङ्गाणां [1][पङ्क्तय एव लिपिराजयः ताभिः][1] वर्णपङ्क्तिभिः विराजितानि पत्राणि दलानि लेखां पठन्ति वाचयन्ति । पठ व्यक्तायां वाचीति धातोर्लट् । मुदितान्तरङ्गैः हृष्टचित्तैः द्विजवरैस्समं पक्षिश्रेष्ठैः विप्रवर्यैश्च सह 'दन्तविप्राण्डजा द्विजा' इत्यमरः । चैत्रः वसन्तः शृणोति हि आकर्णयति । श्रु श्रवण इति धातोर्लट् ।

---

[1] पंङ्क्तिभिरेव लिपिराजिभिः (क)· लुप्तः (ग. घ. च.)

अत्र शुकवचनादिषु चूतदलादितादात्म्यारोपितमदनप्रशंसाकोश-मध्यगतषट्पदरूपवर्णावलीपठनतादात्म्योत्प्रेक्षणादुत्प्रेक्षालङ्कारः । स च व्यञ्जका-प्रयोगाद्गम्यः ॥ ५० ॥

५१

मल्लीवधूलसितलास्यमनङ्गशौर्य-
गद्यावलीपठनतत्परकीरवक्त्रम् ।
चैत्रेण दीपनिवहा निहिता इवासन्
द्रष्टुं वनान्धतमसे स्फुटचम्पकौघाः ॥

मल्लीति ॥ स्फुटानां विकसितानां चम्पकानां चाम्पेयकुसुमानामोघाः समूहाः अनङ्गस्य मदनस्य शौर्यस्य गद्यावलीनां विरुदप्रबन्धानां पठने वाचने तत्पराणि उत्सुकानि कीराणां शुकानां वक्त्राणि आस्यानि यस्मिन् तत्तथोक्तं मल्लीलतैव वधूः वनिता तस्याः लसितं प्रकाशितं लास्यं नृत्यं द्रष्टुमीक्षितुं 'तुमुण्वुलौ क्रियायां क्रियार्थायामि'ति तुमुन्प्रत्ययः । वनमुद्यानमेव अन्धतमसं अन्धकारः तस्मिन् 'ध्वान्ते गाढेऽन्धतमसमि'त्यमरः । 'अवसमन्धे-भ्यस्तमसः' इत्यच् । चैत्रेण वसन्तेन निहिताः निक्षिप्ताः दीपनिवहाः प्रदीपसमूहा इव आसन् अभूवन् । अस भुवि इति धातोर्लङ् ।

अत्र चम्पककुसुमेषु मल्लीवधूलास्यदर्शनासक्तचैत्रनिहितदीपतादा-त्म्योत्प्रेक्षणादुत्प्रेक्षालङ्कारः ॥ ५१ ॥

५२

बालार्करोचिरिव भाति वनान्धकार-
बन्दीकृतं कनकचम्पकफुल्लवृन्दम् ।

तद्द्रष्टुमुत्सुकतयाऽऽगततारकाणां
श्रेणीव कोरकततिर्वनमल्लिकायाः ॥

बालेति ॥ कनकचम्पकानां चाम्पेयविशेषाणां फुल्लबृन्दं कुसुमसमूहः वनमुद्यानमेवान्धकारस्तमः तेन बन्दीकृतं बन्धवत्कृतं 'अभूततद्भावे च्विरि'ति च्विप्रत्ययः । बालार्करोचिः बालारुणदीप्तिरिव भाति राजते । तमसः सूर्यरोचिषा विरोधादिति भावः। भा दीप्ताविति धातोर्लट् । 'अदिप्रभृतिभ्यश्शपः' इति शपो लुक् । वनमल्लिकायाः आस्फोटायाः कोरकाणां कलिकानां ततिः संहति तत् बन्दीकृतबालार्करोचिः द्रष्टुं वीक्षितुमुत्सुकतयाऽऽसक्त्या आगतानां तारकाणां नक्षत्राणां श्रेणिरिव राजिरिव भाति । निजविरोधिदुर्दशावलोकन-कौतुकाः प्रायशो लोका इति भावः ।

अत्र चम्पककुसुमादिष्वन्धतमसबन्दीकृतार्करुचितादात्म्योत्प्रेक्षणादुत्प्रे-क्षालङ्कारः ॥ ५२ ॥

५३

चूतोऽप्यसूत सह मल्लिकया प्रवाल-
चञ्चत्प्रसूनविशिखान्जगतां विजेतुः ।
कामस्य चेत्यलिगुणान्वयमप्यसूत
जम्बूकुजस्फुरितपक्वफलापदेशात् ॥

चूत इति ॥ अपि च मल्लिकया मल्लिकालतया सह, चूतः रसालः जगतां लोकानां विजेतुः लोकाभिविजिगीषोरित्यर्थः । 'कर्तृकर्मणोः कृती'ति कृद्योगात्कर्मणि षष्ठी । कामस्य मदनस्य प्रवालात् पल्लवशरासनात् चञ्चत्प्रसूनानि स्फुरत्कुसुमान्येव विशिखान् बाणान् असूत अजनयत् इति हेतोः जम्बूकुजः

जम्बूवृक्षः स्वयमपि स्फुरितानां लसितानां पक्वानां पचेलिमानां फलानामपदेशात् व्याजात् अलीन् भृङ्गानेव गुणान् मौर्वीः 'मौर्वी ज्या शिञ्जिनीगुण' इत्यमरः । असूत । पक्वजम्बूफलानां भ्रमरवदतिनीलत्वादिति भावः ।

अत्रेमानि जम्बूफलानि न भवन्ति किन्तु पञ्चशरशरासनशिञ्जिनीभूत मधुकरा एवेति जम्बूफलत्वापह्नवेन भृङ्गत्वारोपादपह्नवालङ्कारः । 'प्रकृतं यन्निषिध्यान्यत्साध्यते सात्वपह्नुतिरि'ति लक्षणात् ॥ ५३ ॥

५४

आरुह्य तालतरुमुच्चकमूर्ध्वदेशे
पत्रोल्लसद्विटपविष्टरसन्निषण्णः ।
शाखाचरस्स्मृतिमुदञ्चयति स्म कश्चित्
कर्णान्तकध्वजविराजितकीशभर्तुः ॥

आरुह्येति ॥ उच्चकमुन्नतं तालतरुं तालवृक्षमारुह्यारोहणं कृत्वा ऊर्ध्वदेशेऽग्रभागे पत्रैः पर्णैः उल्लसत् उज्ज्वलत् विटपश्शाखा स एव विष्टरं तस्मिन् सन्निषण्णः उपविष्टः कश्चित् शाखाचरो वानरः कर्णान्तकस्यार्जुनस्य ध्वजे केतौ विराजितस्य विलसितस्य कीशभर्तुः हनुमतः स्मृतिं स्मरणं उदञ्चयति उत्पादयति स्म । अर्जुनस्य हनुमध्वजत्वादिति भावः ।

अत्र तालद्रुमाग्रस्थितशाखाचरे कपिकेतनकेतनाग्रविलसत्पवनतनयस्मरणविधायकत्ववर्णनात्स्मृतिमदलङ्कारः । 'यथानुभवमर्थस्य व्यक्तिः तत्सदृशे स्मृतिरि'ति लक्षणात् ॥ ५४ ॥

५५

साक्षाज्जनन्यसि ममापि तरूत्करस्य
धात्रीति नाम तव तत्कथमित्यमुष्यै ।
नत्वा स्वकीयफलमर्पयतीव रम्भा
क्षित्यै वनेऽत्र नितरां फलभारनम्रा ॥

साक्षादिति ॥ अत्र वने तरूत्करस्य वृक्षसमूहस्य ममापि साक्षात्प्रत्यक्षतः जननी उत्पादिका माता च असि तत्तस्मात्कारणात् तव। कथं धात्री भूमिरुपमाता इति नाम आख्या 'विपुला गह्वरी धात्री' (?) 'धात्री स्यादुपमातापी'ति चामरः। 'ऋन्नेभ्यो ङीप्' इति तृजन्तात् ङीप्। जनन्या उपमात्रभिख्याया अनुचितत्वादिति भावः। इति मत्वा नितरां फलभारेण नम्रा नता रम्भा कदली अमुष्यै क्षित्यै भूम्यै नत्वा नमस्कृत्य स्वकीयफलं निजफलमर्पयतीव समर्पयतीव ।

फलभारकृतरम्भाविनमने जननीबुद्धिप्रयुक्तमहीसमर्चनरूपक्रियातादात्म्योत्प्रेक्षणादुत्प्रेक्षालङ्कारः ॥ ५५ ॥

५६

गारुत्मतोरुकलशास्स्वरसं प्रपूर्य
नीता भुवेव तरुदीर्घकरैस्सुरेभ्यः ।
सञ्जीवनस्वरससारपरीक्षणार्थं
तन्नारिकेलरसपूर्णफलानि रेजुः ॥

गारुत्मतेति ॥ तस्मिन् वने नारिकेलाणां रसपूर्णानि जलभरितानि फलानि (कर्तॄणि) सम्यक् जीवयतीति सञ्जीवनं अमृतं तस्य स्वरसस्वारस्य स्वकीयरसमाधुर्यस्य परीक्षणार्थं परिशीलनार्थम् । एतयोरिदमुत्कृष्टमेतदपकृष्टमिति विचारणायेत्यर्थः । सुरेभ्यः अत्र 'चतुर्थी तादर्थ्ये' । भुवा उद्यानभूम्या (कर्त्र्या) तरव एव [दीर्घकराः] उन्नतबाहवः तैः स्वरसं प्रपूर्य पूरयित्वा नीताः क्षिप्ताः गारुत्मतानां विकारा गारुत्मताः विकारार्थेऽण्प्रत्ययः । मरकतमयाः 'गारुत्मतं मरकतमि'त्यमरः । उरवो बृहन्तः कलशाः कुम्भा इव रेजुः बभुः ।

अत्रोन्नतनारिकेलतरुशिरस्स्फुरत्फलेषु सुरलोके स्वरसमाधुर्यप्रदर्शनाय समुत्क्षिप्तगारुत्मतकलशतादात्म्योत्प्रेक्षणादुत्प्रेक्षालङ्कारः ॥ ५६ ॥

५७

अभ्रङ्कषक्रमुकपुष्पसुगन्धिसारं
आघ्राय खेचरवधूततिरेत्य तस्मिन् ।
मन्दारसौरभमपि प्रथमानुभूतं
मन्दीकरोति निजकेशभरे बिभर्ति ॥

अभ्रङ्कषेति । खेचरवधूनां सुरस्त्रीणां ततिः समूहः तस्मिन् वने एत्य आगत्य अभ्रङ्कषाणां गगनस्पृशां 'सर्वकूलाभ्रकरीषेषु कषः' इति खच्प्रत्यये 'अरुर्द्विषदजन्तस्य मुमि'ति मुमागमः । क्रमुकाणां पूगानां पुष्पाणि कुसुमान्येव सुगन्धीनि 'गन्धस्येदुत्पूतिसुसुरभिभ्य' इतीकारादेशः । तेषां सारं स्थिरांशं आघ्राय घ्रात्वा निजकेशभरे स्वकीयकेशपाशभारे बिभर्ति दधाति । प्रथमं पूर्वमनुभूतमाघ्रातं मन्दाराणां मन्दारकुसुमानां सौरभं सुगन्धमपि मन्दीकरोति अल्पीकरोति । 'अभूततद्भावे च्विः' इत्यत्र सुपीत्यननुवृत्तेस्तिङोऽपि च्वि-

प्रत्ययः [?] 'मूढाल्पपटुनिर्भाग्यमन्दा' इत्यमरः । मन्दारादधिकतरसौरभ्यशालिनोऽतिविवर्धमानाश्च क्रमुका इति भावः ।

अत्र क्रमुककुसुमानां गगनचरतरुणीचिकुरभरधारणाद्यसम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः ॥ ५७ ॥

५८

केल्यै रतेस्सहचरस्य वटोर्वनान्ते
सम्पादितं कनककन्दुकवृन्दमुच्चैः ।
धात्रीश्रियेव नवहेमपिशङ्गरोचिः
नारङ्गपक्वफलजालकमुल्ललास ॥

केल्या इति ॥ वनान्ते उद्यानप्रदेशे नवमपूर्वं हेम सुवर्णमिव पिशङ्गं पीतं रोचिः [1]नारङ्गपक्वफलजालक[1]कान्तिर्यस्य तत्तथोक्तं तादृशम् । नारङ्गाणां 'नारङ्गं पिप्पलीरसे । नारङ्गे विटपे जन्तावि'ति विश्वः । पक्वफलानां जालकं समूहः 'पटलं पेटिका चक्रं जालकं जालमित्यपी'ति वैजयन्ती । *'सङ्कुलमिति' पाठे सङ्कुलशब्दस्य समूहार्थत्वं चिन्त्यम् । वटोर्वत्सस्य रतेः रतिदेव्याः सहचरस्य मदनस्य केल्यै खेलनाय धात्री भूरेव श्रीः लक्ष्मीः तयोच्चैर्बाढं सम्पादितमार्जितं कनककन्दुकानां सुवर्णकन्दुकानां बृन्दं समूह इव उल्ललास चकासे ।

अत्र परिपक्वनारङ्गफलेषु मदनकेलीसमुत्सुकलक्ष्मीसमार्जितकनककन्दुकतादात्म्योत्प्रेक्षणादुत्प्रेक्षालङ्कारः ॥ ५८ ॥

---

[1] नास्ति (क. घ. च.) * जालकस्थले सङ्कुलमिति च व्याख्यातृदर्शितपाठः ।

५९

[1]कामाभिषेकघटकर्मणि सम्प्रवृत्त-
सौवर्णचूर्णममृतैर्मृदितं विधाय ।
पिण्डानि तेन रचयन्निव चैत्रचक्री
माधूफलानि विललास वनप्रदेशे ॥

कामेति ॥ वनप्रदेशे उपवनमध्ये कामस्य मदनस्य अभिषेकाय ये घटाः कलशाः तेषां कर्मणि कृतौ प्रवृत्तः व्यापृतः चैत्रः वसन्त एव चक्री कुलालः सुवर्णस्य विकारस्सौवर्णस्स चासौ चूर्णश्च तं अमृतैः सुधारसैः मृदितं सम्मर्दितं विधाय कृत्वा तेन स्वर्णचूर्णेन माधूफलानि मातुलुङ्गफलान्येवेति व्यस्तं रूपकम् । पिण्डानि गोलकानि 'पिण्डो वपुषि निवापे गोलेऽप्यथ पिण्डमयसि गर्भे चे'ति रत्नमालायाम् । रचयन्निव विललास रेजे ।

कामाभिषेककलशकरणासक्तवसन्तकुलालकृतसुवर्णचूर्णपिण्डा इव माधूफलानि विभान्तीति भावः । उत्प्रेक्षालङ्कारः ॥ ५९ ॥

६०

यत्रैव पङ्क्तिममरेन्द्रधनुश्शुकानां
चूतं मदालिपिहितं नवमम्बुवाहम् ।
मत्वा मरन्दरसवृष्टिमुपेत्य नित्यं
लास्यं करोति च कलापिचयोऽतिरागात् ॥

---

[1] मदना (ग)

यत्रेति ॥ यत्र वने कलापिनां मयूराणां चयः प्रकरः शुकानां कीराणां पङ्क्तिमालिममरेन्द्रधनुरिन्द्रचापं मत्वा मदालिभिः मत्तमधुकरैः पिहितमावृतं चूतं रसालतरुं च नवं नूतनमम्बुवाहं जलदं मत्वा ज्ञात्वा मरन्दरसस्य पुष्परसस्य वृष्टिं वर्षमुपेत्य प्राप्य अतिरागादत्यन्तप्रीतिवशात् नित्यं निरन्तरं लास्यं नृत्यं करोत्येव । कलापिनां सजलजलदालोककृतोल्लासत्वादिति भावः ।

अत्र शुकावल्यादौ केकिनामिन्द्रचापादिभ्रान्तिवर्णनात् भ्रान्तिमदलङ्कारः ॥ ६० ॥

६१

कूजत्पिकस्फुटरवः पटहप्रणादः
शौकध्वनिर्बहुलकाहलिकाविरावः ।
भृङ्गीरुतं मधुरमङ्गलगीतनादः
चूतद्रुपीठवसतोऽभवदङ्गजस्य ॥

कूजदिति ॥ चूतद्रुः सहकारवृक्ष एव पीठं सिंहासनं तस्मिन् वसतः उपविष्टस्य अङ्गजस्य मदनस्य कूजतां ध्वनतां पिकानां कोकिलानां स्फुटरवः व्यक्तनादः पटहानां भेरीणां प्रणादः ध्वनिः अभवत् आसीत् । शौकानां शुकसमूहानां 'तस्य समूह' इत्यण्प्रत्ययः । 'कापोतशौकमायूरतैत्तिरादीनि तद्गण' इत्यमरः । ध्वनिः आरवः बहुलानामनन्तानां काहलिकानां काहलीनां विरावो ध्वनिः अभवत् । भृङ्गीणां भ्रमरीणां रुतं नादः मधुराणां मनोज्ञानां मङ्गलगीतानां नादः स्वरः अभवत् । मन्मथविजृम्भ[1]णालयो[1]ऽयं वनप्रदेश इति भावः ।

अत्र पिकरवादौ पटहतादात्म्यारोपणाद्रूपकालङ्कारः ॥ ६१ ॥

---

[1] णयोग्यो (क. घ. च.)

६२

रम्भाविडम्बनमकारि शुकेन पूर्वं
इत्याहुरद्य मदनाश्रित तद्वनान्ते ।
रम्भामुपेत्य हि शुकस्सरतिश्चुचुम्ब
'को नैव तत्र वनिता जनताऽनुरक्तः' ॥

रम्भेति ॥ पूर्वं पुरा शुकेन शुकयोगिना रम्भायाः अप्सरोऽङ्गनायाः विडम्बनं तिरस्कारः अकारि कृतमित्येवं प्रकारेण जना इति शेषः । आहुः वदन्ति । ब्रूञ् व्यक्तायां वाचीति धातोर्लट् । 'ब्रुवः पञ्चानामादित आहोब्रुवः' इति झेरुसादेशः । ब्रुवश्चाहादेशः । अद्याधुना मदनेन कामेन वृक्षविशेषेण च 'मदनस्मरधत्तूरवसन्तद्रुमसिक्थका' इति विश्वः । आश्रिते सेविते तस्मिन् वनान्ते उदयानदेशे शुकः कीरः शुकयोगी च 'शुको व्यासमुते कीर' इति विश्वः सरतिः अनुरक्तस्सन् रम्भां कदळीमप्सरोऽङ्गनां च उपेत्य प्राप्य चुचुम्ब चुम्बनं कृतवान् । रम्भाविडम्बनकारिणश्शुकस्य रम्भानुरक्ति[1][रिति][1] विरोध इति भावः । शुकस्य कीरस्य रम्भायां कदल्यामनुरक्तिरिति विरोध परिहारः । अत एव विरोधाभासोऽलङ्कारः । तेन रम्भाविडम्बनकारिणश्शुकस्यैव तादृङ्मदनावस्थायामस्मिन्वनान्ते किमन्येषां युवजनानामित्यर्थापत्तिरलङ्कारो व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः । शुककृतरम्भाचुम्बनरूपं विशेषं सामन्येन समर्थयति । तथाहि—तत्र वने कः वनिताजनतायां युवतिसमूहे 'ग्राम बन्धुजनसहायेभ्यस्तलि'ति समूहार्थे तल्प्रत्ययः । अनुरक्तोऽनुरागवान् न, भवेदेव, सर्वोऽपि तथा भवत्येवेति भावः । अत्र विरोधाभासार्थान्तरन्यासयो-

---

[1] रतीव (क. ग. घ. च.)

स्तिलतण्डुलवत्परस्परनैरपेक्ष्यात्तयोस्संसृष्टिः । 'सैषा संसृष्टिरेतेषां भेदेन यदिह-स्थितिरि'ति संसृष्टिलक्षणात् ॥ ६२ ॥

६३

हंसेन मन्थरगतिर्मधुरा शुकेन
वाणी पिकेन सततं सरसोरुगीतम् ।
पारावतेन मणितं पुरकन्यकाभिः
अभ्यस्यते स्मरनियोगत एव तस्मिन् ॥

हंसेनेति ॥ तस्मिन्नुद्याने पुरकन्यकाभिः नगरस्थितवनिताभिः (कर्त्रीभिः) स्मरनियोगतः मदनादेशात् सततं हंसेन सितच्छदेन मन्थर[गति]-र्मन्दगमनमभ्यस्यते अभ्यासीक्रियत एव । शुकेन कीरेण मधुरा मधुार्थवती वाणी वाक् अभ्यस्यते । पिकेन कोकिलेन सरसं मधुररमुरु महत् गीतं गान-मभ्यस्यते । पारावतेन कपोतेन 'पारावतः कलरवः कपोत' इत्यमरः । मणितं रतिकूजितं 'मणितं रतिकूजितमि'त्यमरः । अभ्यस्यते । हंसगमनाश्शुकवाण्यः कोकिलस्वराः पारावतरवसदृशमणितवत्यः । पौरनार्यस्तत्र सर्वदा विहरन्तीति भावः ।

अत्र गमनादिषु प्रसिद्धहंसादिसदृशतया पौरस्त्रीणां वर्णनात्तुल्य-योगितालङ्कारः । 'गुणोत्कृष्टैस्समीकृत्य वचोऽन्या तुल्ययोगिते'ति ॥ ६३ ॥

६४

इति रुचिरवनौघैस्सिन्धुभिर्भूरिवार्भिः
बहुफलवहसस्यक्षेत्रबृन्दैरगेन्द्रैः ।

मणिगणयुतवप्रैश्श्रीसमृद्धैः पुरौघैः
द्रविडजनपदोऽभूत्सर्वदेशातिरम्यः ॥

सर्गादावुपक्रान्तमियता प्रबन्धेन प्रस्तूयमानमर्थं निगमयति । इतीति ॥ इति उक्तप्रकारेण रुचिरैः रम्यैः वनौघैः वनसमूहैः भूरि बहुलं वाः जलं यासु ताभिस्तथोक्ताभिः सिन्धुभिः नदीभिः बहूनि बहुलानि फलानि वहन्तीति तथोक्तानि तादृशानां सस्यानामोषधीनां क्षेत्रबृन्दैः केदारसमूहैः मणिगणैः रत्नसमूहैः युताः युक्ताः वप्रा येषु तैस्तथोक्तैः अगेन्द्रैः गिरिवरैः श्रीसमृद्धैः सम्पत्पूर्णैः पुराणां नगरीणामोघैस्समुदायैश्च द्रविडजनपदः चोळदेशः सर्वेभ्यो देशेभ्योऽतिरम्यः अतिरमणीयः अभूत् ।

अत्र देशे समस्तवस्तुसमृद्धिवर्णनादुदात्तालङ्कारः । सर्गान्तत्वाद्वृत्तभेदः । मालिनीवृत्तं लक्षणन्तूक्तम् ॥६४॥

६५

तद्देशश्रीमुखतिलकवद्राजते राजधानी
नाम्ना याऽसौ 'करिपुरमि'ति क्ष्मातले ख्यातियुक्ता ।
भक्तैस्स्थाणोरतुलितकलावद्भिराम्नायविद्भिः
सत्सम्पद्भिस्सरसकविभिस्संयुता सारसद्भिः ॥

तदिति ॥ या नगरी नाम्ना नामधेयेन करिपुरमिति क्ष्मातले भूतले ख्यातियुक्ता प्रसिद्धियुता स्थाणोश्शिवस्य भक्तैः माहेश्वरैः अतुलितकलावद्भिः अतुलितविद्याशालिभिः आम्नायविद्भिः श्रोत्रियैः सत्सम्पद्भिः प्रशस्तैश्वर्यशालिभिः सरसकविभिः रसिकमनोहरकाव्यकर्तृभिः सारसद्भिः श्रेष्ठसज्जनैश्चेति समुच्चयः ।

भक्तैरित्यस्य विशेषणानि वा ससंयुता असौ राजधानी करिपुरी 'प्रधाननगरी राज्ञां राजधानीति कथ्यत' इत्यभिधानात् । तद्देशश्रियः द्रविडजनपदलक्ष्म्या मुखतिलकवत् मुखालङ्कृतचित्रकमिव राजते भाति ।

अत्र शिवभक्तादीनां महतामुपलक्षणत्ववर्णनादुदात्तालङ्कारः । राजधान्यां जनपदश्रीमुखतिलकतादात्म्योत्प्रेक्षणादुत्प्रेक्षालङ्कारश्च । तयोः परस्परनैरपेक्ष्यात्संसृष्टिः । मन्दाक्रान्तवृत्तं 'मन्दाक्रान्ता जलधिषडगैर्म्भौनतौ ताद्गुरू चेदि'ति लक्षणात् ॥ ६५ ॥

६६

यस्मात्त्वं शिवराजहंसशिखिदक्तत्ते विरूपाक्षता
स्थाने पन्नगपीडनं कृतवतस्ते नीलकण्ठाह्वयः ।
भीमाख्यार्जुनसद्रुचश्च भवतोऽपर्णान्वितत्त्वात्तव
स्थाणुत्वं च गुहानुरक्तमनसस्ते देव पश्चात्सता ॥

इति सकलभुवनैकवल्लभनिखिललेखनायकनिकायसन्ततसमर्चित-
परम'शिवलिङ्ग'पादारविन्दषट्पदायमानलसदुभयकविता-
विशारद'श्रीषडक्षरिदेव'विरचिते 'चोळभूपालीये'
'कविकर्णरसायनाख्ये' महाकाव्ये
चोळदेशवर्णनं नाम
द्वितीयस्सर्गः ॥

★

सर्गान्तत्वान्मङ्गलमादधाति—यस्मादिति ॥ हे शिव ! यस्मात्कारणात् त्वं राजा चन्द्रः हंसः सूर्यः शिखी वह्निः त एव दृशो यस्य स तथोक्तः राजहंसः श्वेतच्छदविशेषः शिखी मयूरः 'शिखिनौ वह्निबर्हिणौ' इत्यमरः । तादृशो दृशो नेत्राणि यस्येति व्यङ्ग्यार्थः । तत्तस्मात्करणात् ते तव विरूपाक्षता विरूपाणि अक्षीणि यस्य स तथोक्तः विरूपीणि पक्षिरूपाणि अक्षीणि यस्य स तथोक्तश्च 'बहुव्रीहौ सक्थ्यक्ष्णोस्स्वाङ्गात्' षच्प्रत्ययः । तस्य भावस्तत्ता । स्थाने युक्तम् । पन्नगानां सर्पाणां पीडनं बन्धनं कृतवतः कुर्वतः ते तव नीलकण्ठ इत्याह्वयो नाम, मयूरनाम च स्थाने । 'मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक्' । 'नीलकण्ठः शिवेऽपि चे'ति चामरः । पन्नगपीडनकरे मयूरे नीलकण्ठाह्वयस्य प्रसिद्धत्वादिति भावः । अर्जुनसद्रुचेः धवलकान्तिमतः अर्जुने पार्थे सती प्रशस्ता रुचिः प्रीतिर्यस्य तस्य तथोक्तस्य च भवतः तव भीमाख्या भीम इति नाम स्थाने । अर्जुनसदृचौ भीमसेने भीमाख्यायाः प्रसिद्धत्वादिति भावः । अपर्णान्वितत्वात् पार्वतीसहितत्वात् पर्णैः पत्रैरन्वितो न भवतीत्यपर्णान्वितः तस्य भावस्तत्त्वं तस्मादिति व्यङ्ग्यार्थः । तव स्थाणुत्वं शिवत्वं शङ्कुत्वं च स्थाने । 'स्थाणू रुद्र उमापतिः' । 'स्थाणुरस्त्री ध्रुवश्शङ्कुरि'ति चामरः । पर्णरहिते शङ्कौ स्थणुत्वस्य दृष्टत्वादिति भावः । हे देव ! गुहे स्कन्दे गुहासु कन्दरासु च 'सिंहपुच्छी कन्दरयोर्गुहा स्त्री षण्मुखे तु ना' इति नानार्थरत्नमालायाम् । अनुरक्तमासक्तं मनो यस्य स तथोक्तस्य ते तव पञ्चास्यता पञ्चमुखत्वं सिंहत्वञ्च स्थाने । गुहासक्तमनसः सिंहस्य पञ्चास्यत्वप्रतीतत्वादिति भावः ।

अत्र यत्र विरूपाक्षत्वाभावः तत्र राजहंसशिखिनेत्रत्वाभाव इति व्यतिरेक-व्याप्तिं पुरस्कृत्य अन्यत्रान्वयव्याप्त्यादिकं पुरस्कृत्य सचमत्कारं हेतुपक्षसाध्यानां

प्रतिपादनादनुमानालङ्कारः। 'अनुमानं तदुक्तं यत् साध्यसाधनयोर्वच' इति लक्षणात्। शार्दूलविक्रीडितम्। लक्षणं तु वक्ष्यते ॥६६॥

इति समस्तसुजनस्तोमसंस्तूयमाननिस्तुलगुणग्रामाभिराम[1]श्रीमत्सालिराज[1]-
कुलकलशजलनिधिपूर्णकलाधरश्रीचेन्नबसवनृपतनूभवमुदियमहीपाल-
प्रोत्साहित'श्रीवेङ्कनसुधी'विरचितायां कविकर्णरसायनव्याख्यायां
'साहित्यसुधोदयाभिख्यायां'
द्वितीयस्सर्गः

---

[1] श्रीमच्छालिराज (क.)

तृतीयस्सर्गः

१

सजलपङ्कजलग्नमधुव्रत-

प्रविलसत्परिघामणिमेखला ।

पुररमाऽवृतवप्रनवाम्बरा

विरुरुचे पृथुहर्म्यघनस्तनी ॥

अथास्मिन् सर्गे पञ्चत्रिं[1]शच्छलोकैः[1] करिपुरं वर्णयति सजलेति ॥ सजलानि जलसहितानि पङ्कजानि तेषु कमलेषु लग्नैः व्याप्तैः मधुव्रतैः भृङ्गैः प्रविलसन्ती परिघा-सङ्घातः 'परिघा योगभेदे स्त्री मुद्गरेऽर्गळखातयोरि'ति विश्वः । सैव मणिमेखला रत्नकाञ्ची यस्यास्सा तथोक्ता । कमलकलितमधुकराणां मुक्तामणिमण्डलमध्यकीलितनीलमणितादात्म्यापत्तेरिति भावः । वृतमावृतं वप्रः प्राकार एव अम्बरं चेलं यस्यास्सा पृथू-पृथुलौ हर्म्यौ प्रासादावेव स्तनौ कुचौ यस्यास्सा तथोक्ता । 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधादि'ति ङीप् । पुररमा पुरश्रीः विरुरुचे रेजे ।

अत्र पुररमेत्युपात्तस्त्रीभावनिर्वाहकतया परिघादिषु मेखलादि ताद्रूप्या-रोपणात्परिणामालङ्कारः ।

---

[1] पञ्चत्रिंशद्भिः श्लोकैः (क. ग. घ.)

अस्मिन् सर्गे प्रायशो द्रुतविलम्बितवृत्तानि । 'द्रुतविलम्बितमाह नभौ भरावि'ति लक्षणात् ॥१॥

२

गगनचुम्बितहर्म्यमहाध्वज-
स्फुरितदर्पण[1][मै][1]क्ष्य विधुन्तुदः ।
रविधिया ग्रसितुं क्षणमीक्षते
ग्रहणकालवदेव नभस्थले ॥

गगनेति ॥ विधुं चन्द्रं तुदति पीडयतीति विधुन्तुदो राहुः 'विध्वरुषोस्तुद' इति खश्प्रत्यये 'अरुर्द्विषदजन्तस्य मुमि'ति मुमागमः । नभस्थले गगनप्रदेशे गगनेन व्योम्ना चुम्बिते स्पृष्टे हर्म्यस्य सौधस्य 'हर्म्यादिर्धनिनां वास' इत्यमरः । महति ध्वजे केतने स्फुरितं उल्लसितं दर्पणं मुकुरं [2]ऐ[2]क्ष्य विलोकय रविधिया सूर्यबुद्ध्या ग्रहणकालवदेव ग्रहणसमय इव 'तत्र तस्येवे'ति सप्तम्यन्तादिवार्थे वति प्रत्ययः । ग्रसितुं कबलयितुं क्षणमीक्षते विलोकयति ।

अत्र गगनचुम्बिनिकेतनकेतनाग्रकलितमुकुरमण्डले राहोः रविभ्रान्ति-प्रतीतेर्भ्रान्तिमदलङ्कारः । लक्षणन्तूक्तम् । *ग्रहणकालमृतेऽपीति क्वचित्पाठः प्रामादिकः । 'अन्यारादि'त्यादिना ऋते योगे पञ्चमीविधानात् ॥२॥

३

नभसि सञ्चरतां मरुतां गणः
तपनतापमपोहितुमागतः ।

---

[1] ई (क) [2] ईक्ष्य (क) * व्याख्यातृसूचितपाठभेदः ।

नगरगोपुरकेतनसन्निधौ
वसति तत्प्रतिमौघ इवाहितः ॥

नभसीति ॥ नभसि गगने सञ्चरतां मरुतां सुराणां 'मरुतौ पवनामरावि'त्यमरः । गणः समूहः तपनातपं [1]सूर्यातपम्[1] अपोहितुं निरसितुं आगतः आयातस्सन् 'गत्यर्थाकर्मके'त्यादिना कर्तरि क्तप्रत्ययः । आहितः रचितः तस्य केतनस्य प्रतिमानां पुत्रिकाणामोघश्चय इव नगरगोपुराणां पुरद्वाराणां 'पुरद्वारं तु गोपुरमि'त्यमरः । करिकलभ इत्यादिवद्विशेष-प्रतिपत्यर्थत्वान्न पुनरुक्तिदोषः । केतनानां ध्वजानां सन्निधौ समीपे वसति तिष्ठति ।

अत्र सूर्यातपसन्तापनिर्हरणाय समागत्य प्रत्यहं केतनपटच्छाया-माश्रितानां मरुतां गणे तदीयप्रतिमाछायातादात्म्योत्प्रेक्षणादुत्प्रेक्षालङ्कारः । लक्षणंतूक्तम् ॥ ३ ॥

४

कनकहर्म्यकवाटतटान्तरे
प्रणयकोपनिगूढसुरस्त्रियाः ।
रुचिरगण्डधिया मणिदर्पणं
सपदि चुम्बति तत्पतिरागतः ॥

कनकहर्म्येति ॥ कनकस्य विकारो हर्म्यः कनकहर्म्यः 'सङ्घात-विकारषष्ठ्याश्चोत्तरपदलोपश्चे'ति समासः । तस्य कवाटतटान्तरे अरर-

[1] सूर्यतापं (ग)

भागाभ्यन्तरे 'कवाटमररं तुल्ये' इत्यमरः। प्रणयकोपेन प्रणयकलहेन निगूढायाः गुप्तायाः सुरस्त्रियाः अमर्याः रुचिरगण्डधिया मनोज्ञगण्डस्थली-बुद्ध्या मणिदर्पणं रत्नमुकुरं पूर्ववत्समासः। तस्याः स्त्रियाः पतिः रमणः सपदि तत्क्षणे आगतस्सन् चुम्बति चुम्बनं करोति। *'पुरस्त्रियः' इति वा पाठः। भ्रान्तिमदलङ्कारः। अनेन नगरहर्म्येषु गगनपर्यन्तमौन्नत्यं व्यज्यते ॥ ४ ॥

५

द्विरदमल्लमहामहिषव्रज-
प्रबलविग्रहवीक्षणतत्परैः।
पुरबहिर्वलयं विलसत्यलं
गजतुरङ्गमशिक्षकसञ्चयैः ॥

द्विरदेति॥ पुरबहिर्वलयं नगरबहिर्भागः 'कटकं वलयोऽस्त्रियामि'-त्यमरः। द्विरदानां गजानां मल्लानां महामहिषाणां च व्रजानां समूहानां प्रबलविग्रहस्य अधिककलहस्य 'विग्रहः कलहे देहे' इति विश्वः। वीक्षणे विलोकने तत्परैः आसक्तैः 'तत्परे प्रसितासक्ताावि'त्यमरः। गजाश्च तुरङ्गमश्च गजतुरङ्गमं 'प्राणितूर्ये'त्यादिना एकवद्भावः। तत् शिक्षयन्तीति तथोक्ताः तेषां सञ्चयैः सङ्घैः *गजतुरङ्गमशिक्षकवाहकैरिति वा पाठः। तदा गजशिक्षकैः अश्ववाहकैरिति क्रमेणान्वयः। अलं भृशं विलसति भाति। अत्र मल्लमहामहिषेत्यादिना वर्णानामसकृदावृत्तेरनुप्रासलक्षणश्शब्दालङ्कारः॥५॥

---

* व्याख्यातृसूचितः पाठभेदः।

६

मृदुचलन्मणिमञ्जुलनूपुर-
क्वणितकाञ्चिकलापकलस्वनैः ।
स्मरधनुर्गुणटंकृतिनिस्वनैः
नगरवीथिरुवाह मनोज्ञताम् ॥

मृद्विति ॥ मृदु मन्दं यथा भवति तथा चलतां मणिभिः रत्नैः 'रत्नं मणिर्द्वयोरि'त्यमरः। मञ्जुलानां मनोज्ञानां नूपुराणां मञ्जीराणां 'मञ्जीरो नूपुरोऽस्त्रियामि'त्यमरः। क्वणितैश्च काञ्च्य एव कलापाः भूषणानि तेषां कलस्वनैः अव्यक्तमधुररवैश्च तैरेव स्मरधनुर्गुणटङ्कृतिनिस्वनैरिति व्यस्तं रूपकम्। स्मरस्य धनुः कार्मुकं तस्य गुणः मौर्वी 'मौर्वी ज्या सिञ्जिनी गुण' इत्यमरः। तस्य टङ्कृतयः टङ्कारा एव निस्वनाः तैः नगरवीथिः पुररथ्या मनोज्ञायाः भावो मनोज्ञता 'त्वतलोर्गुणवचनस्ये'ति पुंवद्भावः। उवाह अवहत् 'वचि स्वपि यजादीनां किती'ति वह प्रापण इति धातोर्लिटि अभ्यासस्य सम्प्रसारणम्। रूपकालङ्कारः ॥ ६ ॥

७

चलमतङ्गजतुङ्गतुरङ्गम-
प्रकटबृंहितहेषितनिक्वणैः ।
भटनटीविटसम्भ्रमनिस्वनैः
नृपतिवीथिरुदाररुचिर्बभौ ॥

चलेति ॥ चलानां चरतां मतङ्गजानां गजानां 'मतङ्गजो गजो नाग' इत्यमरः। तुङ्गतुरङ्गानामुन्नताश्वानां च प्रकटानि प्रकृष्टानि बृंहितानि

गजगर्जितानि 'बृंहितं वारणानाञ्चे'ति हलायुधः। हेषितानि अश्वसिञ्जितानि च 'हेषा ह्रेषा च निस्वन' [1]इत्यमरः[1]। तान्येव निक्कणाः ध्वनयः तैः चलद्गज-बृंहितानि तुङ्गतुरङ्गमहेषितानीति क्रमवशाल्लभ्यते। भटाः योधाः नट्यः नर्तक्यः [2]विटाः[2] षिड्गाश्च तेषां सम्भ्रमनिस्वनैः सन्तोषकलकलैः नृपतिवीथिः राजवीथिका उदारा महती रुचिश्शोभा यस्यास्सा तथोक्ता सती 'उदारो दातृमहतोरि'त्यमरः। बभौ रेजे। 'आत औ णलः' इति भा दीप्ताविति धातोर्लिटि णलः औ इत्यादेशः। अत्र गजतुरङ्गाद्यनेकवस्तुसमृद्धिवर्णना-दुदात्तालङ्कारः। लक्षणंतूक्तम् ॥ ७ ॥

८

मृदुगति प्रमदापदलक्तक-
द्रवमिषेण सपल्लवतां ययौ।
नगरवीथिलता तदपाङ्गरु-
ग्जलनिषेकबलादिति भाव्यते ॥

मृद्विति ॥ नगरवीथिरेव लतावल्ली तासां प्रमदानां अपाङ्गरुचः नयनाञ्चलशोभाः 'अपाङ्गौ नेत्रयोरन्तौ' इत्यमरः। ता एव जलानि तेषां निषेकबलात् अभिषेकवशात् मृदुगतीनां मन्दगमनानां प्रमदानां योषितां पदालक्तकस्य चरणलाक्षारसस्य 'लाक्षा राक्षा जतु क्लीबे यावोऽलक्तो द्रुमामय' इत्यमरः। द्रवमिषेण द्रवव्याजेन पल्लवैः किसलयैः सह वर्तत इति सपल्लवा। तस्याः भावस्तत्ता तां तथोक्तां पदां पादविन्यासानां 'पदङ्घ्रिश्चरणो-

---

[1] इति वैजयन्ती ? (ग) [2] लुप्तः (क)

ऽस्त्रियामि'त्यमरः । तेन तद्विन्यासो लक्ष्यते । लवैः लेशैः सह वर्तत इति तथोक्ता तां च सालक्तकपदविन्यासलेशानां तत्र भानादिति भावः । ययौ प्राप इतीत्थं भाव्यते ज्ञायते । भवतेर्ण्यन्तात् 'सार्वधातुके यगि'ति कर्मणि यक्प्रत्ययः । जनैरिति शेषः ।

अत्र गमनसमयविन्यस्त तरुणीचरणलाक्षारसो न भवति । किन्तु रथ्या लतायां जायमानपल्लवनिचय एवेति पदलक्तकद्रवापह्नवाद्रूपकापह्नवयोरङ्गाङ्गिभावेन सङ्करः ॥ ८ ॥

९

निविडतुङ्गपयोधरघर्षण-
च्युतमृगोद्भवकुङ्कुमरेणुभिः ।
क्षितिवधूः पिहिता तत एव सा
भवति गन्धवती पुरयोपिताम् ॥

निविडेति ॥ क्षितिवधूः पुरयोषितां पौरस्त्रीणां निविडानां नीरन्ध्राणां तुङ्गानामुन्नतानां पयोधराणां वक्षोजानां 'स्त्रीस्तनाब्धौ पयोधरावि'त्यमरः । घर्षणेन सम्मर्देन च्युतैस्स्खलितैः मृगोद्भवस्य कस्तूर्याः कुङ्कुमस्य च रेणुभिः रजोभिः पिहिता व्याप्ता तत एव तस्मात्कारणादेव सा क्षितिः गन्धो अस्या अस्तीति गन्धवती 'उगितश्चे'ति ङीप् भवति ।

अत्र पौरवनितास्तनविलेपनघुसृणरेणूनां समस्तमहीमण्डलव्यापनरूपपूर्ववाक्यार्थस्योत्तरवाक्यार्थेन समर्थनाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥९॥

१०

पुरविजिद्गृहकाञ्चनविस्फुर-
त्कलशकान्तिदिवाकरदीप्तिभिः ।
भवति च स्फुटमम्बरनिम्नगा-
न्तरपयोजकुलं रजनीष्वपि ॥

पुरविजिदिति ॥ किञ्च अम्बरनिम्नगायाः मन्दाकिन्याः अन्तरे मध्ये स्थितं पयोजकुलं जलजबृन्दम् । अत्र नगर्यां, पुरविजिद्गृहस्य शिवालयस्य सम्बन्धिनः काञ्चनेन सुवर्णेन विस्फुरतः विलसितस्य कलशस्य शिखरस्थितकलशस्य कान्तय एव दिवाकरदीप्तयः ताभिः रजनीषु रात्रिष्वपि स्फुटं विकसितं भवति । 'व्याकोच विकचस्फुटा' इत्यमरः । दिवाकरदीप्तितादात्म्येन रूपितानां शिवालयशिखरकलशकान्तीनां वियद्गङ्गा-सङ्गतकमलविकासकत्वासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः । सा च रूपकानुप्राणिता इति सङ्करः ॥१०॥

११

पटहडिण्डिमशङ्खमृदङ्गक-
ध्वनिभिरद्भुतताण्डवविभ्रमैः ।
जयजयस्वनभास्वदुघेरवैः
गृहमराजत तत्र पुरद्विषः ॥

पटहेति ॥ तत्र नगर्यां पुराद्विषः शिवस्य गृहमालयः डिण्डिमः वाद्यविशेषः शङ्खः मृदङ्ग एव मृदङ्गकः । स्वार्थे क प्रत्ययः । मर्दलः पटहडिण्डिमशङ्खमृदङ्गकमित्येकवद्भावः । तस्य ध्वनिभिर्घोषैः अद्भुतानि

आश्चर्यंकराणि ताण्डवानि नटनानि तेषां विभ्रमैः विलासैः जयजयस्वनाः जयजयेति शब्दाः भास्वन्तः विलसन्तः उचैरवाः उचे इति शब्दाश्चेति द्वन्द्वः । तैश्च अराजत रेजे । निरन्तरशिवभजनासक्तचित्ताः पौरजना इति भावः । निस्वनविभ्रमादीनां समुच्चयेनैकक्रियान्वयदर्शनात्समुच्चयालङ्कारः ॥११॥

१२

हरगृहोत्थितधूपसमाकुलं
रुचिरमम्बरमुन्नतसौरभम् ।
स्नपनसारसुधारसधारया
क्षितिरभून्मधुरा परितः पुरः ॥

हरेति ॥ अम्बरं गगनं (कर्तृ) रुचिरं मनोज्ञं यथा तथा पुरः नगर्याः हरगृहात् शिवालयात् उत्थितेन उद्भूतेन 'उदस्स्थास्तम्भोः पूर्वस्ये'ति पूर्वसवर्णादेशः । धूपेन धूपधूमेन समाकुलं व्याप्तमत एव उन्नतमुत्कृष्टं सौरभमामोदो यस्य तत्तथोक्तमभूत् । किञ्च क्षितिर्भूमिः स्नपनस्याभिषेकस्य सम्ब[1]न्धिनः[1] सारः प्रशस्तः यस्सुधारसः क्षीरं 'स्तन्यं क्षीरं पयस्सुधे'ति हलायुधः । तस्य धारया सम्पातेन 'धारासम्पात आसार' इत्यमरः । परितः मधुरा माधुर्यवती अभूत् । अतिशयोक्तिरलङ्कारः ॥१२॥

१३

कचभरप्रसवप्रकरस्फुर-
त्परिमलभ्रमितभ्रमराञ्चितः ।

---

[1] न्धेन (क).

रुचिरभूषणशिञ्जितरञ्जितः
चरति यत्र पणप्रमदाजनः ॥

कचेति ॥ यत्र नगर्यां कचभरेषु केशपाशेषु प्रसवप्रकराणां कुसुमसमूहानां 'प्रसवस्तु फले पुष्पे' इति विश्वः । स्फुरता व्यक्तेन परिमलेन भ्रमितैः चालितैः भ्रमरैः भृङ्गैः अञ्चितो व्याप्तः रुचिरभूषणानां मनोज्ञाभरणानां शिञ्जितैर्ध्वनिभिः 'भूषणानां तु शिञ्जित'मित्यमरः । रञ्जितः विलसितः पणप्रमदाजनः वेश्याजनः चरति सञ्चरति ।

अत्र मणिमयाभरणकुसुममालिकाद्यलङ्कारपूर्वकरथ्यापर्यटनरूपवेश्याजनक्रियायाः अतिरमणीयतया वर्णनात्स्वभावोक्तिरलङ्कारः ॥१३॥

१४

परिचितस्मरयन्त्रकलायुजः
स्फुरितयौवनसुन्दरविग्रहाः ।
कनकसन्मणिभूषणभूषिताः
प्रविलसन्ति च यत्र विलासिनः ॥

परिचितेति ॥ किञ्च यत्र नगर्यां परिचितमभ्यस्तं स्मरतन्त्रे कामशास्त्रमेव कला विद्या 'कला शिल्पे कालभेदे सुषमाविद्ययोरपी'ति शाश्वतः । तया युञ्जत इति तथोक्ताः 'सत्सूद्विषद्रुहदुहयुजविदभिदछिदजिनिराजामुपसर्गेऽपि क्विप्' इति क्विप्प्रत्ययः। यौवनाः सुन्दराः सौन्दर्यवन्तः विग्रहाः देहाः येषां ते तथोक्ताः । कनकस्य सन्मणीनां प्रशस्तरत्नानां च भूषणैराभरणैः भूषिताः अलङ्कृताः विलासिनः कामिनः प्रविलसन्ति। स्वभावोक्तिरलङ्कारः ॥१४॥

१५

स्फुटमधीतमनोजमहागमः
क्वचन कामसमर्चनसम्भ्रमः ।
क्वच रतीश्वरकेलिकुतूहलं
क्वचन गीतरसः पणयोषिताम् ॥

स्फुटमिति ॥ यत्र नगर्यां पणयोषितां वारस्त्रीणां स्फुटं व्यक्तं यथा तथा अधीतः पठितः मनोजमहागमः कामशास्त्रं क्वचन कुत्रचिद्भागे कामसमर्चनस्य मन्मथपूजायाः सम्भ्रमः सन्तोषः। क्वच कुत्रचिद्भागे रतीश्वरकेलिकुतूहलं कामकेलिविनोदः क्वचन कुत्रचिद्भागे गीतरसः गानरसः ॥१५॥

१६

अलिगुणेक्षुशरासनसंहित-
प्रसवशातशरः प्रमदानुगः ।
युवमनोमृगभेदनलम्पटः
चरति यत्र मनोभवलुब्धकः ॥

अलिगुणेति ॥ यत्र नगर्यामलिः भृङ्गः गुणः मौर्वी यस्य तत्तथोक्तमिक्षुरेव शरासनं धनुः शरा आसते अस्मिन्नित्यधिकरणे ल्युट् । तस्मिन् संहिताः [1]सन्धानिताः[1] डु धाञ् धारण इति धातोः क्तप्रत्यये

---

[1] सन्निधाताः (क)·

दधातेर्हिरिति ह्यादेशः । प्रसवाः पुष्पाण्येव शातशराः निशितबाणा यस्य स तथोक्तः । 'भग्नं भुग्नेऽथनिशितक्षुतशातानि तेजिते' इत्यमरः । प्रमदाः योषित एवानुगाः अनुचर्यो यस्य स तथोक्तः । अन्यत्र प्रमदा जायाऽनुगा यस्य स तथोक्तः यूनां तरुणानां मनांसि चेतांस्येव मृगाः तेषां भेदने विदारणे लम्पटः लालसः 'लोलुपो लोलुभो लोलो लम्पटो लालसोऽपिचे'ति यादवः । मनोभवः मदन एव लुब्धको व्याधः चरति । यथा लुब्धकः धनुषि शरं सन्धाय मृगभेदनलालसश्चरति तथा युवजनमनोभञ्जनाय मनोभवोऽप्यत्र चरतीति भावः ।

रूपकालङ्कारः । अनेन च नगरस्थितजनेषु निरन्तरसन्तोषातिशयो व्यज्यते ॥१६॥

१७

चलपणप्रमदाकबरीभरात्
गलितपुष्परसोत्करपङ्किला ।
सरिदिवास तदीक्षणरुग्जला
नगरवीथिरुपान्तगृहाम्बुजा ॥

चलेति ॥ चलानां चरन्तीनां पणप्रमदानां वारस्त्रीणां कबरीभरात् केशपाशभरेभ्य इत्यर्थः । गलितानां स्खलितानां पुष्पाणां कुसुमानां रसस्य मकरन्दस्य उत्करेण समृद्ध्या पङ्कः अस्या अस्तीति पङ्किला । पङ्कशब्दस्य पिच्छादित्वात् 'लोमादिपामादिपिच्छादिभ्यश्शनेलच' इति मत्वर्थे इलच् प्रत्ययः । *'चलपणप्रमदा कबरीभरच्युतसमासवसन्तकपङ्किले'ति पाठान्तरम् ।

* व्याख्यातृसूचितपाठभेदः ।

तासां वारस्त्रीणां ईक्षणरुचो नयनशोभा एव जलानि यस्यास्सा तथोक्ता उपान्ते समीपे गृहा एव अम्बुजानि कमलानि यस्यास्सा तथोक्ता नगरवीथिः पुरवीथिका सरिदिव नदीव आस बभूव ।

अत्र जलादितादात्म्येनारोपित वनिता नयनशोभापङ्किलत्वादि धर्मसम्बन्धेन पुरवीथिकायास्सरिदात्मना सम्भावनादुत्प्रेक्षारूपकयोरङ्गाङ्गिभावेन सङ्करः ॥१७॥

१८

प्रचुरगाढगतक्षितिभृद्भुज-
प्रघटिताङ्गदघर्षणतश्च्युतैः ।
कनकरेणुभिरेव बभूव सा
वसुमतीत्यभिधासहिता मही ॥

प्रचुरेति ॥ तत्र नगर्यां सा प्रसिद्धा मही भूः प्रचुरं प्रभूतं 'प्रभूतं प्रचुरं प्राज्यमि'त्यमरः । गाढं सम्बाधं गतं गमनं येषां ते तथोक्ताः । 'भावे क्तो नपुंसके' इति भावे क्तः । तेषां क्षितिभृतां राज्ञां भुजेषु बाहुषु प्रघटितानां बद्धानामङ्गदानां केयूराणां 'केयूरमङ्गदं तुल्ये' इत्यमरः । घर्षणतः सङ्घर्षणात् । पञ्चम्यास्तसिल् । च्युतैः स्खलितैः कनकरेणुभिः स्वर्णरजोभिरेव वसु धनमस्या अस्तीति वसुमतीत्यभिधया नाम्ना सहिता युक्ता बभूव । अत्र मह्यां प्रसिद्धवसुमतीसमाख्यासम्बन्धस्य अतिसम्बाधसञ्चरन्नृपभुजकेयूर-घर्षणजनितकनकरेणुहेतुकत्वोत्प्रेक्षणाद्धेतूत्प्रेक्षा । सा च व्यञ्जकाप्रयोगाद्गम्या । अनेन नगर्यामनन्तमहीकान्तावस्थानप्रतीतेः अस्य राज्ञस्सार्वभौमत्वं व्यज्यते ॥१८॥

१९

कमलकैरवचम्पकमल्लिका-
वकुलकेतकजातिमुखोद्गमैः ।
रचितमाल्यचयश्शुशुभे भृशं
युवतिभिस्सुमनोविपणिस्थले ॥

कमलेति ॥ अत्र नगर्यां सुमनोविपणिस्थले पुष्पपण्यवीथिकायां युवतिभिः तरुणीभिः 'यूनस्तिरि'ति तिप्रत्ययः । रचितः कृतः माल्यानां स्रजां चयः समूहः कमलानि पद्मानि कैरवाणि कुमुदानि चम्पकानि चम्पककुसुमानि मल्लिकाः मल्लिकाकुसुमानि वकुलानि वञ्जुलानि केतकानि केतकीकुसुमानि जातयो मालतीकुसुमानि च मुखान्यादीनि येषां तैस्तथोक्तैः उद्गमैः कुसुमैः भृशं निभृतं शुशुभे रेजे । अत्र ककारादीनां वर्णानामसकृदावृत्तेर्वृत्त्यनुप्रासश्शब्दालङ्कारः ॥१९॥

२०

मृदुलवृन्तनिबन्धनवेदनां
असहमानतयाऽतनुभूभृतः ।
अलिरवार्तरवा मधुबाष्पका
प्रलपतीव भृशं सुममालिका ॥

मृदुलेति ॥ तत्र सुममालिका पुष्पमालिका मृदुलानां कोमलानां वृन्तानां प्रसवबन्धनानां कुचाग्राणां च 'वृन्तं प्रसवबन्धे स्याद्धटी (?) धारा कुचाग्रयोरि'ति विश्वः । निबन्धनेन बन्धनेन जनिता वेदना निबन्धनवेदना

★

शाकपार्थिवादित्वान्मध्यमलोपी समासः। तां असहमानतया तादृशवेदनाऽ-सहनरूपेण हेतुना अलिरवो भृङ्गनाद एव आर्तरवो दीनस्वरो यस्यास्सा तथोक्ता मधु मकरन्द एव बाष्पमस्रं यस्यास्सा तथोक्ता सती। 'शेषाद्विभाषे'ति समासान्तः कप्रत्ययः। न विद्यते तनुरङ्गं यस्याः अतनुः मदनः। 'न लोपो नञः' इति नञः नकारस्य लोपः। स एव भूभृद्राजा तस्य 'भजे हरेश्चरणयोरि'त्यादिवत् षष्ठी ज्ञेया। अथवा 'ल्यब्लोपे कर्मण्यधिकरणे चे'ति पञ्चमी। अतनुभूभृतमुद्दिश्य प्रलपतीवेत्यर्थः। भृशमत्यन्तं प्रलपतीव प्रलापं करोतीवेत्युत्प्रेक्षा।

लोके हि काचित् केनचिद्बन्धनताडनादिभिः बाधिता सती राजानमुपेत्य तत्सन्निधौ रोदिति। तद्वदिति भावः ॥२०॥

२१

स्मितमुखश्च सदालिमदावहः
भुवनसाररसस्सुमनोगणः।
शिरसि धार्यत एव धराजनैः
'सुगुणवान्न हि कैस्समुपास्यते'॥

स्मितेति॥ स्मितं विकासः मुखं प्रधानं यस्य स तथोक्तः। पुष्पाणां विकासस्यैवातिशयकरत्वादिति भावः। अन्यत्र स्मितं हसनं मुखे यस्य स तथोक्तः। मनस्विनां दैन्यवृत्तेरभावेनोत्साहानुवृत्तेरिति भावः। 'मुखं प्रधाने प्रारम्भे वक्त्रे निस्सरणेऽपिचे'ति रत्नमालायाम्। सदा निरन्तरमलीनां भ्रमराणां मदमावहति करोतीति तथोक्तः। कुसुमरसास्वादनेनैवालिषु मदोदयादिति भावः। अन्यत्र सतां सुजनानामालिः राजिः तस्याः मदं

सन्तोपमावहतीति तथोक्तः। सज्जनानन्दविधायिनो मनस्विन इति भावः। 'मदो रेतसि कस्तूर्यां हर्षे गर्वेभदानयोरि'ति विश्वः। भुवनात् जलात् सारः श्रेष्ठः रसः अम्लानता [1]मकरन्दो[1]वा यस्य स तथोक्तः। अन्यत्र भुवने लोके 'भुवनं विष्टपे लोके सलिलेऽपि वियत्यपी'ति विश्वः। सारः श्रेष्ठः रसो गुणः यस्य स तथोक्तः 'गुणे रागे द्रवे रसः' इत्यमरः। सुमनसां पुष्पाणां विदुषां च गणस्समूहः 'सुमनाः पुष्पमालत्योस्स्त्रियां देवे बुधे च ना। अयं पुष्पे बहुष्वेवे'ति रत्नमालायाम्। धराजनैः महीस्थितजनैः शिरसि मूर्ध्नि धार्यत एव। एकत्र धारणमलङ्कारार्थं तस्य वहनम्। अन्यत्र सन्तोषातिशयेन श्लाघनम्।

उक्तमेवार्थमर्थान्तरेण द्रढयति। तथाहि—सुगुणवान् सद्गुणशाली सूत्रवांश्च कैः जनैः न समुपास्यते न सेव्यते। सर्वैस्सेव्यत एवेत्यर्थः। आस उपवेशन इति धातोः कर्मणि यक्प्रत्ययः।

अत्र स्मितमुख इत्यादि विशेषितार्थस्य सामान्येन समर्थनादर्थान्तरन्यासः। स च श्लेषानुप्राणित इति सङ्करः ॥२१॥

२२

भृतमधुव्रतपङ्क्तिमनोज्ञया
करतलोद्धृतकौसुममालया।
प्रणयिनो निकटे तरुणी बभौ
रतिरिवाङ्गजपुष्पधनुर्धरा ॥

---

[1] माकन्दो (ग)

भृतेति ॥ मधु पुष्परसं व्रत[1]यन्त्यु[1]पभुञ्जत इति मधुव्रताः भृङ्गाः। भृतानां धृतानां मधुव्रतानां पङ्क्तिभिः मनोज्ञया रम्यया करतलेन पाणितलेन उद्धृतस्य उच्छ्रितस्य कौसुमस्य कुसुमसमूहस्य 'तस्य समूह' इत्यण्प्रत्ययः। मालया मालिकया प्रणयिनः प्रियस्य निकटे समीपे तरुणी युवतिः (कर्त्री) अङ्गजस्य मदनस्य सम्बन्धि पुष्पधनुः कौसुमकार्मुकं धरतीति तथोक्ता रतिरिव कामवधूरिव बभौ।

अत्रालिराजिविराजितकुसुममालिकासम्बन्धनिमित्तेन मधुकरमयमौर्वी-समञ्चितपञ्चशरकार्मुकसमुज्ज्वलरतितादात्म्योत्प्रेक्षणादुत्प्रेक्षालङ्कारः ॥२२॥

२३

अरुणपाणिरुचाऽरुणितं पणं
कुसुमविक्रयदत्तमवेक्ष्य च।
सपदि ताम्रपणभ्रमतोऽङ्गना
प्रतिमुमोच भुजङ्गकराम्बुजे ॥

अरुणेति ॥ किञ्च। अङ्गना मालाकारिणी कुसुमविक्रयाय पुष्पविक्रयणार्थं दत्तं प्रतिपादितमरुणया पाणिरुचा करतलशोभया अरुणित-मरुणीकृतं पणं गूर्तं 'पणं गूर्तकरम्बयोरि'त्यभिधानात्। अवेक्ष्य दृष्ट्वा सपदि ताम्रपणभ्रमतः शुल्बमयगूर्तभ्रमात्। भुजङ्गस्य विटस्य करः अम्बुजमिव तथोक्तम् 'उपमितं व्याघ्रादिभिस्सामान्याप्रयोग' इति समासः। तस्मिन् प्रतिमुमोच पुनस्त्यक्तवती।

---

[1] मित्यु (क.)

अत्र सौवर्णपणे निजवर्णतिरोधानेन तरुणीकरकमलारुणिमप्रतिपादन-पूर्वकं तत्र ताम्रमयत्वभ्रान्तिवर्णनात्तद्गुणभ्रान्तिमदलङ्कारयोरङ्गाङ्गिभावेन सङ्करः। 'तद्गुणस्स्वगुणत्यागादन्योत्कृष्टगुणग्रहः' इति तद्गुणालङ्कारलक्षणम् ॥२३॥

२४

कुसुमगन्धमपास्य मधुव्रतः
श्वसितसौरभमेति विटोऽपि च।
तरलकेकरमाल्यमपेक्षते
कुसुममाल्यमपास्य मृगीदृशः॥

कुसुमेति॥ मधुव्रतो भृङ्गः कुसुमगन्धं पुष्पसौरभमपास्य हित्वा मृग्याः हरिण्याः दृशाविव दृशौ यस्यास्तस्याः तरुण्याः श्वसितसौरभं निःश्वासगन्धं एति प्राप्नोति। इण् गताविति धातोरदादित्वाच्छपो लुक्। विटोऽपि च कुसुममाल्यं पुष्पमालिकां अपास्य मृगीदृशः तरलश्चपलः केकरः कटाक्षः तस्य मालिकां 'कटाक्षः केकरोऽपाङ्ग' इति धनञ्जयः। अपेक्षते वाञ्छति।

अत्रालिविटयोः कुसुमगन्धप्रहाणपूर्वकश्वसितगन्धप्रापणकुसुममालापरित्यागपूर्वककटाक्षापेक्षणरूपयोश्च बिम्बप्रतिबिम्बभावेनोपादानात् दृष्टान्तालङ्कारः ॥२४॥

२५

नलिनकोशयुगं प्रविदेहि मे
रुचिरचम्पकदामयुगान्वितम्।

इति विटे वदति प्रमदा ददौ
सितरुचिप्रसवोज्ज्वलमालिकाम् ॥

नलिनेति ॥ रुचिरेण चम्पकदामयुगेन चम्पकपुष्पमालिकायुगलेन अन्वितं सहितं नलिनकोशयोः पद्ममुकुलयोः युगं युग्मं मे मह्यं सम्प्रदानत्वात् चतुर्थी । प्रविदेहि प्रतिपादय । अत्र विषयनिगरणाद्बाहुलतान्तरविलसत्पयोधर-युगलं प्रतिपादयेत्यभिप्रायः । इत्येवंप्रकारेण विटे वदति कथयति, प्रमदा कान्ता सिताः शुभ्राः रुचयो येषां तैस्तथोक्तैः प्रसवैः पुष्पैः उज्ज्वलां विलसितां मालिकां ददौ दत्तवती ।

अत्र विटाभिप्रायाभिज्ञायास्सितकुसुममालिकाप्रदानरूपचेष्टाया एव चन्द्रिकासमयापनयानन्तरं भविष्यतीत्यभिप्रायगर्भत्वात्सूक्ष्मालङ्कारः । 'सूक्ष्मं पराशयाभिज्ञेतरसाकूतचेष्टितमि'ति लक्षणात् ॥२५॥

२६

नृपतिसङ्गसमागतगर्भभा-
क्क्षितिवधूदरजा इव रेजिरे ।
मणिगणास्सुचिरं पुरवीथिका-
पणगृहेषु च राशितया स्थिताः ॥

नृपतीति ॥ पुरवीथिकायां रथ्यायाम् आपणगृहेषु निषद्यासु 'आपणस्तु निषद्यायामि'त्यमरः । सुचिरं चिरकालं राशितया स्थिताः राशिरूपेणेत्यर्थः । बहु व्यवहारे सत्यप्यनूना इति भावः । मणिगणाः रत्नसमूहाः नृपतिसङ्गेन राजहंससङ्गत्या समागतं प्राप्तं गर्भं भजतीति तथोक्ता

'भजोण्विरि'ति ण्विप्रत्यये णित्वादादिवृद्धिः अपृक्तत्वात् 'वेरपृक्तस्ये'ति लोपः। तस्याः क्षितिवध्वाः महीमहिलायाः उदरजाः तनुसम्भूता इव रेजिरे बभुरित्युत्प्रेक्षा । अनेन च रत्नराशीनामगण्यत्वं व्यज्यते ॥ २६ ॥

२७

पुरलसद्वणिगापणसंस्थितः
कनकराशिरिलास्तनसन्निभः ।
पुरसरोविकसद्विमलाब्जव-
ल्लसति कांस्यविकारकदम्बकम् ॥

पुरलसदिति ॥ पुरे नगर्यां लसत्सु भासुरेषु वणिगापणेषु सार्थवाहनिषद्यासु संस्थितः स्थितः कनकराशिः सुवर्णराशिः इलास्तनसन्निभः महीकुचमण्डलसदृशस्सन् लसति । इलास्तनसन्निभ इत्यत्रेलास्तनस्यासम्भवाद-भूतोपमेत्याचार्यदण्डिप्रभृतयो बभणुः । अत एवाप्रसिद्धस्योपमानत्वायोगा-दुत्प्रेक्षेत्यालङ्कारिकास्सर्वे वर्णयन्ति । कांस्यविकारकदम्बकं कांस्यपात्रसमूहः। पुरमेव सरः । तस्मिन् विकसन्ति विकसितानि विमलानि अब्जानि कमलानि तद्वदितीवार्थे 'तेन तुल्यं क्रियाचेद्वतिरि'ति वति प्रत्ययः । लसति भाति । पूर्ववदेवालङ्कारः ॥२७॥

२८

*सुरपगोपतमालतावली
जलदकञ्जमुखाम्बरसङ्कुलम् ।

---

* अयं श्लोकस्त्वस्फुटाशयः ॥ टीका नास्तीति (क. ग.)

जघनशैलरिरंसुरुपागतो
बहुरुगब्द इवात्र पुरस्त्रियाम् ॥

२९

नवसुधाकरकान्तनिकेतन-
द्युतिवलक्षनरेन्द्रगजो बभौ ।
रजतशैलगुहान्तरविस्फुर-
त्सुरकरीव कटावृतषट्पदः ॥

[1]नवेति[1] ॥ कटयोर्गण्डयोरावृताः स्थिताः षट्पदाः भृङ्गा यस्य स तथोक्तः । अनेन च मदौत्कट्यं व्यज्यते । नवानां नूतनानां सुधाकरकान्तानां चन्द्रकान्तोपलानां निकेतनानां गृहाणां द्युतिभिर्दीप्तिभिः 'वलक्षो धवलोऽर्जुन' इत्यमरः । नरेन्द्रस्य राज्ञो गजः द्विपः अत एव तद्गुणालङ्कारः । रजतशैलस्य कैलासस्य गुहान्तरे विस्फुरन् उज्ज्वलः सुरकरी *[इव] ऐरावत इव बभावित्युत्प्रेक्षा । सुरगजस्य शुभ्रवर्णत्वादिति भावः । अनेन च नृपतेर्महेन्द्रसम्पत्तिर्व्यज्यते ॥२९॥

३०

हयततिस्तु हरिन्मणिमन्दुरा-
घृणिभिरापिहिता निजतेजसा ।

---

[1] लुप्तः (क) * लुप्तः (क. ग.)

नृपतिनैव विजित्य समाहृता
रवितुरङ्गमराजिरिवाबभौ ॥

[1]हयेति[1] ॥ हरिन्मणिमन्दुराणां मरकतमणिमयवाजिशालानां 'वाजिशाला तु मन्दुरे'त्यमरः। घृणिभिर्दीप्तिभिः आपिहिता समन्तादावृता हयततिरश्वसमूहः नृपतिना चोलमहीपालेन (कर्त्रा) निजतेजसा स्वीयप्रतापेनैव (करणेन) विजित्य जित्वा परपराजयक्रियायास्तेजस्साध्यत्वात्। अनेन राज्ञस्सूर्यादतिश[2]यित[2]तेजोवत्त्वं प्रतीयते। समाहृता आनीता रवेस्सू`र्यस्य तुरङ्गमाणामश्वानां राजिः आवलिरिव आबभौ। सूर्याश्वानां हरिद्वर्णत्वादिति भावः। अत एव 'हरिदश्वोष्णरश्मय' *इत्यनुशासनम् (?)। उत्प्रेक्षातद्गुणालङ्कारयोस्सङ्करः ॥३०॥

३१

बहुलशैवलसद्द्विजरञ्जितं
सकमलाश्रितकैरवभासितम्।
रसचरप्रमदालियुतं पुरं
भुवनशोभिसरश्श्रियमाययौ ॥

बहुलेति ॥ बहुलैः शैवैः शिवभक्तैः लसद्भिः राजमानैः द्विजैर्विप्रैः 'द्वन्द्वः कर्मधारयो वा' रञ्जितं शोभितम्। अन्यत्र बहुलेन शैवलेन जलनील्या 'जलनीली तु शैवालं शैवल' इत्यमरः। सद्भिः प्रशस्तैः द्विजैः पक्षिभिश्च 'दन्तविप्राण्डजा द्विजा' इत्यमरः। रञ्जितं कमलया श्रिया स्त्रीभिर्वा

---

[1] लुप्तः (क) [2] य (क) * नामलिङ्गानुशासनमिति स्यात्।

सहिताः सकमलाः 'कमला श्रीवरस्त्रियोरि'ति विश्वः। आश्रितं कं सुखं येषां ते तथोक्ताः सुखिनः सकमलाश्च ते आश्रि'तका'[1]श्च तैरवभासितं 'कं शिरोऽम्बु सुखे क्लीबमि'ति रत्नमालायाम्। लक्ष्मीसम्पन्नभोगिजनशोभितमित्यर्थः। अन्यत्र सकमलैः नलिनसहितैः आश्रितैः आस्थितैः कैरवैः कुमुदैः भासितं प्रकाशितम्। रसात् रागात् चरन्तीति रसचर्यः ताश्च ताः प्रमदाश्च रसचरप्रमदाः 'उपसर्जनं पुंवदि'त्यादिना पुंवद्भावः। तासामालिभिः श्रेणिभिः युतम्। अन्यत्र रसं मकरन्दं चरन्ति भक्षयन्तीति रसचराः। चरगतिभक्षणयोरिति धातोष्टः। प्रमदाः प्रकृष्टमदवन्तः। 'प्रमदस्सम्मदे गर्वे कामिन्यां प्रमदा मते'ति विश्वः। अलिनो भृङ्गास्तैर्युतं सहितं भुवने जगति शोभत इति भुवनशोभि। अन्यत्र भुवनेन सलिलेन शोभत इति तथोक्तं पुरं नगरी सरसः सरस्याः श्रियं शोभां आययौ प्राप।

अत्र नगर्यां सरसश्शोभासम्भवेन शोभेव शोभेति सदृशशोभान्तरकल्पनान्निदर्शनालङ्कारः। 'निदर्शना। अभवद्वस्तुसम्बन्धः उपमापरिकल्पकः' इति लक्षणात् ॥ ३१ ॥

३२

शशिमणिस्फुटसालदलावृतं
कनकहर्म्यकनद्रुचिकर्णिकम्।
वहति राजगृहं नलिनोपमां
पुरसरोवरमध्यविराजितम्॥

---

[1] ता (क)।

शशीति ॥ शशिमणिभिः चन्द्रकान्तोपलैः स्फुटानि व्यक्तानि सालदलानि प्राकारदलान्येव दलानीति श्लिष्टं रूपकम् । तैरावृतं परिवृतं कनक-हर्म्यं सुवर्णमयप्रासादः 'अन्येषां विभववतां च हर्म्यमि'ति हलायुधः । स एव कनद्रुचिः भासुरदीप्तिमती कर्णिका बीजकोशो यस्य तत्तथोक्तं 'कर्णिका बीजकोशस्स्यादि'ति हलायुधः । 'गो स्त्रियोरुपसर्जनस्ये'ति ह्रस्वः । पुरं नगरमेव सरोवरं सरश्श्रेष्ठं तस्य मध्ये राजितं दीप्तं राजगृहं नृपभवनं 'गृहगेहोदवसितं वेश्म सद्म निकेतनमि'त्यमरः । नलिनोपमां कमलसाम्यं वहति भजति ।

अत्र सालदलादीनां दलादितादात्म्यारोपेण तादृशधर्मसम्बन्धवशात्क-मलसादृश्यप्रतिपादनादुपमारूपकयोरङ्गाङ्गिभावेन सङ्करः ॥ ३२ ॥

३३

वितततूर्यरवोर्मिघनस्वनैः
मणिमयोर्जितहर्म्यधराधरैः ।
शशिशिलाभवनांशुजलैर्भृशं
जलधिसाम्यमयान्नृपमन्दिरम् ॥

वितततेति ॥ विततः वि[1]स्तृ[1]ताः तूर्यरवाः तूर्यध्वनय एव ऊर्मीणां तरङ्गाणां घनस्वना महाघोषाः तैः मणिमयानि रत्नविकाराणि ऊर्जितान्युन्न-तानि हर्म्याणि प्रासादा एव धराधराः पर्वतास्तैः शशिशिलाभवनानां चन्द्रकान्तगृहाणामंशवो मयूखा एव जलानि तैश्च उपलक्षितं नृपमन्दिरं

[1] स्मृ (क)

राजभवनं भृशमत्यन्तं जलधिसाम्यं समुद्रसादृश्यं अयात्। या प्रापण इति धातोर्लङ्। अदादित्वाच्छपो लुक्। जलनिधौ कल्लोलकलकल: धराधरधारणं जलसमृद्धिश्चेतीमानि प्रसिद्धानीति भावः। पूर्ववदेवोपमारूपकयोस्सङ्करः ॥ ३३ ॥

३४

जनपहर्म्यकनत्कलशस्त्विषा
तरुणघर्मघृणिद्युतिशोभया।
सततमभ्रविधोरकरोद्भृशं
भृतसुवर्णमयाम्बरविभ्रमम् ॥

जनपहर्म्येति ॥ जनान्पाति रक्षतीति जनपो राजा 'आतोऽनुपसर्गे कः' इति कर्मण्युपपदे कप्रत्ययः। तस्य हर्म्ये प्रासादे कनन् राजमानः कलशः शिखरकलशः तरुणाः बालाः घर्माः उष्णाः घृणयो रश्मयो यस्य स तथोक्तः सूर्यः 'किरणोऽस्रमयूखांशुगभस्तिघृणिघृष्टय' इत्यमरः। तस्य द्युतिर्दी[1]प्ति[1]-रिव शोभा प्रकाशो यस्यास्तया त्विषा कान्त्या सततं निरन्तरमभ्रं गगनमेव विधुर्विष्णुः। व्यो[2]म्नो[2] नीलवर्णतया कविप्रसिद्धेरिति भावः। 'विश्वम्भरः कैटभजिद्विधुश्श्रीवत्सलाञ्छनः' इत्यमरः। तस्य भृशं नितरां भृतस्य धृतस्य सुवर्णमयाम्बरस्य पीताम्बरस्य विभ्रमं विलासमकरोत् कृतवान्।

अत्र विधुतादात्म्येनारोपितगगनमण्डलपरिवृतपीताम्बरताद्रूप्यस्य कलशत्विषि रूपणाद्रूपकालङ्कारः ॥ ३४ ॥

---

[1] चिति (क) [2] म्नि (क)

३५

सुरकुजाभवनस्पतिभिस्सुधा-
रुचिजलोज्ज्वलकञ्जसरोवरैः ।
शुकपिकालिरवैर्गृहनन्दनं
मृदुमरुन्मधुमञ्जुलमुद्बभौ ॥

सुरकुजेति ॥ सुरकुजानां कल्पवृक्षाणामाभेवाभा येषां ते तथोक्ताः वनस्पतयो वृक्षाः 'वनस्पतिर्वृक्षमात्रे विना पुष्पैः फलद्रुमे' इति विश्वः । तैः । सुधायाः अमृतस्य रुचिः माधुर्यमिव माधुर्यं कान्तिर्वा यस्य तत्तथोक्तं तस्मिन् जले उज्ज्वलानि कञ्जानि जलजानि येषां तैस्तथोक्तैः सरोवरैः 'कमित्यव्ययात् जनेर्डप्रत्ययः' शुकानां कीराणां पिकानां कोकिलानामलीनां भृङ्गाणां रवैः स्वरैः उपलक्षितं मृदुर्मन्दः मरुद्वायुर्यस्य तत्तथोक्तम् । अन्यत्र मृदवः मनोज्ञाः मरुतो देवा यस्मिन् तत्तथोक्तम् । मधुभिर्गुडपुष्पैः मधुना वसन्तेन वा मञ्जुलं मनोज्ञं 'मधु क्षौद्रे जले क्षीरे मद्ये पुष्परसे मधुः' । 'दैत्ये [1]चैत्रे वसन्ते[1] च जीवाशोके मधुद्रुमे' इति विश्वः । गृहनन्दनमुद्बभौ रेजे ।

अत्र पुरगृहोपवने प्रस्तुते विशेषणसाम्यादप्रस्तुतवासवोद्यानपरिस्फूर्तेस्समासोक्तिरलङ्कारः । 'समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य-चेदि'ति लक्षणात् । अनेन च पुरजनानां निर्जरतुल्यभोगवत्त्वं व्यज्यते ॥३५॥

३६

वसति तत्र पुरन्दरविभ्रमः
शिवपदाब्जलसन्मदषट्पदः ।

---

[1] चक्रे मांसके (क)

रिपुनृपालमदाभ्रमहानिलः
सुजनसम्मदसिन्धुसुधाकरः ॥

अथ राजानं प्रस्तौति वसतीत्यादिना ॥ तत्र गजपुरे पुरः पुराणि शात्रवाणि दारयतीति पुरन्दरो वासवः 'पूःसर्वयोर्दारिसहोरि'ति खच्प्रत्यये खिदन्तोत्तरपदत्वात् मुम् । तस्य विभ्रमः विलास इव विलासो यस्य स तथोक्तः । सप्तम्युपमानपूर्वपदस्य बहुव्रीहिर्वाच्य उत्तरपदलोपश्चेत्युत्तरपदलोपः । शिवस्य महेश्वरस्य पदाब्जे चरणकमले लसन् राजमानः मदषट्पदः मत्तमधुकरः । निरन्तरशिवचरणसेवाकरणान्तःकरण इति भावः । रिपुनृपालानां शत्रुमहीभुजां मदो गर्व एवाभ्रं मेघः 'अभ्रं मेघो वारिवाह' इत्यमरः । तस्य महानिलः चण्डमारुतः रिपुनृपालकुलमूलोन्मूलनकुशल इति भावः । सुजनानां सज्जनानां सम्मदः प्रमोद एव सिन्धुस्समुद्रः तस्य सुधाकरः चन्द्रः 'प्रमोदामोदसम्मदा' इत्यमरः । विक्रमचोलमहीपतिरिति वक्ष्यमाणविशेष्यमनुषज्यते वसति तिष्ठति ।

अत्र शिवपदाम्बुजरिपुमदाभ्रसज्जनसम्मदसिन्धूनां क्रमेण मधुकरमहानिलसुधाकररूपेण बहुधा कविनोल्लेखनादुल्लेखालङ्कारः ॥ ३६ ॥

३७

विशदकीर्तिविराजितदिक्तटः
सुकविसूक्तिमणिश्रुतिभूषणः ।
प्रबलपार्थिवसेव्यपदाम्बुजः
प्रथित'विक्रमचोलमहीपतिः' ॥

तमेव द्वाभ्यां कुलकेनाह विशदेति ॥ विशदया निर्मलया कीर्त्या यशसा विराजितानि [1]प्रकाशितानि[1] दिक्तटानि हरिन्मुखानि येन स तथोक्तः । सुकवीनां सत्कवीनां सूक्तयः कविता एव मणिश्रुतिभूषणानि मणिमयकर्णाभरणानि यस्य स तथोक्तः । सत्कविकाव्यश्रवणासक्तचित्त इति भावः । प्रबलैः बलवद्भिः पार्थिवैः नृपैः 'पार्थिवो नृपतौ भूमेर्विकारे पार्थिवोऽन्यवदि'ति विश्वः । सेव्ये भजनीये पदाम्बुजे चरणकमले यस्य स तथोक्तः । निरतिशयप्रतापशालित्वं प्रबलशब्देन व्यज्यते । प्रथितः [2]प्रसिद्धः[2] विक्रमः प्रतापो यस्य स तथोक्तः चोलमह्याः चोलदेशस्य पतिः अधिप इति चार्थः वसतीत्यन्वयः ।

अत्रात्युत्कृष्टकीर्तिप्रतापादिवर्णनादत्युक्तिरलङ्कारः । 'अत्युक्तिरद्भुतातथ्यशौर्यौदार्यादिवर्णनमि'ति लक्षणात् ॥३७॥

३८

गतमदोऽपि स दानवतां वरः
सुखयुतोऽपि कुलीन इति श्रुतः ।
घनगुणोऽपि जलौघविवर्जितः
शिवयुतोऽप्यतनुस्थितिमान्नृपः ॥

गतेति ॥ गतः निर्गतः मदो गजदानं यस्य स तथोक्तोऽपि स दानवतां मदवतां वरः श्रेष्ठः इति विरोधः । गतमदो निर्गतगर्वः दानवतां वितरणशालिनां वर इति तत्परिहारः । 'मदो रेतसि कस्तूर्यां हर्षे गर्वेभदानयोः' 'दानं गजमदे त्यागे' इत्युभयत्रापि विश्वः । सुखयुतः [3]सु सुष्ठु खेन गगनेन[3]

---

[1] लुप्तः (क) [2] लुप्तः (क) [3] सुखेन गगने (ग)

युतः युक्तोऽपि 'अनन्तं सुरवर्त्म खं' इत्यमरः। कुलीनः कौ भूम्यां लीनः स्थित इति विरोधः। 'गोत्रा कुः पृथिवी पृथ्वी'त्यमरः। खविशिष्टस्य वसुधान्तर्लयासम्भवादिति भावः। सुखयुतः आनन्दसहितः कुलीनः सत्कुलप्रसूत इति विश्रुतः प्रसिद्धः इति तत्परिहारः। 'कुलात्खः' इति ख-प्रत्यये 'आयनेयीनीत्यादिना खस्येनादेशः। घनस्य मेघस्य गुण इव गुणो यस्य स तथोक्तोऽपि जलौघेन सलिलसमृद्ध्या विवर्जितः रहित इति विरोधः। मेघधर्माश्रितस्य जलविवर्जनमसम्भवीति भावः। घनाः अधिकाः गुणाः औदार्यादयः यस्य सः तथोक्तः। 'कठिनाधिकसान्द्रेषु वाद्यमध्यमनृत्ययोः। मुस्ता मुद्गरमेघेषु त्रिषु क्लीबे पुमान्घनः' इति रत्नमालायाम्। जलौघो जडौघः मूर्खसमूहः। 'जलं कोर[1]ले[1] (?) नीरे ही भेदे च जडोऽन्यवदि'ति विश्वः। तेन विवर्जित इति तत्परिहारः। दूरपरिवर्जितदुर्जनसङ्ग इति भावः। शिवयुतः [अपि] ईश्वरसहितोऽपि अतनोर्मदनस्य स्थितिर्वर्तनं अस्यास्तीत्य-तनुस्थितिमानिति विरोधः फालऌोचनसन्निधौ मदनस्थितेरसम्भवादिति भावः। शिवयुतः कल्याणसम्पन्नः अतनुरधिका स्थितिर्मर्यादाऽस्यास्तीति तथोक्त इति तत्परिहारः। 'स्थानमर्यादयोस्स्थितिरि'ति रत्नमालायाम्। सः नृपो राजा वसति तिष्ठति। विरोधाभासालङ्कारः ॥३८॥

३९

जिगमिषुर्यशसा समतां पुनः
समवर्धत वारिधिरिन्दुना।

[1] लति (ग)

अनधिगम्य च तां तनुतां गतः
सह सुतेन स तस्य महीभुजः ॥

जिगमिषुरिति ॥ वारिधिः क्षीरोदः इन्दुना समं चन्द्रेण सह महीं भुवं भुनक्ति रक्षतीति महीभुक् । भुज पालनाभ्यवहारयोरिति धातोः क्विप् । तस्य चोलभूपालस्य यशसा कीर्त्या समतां साम्यं गन्तुं लब्धुमिच्छुर्जिगमिषुः गमेस्सन्नन्तादुप्रत्ययः । अवर्धत ववृधे । वृधु वृद्धाविति धातोरात्मनेपदिनः लङ् । स सिन्धुः [सह] सुतेन चन्द्रेण सह तां तद्यशस्समतां अनधिगम्याप्राप्य पुनः तनुतां कृशतां गतः प्राप्तश्च ।

अत्र सिन्धौ चन्द्रेण सह प्राप्तयोः प्रसिद्धयोः वृद्धिक्षययोः चोलमहीपालकीर्तिसादृश्यलाभेच्छा तदभावहेतुक[तनु]त्वोत्प्रेक्षणादुत्प्रेक्षालङ्कारः । स च व्यञ्जकाप्रयोगाद्गम्यः ॥३९॥

४०

वितरणस्य निशम्य विशांपतेः
विभवमाशु पशुर्मरुतां ह्रिया ।
गतसुधैव सुराः कथमन्यथा
मखहुताल्पसुधारसकाङ्क्षिणः ॥

वितरणस्येति ॥ मरुतां देवानां पशुः कामधेनुः विशां मनुजानां 'द्वौ विशौ वैश्यमनुजावि'त्यमरः । पतेर्नायकस्य 'षष्ठीयुक्तश्छन्दसि वे'त्यत्र लोकेऽपीति कैश्चिदङ्गीकारात्पतिशब्दस्य घिसंज्ञा । वितरणस्य दानस्य 'विश्राणनं वितरणं स्पर्शनं प्रतिपादनमि'त्यमरः । विभवमतिशयं निशम्य श्रुत्वा ह्रिया लज्जया आशु शीघ्रमेव गता विनिर्गता सुधा क्षीरं यस्यास्सा

★

तथोक्ता । अभूदिति शेषः । भू आपादेः क्रियासामान्यरूपतया प्रसिद्धत्वाद-प्रयोगेऽपि न दोष इत्याह वामनः । लोके स्वस्मिन्नेवातिशयं मन्वानस्स्वतोऽप्यतिशयशालिन्युपस्थिते लज्जया शुष्करसो भवतीति प्रसिद्धेरिति भावः । अन्यथा गतसुधा न चेत् सुधावती चेदित्यर्थः । सुराः देवाः मखेषु यज्ञेषु 'सप्ततन्तुर्मखः क्रतुरि'त्यमरः । हुतं अग्नौ प्रक्षिप्तमल्पं स्वल्पं सुधायाः हविषः क्षीरस्य वा रसं काङ्क्षन्ते अपेक्षन्त इति तथोक्ताः 'ताच्छील्ये णिनिः' कथं भवन्तीति शेषः ।

अत्र चोलनृपालवितरणश्रवणजनित[1]सु[1]रसुरभिसुधाशोषणपूर्ववाक्यार्थस्य व्यतिरेकमुखेनो-त्तरवाक्यार्थेन समर्थनाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥४०॥

४१

रिपुतमः प्रहरेण तदोजसाऽ-
प्यभिलषन्समतां द्युमणिस्स्वयम् ।
विततकान्तिरभूदनवाप्य तां
स गतरोचिरुदन्वति मज्जति ॥

रिपुतम इति ॥ द्युमणिः (अपि) सूर्योऽपि 'द्युमणिस्तरणिर्मित्र' इत्यमरः । स्वयं रिपवश्शत्रव एव तमांसि तिमिराणि शत्रुभूतं तमश्च प्रहरतीति तथोक्तं तेन । तस्य राज्ञः ओजसा प्रतापेन समतां सादृश्यमभिलषन् वाञ्छन् सन् वितता विस्तृता कान्तिर्दीप्तिर्यस्य स तथोक्तः अभूत् । सः रविः तां तदोजस्समताम् अनवाप्याप्राप्य विगतानि रोचींषि त्विषो यस्य स तथोक्तस्सन्

---

[1] पु (क)·

उदकमस्मिन् अस्तीत्युदन्वान् तस्मिन्समुद्रे 'उदन्वानुदधिस्सिन्धुरि'त्यमरः । 'उदन्वानुदधौ च' इति निपातनात्साधुः । मज्जति पतति । तेजोवतामारब्धार्थानवाप्तिरत्यन्तक्लेशकारणमिति भावः ।

अत्र रवौ प्रसिद्धमाध्याह्निककान्तिप्रचयसायन्तनसिन्धुपतनयोः राजप्रतापसादृश्यलिप्सातदनवाप्तिहेतुकत्वोत्प्रेक्षणादुत्प्रेक्षालङ्कारः । स च व्यञ्जकाप्रयोगाद्गम्यः । अनेन राज्ञः निरुपमप्रतापसम्पत्तिर्व्यज्यते ॥ ४१ ॥

४२

श्रियमपुष्यदिलाफलवृद्धिभाक्
जनपदे जनता भृतसम्मदा ।
जनपतावनताहितभञ्जने
वहति चात्मभुजे भुवमञ्जसा ॥

श्रियमिति ॥ अनतान् अनम्रान् अहितान् शत्रून् भञ्जति संहरतीति तथोक्तः । कर्तरि ल्युट् प्रत्यये 'युवोरनाकावि'त्यनादेशः । शत्रवोऽपि शरणागताश्चेत्तानपि रक्षतीत्यनतशब्देन व्यज्यते । तस्मिन् जनपतौ राज्ञि आत्मभुजे निजबाहौ भुवं भूमिं वहति बिभ्रति सति जनपदे देशे 'भवेज्जनपदो देश' इति विश्वः । जनता जनसमूहः । 'ग्रामबन्धुजनसहायेभ्यस्तलि'ति समूहार्थे तल्प्रत्ययः भृतसम्मदा धृतप्रमोदा अभवदिति शेषः । इला भूश्च 'गौरिला कुम्भिनी क्षमे'त्यमरः । फलवृद्धिं सस्यवृद्धिं भजतीति तथोक्ता सती श्रियं सम्पदमपुष्यत् पुपोष । दिवादित्वाच्छ्यन्प्रत्ययः । अञ्जसा तत्त्वं 'तत्त्वे त्वद्धाञ्जसा द्वय'मित्यमरः ।

अत्र फलादीनां समृद्धिवर्णनादुदात्तालङ्कारः । अनेन च नृपतौ यथानीति[1]जगती[1]भरणप्रतीत्या पुण्यशीलत्वं व्यज्यते ॥ ४२ ॥

४३

अरिगदादिभयं दनुसूनुषु
च्युतगुणस्थितिरिन्द्रशरासने ।
विदितकर्णकथाऽपि च भारते
जनपदे नहि तत्र महीभृतः ॥

अरिगदेति ॥ महीभृतो राज्ञः तत्र जनपदे देशे अरयः शत्रवः गदाः रोगाः आदयो येषां ते अरिगदादयः तेभ्यो भयं नास्ति । हि प्रसिद्धौ । किन्तु दनुसूनुषु दैत्येषु अरिगदादिभयम् अराणि धाराः सन्त्यस्मिन्निति अरि चक्रम् 'अरं शीघ्रे च चक्राङ्गे शीघ्रगे पुनरन्यवदि'ति विश्वः । गदा कौमोदकी 'गदा रोगहरिभ्रात्रोर्गदा स्यादायुधान्तरे' इति रत्नमालायाम् । आदी येषां तानि अरिगदादीनि तेभ्यो भयं भीतिः अस्तीति शेषः । चक्रपाणेर्दैत्यारित्वादिति भावः । च्युतगणानां गुणरहितानां स्थिति[2]रवस्थानं[2] च्युता अविद्यमाना गुण-स्थितिः मौर्वीसम्बन्धः इन्द्रशरासने शक्रधनुषि 'इन्द्रायुधं शक्रधनुस्तदेव ऋजु-रोहितमि'त्यमरः । न तद्देश इत्यर्थः । विदितकर्णस्य छिन्नश्रोत्रस्य कथा वार्ताऽपि च कर्णच्छेदनवार्तेत्यर्थः । 'छिन्नं छातं दितं कृत्तमि'त्यमरः । अन्यत्र विदिता प्रसिद्धा कर्णस्य राधेयस्य कथा वृत्तान्तः भारते न तु देश इत्यर्थः । 'श्रोत्रकौन्तेययोः कर्ण' इति रत्नमालायाम् ।

---

[1] भगवति (क.) [2] रिव स्थापनं च (क)

अत्रारिगदादीनां देशे निषिध्य दानवादिषु नि[1]य[1]न्त्रणात्परिसङ्ख्यालङ्कारः ॥ ४३ ॥

४४

अमृतवर्षि वचः करपङ्कजं
कनकवर्षि सदाऽस्य मनीषिणाम् ।
विशिखवर्षि धनुर्द्विषतां ततो
भुवि नृपेन्द्र विचेष्टितमद्भुतम् ॥

अमृतेति ॥ अस्य राज्ञः वचः वाक् अमृतं वर्षति स्रवतीति तथोक्तं मधुरवागयमिति भावः । करपङ्कजं करकमलं मनीषिणां विदुषां 'धीरो मनीषी ज्ञः प्राज्ञः' इत्यमरः । सदा निरन्तरं कनकवर्षि धनदायकमित्यर्थः । धनुश्शरासनं द्विषतां शत्रूणां 'द्विषोऽमित्र' इति शतृप्रत्ययः । विशिखवर्षि शरवर्षि भवतीति । ततस्तस्मात्कारणात् भुवि नृपाणां राज्ञामिन्द्रः राजशिरोमणिरित्यर्थः । अथवा नृप इन्द्र इव नृपेन्द्रः 'उपमितं व्याघ्रादिभिरि'ति समासः । तस्य विचेष्टितं व्यापारः 'भावे निष्ठा नपुंसके' इति क्तप्रत्ययः । अद्भुतमाश्चर्यकरं शौर्यौदार्यादिगुणवानयं धीरोदात्त इति व्यज्यते ।

महेन्द्रस्य वाहनभूतो मेघ एव जलमात्रवर्षी । नृपेन्द्रस्य तु वचःप्रभृति सर्वमप्यमृतादिवर्षीत्यद्भुतमिति [2]भावः ।[2]

अत्रोत्तरवाक्यस्य पूर्ववाक्यार्थहेतु[3]क[3]त्वात्काव्यलिङ्गमलङ्कारः ॥४४॥

---

[1] म (क) [2] वाच्यं (क). [3] त्वा (क).

४५

सह फलैस्सुमनोरुचिभिः प्रजा-
कुजकुलं कलितं श्रितनन्दनम् ।
नृपवसन्तसमागमतोऽस्य त-
न्नहि कदाऽपि विपल्लववर्तनम् ।।

सहेति ।। श्रिताः प्राप्ताः नन्दनाः पुत्रा यस्य तत्तथोक्तम् । अन्यत्र श्रितं नन्दनं वनं यस्य तत्तथोक्तम् । प्रजाः नन्दना एव कुजाः द्रुमाः तेषां कुलं समूहः नृपः भूपतिरेव वसन्तः मधुः तस्य समागमतः सम्बन्धात् [सु] शोभना मनोरुचिरभिलाषो येषु तानि तथोक्तानि अतीव मनः प्रियाणीत्यर्थः । अन्यत्र सुमनोरुचिभिः पुष्पशोभाभिस्सहेति योजनीयम् । 'रुचिस्तु किरणे कान्तावभिषङ्गाभिलाषयोरि'ति रत्नमालायाम् । फलैरर्थैः अन्यत्र सस्यैश्च सह कलितं व्याप्तं 'फलं हेतुरसोऽर्थे स्यात्फलके मुष्टिलाभयोः । नातीफलेऽपि त[1][क्रोले][1]सस्यबाणाग्रयोरपी'ति विश्वः । तत्तस्मात्कारणात् अस्य प्रजाकुज-कुलस्य कदाऽपि कदाचिदपि विपल्लववर्तनमापल्लेशवृत्तिः । अन्यत्र विपल्लवं किसलयरहितं यथा तथा वर्तनं विपल्लववर्तनम् । नहि । वसन्तकाले सर्वेषु द्रुमेषु पल्लवसमृद्धिरिति भावः । यथा वसन्तोदयेषु पुष्पफलादिभिस्सम्पूर्णा-स्सर्वे महीरुहास्तथाऽस्मिन् राज्ञि राज्यधुरन्धरे मनीषिताशेषविशेषितार्थ-सम्पन्नाः प्रजा इति भावः । श्लेषरूपकयोस्सङ्करः ।।४५।।

४६

अनमदानमतामकरोद्विभुः
युधि सुरीरमयोः परिरम्भणम् ।

---

[1] क्रोलं (क ग)

क्षितिभुजामसिवीक्षणधारया
'न विफलं महतामुपसर्पणम्' ॥

अनमदिति ॥ विभुः राजा युधि युद्धे 'समुदायस्त्रियस्संयत्स-मित्याजिसमिद्युधः' इत्यमरः । असिः खड्गः वीक्षणं कटाक्षश्च तयोर्धारया कोट्या परम्पर[1]या च[1] 'खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टय' इत्यमरः । अनमन्तः अविनताः शत्रव इत्यर्थः । आनमन्तः शरणागताश्च तेषां क्षितिभुजां राज्ञां सुरी अप्सरस्त्री रमा सम्पत्तिश्च तयोः परिरम्भणं आश्लेषं अकरोत् कृतवान् । 'जातेरस्त्रीविषयादयोपधादि'ति सुरशब्दात् ङीप् । युद्धे प्रतिभटानखिलानपि निहन्ति रिपूनपि शरणागतानवतीति निरतिशय-विक्रमकृपाशालीति भावः । उक्तमेवार्थमर्थान्तरेण द्रढयाति तथा हि—महतां महात्मनामुपसर्पणम्, एकत्र युद्धं विधेहीति समीपागमनम् । अन्यत्र त्रायस्वेत्य-नुसरणं विफलं व्यर्थं न भवति । एकत्रामुष्मिकफलप्राप्तेरन्यत्रैहिकफल-लाभादिति भावः । अत्र नतानतशात्रवपरिगतसम्पत्स्त्रीनितापरिरम्भणरूप-विशेषस्य सामान्येन समर्थनादर्थान्तरन्यासोऽलङ्कारः ॥४६॥

४७

विरहदावविलीनगलत्तनु-
स्फुरितकाञ्चनभूषणसारतः ।
स्वरमणीसरणीमधिगम्य तां
अनुययुर्युधि तेन पलायिताः ॥

---

[1] तो (क)

विरहेति ॥ युधि युद्धे तेन राज्ञा पलायिता विद्रुताः परापूर्वकादेतेः क्तप्रत्ययः । 'आर्धधातुकस्येड्वलादेरि'तीडागमः । 'उपसर्गस्यायतावि'ति रस्य लत्वम् । रिपव इति शेषः । विरहदावेन विरहाग्निना विलीनानां द्रुतानामत एव गलतां च्युतानां तनुषु अङ्गेषु स्फुरितानां काञ्चनभूषणानां स्वर्णाभरणानां सारतः रसात् स्वरमणीसरणीं स्वकीयतरुणीवर्त्म अधिगम्य प्राप्य तां रमणीं जा[1]तावे[1]कवचनम् । अनुययुरनुजग्मुः । निजरमणीरपि विहाय कान्दिशीका रिपवः निजनायकविरहदहनज्वालाजालविलीनतदीयतनुच्युतस्वर्णाभरणविलोकनादनुयान्तीति भावः । अत्र रिपुरमणीतनुभूषणानां विरहाग्निविलयनासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरलङ्कारः ॥४७॥

४८

विपिनयातपरप्रमदामुखो-
च्छ्वसितसोष्ममरुत्कृतकालिमा ।
वनमराजत साञ्जनबाष्पकं
वृतमिवाहितदुर्यशसाऽभितः ॥

विपिनेति ॥ विपिनमरण्यं याताः गताः परेषां शत्रूणां 'परोऽरिः परमात्मा च केवले परमव्ययमि'ति रत्नमालायाम् । प्रमदा नार्यः तासां मुखोच्छ्वसितानि मुखश्वासा एव सोष्ममरुतः ऊष्मसहितमारुताः तैः कृतकालिमा नैल्यं यस्य तत्तथोक्तम् । 'वर्णदृढादिभ्यः ष्यञ्च' इति चादिमनिच् प्रत्ययः । किञ्च अभितः समन्तात् साञ्जनबाष्पकं कज्जलसहि[2][ता[2]]-

---

[1] त्येक (क). [2] तं अ (क. ग.)

श्रुमत् वनं विपिनमहितानां शत्रूणां दुर्यशसा अपकीर्त्या वृतमावृतमिव अराजतेत्युत्प्रेक्षा । अपयशसो नीलतया कविभिर्वर्णनादिति भावः ॥४८॥

४९

नृपकरासिकरालभुजङ्गमः
प्रसभतो द्विपतामसुमारुतम् ।
प्रथमतः प्रपिबन्नपि तर्षतो
युधि तदीययशोऽमृतमापपौ ॥

नृपेति ॥ नृपस्य राज्ञः करे हस्ते असिः खड्ग एव करालभुजङ्गमः क्रूरसर्पः युधि युद्धे प्रथमतः पुरस्तात् प्रसभतः बलात्कारेण द्विषतां शत्रूणामसुमारुतं प्राणवायुं प्रपिबन्नपि पानं कुर्वन्नपि शतुः शित्वात् 'पाघ्रे'त्यादिना पिबादेशः। सर्पाणां पवनाशनत्वादिति भावः। तर्षतस्तृष्णावशात् तदीयं शत्रुसम्बन्धि 'त्यदादीनिचे'ति वृद्धिसंज्ञायां 'वृद्धाच्छ' इति छप्रत्यये 'आयनेयीनीये'त्यादिनेयादेशः। यशः कीर्तिरेवामृतं क्षीरं आपपौ अपिबत् ।

अत्र नृपखड्गादिषु भुजङ्गमतादात्म्यारोपणाद्रूपकालङ्कारः। अनेन शौर्यादिभिः ख्यातानेव रिपून् जितवानिति राज्ञि प्रतापातिशयो व्यज्यते ॥४९॥

५०

अहितहर्म्यकुलाग्रहरित्तृण-
ग्रसनतस्सवितुर्हरितो हयाः ।
तदरुणोपलकल्पितभूषणोऽ
प्यरुणतामरुणो नृपतेर्ययौ ॥

अहितेति ॥ नृपतेः राज्ञः *अर्थपतेरिति पाठान्तरम् । अहितानां शत्रूणां हर्म्यकुलाग्रेषु सौधसमूहशिखरेषु हरित्तृणानां दूर्वाग्राणां ग्रसनतः भक्षणात् सवितुः रवेः हयाः अश्वाः हरितः हरिद्वर्णा अभवन्निति शेषः। युधि पलायितानां शत्रूणां सपरिवारं पुनरावृत्तिरेव नास्तीति भावः। रक्षित्रभावात् सौधाग्रेष्वपि दूर्वादीनामुत्पत्तिरित्यभिसन्धिः । सौधाग्रेष्वभ्रंकषत्वापादनेन बलवद्विजयशाली राजेति व्यज्यते । अरुणस्सूरसूतोऽपि 'सूरस्सूतोऽरुणोऽनूरुरि'त्यमरः। तेषां सौधाग्राणां अरुणोपलैः पद्मरागमणिभिः 'उपलः प्रस्तरे रत्ने' इत्यमरः। कल्पितानि कृतानि भूषणान्याभरणानि येन स तथोक्तस्सन् अरुणतां अरुणवर्णतां अरुणाख्यतां च ययौ प्राप।

अत्र स्वतस्सिद्धे सूर्याश्वहरितवर्णादौ अहितहर्म्यशिखरसमुद्भूत हरित्तृणग्रासादिहेतुकत्वोत्प्रेक्षणादुत्प्रेक्षालङ्कारः । स च व्यञ्जकाप्रयोगाद्गम्यः ॥५०॥

५१

परकुभृन्महिषीततिरद्भुतं
बहुविषादहताऽपि वनस्थिता।
तृणभुगात्मपतेर्विरहात्परं
परिमुमोच पयांसि दृशैव सा॥

परेति ॥ नृपतेः परकुभृतां शत्रुभूपतीनां महिषीणां [1]पुरन्ध्रीणां[1] ततिस्समूहः [2]परकुभृति[2] चरमगिरौ महिषीणां सैरिभीणां ततिश्च 'महिषी नृपपत्न्यां च सैरिभ्यामोषधीभिदी'ति विश्वः। कुं भुवं बिभर्तीति कुभृत् भृञ्

---

* व्याख्यातृदर्शितपाठभेदः। [1] कुटुम्बिनीनां (ग). [2] लुप्तः (क).

भरणपोषणयोरिति धातोः कर्तरि क्विप्प्रत्यये ह्रस्वस्य पिति कृति तुगिति तुगागमः। बहुनाऽधिकेन विषादेन खेदेन हता व्याहता। विप जलमदन्ति पिबन्तीति विषादाः जलजन्तवः। कर्मण्यण्। बहुभिर्विषादैः जलचरैः हताऽपि वने अरण्ये स्थिता। अन्यत्र जलमध्यस्थिताऽभूदिति शेषः। 'जलकाननयोर्वनमि'ति विश्वः। जलचरसन्दष्टसैरिभीणां जलमध्यस्थितिर्विरुद्धेति भावः। विरहविह्वलरिपुस्त्रीणामरण्यान्तरावस्थिति[1]रिति तत्परि[1]हारः। किञ्च सा महिषीततिः तृणानि भुनक्तीति तृणभुक्। एकत्र युधि राजभयादन्यत्र स्वभावादिति भावः। स चासावात्मपतिर्निजरमणः तस्य, जातावेकवचनम्। निजपतीनामित्यर्थः। विरहात् वियोगात् दृशा ने[2]त्रेणै[2]व पयांसि जलानि क्षीराणि च 'पयःक्षीरं पयोम्बु च' इत्यमरः। परं भृशं परिमुमोच त्यक्तवती। अद्भुतमाश्चर्यकरम्। महिषीणां स्तनैरेव पयोमोचनं प्रसिद्धम्। दृशा पयोमोचनं त्वदृष्टमिति चित्रमिति भावः।

अत एवाकारणात् कार्यजननप्रतीतेः विभावनालङ्कारः। स च श्लेषोत्थापित इति तयोस्सङ्करः ॥५१॥

५२

अरुणमङ्घ्रितलं कति चक्रिरे
मकुटसन्मणिरुग्भिरसिं परे।
निजशिरोध्यमृजा च विरोधिनः
युधि नृपस्य रुषाऽरुणचक्षुषः॥

---

[1] र्विं (क.) [2] त्रैरे (ग.)

अरुणमिति ॥ युधि रुषा रोषेण 'रुट्क्रुधौ स्त्रियामि'त्यमरः। अरुणचक्षुषः कषायितनेत्रस्य नृपस्य राज्ञः अङ्घ्रितलं चरणप्रदेशं (कर्म) कतिचित् 'किमः सङ्ख्यापरिमाणे डति च' इति डतिप्रत्ययः। विरोधिनः शत्रवः *रिपूर्विपा इति पाठे ङीपो ह्रस्वश्चिन्त्यः। मकुटेषु किरीटेषु सतां प्रशस्तानां मणीनां पद्मरागमणीनां रुग्भिर्दीप्तिभिः अरुणं लोहितं चक्रिरे कृतवन्तः। परेऽन्ये च नृपस्यासिं खड्गं निजशिरोध्यसृजा स्वकीयकण्ठरुधिरेण 'शिरोधिः कन्धरेत्यपि। रुधिरेऽसृग्लोहितास्त्ररक्तक्षतजशोणितमि'त्युभयत्राप्यमरः। अरुणं चक्रिरे। कृञः आत्मनेपदे 'लिटस्तझयोरेशिरेजि'ति झस्य इरेजादेशः। यणादेशश्च। 'कुहोश्चुरि'त्यभ्यासककारस्य चुत्वम् 'उरदि'त्यभ्यासऋवर्णस्यादादेशः। शत्रुषु केचिन्नताः केचिन्मृता इति भावः। अत्र श्यामकृपाणादौ [1][कन्धररुधि][1]रारुणिमवर्णनात्तद्गुणालङ्कारः ॥ ५२ ॥

५३

शरधिवीचिमृदङ्गरवैर्नट-
न्नृपकृपाणलतानवनर्तकी।
समररङ्गतले पुरु तर्षतः
पिबति जीवनमुन्मदविद्विषाम् ॥

शरधीति ॥ शरं वनं धीयतेऽस्मिन्निति शरधिस्समुद्रः अधिकरणे किप्रत्ययः। 'शरं वनं कुशं तोयमि'ति धनञ्जयः। तस्य वीचयस्तरङ्गा एव मृदङ्गाः मर्दलाः तेषां रवैः ध्वनिभिः नटन्ती नटनं कुर्वन्ती नृपस्य राज्ञः

---

* व्याख्यातृदर्शितपाठभेदः॥ [1] कन्धराध (क.) कण्ठरुधि (ग.)

कृपाणलता खड्गलतिकैव नवनर्तकी नूतनलासकी 'शिल्पिनिष्वुन्नि'ति ष्वुन् प्रत्यये 'षिद्गौरादिभ्यश्चे'ति ङीप् प्रत्ययः। पुरु बहु तर्षतः तृष्णावशात् 'पुरुहूः पुरु भूयिष्ठमि'त्यमरः। समररङ्गतले रणरङ्गप्रदेशे उन्मदाः उत्कृष्ट-गर्ववन्तः विद्विषश्शत्रवः तेषां जीवनं प्राणनं [1]'जलं च[1]'जीवनं वर्तने नीरे' इति विश्वः। पिबति पानं करोति। चतुस्समुद्रपर्यन्तं नृपकृपाणस्य प्रति-ब[2][न्धो][2] नास्तीति भावः। उदधिपर्यन्तनटनस्यैकस्यां नर्तक्यामपूर्वत्वान्नव-नर्तकीत्युक्तम्।

अत्र नटनश्रान्तनर्तक्याः तृष्णापरिहाराय जीवनपानं योग्यमिति प्रतीतेस्समालङ्कारः। 'समो योग्यतया योगो यदि सम्भावितः क्वचिदि'ति लक्षणात् ॥ ५३ ॥

५४

क्षितिपखड्गलतापटुदूतिका
सुरवधूमनयद्द्विषतां गणम्।
नृपमरातिमहीमुभयोः प्रियं
कृतवती 'चतुराः खलु योषितः'॥

क्षितीति। क्षितिपखड्गलतैव पटुस्समर्था दूतिका दूती द्विषतां शत्रूणां गणं समूहं सुरवधूं स्वर्गवनितां अनयत्। नयतेर्द्विकर्मकत्वं नृपं राजानमरातिमहीं शत्रुधरणीमनयत्। अहितास्सर्वे निहतास्स्वर्गं याताः। गृहीता च रिपुधरणी राज्ञेति भावः। उभयोश्शत्रुगणनृपयोः प्रियं प्रीतिं कृतवती अकरोत्। भूते क्तवतुः 'उगितश्चे'ति ङीप्। उक्तमेवा[3]र्थमर्थान्त[3]रेण द्रढयति। तथाहि—योषितः

---

[1] लम्भनं च (क). [2] न्धि (क) न्धो (ग.) [3] र्थं भङ्ग्यन्त (क)

स्त्रियः चतुराः अभिज्ञाः। खल्विति वाक्यालङ्कारे जिज्ञासायां वा । 'निषेधवाक्यालङ्कारजिज्ञासानुनये खल्वि'त्मरः । अत्र [1]दूतिकात्वेनारोपित[1]खड्गलतायाः प्रकृतोपयोगित्वात्परिणामालङ्कारः। 'आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम' इति लक्षणात् । रूपके तु न प्रकृतोपयोगित्वं कि[[2]न्तूपरञ्जन][2]मात्रं तदुत्थापितश्चार्थान्तरन्यास इति तयोस्सङ्करः ॥५४॥

५५

गगनसीम्नि यथा शशिमण्डलं
स्फुरति चैकमिहास्य महीतले।
सशरधौ हि सितातपवारणं
विलसति स्थिरमे[3]कमि[3]लेशितुः ॥

गगनेति ॥ किञ्च यथा एकं शशिमण्डलं चन्द्रमण्डलं गगनसीम्नि वियति स्फुरति तथेति शेषः। सशरधौ सिन्धुयुक्ते समुद्रपर्यन्त इत्यर्थः। 'तेन सहेति तुल्ययोग' इति बहुव्रीहौ 'भाषितपुंस्कं पुंवद्गालवस्ये'ति वैकल्पिकः पुंवद्भावः। इहास्मिन्महीतले भुवि अस्येलेशितुः राज्ञः सम्बन्धि एकं केवलं सितातपवारणं श्वेतच्छत्रं स्थिरं शाश्वतं यथा तथा विलसति हि भात्येव।

अत्र विलसति स्फुरति भातीति शब्दभेदेन क्रियारुपसामान्यस्य वाक्ययोरुभयत्र प्रतीते प्रतिवस्तूपमालङ्कारः। प्रतिवस्तूपमा तु 'सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिरि'ति लक्षणात् ॥५५॥

---

[1] दण्डिकत्वे स्थापित (क) [2] न्तु सरञ्जक (क) न्तूपरञ्जक (ग) [3] तदि (क)

५६

जडविमोहनकर्मपटीयसी
नहि रमा परिमोहयितुं क्षमा ।
तमपि किं परिभूतजनेक्षणं
तरणिमाक्रमते निबिडं तमः ॥

जडेति ॥ जडानामज्ञानां विमोहनकर्मणि भ्रमकरणे पटीयसी चतुरा पटुशब्दादतिशयार्थे ईयसुन्प्रत्ययः उगित्वात् ङीप् । रमा श्रीः तं राजनामपि परिमोहयितुं भ्रमयितुं क्षमा शक्ता नहि । निरतिशयैश्वर्यसम्पन्नोऽपि विवेकशालीति भावः । 'यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता । एकैकमप्यनर्थाय किमु यत्र चतुष्टयमि'त्युक्तत्वात्सम्पत्तेर्मोहनकारित्वं प्रसिद्धम् । तमेवार्थं बिम्बप्रतिबिम्ब-भावेन द्रढयति । किमिति ? परिभूतं तिरस्कृतं जनेक्षणं लोकदृष्टिर्येन तत्तथोक्तं निबिडं सान्द्रं तमोऽन्धकारः तरणिं रविं 'द्युमणिस्तरणिर्मित्र' इत्यमरः । आक्रमते आवृणोति किं नावृणोतीति भावः । दृष्टान्तालङ्कारः ॥ ५६ ॥

५७

शिवकथाश्रुतिषु श्रुतिरुत्सुका
निजदृगीशविलोकनतत्परा ।
हरसमर्चनकर्मकरः करः
स्थिरमभूद्भुवि भूमिभृतो भृशम् ॥

शिवेति ॥ भुवि भूमौ स्थिरं शाश्वतं भूमिभृतः राज्ञः श्रुतिः श्रोत्रं भृशमधिकं शिवकथानां श्रुतिषु आकर्णनेषु 'श्रुतिश्श्रोत्रे तथाऽऽम्नाये वार्तायां श्रोत्रकर्मणी'ति विश्वः । उत्सुका आसक्ता अभूत् 'च्लिलुङि' इति च्लिप्रत्यये

'च्लेस्सिच्' इति सिजादेशः। 'गातिस्थाघुपाभूभ्यस्सिचः परस्मैपदेष्वि'ति सिचो लुक्। 'इतश्चे'तीकारस्य लोपः। 'लङ् लुङ्लृङ्क्ष्वडुदात्त' इत्यडागमश्च। निजदृक् स्वकीयदृष्टिः ईशविलोकने तत्परा शिवदर्शनासक्ता अभूत्। करः हस्तः हरसमर्चनमीश्वरपूजैव कर्म क्रिया तत्करोतीति तथोक्तः अभूत्। अत्र वर्णानामसकृदावृत्तेर्वृत्त्यनुप्रासरूपश्शब्दालङ्कारः ॥ ५७ ॥

५८

सततमन्तरुपात्तमहेश्वर-
स्तिमितसंयमनिर्वृतितत्परः।
बहिरुपात्तवधूमुखविस्फुर-
द्विषयभोगरतोऽर्थपतिर्बभौ ॥

सततमिति ॥ अर्थपतिः राजा 'कुबेरे स्यादीश्वरेऽर्थपतिस्तथे'ति (?) विश्वः। सततं निरन्तरं अन्तरन्तरङ्गे उपात्ते प्राप्ते महेश्वरे शिवे स्तिमितो निश्चलः संयमो नियमः। 'नियामो नियमो यामो यमस्संयामसंयमावि'त्यमरः। तेन निर्वृतिः सुखं तस्मिन् तत्परः आसक्तः 'तत्परे प्रसितासक्तावि'त्यमरः। बहिः उपात्तानां प्राप्तानां वधूमुखानां वनिताप्रमुखानां विस्फुरतां विलसतां विषयाणां भोग्यवस्तूनां भोगे अनुभवे रत उत्सुकस्सन् बभौ। प्राकृतजन इव बहिर्विषयभोगलालसः अन्तश्शिवयोगानन्दसन्धानितान्तरङ्ग इत्ययं राजर्षिरिति भावः ॥ ५८ ॥

५९

जनक एव नृपतिः प्रजाऽवने
सुमनुरेव शिवधर्मसङ्ग्रहे।

विजय एव निमिषाहितक्षये
भुवि बुधैरिति स एव भाव्यते ॥

सर्गान्तत्वाद्वृत्तभेदानाह जनक इति ॥ नृपतिः राजा [1]प्रजा[1]ऽवने जनसंरक्षणे जनकः जनकचक्रवर्ती पितैव वा । पुत्रानिव जनानवतीति भावः । शिवस्य ईश्वरस्य धर्माणां पूजादीनां संग्रहे संग्रहणे सुमनुः सुमनुनामकस्मृतिकर्तैव । तस्य धर्मशास्त्रकर्तृत्वेन शैवधर्मसंग्राहकत्वादिति भावः । अथवा शिवधर्मसंग्रहे श्रेयस्करसुकृतसम्पादने सुमनुः सन्मन्त्रवानेव । पञ्चाक्षरीप्रभृति मन्त्रजपेन सकलधर्मलाभादिति भावः । निमिषाहितक्षये निमिषेण क्षणमात्रेण अहितक्षये शत्रुभञ्जने विजयोऽर्जुन एव । विशेषेण जयवानेव वा । 'विजयस्तु जये पार्थे' इति विश्वः । इत्येवं प्रकारेण भुवि भूमौ बुधैर्मनीषिभिः स एव नृपतिरेव विभाव्यते प्रतीयते ।

अत्र नृपतौ प्रजाऽवनादिविषयभेदेन जनकत्वा[2]द्युल्लेखनादुल्लेखा-[2]लङ्कारः । मत्तकोकिलावृत्तम् ॥ ५९ ॥

६०

मधुपरागनिचितं ममालयो
निजसहोदरविरोधि पङ्कजम् ।
इति सकण्टकमपास्य तद्रमा
वसति तस्य विमलाम्बकाम्बुजे ॥

---

[1] लुप्तः (क.) [2] दुल्लेखना (क).

मधुपेति ॥ मम आलयः आश्रयभूतं नित्यपुल्लिङ्गत्वान्न विशेष्य निघ्नता । अत एव 'निकाय्यनिलयालया' इत्यमरः । पङ्कजं कमलं मधु पिबन्तीति मधुपाः मद्यपायिनः 'आतोऽनुपसर्गे कः' इति कप्रत्ययः । तेषां रागेणेच्छया निचितं निबद्धं तेषामिष्टमिति भावः । मधुना मकरन्देन परागेण रजसा च निचितं च । निजसहोदरेण स्वकीयसोदर्येण विरोधोऽस्यास्तीति । तथोक्तम् कमलविरोधिनश्चन्द्रस्य लक्ष्मीसोदरत्वादिति भावः । सकण्टकं कण्टकयुतं शत्रुसहितं च 'कण्टकः क्षुद्रशत्रौ च कर्षस्थानकदोषयोः । रोमाञ्चे च द्रुमाङ्गे चे'ति विश्वः । इति मत्वा रमा श्रीः तत् पङ्कजमपास्य त्यक्त्वा मद्यपायिना सहवासस्य सहोदरविरोधिसमाश्रयस्य कण्टकसहभावस्य युक्तत्वादिति भावः । तस्य राज्ञः विमलाम्बकाम्बुजे निर्मलनयनसरोजे वसति तिष्ठति । 'दृग्दृष्टिनेत्रलोचनचक्षुर्नयनाम्बकेक्षणाक्षीणि' इति हलायुधः ।

अत्रैकस्याः रमायाः पर्यायेण कमलराजनेत्ररूपानेकाश्रयवर्णनात् पर्यायालङ्कारः । 'एकं क्रमेणानेकस्मिन्पर्यायोऽन्यस्ततोऽन्यथे'ति लक्षणात् ॥६०॥

६१

जडरुहे च जनिरस्य वासिता
जडरुहेऽपि जडधीरतः पतिः ।
इति विहाय विधिमाननाम्बुजे
वसति तस्य रुचिरे सरस्वती ॥

जडरुह इति ॥ किञ्च अस्य ब्रह्मणः जडरुहे कमले मूढपितृके इत्यपि ध्वन्यते । जनिरुत्पत्तिः अभूदिति शेषः । जडरुहे वासोऽस्यास्तीति वासी तस्य भावो वासिता स्थितिरपि । प्रथमं मत्वर्थीय इन्प्रत्ययः ततस्तल् ।

अभूत् । अतः कारणात् पतिर्भर्ता जडधीः मन्दबुद्धिः । जन्यस्य जनकगुणानुवृत्तेस्सङ्गदोषस्य च लोकसिद्धत्वादिति भावः । इति मत्वा सरस्वती वाणी विधिं ब्रह्माणं विहाय रुचिरे मनोज्ञे तस्य राज्ञः आननाम्बुजे मुखकमले वसति ।

[1]अत्रातो[1] जडधीरिति हेतुसा[2]ध्यादेर्व[2]र्णनादनुमानालङ्कारः । लक्षणन्तूक्तम् ॥ ६१ ॥

६२

मरुददो हि विषभीषणाननः
पदविहीन इति जिह्मगाधिपम् ।
महिरपास्य नृवरं ययौ सुर-
स्तुतमुदारसुमुखं सुसम्पदम् ॥

मरुदिति ॥ महिः भूमिः 'क्तिच्क्तौ च संज्ञायामि'ति क्तिच्प्रत्ययः । 'कृदिकारादक्तिन' इति विकल्पान्न ङीप् । जिह्मगानां सर्पाणामधिपं नायकं शेषं 'जिह्मगः पवनाशन' इत्यमरः । मरुददः पवनाशनः 'पचाद्यच्' अमराशन इति च ध्वन्यते । विषाद्गरळात् भीषणं भयङ्करमाननं वदनं यस्य स तथोक्तः पदेन चरणेन विहीनः रहितः प्रतिष्ठारहितश्च 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुष्वि'त्यमरः । इत्यपास्य हित्वा क्रूरकर्मणो भीषणकृतेः । प्रतिष्ठाविहीनस्य सङ्गतेरयुक्तत्वादिति भावः । सुरैर्देवैः स्तुतं संस्तूयमानमुदारो दाता महान्वा स चासौ । सुमुखः प्रसन्नश्चेति विशेषणोभयपदकर्मधारयः । तं

---

[1] अत्र (क.) [2] ध्यार्थ(क).

सुसम्पदमधिकैश्वर्यशालिनं नृवरं नृपं ययौ । हि प्रसिद्धौ । अत्र सुरस्तुत-मित्यादिविशेषणानां साभिप्रायकत्वात्परिकरालङ्कारः ॥ ६२ ॥

६३

रुचिररत्नमकुटार्कविस्फुर-
त्सितसरोजमिव मौक्तिकान्वितम् ।
शशधरद्युति सितातपत्रकं
विलसति स्म नृपतेश्श्रियः पदम् ॥

रुचिरेति ॥ नृपतेः राज्ञः सितातपत्रकं श्वेतच्छत्रकं 'स्वार्थे क-प्रत्ययः' । मौक्तिकान्वितं मुक्तामणिसहितं शशधरस्य चन्द्रस्य द्युतिरिव द्युतिर्यस्य तत्तथोक्तम् । श्रियः लक्ष्म्याः पदं व्यञ्जकमाश्रयश्च । रुचिराणि मनोज्ञानि रत्नानि यस्य तन्मकुटं किरीटमेवार्कस्सूर्यः तेन विस्फुरत् विलसत् सितसरोजं पुण्डरीकमिव विलसतिस्मेत्युत्प्रेक्षा । सा च श्लेषरूपकाभ्या-[1]मुत्थापि[1]तेति तेषां सङ्करः ॥ ६३ ॥

६४

रिपुनृपालमहिषीदृगम्बुजो-
द्गतपयोभिरुदिता सरिन्नवा ।
श्रितसोष्मसलिलाङ्गसङ्गता
विरहिणीव शरधिं जगाम सा ॥

---

[1] मन्वि (क)·

रिपुनृपालेति ।। रिपुनृपालमहिषीणां शत्रुस्त्रीणां दृशोऽम्बुजानीव दृगम्बुजानि नयनकमलानि तेभ्यूद्गतैरुत्थितैः पयोभिरम्बुभिः नवा नवीना सरित् नदी उदिता उत्पन्ना विततानि विस्तृतानि सोष्माणि ऊष्मसहितानि सलिलानि जलानि येषां तानि तथोक्तानि तादृशैरङ्गैः अन्तिकभागैः अवयवैश्च सङ्गता 'अङ्गं गात्रान्तिकोपायप्रतीकेष्वप्रधानके' इति विश्वः। अत एव विरहिणी विरहवतीव स्थिता। 'ऋन्नेभ्यो ङीबि'ति ङीप्। सा सरित् शरधिं समुद्रं जगाम ययौ। 'अत उपधाया' इति लिटि उपधावृद्धिः। विरहिणीनां नायकाभिसरणस्य लोकसिद्धत्वादिति भावः।

अत्र रिपुस्त्रीनयनजलस्य सरिद्रूपेण समुद्रपर्यन्ताभिगमनवर्णनेन राज्ञि अत्यद्भुतशौर्यप्रतीतेरत्युक्तिरलङ्कारः ॥ ६४ ॥

६५

पथि शिलाहतपदाग्रनिर्गल-
द्रुधिरसम्पतितहारमौक्तिकम्।
अभिलषन्ति बदरीफलभ्रमात्
वनचरास्तदहितस्त्रिया वने

पथीति ।। वनचराः किराताः तस्य राज्ञः अहितानां शत्रूणां स्त्रिया इति जातावेकवचनं स्त्रीणामित्यर्थः। पथि मार्गे 'भस्य टेर्लोप' इति ङौ पथिन् शब्दस्य टिलोपः। शिलाभिः प्रस्तरैः हतेभ्यः क्षतेभ्यः पदाग्रेभ्यः चरणतलेभ्यः निर्गलति स्रवति रुधिरे शोणिते सम्पतितं सम्यक्पतितं हारमौक्तिकं

त्रुटितमुक्तासरगलितमौक्ति[1]कानी[1]त्यर्थः। बदरीफलभ्रमात् अभिलषन्ति अपेक्षन्ते।

अत्र वनचराणां रक्तसिक्तमुक्तामणिषु बदरीफलभ्रान्तिवर्णनाद्भ्रान्तिमदलङ्कारः। स च मुक्तामणिगतरुधिरारुणिमसंग्रहमूलक इति तद्गुणालङ्कारेण सङ्कीर्णः॥ ६५॥

६६

रणमुखे तृणमुखान्रिपून्नृपान्
परिविहाय जनपः पशूनिव।
प्रचलखड्गलतया छिनत्त्यरीन्
मदमुखानभिमुखानिभानिव॥

रणेति॥ जनपः राजा रणमुखे युद्धप्रारम्भे तृणानि मुखेषु वदनेषु येषां ते तथोक्तास्तान् अन्यत्र अत एव पशूनिव स्थितान् रिपून् शत्रून् नृपान् भूपतीन् एकत्र भयात् अन्यत्र क्षुधावशादिति भावः। परिविहाय हित्वा अभिमुखान् सम्मुखान्। मदो गर्वः मुखं प्रधानं येषां ते, अन्यत्र मदः दानजलं मुखे मुखैकदेशगण्डस्थले येषां ते तथोक्ताः अत एव इभान् द्विपानिव स्थितानित्युत्प्रेक्षा। अरीन् शत्रून् प्रचलयोज्वलया खड्गलतया खड्गधारया छिनत्ति प्रहरति। छिदिर्-द्वैधीकरण इति धातोः 'रुधादिभ्यः श्नमि'ति श्नम्। मित्वात् 'मिदचोन्त्यात्पर' इति तस्यान्त्यात्परत्वं च॥ ६६॥

---

[1] कमि (क.)

६७

युधि पलायनपरा नृपाः परे
गहनमेत्य मृगराजगर्जनम् ।
नृपतिगर्जनधिया निशम्य ते
मुमुहुरद्भुतभिया म[1]षी[1]भृतः ॥

युधीति॥ युधि युद्धे अद्भुतभिया विचित्रभीत्या अत्युत्कृष्टभियेत्यर्थः। पलायनपराः दूरगमनासक्ताः म[2]षी[2]भृतः स्वरूपगोपनार्थं म[3]षी[3]लेपं बिभ्राणा इत्यर्थः। परे शत्रवः ते प्रसिद्धाः नृपाः गहनमरण्यमेत्यागत्य मृगराजगर्जनं सिंहनादं निशम्य श्रुत्वा नृपतेश्चोलमहीपालस्य गर्जनमारभटमिति धिया बुद्ध्या मुमुहुः मूर्छां ययुः। मुह वैचित्ये इति धातोर्लिट्।

अत्र सिंहनादे शत्रूणां नृपगर्जनभ्रान्तिवर्णनाद्भ्रान्तिमदलङ्कारः ॥६७॥

६८

द्विपमहीध्रतुरगोर्मिसङ्कुलं
रथवहित्रभटमीनसम्भृतम् ।
पिबति तीक्ष्णनृपतिप्रतापरु-
ग्जलधिवह्निररिसैन्यसागरम् ॥

द्विपेति॥ तीक्ष्णः तिग्मः नृपतेः राज्ञः प्रतापरुक् विक्रमदीप्तिरेव, जलधिवह्निर्बडबाग्निः 'और्वस्तु समुद्रवह्निस्स्याद्वाडवो बडबानल' इति हलायुधः।

---

[1] ही (क). [2] ही (क) [3] हीं (क).

द्विपैः गजैरेव महीध्रैः पर्वतैः तुरगैरश्वैरेव ऊर्मिभिस्तरङ्गैश्च सङ्कुलं सङ्कीर्णं रथैः स्यन्दनैरेव वहित्रैस्तरणिभिः भटैर्योधैरेव मीनैर्मत्स्यैः सम्भृतं व्याप्तं 'तरणिर्वेलावहित्रमि'ति हलायुधः। [1]अरिसैन्यं शत्रुसेनैव सागरः समुद्रः तं पिबति। 'सैन्यं चक्रं चमूर्वरूथिनी'ति हलायुधः।[1]

अत्र नृपविक्रमादिष्वौ[2][र्वादि][3]तादात्म्यवर्णनाद्रूपकालङ्कारः ॥६८॥

६९

निशितखड्गदलिताहितद्विप-

स्फुरितकुम्भगलितैर्धरावधूम्।

न तु विभूषयति मौक्तिकैः पुनः

क्षरितरक्तघुसृणेन भूपतिः ॥

निशितेति ॥ भूपतिः राजा निशितेनोत्तेजितेन खड्गेनासिना दलितानां छिन्नानां पतितानां अहितद्विपानां शत्रुसम्बन्धिगजानां स्फुरितेभ्यः उल्लसितेभ्यः कुम्भेभ्यः मूर्धभ्यः गलितैः च्युतैः मौक्तिकैस्तु मुक्ताफलैरेव 'तु स्याद्भेदेऽवधारणे' इत्यमरः। धरा भूः सैव वधूर्जाया तां 'वधूर्जाया-स्नुषे'त्यमरः। न विभूषयति नालङ्करोति। किन्तु क्षरितं स्रुतं रक्तं शोणितमेव घुसृणं कुङ्कुमं तेन पुनरित्यप्यर्थे। विभूषयति ॥६९॥

७०

तपनवंश्यखरखड्गखण्डितैः

तपनबिम्बमरिभिर्विभिद्यते।

---

[1] लुप्तभागः (ग.) [2] र्वं (क)

युधि समत्सरनृपैर्विमुच्यते
नहि रिपुत्वमहितैर्मृतैरपि ॥

तपनवंश्य इति ॥ युधि युद्धे तपनस्य सूर्यस्य वंशेभवस्तपनवंश्यः चोलमहीपालः तस्य खरखड्गेन निशितकौक्षेयकेण खण्डितैः छेदितैः अरिभिः शत्रुभिः समत्सरनृपैः [1]'क्रुद्ध'भूपतिभिः तपनबिम्बं सूर्यमण्डलं विभिद्यते विदार्यते। भिदिर् विदारण इति धातोः कर्मणि यक्प्रत्ययः। रिपवोऽपि युधि रोषयुक्ता एव निहताः। क्रोधं विहाय शरणागतास्तु रक्षिता एवेति समत्सर। शब्देन गम्यते। तपनस्य चोलमहीपालवंश[2]मूल[2]त्वेन तत्सम्बन्धित्वादिति भावः - रणमुखनिहतानां सूर्यमण्डलभेदत्वं सिद्धम्। तदुक्त— 'द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ। परिव्राड्योगयुक्तश्च रणे चाभिमुखो हत' इति। उक्तमर्थ-मर्थान्तरेण समर्थयति। तथाहि–मृतैः गतासुभिरपि अहितैः शत्रुभिः रिपुत्वं विरोधित्वं न विमुच्यते।

अत्र रिपूणां निजशत्रुपक्षपराक्रमवर्णनात्प्रत्यनीकालङ्कारः। 'प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रम' इति लक्षणात्। तदनुप्राणितश्चार्थान्तरन्यासः ॥७०॥

७१

अनिमिषानुकृतिमेव केवलां
रचितवान् कमलभूः पुरादृशोः।
अनिमिषत्वमपि पौरयोषितां
नृपवपुर्विलसनेन सम्भृतम् ॥

---

[1] क्रोधयुक्त (ग). [2] म (क).

अनिमिषेति ॥ कमलभूः ब्रह्मा पुरा पूर्वं पौरयोषितां पुरस्त्रीणां दृशोः नयनयोः केवलामनिमिषानुकृतिं मत्स्यसादृश्यमेव रचितवान् कृतवान्। नृपस्य राज्ञः वपुर्विलसनेन तनुप्रकाशेन अनिमिषत्वं निमेषरहितत्वमपि मत्स्यत्वमिति गम्यते। सम्भृतं सम्पादितम्। स्वभावान्मत्स्यसदृशः पुरस्त्रीदृशः राजसौन्दर्य-विलोकनकौतुकान्निर्निमिषा बभूवुरिति भावः ॥७१॥

७२

वसति तस्य महिषी मनोहरा
युवतिरप्यभिधया 'कलावती'।
शुभगुणाऽभिनवरूपविभ्रमा
पुरभिदङ्घ्रिनलिनार्चनोत्सवा ॥

अथ राजानं प्रस्तुत्य षड्भिश्श्लोकैस्तस्य भार्यां स्तौति वसतीत्या-दिना ॥ पुरभिदः शिवस्य अङ्घ्रिनलिनयोः पदकमलयोः अर्चनं पूजैव उत्सव उद्धवो यस्यास्सा तथोक्ता 'मह उद्धव उत्सव' इत्यमरः। अभिनवा-वपूर्वौ रूपविभ्रमौ सौन्दर्यविलासौ यस्यास्सा तथोक्ता 'रूप स्वभावे सौन्दर्य इति विश्वः। शुभाः शोभनाः गुणाः पातिव्रत्यादयः यस्यास्सा तथोक्ता अपीति चार्थः। अभिधया नाम्ना [1]कलावती[1] कलावतीत्यभिख्यावतीत्यर्थः' मनोहरा मनोज्ञा महिषी कृताभिषेका तस्य राज्ञः युवतिस्तरुणी वसति तिष्ठति।

अत्र समृद्धिमद्वस्तुवर्णनादुदात्तालङ्कारः ॥७२॥

---

[1] लुप्तः (क.)

७३

भुजकटाक्षवदनस्थितिस्सदा
क्षितिरमाविधिवधूभिरार्जिता ।
सकलमङ्गमधिपस्य चेतसा
सह चकर्ष वनिता गुणान्विता ॥

भुजेति ॥ सदा अधिपस्य राज्ञः 'राजाऽधिपः प्रभुः स्वामी'ति धनञ्जयः । भुजयोर्बाह्वोः कटाक्षेष्वपाङ्गदृष्टिषु वदने मुखे च स्थितिरवस्थानं क्षितिर्भूः रमा श्रीः विधिवधूर्वाणी च ताभिरार्जिता सम्पादिता गुणान्विता सद्गुणयुक्ता वनिता कलावती चेतसा चित्तेन सह सकलं समग्रं कलायुक्तं वा । अङ्गं चकर्ष जहार । अत्र क्षित्या भुजयोः रमया कटाक्षेषु वाण्या वदने स्थितिरार्जितेति क्रमेणान्वयादयथासङ्ख्यालङ्कारः । चेतसा सहाङ्गं जहारेति सहभाववर्णनात्सहोक्तिश्च । तयोस्तिलतण्डुलवत्संसृष्टिः । 'सैषा[1]संसृष्टिरेतेषां भेदेन यदिह स्थिति'रिति लक्षणात् ॥७३॥

७४

मुखविधुस्मितकटाक्षचन्द्रिका-
विलसनेन परिवर्धतेऽनया ।
नृपतिसम्मदसुधापयोनिधि-
र्निभृतमङ्गजकलाप्रवीणया ॥

---

[1] येषां (क) शेष (ग)

मुखेति ।। अङ्गजकला मन्मथशिल्पं मदनतन्त्रं वा तत्र प्रवीणया निपुणया :अनया तरुण्या (कर्त्र्या) मुखविधोर्वदनेन्दोः स्मितं हसनं कटाक्षो-ऽपाङ्गदर्शनं च तयोरेव चन्द्रिकायाः कौमुद्याः विलसनेन प्रकाशेन (करणेन) नृपतेः राज्ञः सम्मदः हर्ष एव सुधापयोनिधिः क्षीरसमुद्रः 'प्रमोदामोदसम्मदा' इत्यमरः । निभृतं भृशं परिवर्ध्यते वृद्धिं नीयते वृधु वृद्धाविति धातोः कर्मणि यक्प्रत्ययः । 'पुगन्तलघूपधस्यचे'ति गुणः । यद्यपि कटाक्षैरतिनीलतामित्यादौ नीलगुणवत्तयैव कविसम्मतेषु कटाक्षेषु, सितचन्द्रिकाताद्रूप्यमनुपपन्नम् । तथाऽपि विशेषविभववतीनां कटाक्षेषु धावल्यमपि कवयो वर्णयन्ति । अत एव 'मन्दारमाल्यनिकुरुम्बसहोदरेण । गौरीकटाक्षनिकरेण करम्बितस्ये'-त्यभिनवकालिदासेनोक्तम् । रूपकालङ्कारः ।।७४।।

७५

मणि[1]रुदार[1]गुणमन्तरादद्दे
तदुचितं नृपशिरोमणिं त्विमम् ।
तदपि चित्रमयमन्तरादद्दे
यदिह हृद्यरुचिरङ्गनागुणः ।।

मणिरिति।। इह भुवि मणिः रत्नम् [2]उदारो[2] गुणस्सूत्रं तमन्तरभ्यन्तरे आददे जग्राह । तत् मणिकृतगुणग्रहणमुचितं युक्तम् । किन्तु हृदया मनोज्ञा रुचिः प्रकाशो यस्य स तथोक्तः अथवा हृद्यरुचिः रम्यकान्तिरिति ।

---

[1] रपार (क). [2] अपारो (क).

अयमङ्गनायाः गुणः सौन्दर्यादिरपि इमं नृपशिरोमणिं राजेन्द्रमन्तराददे स्ववशं चकारेति यत्, तत् चित्रमाश्चर्यकरम्। मणौ गुणग्रहणस्य लोकसिद्धत्वेऽपि गुणे मणिग्रहणस्य विरुद्धत्वाद्विरोधालङ्कारः। वनितासौन्दर्यादिगुणः राजेन्द्रं वशीचकारेति विरोधपरिहारः ॥७५॥

७६

मुखसरोजकुचचक्रशोभिनी
जघनसैकतवती दृगुत्पला।
वलितरङ्गकलिताङ्गनापगा
विरुरुचे नृपसमुद्रसङ्गता ॥

मुखेति ॥ मुखेनैव सरोजेन कमलेन कुचाभ्यां स्तनाभ्यामेव चक्राभ्यां चक्रवाकाभ्यां शोभते प्रकाशत इति तथोक्ता। 'ताच्छील्ये णिनिः' नान्तत्वात् ङीप्। जघनं कटिपुरोभाग एव सैकतं द्वीपमस्या अस्तीति तथोक्ता 'पश्चान्नितम्बस्स्त्रीकट्याः क्लीबे तु जघनं पुरः' इत्यमरः। दृशौ नेत्रे एव उत्पले कैरवे यस्यास्सा तथोक्ता। वलिभिः उदररेखाभिरेव तरङ्गैरूर्मिभिः कलिता व्याप्ता नृपेणैव समुद्रेण सङ्गता सम्पृक्ता अङ्गना युवतिरेव आपगा सरित् विरुरुचे रेजे। रूपकालङ्कारः ॥७६॥

७७

गुणनिधिरुपधाऽनिरुद्धकीर्तिः
नयविदमित्रनृपैरपि प्रणुत्यः।

पतिहितचरितश्शिवैक[1]भक्त-
शशु[1]श्चिरभवत्सचिवोऽस्य शास्त्रवेत्ता ॥

राजानमेवं प्रस्तुत्य सचिवं वर्णयति गुणेत्यादिश्लोकद्वयेन ॥ गुणनिधिर्गुणाश्रयः उपधया प्रतिब[2]न्धेन[2] अनिरुद्धा अवारिता कीर्तिर्यशो यस्य स तथोक्तः। नयं नीतिं वेत्ति जानातीति नयवित्। अमित्रनृपैश्शत्रुमही-पालैरपि प्रणुत्यः स्तोतव्यः 'णोपदेशत्वान्नस्य णत्वं' अन्यैस्स्तूयत एवेत्यपि-शब्देन व्यज्यते। पत्युः राज्ञः हितं प्रिय चरितं वर्तनं यस्य स तथोक्तः। शिवस्य एकस्य केवलस्य भक्तः। 'एके मुख्यान्यकेवला' इत्यमरः। शास्त्रवेत्ता शास्त्रज्ञः शुचिः परिशुद्धः। [3]अस्य[3] राज्ञः सचिवोऽमात्यः अभवत्। उदात्तालङ्कारः। पुष्पिताग्रावृत्तम्—'अयुजि न युगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रे'ति लक्षणात् ॥७७॥

७८

स्वतेजोभिः कुर्वन्परकुवलयग्लानिमधिप-
प्रभादर्शी पद्माञ्चितरुचिरकोशं विपुलयन्।
वितन्वन् सच्चक्रप्रमदमरिराजं निरसयन्
असौ गाङ्गेयाख्यस्स्फुरति सचिवस्सोऽरुण इव ॥

[4]स्वेति[4] ॥ गाङ्गेय इत्याख्या नाम यस्य स तथोक्तः सः प्रसिद्धः असौ सचिवः मन्त्री स्वतेजोभिः निजप्रतापैः निजदीप्तिभिश्च 'तेजो धाम्नि पराक्रम' इति विश्वः। परकुवलयस्य शत्रुभूमण्डलस्य उत्पलस्य च ग्लानिं

---

[1] लुप्तभागः (क). [2] न्धने (ग.) [3] लुप्तः (क.) [4] लुप्तः (क).

नाशं कुर्वन् अधिपस्य चोलभूपालस्य सूर्यस्य प्रभां दीप्तिं दर्शयति प्रकटीकरोतीति तथोक्तः । 'दृशेर्ण्यन्ताण्णिनिः' । अरुणोदयानन्तरमेव सूर्यप्रभाप्रकटनादिति भावः । पद्मया श्रिया अञ्चितं महितं रुचिरं रम्यं कोशं घनगृहं पद्मकोरकं च 'कोशोऽस्त्री कुट्मलेऽर्थौघे' इति रत्नमालायाम् । विपुलयन् वर्धयन् अन्यत्र विकासयन् सतां साधूनां चक्रस्य समूहस्य प्रमदं हर्षम् अन्यत्र सतां प्रशस्तानां चक्राणां चक्रवाकाणां प्रमदं वितन्वन् विदधानः अरिश्शत्रुः स चासौ राजा च अरिराजः । 'राजाहस्सखिभ्यष्टच्' इति समासान्तष्टच्प्रत्ययः । एकत्र शत्रुभूपालः अन्यत्र चन्द्रः राजा, 'मृगाङ्के क्षत्रिये चन्द्र' इत्यमरः । तं निरसयन् निस्तेजस्कं कुर्वन् सन् अरुण इव सूर्यसारथिरिव स्फुरति भाति । अत्र निजते[1]जोभिः[1] परकुवलयग्लानिजननादिधर्मसम्बन्धेन सचिवेऽरुणतादात्म्योत्प्रेक्षणादुत्प्रेक्षालङ्कारः स च श्लेषानुप्राणित इति तयोस्सङ्करः । शिखरिणीवृत्तम् । लक्षणन्तूक्तम् ॥७८॥

७९

इति सकलधरित्रीनाथकोटीरकोटि-
प्रकटितमणितेजोराजिनीराजिताङ्घ्रिः ।
गुणमणिगणसिन्धुस्स्वीकृतानन्दसान्द्रः
क्षितिपतिरवतस्थे शम्भुपादाब्जभृङ्गः ॥

इतीति ॥ इत्येवंप्रकारेण सकलधरित्रीनाथानां समस्तभूपालानां कोटीरकोटिषु किरीटाग्रेषु प्रकटितानामुल्लसितानां मणीनां रत्नानां तेजोराजिभिः

---

[1] जः शत्रु (क ग).

दीप्तिश्रेणिभिः नीराजितौ नीराजनवत्कृतौ अङ्घ्री चरणौ यस्य स तथोक्तः। 'राजतेर्ण्यन्तात् क्तप्रत्ययः'। सकलनृपसंसेवित इति भावः। गुणादीनां शौर्यादीनामेव मणीनां रत्नानां गणस्य समूहस्य सिन्धुस्समुद्रः सकलगुणसम्पन्न इति भावः। स्वीकृतेनाङ्गीकृतेन आनन्देन सुखेन सान्द्रः सम्पूर्णः शम्भुपादाब्जयोः ईश्वरचरणारविन्दयोः भृङ्गः भ्रमरभूतः निरन्तरशिवचरणासक्तचित्त इत्यर्थः। क्षितिपतिश्चोलभूपतिः अवतस्थे अतिष्ठत्। 'ष्ठा गतिनिवृत्ता'विति धातोर्लिट्। शर्पूर्वाः खयः इत्यभ्यासस्य [खयः शेषः] तस्य 'अभ्यासे चर्चे'ति तकारः। 'धात्वादेष्षस्स' इति षकारस्य सकारः।

अत्र कोटीरकोटीति वर्णानामसकृदावृत्तेर्वृत्त्यनुप्रासोऽलङ्कारः। मालिनीवृत्तम् ॥७९॥

८०

स्वर्भेरीभूरिरावस्फुटघननिनदोद्यज्जटाद्योतविद्यु-
द्भ्राडभ्राभ्रात्पतन्त्यां पतदुडुसलिलग्रावयुक्पुष्पवृष्टौ।
भ्राम्यद्दन्तित्वगञ्चत्पटभुजपटलीपक्षकः पादघात-
क्षिप्तव्यालेन्द्रदर्पः प्रभुरवतु नटन्वस्सदा नीलकण्ठः॥

सर्गान्तत्वान्मङ्गलमाचष्टे स्वर्भेरीति। स्वर्भेरीभूरिरावः स्वर्लोकदुन्दुभिबहुलनिर्घोषः स एव स्फुटघननिनदः प्रकटितमेघगर्जितं यस्य तत्तथोक्तम्। उद्यज्जटाद्योताः उज्वलज्जटादीप्तय एव विद्युतः सौदामिन्यः ताभिः भ्राजत इति तथोक्त तादृशं चाभ्रं गगनमेवाभ्रं मेघः तस्मात्। भ्राडभ्रपदस्य केवलाभ्रपदस्य च सरूपत्वाभावान्नैकशेषप्रसक्तिः। पतद्भिः स्खलद्भिः उडुभिरेव सलिलग्रावभिः करकैः युनक्तीति तथोक्ता। 'क्विप्चे'ति

क्विप्प्रत्ययः। सा चासौ पुष्पवृष्टिः कुसुमवर्षं तस्यां पतन्त्यां स्रुतायां सत्याम्। भ्राम्यन् चलन् दन्तित्वचा गजचर्मणा अञ्चन् खचितः पटः वस्त्रं येषां तेषां भुजानां बाहूनां पटली समूह एव पक्षाः गरुतः यस्य स तथोक्तः। 'समूहे पटलं न ना' 'गरुत्पक्षच्छदाः पत्रमि'त्युभयत्राप्यमरः। पादघातैश्चरणघट्टनैः क्षिप्तः निरस्तः व्यालेन्द्रस्य शेषस्याहीन्द्राणां च दर्पः गर्वो येन स तथोक्तः। एकत्र भुवनं बिभ्रतश्शेषस्य पादघातभेदासहनात्। अन्यत्र तत्कृतहिंसनादिति भावः। नटन् नाट्यं कुर्वन् प्रभुस्समर्थः नीलकण्ठः शिवः मयूरश्च वः युष्मान् सदा अवतु रक्षतु। 'नीलकण्ठौ शिखीश्वरावि'ति रत्नमालायाम्। जटाटीरनटनसमये देवदुन्दुभयो नेदुः। अन्तरिक्षात्पुष्पवृष्टयो जाताः। पाद-घातेन शेषोऽपि भीत इति भावः।

अत्र भेरीरवादिषु घनगर्जिततादात्म्यारोपणाद्रूपकालङ्कारः। श्लेष-स्त्वङ्गमिति तयोस्सङ्करः।

परुषाक्षरबन्धत्वादारभटीवृत्तिः—'परुषाक्षरसन्दर्भा वृत्तिरारभटी मते'ति लक्षणात्। स्रग्धरावृत्तम् ॥८०॥

इति सकलभुवनैकवल्लभनिखिललेखनायकनिकायसन्ततसमर्चित-परम'शिवलिङ्ग'पादारविन्दषट्पदायमानलसदुभयकविता-विशारद'श्रीषडक्षरिदेव'विरचिते 'चोळभूपालीये' 'कविकर्णरसायनाख्ये' महाकाव्ये नगरादिवर्णनं नाम तृतीयस्सर्गः ॥

★

'त्रेस्सम्प्रसारणञ्चे'ति तीयस्सम्प्रसारणञ्च । व्याख्यातमेतत् ॥

इति समस्तसुजनस्तोमसंस्तूयमाननिस्तुलगुणग्रामाभिरामश्रीमत्सालिराज-कुलकलशजलनिधिपूर्णकलाधरश्रीचेन्नबसवनृपतनूभवश्रीमुदियमहीपाल-प्रोत्साहित 'श्रीवेङ्कनसुधी' विरचितायां कविकर्णरसायनव्याख्यायां

'साहित्यसुधोदयाभिख्यायां'

तृतीयस्सर्गः

चतुर्थस्सर्गः

१

अथ कथां च मृकण्डुतनू[1]भु[1]वः
श्रुतवती महिषी स्वयमात्मनः ।
सुतविहीनतया शुचमादधे
श्रुतनया तनयात्तमनोरथा ॥

अथेति ॥ श्रुतः प्रसिद्धः नयो विनयः यस्यास्सा तथोक्ता अथवा श्रुता विदिताः नयाः शास्त्राणि यया सा तथोक्ता । सकलशास्त्रज्ञानवतीत्यर्थः । महिषी राजपत्नी स्वयं मृकण्डुतनू[2]भु[2]वः मार्कण्डेयस्य कथां श्रुतवती आकर्णितवती । 'भूते क्तवतुप्रत्ययः । उगित्वात् ङीप् । अथ कथाकर्णनानन्तरं आत्मनः स्वस्याः सुतेन पुत्रेण विहीनो रहितः सुतविहीनः तस्य भावस्तत्ता तया तनये पुत्रे आत्त आहितः मनोरथः अभिलाषो यस्यास्सा तथोक्ता सती शुचं शोकमादधे कृतवती च । 'मन्युशोकौ तु शुक् स्त्रियामि'त्यमरः । दधातेर्लिट्यात्मनेपदत्वात् 'लिटस्तझयोरेशिरेजि'ति तस्यैशादेशः । 'अभ्यासे चर्चे'ति धस्य दकारः ।

अत्र तनया तनया इति भिन्नार्थकयोश्शब्दयोः पुनश्श्रुतेर्यमकाख्यश्शब्दालङ्कारः । स च पादैकदेशगतत्वात्पदभागगतः समासगतश्च । तदुक्तं काव्यप्रकाशे—

---

[1] भ (क) [2] भ (क).

'अर्थे सत्यर्थभिन्नानां शब्दानां या पुनश्श्रुतिः ।
यमकं पादतद्भागवृत्ति तद्यात्यनेकताम् ।।' इति

अस्मिन् सर्गे द्रुतविलम्बितवृत्तानि । लक्षणन्तूक्तम् ॥१॥

२

प्रियसखीमुखमाशु विलोक्य सा
तरलबाष्पकणाकुललोचना ।
अवददेवमतीव विषादतः
तनुभवानुभवाहितमानसा ।।

प्रियसखीति ।। सा कलावती तनुभवस्य सुतस्य अनुभवे उपलब्धौ आहितमासक्तं मानसं मनो यस्यास्सा तथोक्ता अतीवात्यन्तं विषादतः खेदात् । 'सदेरप्रतेरि'ति सस्य षत्वम् । तरले चञ्चले बाष्पकणैरश्रुबिन्दुभिः आकुले व्याकुले लोचने नेत्रे यस्यास्सा तथोक्ता सती प्रियसख्या इष्टवयस्यायाः मुखमाननं विलोक्य दृष्ट्वा आशु द्रुतमेवं वक्ष्यमाणप्रकारेण अवदत् उवाच । वद व्यक्तायां वाचीति धातोर्लङ् ।।२।।

३

अमितसम्पदियं मम निष्फला
सखि मनोज्ञसुतेन विनाऽधुना ।
कथमहं भुवि जानुचरं लभे
कृतमुदन्तमुदञ्चितविग्रहम् ।।

अमितेति ॥ हे सखि भुवि भूमौ मनोज्ञसुतेन रमणीयतनूभवेन विना मम अधुना इदानीमियं परिदृश्यमाना अमिता अपरिमिता सम्पत् श्रीः निष्फला निरर्थिका 'इदुदुपस्य चाप्रत्ययस्ये'ति सस्य मूर्धन्यादेशः। भवतीति शेषः। अहं, चरतीति चरः जानुभ्यां जङ्घाभ्यां चरः जानुचरः। पचाद्यच्, तम्। न तु जानुभ्यां चरतीत्युपपदसमासः। 'चरेष्ट' इत्यधिकरणोपपदे एव ट-प्रत्ययस्य विधानात्। बालानां जानुचरस्यानन्दकरत्वादिति भावः। अत एव कृता जनिता मुत् हर्षो येन तं तथोक्तम्। उदञ्चितो महितः विग्रहः शरीरं यस्य तं तथोक्तं 'शरीरं वर्ष्म विग्रह' इत्यमरः। तं सुतं कथं केन प्रकारेण लभे प्रा[1]प्नो[1]मि। डुलभष् प्राप्ताविति धातोर्लट् ॥३॥

४

चरमदेशमुपेत्य महीभृतः
जननि कुत्र वसामि वदेत्यलम्।
स्मितमुखोऽङ्कमुपैष्यति मे कदा
स सहसा सहसारमुदागतः ॥

चरमेति ॥ महीभृतो राज्ञः चरमदेशं पश्चाद्भागं 'अन्तो जघन्यं चरममन्त्यं पाश्चात्यपश्चिममि'त्यमरः। उपेत्य प्राप्य हे जननि! अम्ब! अहमिति गम्यमानत्वादप्रयोगः। कुत्र वसामि तिष्ठामि वद ब्रूहि। इत्येवं प्रकारेण सः सुतः अलं भृशं स्मितमुखः हसन्मुखः सारमुदा उत्कटहर्षेण

---

[1] प्स्या (क.)

सह वर्तत इति ससारमुत्। 'वोपसर्जनस्ये'ति सभावस्य वैकल्पिकत्वान्न सः। सहसा त्वरया आगतस्सन् मे मम अङ्कमुत्सङ्गं 'उत्सङ्गचिह्नयोरङ्क' इत्यमरः। कदा उपैष्यति प्राप्स्यति 'एत्येधत्यूठ्सु' इति [1]वृ[1]द्धिः। स्वभावोक्तिरलङ्कारः ॥४॥

५

द्रुतमरालकिशोरमनुद्रुत-
श्चलशिखण्डशिराः क्वणदन्दुकः।
सखि! कदा विहरिष्यति विभ्रमैः
सह स नो हसनोदयवान्पुरः॥

द्रुतेति॥ हे सखि! द्रुतं धावन्तं मरालकिशोरं हंसशिशुमनुद्रुतः अनुसृत्य धावन् अत एव चलः लोलः शिखण्डकः काकपक्षो यस्य तत्तथोक्तं चलशिखण्डं शिरो मूर्धा यस्य स तथोक्तः 'काकपक्षः शिखण्डक' इत्यमरः। क्वणन् ध्वनन् अन्दुकः [2](नूपुरः यस्य सः)[2] विभ्रमैः विलासैस्सह हसनस्य हासस्य उदयो यस्यास्तीति हसनोदयवान् सः सुतः नोऽस्माकं पुरोऽग्रतः कदा विहरिष्यति दीव्यति। स्वभावोक्तिरलङ्कारः।

यद्यपि किशोरशब्दोऽश्वशिशुपरः। अत एव 'अश्वपोतः किशोरक' इति हलायुधः। तथाप्युपचारादन्यत्रापि प्रयुज्यते अत एव 'स्मेराननं स्मरति गोपवधूकिशोरमि'ति लीलाशुकः ॥५॥

---

[1] धि (क ग). [2] नास्ति (क. ग.)

६

*प्रतिशिशुत्वधिया मणिकुड्यग-
प्रतिफलं स्वकमैक्ष्य[2]मुप[2]स्पृशन् ।
हसति यः कुतुकी स च लभ्यते
महितलेहितले[3]रिति[3]दानया (?) ॥

७

वनमिवाशुकशोभि नवाम्रकं
सर इवानलि चार्वपि साम्बुजम् ।
असुतभासि तथाऽपि च शोभते
न सदनं सदनन्तशुभास्पदम् ॥

वनमिति ॥ नवा अपूर्वाः आम्रा रसालाः यस्मिन् तत् 'आम्रश्चूतो रसालोऽसावि'त्यमरः। 'शेषाद्विभाषे'ति समासान्तः कप् प्रत्ययः। शुकैः शोभत इति शुकशोभि तथा न भवतीत्यशुकशोभि। वनमाराम इव। पल्लवपुष्पसमृद्धमपि सहकारवनं कीररहितं निरर्थकमिति भावः। साम्बुजं कमलसहितमपि अलिभिः भृङ्गैः चारु रम्यं न भवतीत्यनलि चारु सरः कासर इव च। तथा सतां प्रशस्तानामनन्तानां बहूनां शुभानां श्रेयसामास्पदमाश्रयोऽपि सुतेन पुत्रेण भासते प्रकाशत इति सुतभासि; तथा न

* अस्य श्लोकस्य टीका कस्यामपि मातृकायां नास्ति अशुद्धयश्च दृश्यन्ते। प्रक्षिप्तस्स्यात् ६१ तमश्लोकं पश्यत [2] [दुप] [3] [रित]

भवतीत्यसुतभासि । सदनं मन्दिरं न शोभते न भाति । सकलसम्पत्साफल्य-सम्पादकस्सुत इति भावः ।

अत्र पुत्रेण विना सकलसम्पत्सम्पूर्णस्य सदनस्य विफलत्वापादनाद्विनोक्तिरलङ्कारः ॥७॥

८

इति विलप्य विसृष्टविभूषणा
रहसि तल्पनिषक्तवपुर्वधूः ।
सहचरीषु विषादविधायिनी
निजगृहे जगृहे हृदि वेदनाम् ॥

इतीति ॥ वधूः कलावती इति उक्तप्रकारेण विलप्य परिदेवनं कृत्वा 'विलापः परिदेवनमि'त्यमरः । निजगृहे विसृष्टविभूषणा परित्यक्ताभरणा रहसि एकान्ते तल्पे आस्तरणे निषक्तं शयितं वपुः शरीरं यस्यास्सा तथोक्ता । 'उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसेचसञ्जस्वञ्जामि'ति सस्य षत्वम् । अत एव सहचरीषु सखीषु विषादं खेदं विदधाति करोतीति तथोक्ता सती । हृदि मनसि वेदनां व्यथां 'घट्टिवन्दिविदिभ्यश्चेति वाच्यमि'ति युच्प्रत्ययः । जगृहे स्वीचकार । ग्रह उपादाने इति धातोर्लिट् । 'ग्रहिज्ये'त्यादिना सम्प्रसारणं 'कुहोश्चुरि'त्यभ्यासस्य चुत्वं 'उरदि'त्यभ्यासस्याकारः । यद्यपि सहचरीत्यत्र 'चरेष्ट' इत्यधिकरणोपपदप्रयुक्तस्य टप्रत्ययस्याप्रवृत्तेः पचाद्यच्प्रत्यय एव वाच्यः । तथापि निमित्ताभावात् ङीबनुपपन्नः । तथापि पचादिषु चरडिति पाठात् टित्त्वेन टिड्ढाणि'त्यादिना ङीपि सम्भवतीत्यवगन्तव्यम् ॥८॥

९

अथ विसृष्टसभस्समुपागतः
स नृपतिस्सदनं तदधिष्ठितम् ।
परमपश्यदमन्दमनोगदां
स्वमहिलां महिलाञ्छितसद्भुजः ॥

अथेति ॥ मह्या भुवा लाञ्छितावङ्कितौ अत एव सन्तौ प्रशस्तौ भुजौ यस्य सः तथोक्तः । निजभुजाहितभूमण्डल इति भावः । सः नृपतिः राजा विसृष्टा त्यक्ता सभा येन सः । अथानन्तरं तया पत्न्या अधिष्ठितमाश्रितं सदनं मन्दिरमुपागत आयातस्सन् 'गत्यर्थाकर्मके'त्यादिना कर्तरि क्तप्रत्ययः । अमन्दोऽनल्पः मनोगदो मनोव्यथा यस्यास्तां स्वमहिलां निजरमणीं 'वनिता महिला तथे'त्यमरः । परं केवलमपश्यत् दृष्टवान् । तादृगवस्थापन्नपत्नीदर्शनात् राज्ञश्शोच्यता समभूदिति परमित्यनेन व्यज्यते । तेन च तस्यां नृपतेः प्रेमातिशयो गम्यते । यद्यपि महिलां महिलामित्यत्र 'मोऽनुस्वार' इति प्राप्तस्यानुस्वारस्य 'अनुस्वारस्य ययि परसवर्णः' इति मकारादेशेन व्यवहितत्वादभिमतभङ्गः । तथाऽपि 'ययि परसवर्णस्यानित्यत्वेनानुस्वारस्यैव सम्भवान्नोक्तानुपपत्तिः । अत एव 'कपिशितं पिशितं मदने'ति माघः ॥९॥

१०

स कलिकामिव चातपतापितां
अलिरवेक्ष्य तदाऽऽकुलमानसः ।
जनवरो निजगाद निजाङ्गनां
असुततासुतताऽतिशुचं वचः ॥

स इति ।। सः जनवरो राजा (कर्ता) अलिः भृङ्गः आतपेन सूर्यद्योतेन तापितां सन्तप्तां 'तपेर्ण्यन्तात्कर्मणि क्तः। कलिकां कोरकमिव 'कलिका कोरकः पुमानि'त्यमरः। असुततया सन्तानरहिततया सुतता विस्तृता अतिशुक् अत्यन्तशोको यस्यास्सा तां तथोक्तां निजाङ्गनामवेक्ष्य तदा तस्मिन् काले आकुलं व्यग्रं मानसं मनो यस्य स तथोक्तस्सन् वचः वाचं निजगाद उवाच। [1]गद[1] व्यक्तायां वाचीति धातोर्लिट्। उपमालङ्कारः ॥१०॥

११

बलरिपूपलनूपुरवर्जितं
पदमिदं वद मे परिदृश्यते।
अनलिसंवृतमब्जमिवारुणं
किमधुना मधुना सदृशाधरे ॥

बलेति ।। मधुना क्षौद्रेण सदृशः समानः अधरः ओष्ठः यस्यास्सा तस्यास्सम्बुद्धिः। हे प्रिये! अधुना इदानीं बलरिपूपलनूपुरेण इन्द्रनीलमणिसंयुक्तमञ्जीरेण वर्जितं रहितमिदं (पदं) तव चरणं (कर्म) अनलिसंवृतमलिभिः भृङ्गैः संवृतमावृतं न भवतीति तथोक्तमरुणं शोणमब्जं कमलमिव मयेति शेषः। परिदृश्यते संलक्ष्यते तत् किं मे मम 'शेषविवक्षायां षष्ठी। तादर्थ्ये चतुर्थी वा'। वद ब्रूहि।

अत्रेन्द्रनीलमणिखचितनूपुरवर्जनरूपक्रियानिमित्तेन भृङ्गरहितारुणकमलतादात्म्योत्प्रेक्षणादुत्प्रेक्षालङ्कारः ॥११॥

---

[1] वद (क)·

१२

कचभराब्दगलज्जघनाचल-
श्रिततटित्सदृशी नवमेखला।
भण किमत्र मया न विलोक्यते
रमणि सा मणिसाररुचोज्ज्वला ॥

कचेति ॥ हे रमणि! अत्र त्वदीयकटिस्थले कचभरः केशपाश एव अब्दो जलदः तस्मात् गलन्ती च्युता जघनं श्रोणिमेवाचलं पर्वतं श्रिता उपयाता तटित्तया सदृशी मणीनां रत्नानां साररुचा प्रशस्तकान्त्या उज्वला भासमाना सा [1][नव][1]मेखला [2][नूत्न][2]काञ्ची 'स्त्रीकट्यां मेखला काञ्ची'-त्यमरः। मया न विलोक्यते न दृश्यते। तत्किमिति प्रश्ने। भण वद।

अत्र जघनताद्रूप्यापन्नेऽचले तटितस्समाश्रयस्याप्रसिद्धत्वान्नोपमा। किन्तूत्प्रेक्षैव। सदृशशब्दस्तूपस्थितसामान्यानुवादकः ॥१२॥

१३

भगणभासिसुवर्णनगश्रियं
हरति नाद्य तव स्तनमण्डलम्।
किमिह मौक्तिकहारविभूषणैः
सति वदातिवदान्यगुणान्विते ॥

---

[1] लुप्तः (क ग.) [2] लुप्तः (क ग.)

भगणेति ॥ अतिवदान्यस्य दातुः गुणः औदार्यम्। 'स्युर्वदान्यस्थूललक्षदानशौण्डा बहुप्रदे' इत्यमरः। तेनान्विते ! हे सति ! जाये ! इह केलिगृहे। अनेन भूषणधारणस्यावश्यकत्वं व्यज्यते। उद्दीपकत्वेन रसोपकरणत्वादिति भावः। अद्यास्मिन् दिने तव स्तनमण्डलं कुचतटं मौक्तिकहारैर्मुक्तासैरेव विभूषणैः भानां नक्षत्राणां गणेन समूहेन भासत इति भगणभासि सुवर्णनगो मेरुः तस्य श्रियं शोभां किं न हरति ? वद। मौक्तिकहारादिभूषणं किमिति नाङ्गीकरोषीति भावः।

अत्र मौक्तिकहारस्य सुवर्णनगशोभास्वीकरणाऽसम्भवेन तादृशश्रियमिव श्रियमिति सदृशवस्त्वन्तरकल्पनान्निदर्शनालङ्कारः ॥१३॥

१४

मम मनोऽतिदुनोति करस्तव
स्फुरितमौक्तिककङ्कणवर्जितः।
गतमरालकदम्बमिवाम्बुजं
विमलकोमलकोकिलनिस्वने ॥

ममेति ॥ विमलो निर्दुष्टः कोमलो रम्यः कोकिलस्य निस्वन इव निस्वनो यस्यास्तस्यास्सम्बुद्धिः हे विमलकोकिलनिस्वने। स्फुरितान्युल्लसितानि मौक्तिकानि मुक्ताफलानि येषु तैः कङ्कणैर्वर्जितः 'कङ्कणं करभूषणमि'त्यमरः। अत एव गतं निर्गतं मरालकदम्बं हंस[1]वृ[1]न्दं यस्य तत्तथोक्तमम्बुजं कमलमिव

---

[1] वृ (क. ग.)

स्थित इत्युत्प्रेक्षा । तव करः हस्तः मम मनः चेतः (कर्म) अतिदुनोति अतीव व्यथयति ॥१४॥

१५

हसितरिक्तमनूदितबाष्पकं
तिलकपत्रलतापरिवर्जितम् ।
मुखमिदं तव किं परिदृश्यते
सुवदने ! वद नेत्रजितोत्पले ! ॥

हसितेति ॥ नेत्राभ्यां जिते निर्जिते उत्पले कुवलये यस्यास्तस्यास्सम्बुद्धिः । सुवदने ! हे सुमुखि ! 'स्यादुत्पलं कुवलयमि'त्यमरः । हसितेन स्मितेन रिक्तं वर्जितमनूदितम'[नू][1]त्पन्नं बाष्पमश्रु यस्य तत्तथोक्तम् । समासान्तः कप् प्रत्ययः । तिलकेन चित्रकेण पत्रलताभिः मकरिकाभिश्च परिवर्जितं रहितं 'तमालपत्रतिलकचित्रकाणि विशेषकमि'त्यमरः । 'भुजशिखरस्तनमण्डलकपोलकण्ठेषु विरचिता कुशलैः । अनुलेपनरेखा गद्यते पत्रवल्ली'ति हलायुधः। तवेदं मुखं परिदृश्यते तत्किं वद । सुवदने ! इत्यनेन विषादनिमित्तस्यौत्कट्यं सम्भाव्यते ॥१५॥

१६

जलभृतः पृषतैरपि चन्द्रकी
लसति यस्तव जालकमौक्तिकैः ।

---

[1] नु (क. ग.)

कचभरोऽद्य पराभवमस्य किं
न तनुते तनुतेलितमध्यमे ! ।।

जलेति ।। अपि चेति समुच्चयः। तनुतया सूक्ष्मतया ईलितं प्रशस्तं मध्यममवलग्नं यस्यास्तस्यास्सम्बुद्धिः हे तनुतेलितमध्यमे ! 'ईलितशस्तपणायितपनायितप्रणुतपणितपनितानी'त्यमरः । यः चन्द्रकी मयूरः जलभृतः मेघस्य पृषतैः जलबिन्दुभिः लसति भाति। लस श्लेषणक्रीडनयोरितिधातोर्लट् । अद्य तव कचभरः केशपाशः जालकानि मुक्तासररचितालङ्कारविशेषाः तेषां मौक्तिकैः मुक्ताफलैः उपलक्षितस्सन् अस्य चन्द्रकिणः पराभवं परिभवं किं किमिति न तनुते न करोति । कचभरो मुक्तासरैः किं नालङ्कृत इति भावः।

अत्रोपमानभूतमयूरबर्हापेक्षया उपमेयस्य केशपाशस्याधिक्यप्रतीतेर्व्यतिरेकालङ्कारः ।।१६।।

१७

मधुरसुस्वरशून्यमिदं मुखं
व्यथयतीह सबाष्पपयस्तव ।
मृदुरवैरिव रिक्तमलेः प्रिये
स्वकमलं कमलं मम मानसम् ।।

मधुरेति ।। हे प्रिये! इह रहसि सबाष्पपयः अश्रुजलसहितं मधुरसुस्वरशून्यं मधुरवाणीवर्जितमत एवालेर्मधुकरस्य मृदुरवैः कोमलस्वरै रिक्तं रहितं कमलमिव स्थितं तव इदं मुखं वदनं (कर्तृ) स्वकीयं त्वदेकानुरक्तमिति भावः। मम मानसं (कर्म) अलं निभृतं व्यथयति पीडयति। व्यथ भयसञ्चलनयोरिति धातोर्णिजन्तारल्लट् । उत्प्रेक्षालङ्कारः ।।१७।।

१८

वद तवाद्य मनोगतकारणं
सुदति मह्यमिति स्फुटवादिनम् ।
मृदु सखी निजगाद कृताञ्जलिः
नरवरं स्वरम्यमुखाम्बुजम् ॥

'वदेति[1] ॥ शोभनाः दन्ताः यस्यास्तस्याः सम्बुद्धिः हे सुदति । 'वयसि दन्तस्य दतृ' इति दन्तशब्दस्य दत्रादेशः । उगितत्वात् ङीप् । अद्य तव मनोगतकारणमन्तरङ्गस्थितनिमित्तं मह्यं वद । इत्येवं प्रकारेण स्फुटं व्यक्तं वदतीति[2]स्फुटवादी तं[2] स्फुटवादिनम् । नरवरं नृपतिं प्रति सखी [3]नायिकाया इति[3] भावः । कृताञ्जलिः बद्धाञ्जलिपुटा सती 'तौ युतावञ्जलिः पुमानि'त्यमरः । स्वेण स्वरेण रम्यं मनोज्ञं मुखाम्बुजं वदनकमलं यस्मिन् कर्मणि तद्यथा भवति तथा मृदु निजगाद उक्तवती ॥१८॥

१९

मुनिमृकण्डुचरित्रमियं मुदा
श्रुतवती स्मरणाद्व्यथिता ततः ।
असुतलाभतया महिला स्वयं
स्थितवती तव तीव्रशुचाऽधुना ॥

मुनीति ॥ इयं कलावती मुदा हर्षेण मुनिश्चासौ मृकण्डुश्च मुनिमृकण्डुः । विशेषणविशेष्यभावस्य विवक्षाधीनतया विशेषणवाचिनो

---

[1] नस्ति (क). [2] नास्ति(क). [3] नायकमिति (क).

15

मुनिशब्दस्योपसर्जनत्वम्। तस्य चरित्रं सुतलाभादिकथां श्रुतवती आकर्णितवती। ततः तस्मात् स्मरणात् मृकण्डुचरित्रगोचरात् तव महिला वधूः न विद्यते सुतलाभः पुत्रप्राप्तिः यस्यास्तस्या भावस्तत्ता तया। निमित्तेन 'तसिलादिषु चे'ति पुंवद्भावः स्थितवती स्थिता अत एवाधुना इदानीं तीव्रशुचा तीक्ष्णशोकेन स्वयं व्यथिता पीडिताऽभवदिति शेषः। मृकण्डुकथाकर्णनादारभ्यात्मनः पुत्रालाभकृतशोकसन्तापिता भवतीति भावः।

अत्र नृपमहिलामनोजनितसन्तापक्रियायां मृकण्डुकथाकर्णनरूपवाक्यार्थस्य हेतुत्ववर्णनात्काव्यलिङ्गमलङ्कारः ॥१९॥

२०

तनुलताहिसुभोगयुताऽप्यसौ
विफलतामनपत्यफलोदया।
व्रजति देव यथा भुवि केतकी
कुसुमितासुमितालिसमावृता॥

तन्विति॥ हे देव! राजन्! तनुर्लतेव यस्यास्सा तनुलता अन्यत्र तन्वी अल्पा लता यस्यास्सा। सुभोगेनाधिकसुखेन युता। अन्यत्र अहेः सर्पस्य सुभोगेन कायेन फणेन वा युता। 'भोगस्सुखेस्त्र्यादिभृतावहेश्च फणकाययोरि'त्यमरः। कुसुमिता सञ्जातार्तवा। अन्यत्र प्रसूनवती। तारकादित्वादितच्। 'कुसुमं पुष्पफलयोः स्त्रीरजो नेत्ररोगयोरि'ति रत्नमालायाम्। असुभिः प्राणैः मिताभिः सम्मिताभिः आलिभिः सखीभिः समावृता प्राणसमसखीसहितेत्यर्थः। अन्यत्र सुमितैः परिमितैः। अन्यत्रोपलब्धगन्धैः (?) कतिपयैरित्यर्थः। अलिभिः भ्रमरैस्समावृताऽपि अपत्यं सन्तान एव फलं तस्य

उदय उत्पत्तिः न विद्यते अपत्यफलोदयो यस्यास्सा तथोक्ता असौ कलावती [1]भुवि केतकी यथा[1] केतकीवत् विफलतां निरर्थकतां व्रजति प्राप्नोति हि। उपमालङ्कारः ॥२०॥

२१

निजकुलाम्बुधिवर्धनकारणं
रचितनेत्रचकोरकपारणम्।
तव वधूस्तनयेन्दुमिहेहते
महिवराहिवराभभुज प्रभो!॥

निजेति॥ अहिवरस्य शेषस्य आभेव आभा ययोस्तौ तथोक्तौ भुजौ यस्य तस्य सम्बुद्धिः। अहीन्द्रवद्भूभरणनिपुण इत्यर्थः। हे महीवर! भूपते प्रभो! राजन्! तव वधूः जाया निजकुलं स्वकीय वंश एव अम्बुधिरर्णवः तस्य वर्धने अभिवृद्धौ कारणं निमित्तं रचिता कृता नेत्राणामेव चकोरकाणां जीवंजीवानां 'जीवंजीवश्चकोरक' इत्यमरः। पारणमाहारो येन तं तथोक्तं नेत्रानन्दकरमित्यर्थः। तनय एव इन्दुश्चन्द्रः तम् [इह] ईहते वाञ्छति। ईह चेष्टायामिति धातोर्लट्। रूपकालङ्कारः ॥२१॥

२२

इति निशम्य वचस्तदुदीरितं
स्वयमपोहितपुत्रफलोदयः।

---

[1] नास्ति (क).

☆

नृपतिरेवमुवाच निजाङ्गनां
अविकलं विकलङ्कमनास्तदा ॥

इतीति ॥ विकलङ्कं निर्मलं मनो यस्य स तथोक्तः नृपतिः इति इत्थं [तदुदीरितं] तया सख्या उदीरितमुक्तं वचः वाचं निशम्य श्रुत्वा तदा स्वयमपि ईहितः अभिलषितः पुत्रस्यैव फलस्य प्रयोजनस्य उदयो येन स तथोक्तस्सन् निजाङ्गनां निजना[1]यिकां[1] प्रति अविकलं व्याकुलरहितं यथा भवति तथा एवं वक्ष्यमाणप्रकारेण उवाच उक्तवान् ॥२२॥

२३

द्युमणिमन्वयमारुतवर्त्मनः
नयविदं मृडभक्तिपरायणम् ।
तनयमाशु दिशेत्परमात्मनो
यजनतोऽजनतोऽङ्गजसूदनः ॥

नृपतिरुवाचेत्युक्तं तत्प्रकारमेवाह—द्युमणिमिति ॥ अजेन ब्रह्मणा विष्णुना वा नतो नमस्कृतः अङ्गजं मदनं सूदयति हन्तीत्यङ्गजसूदनः शिवः कर्तरि ल्युट् । आत्मनः स्वस्य यजनतः अर्चनात् पञ्चम्यास्तसिल् । मारुतस्य वायोः वर्त्म सञ्चारमार्गः अथवा मरुतां देवानामिदं मारुतं तच्च तत् वर्त्म च मारुतवर्त्म गगनम् । अन्वयो वंश एव मारुतवर्त्म तस्य । द्युमणिं सूर्यभूतं 'द्युमणिस्तरणिर्मित्र' इत्यमरः । वंशप्रकाशकमिति भावः । नयविदं

---

[1] यकीं (क).

नीतिज्ञं परं भृशं मृडस्य शिवस्य भक्त्यां भजने परायणमासक्तं तनयं आशु शीघ्रं दिशेत् दास्यति। दिश अतिसर्जन इति धातोर्लिङ् ॥२३॥

२४

भजनतो हि पुरा किल लेभिरे
हरिमुखाः पदमन्धकमर्दिनः।
सुतमहं च लभेऽस्य सपर्यया
धुनिभृतो निभृतोर्जितमर्भकम् ॥

भजनत इति॥ पुरा किल प्रथमं हरिर्मुखं प्रधानं येषां ते हरिमुखाः विष्ण्वादयः अन्धकमन्धकासुरं मर्दयति हन्तीत्यन्धकमर्दी 'ताच्छील्ये णिनिः' तस्य भजनतः भजनात् पदं प्रतिष्ठां वाञ्छितवस्तु वा लेभिरे प्रापुः। हीत्यवधारणे। अहं च अस्य धुनिं नदीं बिभर्तीति धुनिभृत् तस्य शिवस्य सपर्यया पूजया निभृतं भृशमूर्जितं वर्धमानं सुतमात्मजमर्भकं बालं लभे प्राप्स्यामि। डु लभष् प्राप्ताविति धातोस्सम्भावनायां लट्।

अत्र गुणोत्कृष्टैर्हरिप्रमुखैस्समीकृत्य नृपतिर्वर्णित इति तुल्ययोगितालङ्कारः ॥२४॥

२५

त्यज शुचं भज शम्भुपदाम्बुजं
कुरु विधीरितदानमनेकधा।
अचिरमिष्टमुपैष्यसि चेति तां
विशुचमाशु च मानधनो व्यधात् ॥

[1]त्यजेति[1] ।। हे मानिनि ! शुचं शोकं त्यज जहीहि । शम्भोः शिवस्य पादाम्बुजं पादारविन्दं भज सेवस्व । अनेकधा बहुधा विधिना शास्त्रेण ईरितं विहितं दानं कुरु [2]विधे[2]हि च । अचिरं तूर्णमिष्टं काममुपैष्यसि प्राप्स्यसि इति । मानः चित्तसमुन्नतिः धनं यस्य स तथोक्तः राजा तां वधूमाशु विशुचं शोकरहितां व्यधात् कृतवान् । त्यज भज कुर्विति क्रियाणा- महमहमिकया प्राप्तानां समुच्चयेन वर्णनात्समुच्चयालङ्कारः ॥२५॥

२६

पतिवचोद्रुतलुप्तमनोगदा
धृतिमुपेत्य मृडार्चनतत्परा ।
स्वयमभूत्स तया सह धूर्जटेः
भजनतो जनतोषकरस्स्थितः ॥

पतिवच इति ।। सा राज्ञी पत्युः भर्तुः वचोभिः द्रुतं शीघ्रं यथा तथा लुप्तः नष्टः मनोगदः अनपत्यताप्रयुक्तमनोव्यथा यस्यास्सा [3]तथोक्ता[3] । अनेन पतिवचनेषु निश्शङ्कप्रामाण्यनिश्चयात् राज्ञ्याः पातिव्रत्यातिशयो व्यज्यते । धृतिं धैर्यं उपेत्य प्राप्य मृडार्चने शिवपूजायां तत्परा अभूत् । सः नृपतिः स्वयमपि धूर्गङ्गा जटासु यस्य स धूर्जटिः शम्भुः तस्य भजनतः भजनात् तया स्त्रिया सह जनस्य तोषं सन्तोषं करोतीति तथोक्तस्सन् । कृञो हेत्वित्यादिना टप्रत्ययः । स्थितः ॥२६॥

---

[1]लुप्तः (क. ग). [2] दे (क). [3] तथासती (ग).

२७

शिवगणाङ्घ्रिसमर्चनलोलुपौ
शिवपदाब्जनिषेवणतत्परौ ।
युवतिभूमिभृतौ बभतुस्ततो
लसदयौ सदयौ श्रितवत्सलौ ॥

शिवेति ॥ ततोऽनन्तरं श्रितवत्सलावाश्रितवात्सल्यशालिनौ 'स्निग्धस्तु वत्सल' इत्यमरः । लसन् अयः शुभावहविधिः ययोस्तौ 'अयश्शुभावहो विधिरि'त्यमरः । सदयौ दयासहितौ युवतिभूमिभृतौ कलावतीविक्रमचोलमहीपालौ शिवगणानां शिवभक्तानां अङ्घ्रीणां पदानां समर्चने पूजायां लोलुपौ आसक्तौ । शिवपदाब्जयोः शम्भुपादारविन्दयोः निषेवणे भजने तत्परौ सन्तौ बभतुः रेजतुः ॥२७॥

२८

प्रियदृगञ्चलरुक्सलिलोक्षिता
सुरलतावदजायत पुष्पिणी ।
सुरुचिरा मधुराधरपल्लवाऽ-
प्यलिभिरालिभिरावृतविग्रहा ॥

प्रियेति ॥ अपि च प्रियस्य नृपस्य दृगञ्चलस्यापाङ्गदृष्टेः रुक् शोभैव सलिलं तेनोक्षिता सिक्ता । एकत्र मोहातिशयादन्यत्र पुष्पादिसम्पत्त्यर्थमिति भावः । मधुरः स्वादुर्मनोज्ञश्च अधरः ओष्ठ एव पल्लवो यस्यास्सा तथोक्ता आलिभिः सखीभिरेवालिभिः भृङ्गैरिति व्यस्तं रूपकम् 'आलिः पङ्क्तौ च सख्याञ्चे'ति विश्वः । आवृतः परिवृतः विग्रहः शरीरं यस्यास्सा तथोक्ता ।

सुरुचिरा राज्ञी सुरलतावत् कल्पलतेव पुष्पिणी रजस्वला प्रसूनवती च 'स्याद्रजः पुष्पमार्तवं । स्त्रियस्सुमनसः पुष्पमि'त्युभयत्राप्यमरः । अजायतासीत् । जनी प्रादुर्भाव इति धातोर्लङ् । 'ज्ञा जनोर्जे'ति जादेशः ।

अत्र पुष्पिणीत्येकशब्दोपात्ततया रजःप्रसूनयोरभेदाध्यवसायेन तद्रू त्सरूपधर्मेण राज्ञीकल्पलतयोर्वतिप्रत्ययेन सादृश्यवर्णनादुपमालङ्कारः । स च रूपकानुप्राणित इति तयोस्सङ्करः ॥२८॥

२९

अथ सुगन्धिपयस्स्नपिताङ्गना
जलनिषिक्तकरेणुरिवास सा ।
गतरजाः परिशुद्धवपुर्भृशं
शुचिरदा चिरदार्ढ्यशुभोदया ॥

अथेति ॥ अथानन्तरम् । शोभनो गन्धो यस्य तत्सुगन्धि तादृशेन पयसा जलेन स्नपिता स्नाता साऽङ्गना राज्ञी गतं निर्गतं रजः आर्तवं पांसुश्च यस्यास्सा तथोक्ता अत एव भृशं परिशुद्धं पावनं निर्मलं च वपुः शरीरं यस्यास्सा तथोक्ता । आर्तवदिनेषु स्त्रीभिस्सह सल्लापसहवासादेर्निषेधादिति भावः । तदुक्तम्ः—'प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातकी । तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यती'ति । शुचयः निर्मलाः रदाः दन्ताः यस्यास्सा । अन्यत्र शुची रदौ यस्यास्सा चिरं चिरन्तनं दार्ढ्यं दृढता यस्मिन् कर्मणि तद्यथा भवति तथा शुभोदयं शुभाविर्भावो यस्यास्सा । अन्यत्र चिरं दार्ढ्येन शक्तिमत्त्वेन यानि शुभानि प्र[1][भु]लाल[ना][1]दीनि तेषामुदयो यस्यास्सा

---

[1] बलालसा (क. ग.)

तथोक्ता 'दृढा बलिस्थूलगाढा' इति रत्नमालायाम्। अत एव जलेनाम्भसा निषिक्ता करेणुः करिणीव आसेत्युत्प्रेक्षा। 'करेणुरिभ्यां स्त्री नेभे' इत्यमरः ॥२९॥

३०

सितदुकूलसमौक्तिकभूषणा
हिमपटीरविलिप्तवपुर्लता।
विधुकलावदलक्ष्यत कामिनी
सरससारससारदलेक्षणा ॥

सितेति ॥ सरसस्य अम्लानस्य सारसस्य कमलस्य सारदलेक्षणा सारे श्रेष्ठे दले इव ईक्षणे नयने यस्यास्सा तथोक्ता कामिनी राज्ञी सितं दुकूलं क्षौमं यस्यास्सा समौक्तिकभूषणा मुक्ताहारादिसहिता। सितदुकूला चासौ समौक्तिकभूषणा चेति कर्मधारयः। अथवा समौक्तिकानि मुक्ताफलसहितानि भूषणानि। सितदुकूलञ्च समौक्तिकभूषणानि च यस्यास्सा तथोक्ता। *'सुमौक्तिके'ति वा पाठः। हिमपटीरेण कर्पूरमिश्रचन्दनेन विलिप्ता दिग्धा वपुर्लता यस्यास्सा तथोक्ता। अत एव विधुकलावत् चन्द्रकलेव अलक्ष्यत अदृश्यत। अत्र दुकूलसमौक्तिकाभरणचन्दनलेपनादिभिर्धवलवर्णतया प्रतीयमानायां रज्यां धावल्यगुणेन चन्द्रकलासादृश्यवर्णनादुपमालङ्कारः ॥३०॥

३१

परिसमाप्य च सान्ध्यमृडार्चनं
परमभक्तिविधानत एव सा।

---

* व्याख्यातृदर्शित पाठभेदः

वितसम्पदपास्तपुलोमजा
प्रविशदाऽविशदात्मपतेर्गृहम् ॥

परीति ॥ विततया विस्तृतया सम्पदा सम्पत्त्या अपास्ता तिरस्कृता पुलोमजा शची यया सा तथोक्ता । ततोऽप्यधिकसम्पत्तिशालिनीति भावः । 'पुलोमजा शचीन्द्राणी'त्यमरः । प्रविशदा प्रकर्षेण निर्मला सा कलावती परमभक्तिविधानतः उत्कृष्टभक्तिविधिनैव सन्ध्यायां कर्तव्यं सान्ध्यं मृडार्चनं शिवपूजां परिसमाप्य कृत्वा आत्मपतेः स्वभर्तुः गृहं अविशत् विवेश ।

वितसम्पदित्यादिना वर्ण्यमानायां राज्ञ्यामुपमा[ना]धिक्यप्रतीते- र्व्यतिरेकालङ्कारः ॥३१॥

३२

धवलतल्पमनल्पमुपाश्रितं
पतिमुपेत्य समत्वमगात्स्वयम् ।
फणिपतल्पगतं विधुमाप्तया
कमलया मलयाद्रिनिभस्तनी ॥

धवलेति ॥ अनल्पं महत् धवलतल्पं सितास्तरणं उपाश्रितं पतिमुपेत्य प्राप्य स्वयं राज्ञी[1][फणिनः][1] पातीति फणिपः शेषाहिरेव तल्पमास्तरणं तद्गतं विधुं विष्णुमाप्तया उपेतया कमलया लक्ष्म्या समत्वं साम्यं गुणवचनत्वाभावात् 'त्वतलोर्गुणवचनस्ये'ति न पुंवद्भावः । किन्तु सामान्ये नपुंसकमिति ज्ञेयम् ।

---

[1] फणीन् (क.) लुप्तः (ग.)

अगात् आप। इण् गताविति धातोः लुङि 'इणोगालुङि' इति गादेशे 'गातिस्थे'ति सिचो लुक्। उपमालङ्कारः ॥३२॥

३३

परमलाभि रतोत्सवनिर्वृतिः
विविधबन्धसचुम्बनसीत्कृता।
स्वकपतेर्नखदन्तहतिश्रिया
समरसाऽमरसामजयानया ॥

परमिति॥ स्वकपतेः निजनायकस्य नखदन्तहतिश्रिया नखक्षत-दन्तक्षतशोभया उपलक्षितया अमरसामजस्यैरावतस्य यानमिव यानं यस्यास्तया राज्ञ्या (कर्त्र्या) विविधा बहुविधा बन्धाश्च सचुम्बनसीत्कृताश्च [1]चुम्बन सहितसीत्काराश्च[1] यस्यास्सा तथोक्ता। समानो रसः रागो यस्यास्सा तथोक्ता। 'गुणे रागे द्रवे रस' इत्यमरः। स्त्रीपुरुषयोरन्यतरस्मिन्नेवानुरागे रसस्याभासत्वा-दिति भावः। रतोत्सवेन सुरतोत्सवेन निर्वृतिः सुखं परं भृशमलाभि लब्धम्। लभगताविति धातोः कर्मणि लुङि 'चिण्भावकर्मणोरि'ति च्लेश्चिण्, 'विभाषा-चिण्णमुलोरि'ति वैकल्पिकनुमभावः। 'अत उपधाया' इति दीर्घः ॥३३॥

३४

तदनुनिद्रितया सुखमागतः
तव भविष्यति सूनुरिति ब्रुवन्।

---

[1] लुप्तः (क).

चरवपुर्मृड एव विलोकितः
स हि तयाऽहितयागहृदग्रतः ॥

तदन्विति ॥ तदनु रतोत्सवानन्तरं सुखं यस्मिन् कर्मणि तद्यथा भवति तथा निद्रितया निद्रां गतया 'गत्यर्थाकर्मके'त्यादिना कर्तरि क्तः । तया राज्ञ्या तव सूनुः सुतः भविष्यतीति आगतः । [1]ब्रुवन्[1]अहितस्य शत्रोर्दक्षस्य यागमध्वरं हरतीति तथोक्तः सः प्रसिद्धः चरवपुः जङ्गमाकृतिः मृडः शिवः अग्रतः पुरत एव विलोकितः दृष्टो हि ।

स्वप्ने भगवान् शम्भुः जङ्गमरूपेणागत्य तव पुत्रो भविष्यतीत्युक्तवानित्यर्थः ॥३४॥

३५

इति वचस्सुधया शुभदर्शने
प्रमदमागतयोत्थितमञ्जसा ।
उषसि गीतरवे समयोचिते
समुदिते मुदितेश्वरचेतसा ॥

इतीति ॥ इतीत्थं वचस्सुधया शिववचनामृतेन प्रमदं सन्तोषं आगतया प्राप्तया मुदितं सन्तोषितमीश्वरचेतः पतिचित्तं यस्यास्सा सौशील्यादिति भावः । अथवा मुदितं ईश्वरस्य शिवस्य चेतो यस्यास्सा भजनातिशयादिति भावः । तया राज्ञ्या उषसि प्रातःकाले समयोचिते तत्काल्योग्ये शुभदर्शने श्रेयस्सूचके कर्तरि ल्युट् । गीतरवे गीतध्वनौ वन्दिभिरिति शेषः । समुदिते उक्ते सति अञ्जसा त्वरया उत्थितं प्रबुद्धम् ॥३५॥

---

[1] नास्ति (क)·

३६

सुरभि सोष्म पयस्स्नपिता पुनः
मृडसमर्चनकर्म विधाय च ।
स्वपतिना सह विष्टरभाग्बभौ
स्वसदने सदनेकसखीवृता ॥

सुरभीति ।। सा राज्ञी सतीभिः अनेकाभिः सखीभिः विदग्धाभिः वृता परिवृता सुरभिणा सौरभयुतेन सोष्मणा उष्णेन पयसा सलिलेन स्नपिता स्नाता सती पुनश्च मृडसमर्चनकर्म शिवपूजाविधिं विधाय कृत्वा स्वसदने निजगृहे स्वपतिना सह समासत्वात्पत्युर्घिसंज्ञा । विष्टरमासनं भजतीति विष्टरभाक् बभौ । 'विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनमि'त्यमरः ॥३६॥

३७

वदनसद्मगिरो रुचिवद्रुचः
स्फुरति दन्तकरे शुभशंसिनि ।
कथयति स्म समुत्सुकमानसा
महिभृतेऽहिभृतेरितमात्मनः ॥

वदनेति ।। शुभशंसिनि शुभसूचके दन्तानां करे मयूखे 'भानुः करो मरीचिस्स्त्री पुंसयोरि'त्यमरः । वदनं मुखं सद्म गृहं यस्यास्तस्याः गिरः वाण्याः रुचिवत् दीप्तिरिव स्फुरति भाति सति समुत्सुकं मानसं यस्यास्सा तथोक्ता राज्ञी आत्मनः आत्मानमुद्दिश्येत्यर्थः । 'ल्यब्लोपे पञ्चमी । शेषविवक्षया

षष्ठी वा'। अहिभृता सर्पधारिणा आभरणतयेति भावः। शिवेन ईरितमुक्तम्। वच इति शेषः (?)। महीभृते राज्ञे कथयति स्म उक्तवतीत्यर्थः ॥३७॥

३८

श्रुतिसुखावहमेव निशम्य तद्
वचनमुत्पुलकस्समभाषत।
अचिरमिष्टमनेन भवेदिति
प्रणयतोऽनयतोदकृदङ्गनाम् ॥

श्रुतीति ॥ न विद्यते नयो नीतिर्येषां ते अनयाः अविनीताः तेषां तोदं व्यथां करोतीत्यनयतोदकृत्। सः राजा श्रुतेश्श्रोत्रस्य सुखावहं सुखकरं तत् वचनं प्रणयतः विश्वासात् निशम्य श्रुत्वा उत्पुलकः हर्षोदयादुद्गत-रोमाञ्चस्सन् अनेन स्वप्नेन इष्टमचिरं क्षिप्रमेव भवेदिति अङ्गनां प्रति समभाषत उक्तवान्।

'देवताः पितरो गावो गुरवो लिङ्गिनस्तथा।
कथयन्ति यथा स्वप्ने तथैव फलमश्नुत' ॥

इति बृहस्पतिवचनादिति भावः ॥३८॥

३९

प्रणयिनैवमुदीरितमात्मनि
प्रतिनिधाय शुभाचरणोद्यता।
नृपवधूरथ दौहृदलक्षणं
सुरुचिरं रुचिरम्यवपुर्दधौ ॥

प्रणयिनेति ।। एवं पूर्वोक्तप्रकारेण प्रणयिना प्रियेण उदीरितं उक्तं फलमिति शेषः । आत्मनि मनसि प्रतिनिधाय निक्षिप्य शुभाचरणोद्यता शुभकर्मासक्ता रुच्या शोभया रम्यं मनोज्ञं वपुश्शरीरं यस्यास्सा तथोक्ता नृपवधूः राज्ञी अथानन्तरं सुरुचिरं मनोज्ञं दौहृदलक्षणं गर्भं दधौ धृतवती* ।।३९।।

४०

जगदलङ्करणं हि ममोदरे
वसति चाग्र्यमलङ्करणैरलम् ।
इति तदाऽल्पितबाह्यविभूषणा
तनुतरा नुतराजवधूर्बभौ ।।

अथ नवश्लोकैर्गर्भलक्षणमेव वर्णयतिः—**जगदित्यादिना** ।। नुता जनसंस्तुता राजवधूः राज्ञी तदा गर्भकाले तनुतरा अतिकृशा सती अग्र्यं श्रेष्ठं जगदलङ्करणं जगदलङ्कारभूतं वस्तु मम उदरे जठरे वसति तिष्ठति हि अलङ्करणैः बाह्यालङ्कारैः अलम् । किञ्चित्कार्यं नास्तीत्यर्थः । गम्यमानक्रियापेक्षयाऽत्र तृतीया । इति एवं मत्वेत्यर्थः । गम्यमानत्वादप्रयोगः । अल्पितानि स्वल्पीकृतानि बाह्यभूषणानि हारादीनि यया सा तथोक्ता सती च बभौ ।

अत्र शरीरकार्श्यप्रयुक्ते आभरणाल्पीकरणे जगदलङ्कारभूतप्रशस्तवस्तुगर्भीकरणोत्साहहेतुकत्वोत्प्रेक्षणादुत्प्रेक्षा । सा च व्यञ्जकाप्रयोगाद्गम्या ।।४०।।

---

* नात्र ग्रन्थपात इति (ग).

४१

रहसि मृत्सुरभिप्रमदानन-
स्फुटसुगन्धिसरोजरसज्ञताम् ।
चिरमवाप ससम्मदमानसः
परमया रमयाऽऽश्रितविग्रहः ॥

रहसीति ॥ परमया उत्कृष्टया रमया श्रिया श्रितः आश्रितः विग्रहः शरीरं यस्य स तथोक्तः ससम्मदं सन्तोषसहितं मानसं मनो यस्य सः राजेति शेषः । रहस्येकान्ते मृदा मृत्तिकया सुरभि सौरभवत् प्रमदायाः राज्ञ्याः आननमेव स्फुटं विकसितं सुगन्धि शोभनगन्धवत् सरोजं कमलं तस्य रसो गुणः 'गुणे रागे द्रवे रस' इत्यमरः । तं जानातीति तथोक्तः तस्य भावस्तत्ता तां चिरमवाप प्राप्तवान् । गर्भिण्या मृद्भक्षणं लोकसिद्धमिति भावः ॥४१॥

४२

उपचितावयवैर्महिला क्रमात्
मधुरया ददृशे क्रमवर्धिता ।
शशिकलेव कलेवरशोभया
गजगतिर्जगति स्थिरवैभवा ॥

उपचितेति ॥ क्रमात् क्रमशः उपचितावयवैः संवर्धिताङ्गैः मधुरया मनोज्ञया कलेवरशोभया बवयोरभेदात्कलेबरशोभया शरीरकान्त्येत्यर्थः । उपलक्षिता जगति भुवने स्थिरं वैभवं यस्यास्सा गजस्य गतिर्गमनं यस्यास्सा

महिला राज्ञी क्रमवर्धिता शशिकलेव ददृशेऽवैक्ष्यत। दृशिर्—प्रेक्षणे इति धातोः कर्मणि लिट्। उपमालङ्कारः ॥४२॥

४३

* तनुरभूदत[1]नुः कु[1]चचूचुकं
[2]दध[2]दलिद्युतिमब्ज[3]दृशो[3] गतिः।
वहति मान्द्यम[4]पीक्षणगोचरा[4]
[5]न[5] वलयो वलयोचितचेतसः॥

[व्या॥ वलयोचितचेतसः
अब्जदृशः तनुरतनुरभूत्।
अब्जदृशः कुचचूचुकमलिद्युतिं दधत् अभूत्।
अब्जदृशः गतिः मान्द्यं वहति।
अब्जदृशः वलयः ईक्षणगोचरा न अभूवन्॥]

४४

सितरुचि प्रमदाऽस्य सुधारुचौ
ज्वलति तत्कुचकोकयुगाननम्।

---

* टिप्पणीः—सर्वमातृकासु मूलमात्रेण वर्तते। व्याख्यायुक्तमातृकासु विद्यमानोऽप्ययं श्लोकः व्याख्यारहितः। 'अस्य व्याख्या लुप्ता' 'नास्ति' इति टिप्पणी च लिखिता॥

[1] नुरुकु (ग). [2] वद (ग). [3] रुचो (ग). [4] दृश्यतरा बभौ (ग).
[5] स्त्रि (ग).

16

मलिनमास 'सहेत हि कः पुमान्
सततमाततमानरिपुश्रियम् ॥

उक्तमेवार्थमुत्प्रेक्षते ॥सितेति॥ सिता शुभ्रा रुचिः कान्तिर्यस्य तस्मिन्, मुखधवलिमा एव गर्भिणीलक्षणमिति भावः। प्रमदायाः राज्ञ्याः आस्यं मुखमेव सुधारुचिश्चन्द्रः तस्मिन् ज्वलति भासमाने सति तस्याः राज्ञ्याः कुचौ स्तनावेव कोकौ चक्रवाकौ तयोर्युगस्य आननमग्रं मुखं च सततं मलिनं नीलं म्लानं च आस। तथा हि—कः पुमान् को वा पुरुषः आततमाना विस्तृता रिपुश्रीः शत्रुसम्पत् तां सहेत। कोऽपि न सहत इत्यर्थः।

अत्र मुखसुधाशुचिप्रकाशकालिककुचकोकमुखमलिनीकरणस्य विशेषस्य सामान्येन समर्थनादर्थान्तरन्यासः। स च रूपकानुप्राणित इति तयोस्सङ्करः ॥४४॥

४५

जतुविमुद्रितहेमकरण्डक-
स्थितिमगादलिमेचकचूचुकम्।
कुचयुगं तनुलोमलता दधौ
असिततासिततामतनोर्भृशम् ॥

जत्विति॥ अलिः भृङ्ग इव मेचकं नीलं चूचुकं कुचाग्रं यस्य तत्। 'कृष्णे नीलासितश्यामकालश्यामलमेचकाः' इत्यमरः कुचयुगं जतुना लाक्षया विमुद्रितस्य मुद्रावत्कृतस्य हेमकरण्डकस्य सुवर्णकरण्डस्य स्थितिं

मर्यादामगात् प्राप्तवत्। इण् गताविति धातोः [कर्तरि] लुङ्। तनौ वपुषि लोमलता रोमराजिः भृशमतनोः मन्मथस्य असिततासिततां असिः खड्गः तस्य ततामधिकामसिततां नैल्यं दधौ धृतवती। रोमलता अतीव श्यामाऽभूदिति भावः ॥४५॥

४६

गुरुतया जठरे जघने स्तने
स्मरकृतेः प्रथमोदितपद्यवत्।
विशदवर्णमराजत कोमलं
वपुरतः पुरतश्शुभशंसि च ॥

गुर्विति ॥ जठरे उदरे जघने नितम्बे स्तने कुचमण्डले च गुरुतया महत्तया गुरुसंज्ञतया च उपलक्षितं विशदवर्णं व्यक्तस्वरूपं निर्दुष्टाक्षरं च 'वर्णो द्विजाऽऽदौ शुक्लाऽऽदौ स्तुतौ वर्णन्तु वाऽक्षरे' इत्यमरः। कोमलं मृदुलमविकटाक्षरबन्धं च। तस्याः वपुः शरीरं स्मरकृतेः कामतन्त्रस्य प्रथमोदितपद्यवत् नान्दीपद्यमिव अराजत अशोभतेत्युत्प्रेक्षा। कृत्यादौ गुरुवर्णत्रयात्मकमगणप्रयोगस्यातिशयकरत्वादिति भावः। तदुक्तं लक्षणसारे- 'मो भूमिस्त्रिगुरुश्श्रियं वितनुते' इति। अतो मगणपूर्वकनान्दीपद्यात्मना सम्भावितत्वादेव पुरतः उत्तरत्र शुभशंसि श्रेयसस्सूचकमपि भवतीति शेषः।

अत्रोत्प्रेक्षा श्लेषकाव्यलिङ्गानां सङ्करः। वतिप्रत्ययस्त्वर्था[1]क्षिप्त[1]-सादृश्यानुवादकः ॥४६॥

---

[1] त्क्षिप्र (क).

★

४७

नवसुधांशुरिवार्जुनतोयदे
तरुणहंस इवाम्बुजकुट्मले ।
तदुदरे ववृधे विमलोऽर्भकः
स सकलस्सकलश्रितमुत्प्रदः ॥

नवेति ॥ सकलश्रितानां समस्ताश्रितजनानां मुदं सन्तोषं प्रददातीति तथोक्तः सः अर्भकः सकलः कान्तिसहितः कलासहितश्च अत एव तस्याः राज्ञ्याः उदरे जठरे नवः बालः सुधांशुश्चन्द्रः अर्जुनतोयदे सिताभ्र इव ववृधे वृद्धिं प्राप्तवान् । किञ्च [1]वि[1]मलः [2]सः[2] अर्भकः तरुणहंसो बालमरालः अम्बुजकुट्मले पद्ममुकुल इव ववृधे ।

अत्र चन्द्रहंसोभयनिरू[3]पितो[3]पमाद्वयसमर्पकतया सकलो विमल इति विशेषणद्वयस्य साभिप्रायत्वात् उपमायाः परिकरेण सङ्करः ॥४७॥

४८

नृपतिनेत्रचकोरकुतूहलं
परमधायि सगर्भसितार्चिषा ।
हरिदिशेव निगूढशशाङ्कया
ननु तया नुतया धुरि योषिताम् ॥

---

[1] अ (क). [2] लुप्तः (क.) [3] पको (क).

नृपतीति ।। गर्भ एव सितार्चिश्चन्द्रः तेन सहिता सगर्भसितार्चिः [1]अथवा गर्भस्य सितार्चिः[1] निर्मलच्छविः तेन सहिता तथोक्ता तया योषितां सतीनां अग्रे नुतया कीर्तितया तया राज्ञ्या निगूढः अन्तर्लीनः शशाङ्कश्चन्द्रो यस्यां सा तथोक्ता तया हरिदिशा प्राच्येव नृपतिनेत्रयोरेव चकोरयोः कुतूहलं कौतुकं परं भृशमधायि ननु कृतं खलु। उद्यच्चन्द्रमाः प्राची यथा चकोरानन्द[2]विधा[2]यिनी तथा राज्ञी नृपनयनानन्दसन्दायिनी जातेति भावः। उपमारूपकयोस्सङ्करः ॥४८॥

४९

सहचरीभिरनूनविनोदतः
स्थितवती समये सुतरां शुभे।
सुतमसूत समुन्नतरोचिषं
सुरमणी रमणीयगुणं यथा ॥

सहचरीभिरिति ।। सहचरीभिस्सखीभिस्सह 'वृद्धो यूने'ति ज्ञापकात्सहशब्दस्याप्रयोगेऽपि तृतीया। अनूनविनोदतः अनल्पकुतूहलात् स्थितवती स्थिता सा राज्ञी सुरमणी कृदिकारत्वात् ङीप्। चिन्तामणिः रमणीयगुणं यथा औदार्यादिगुणमिव सुतरां भृशं शुभे शुभकरे समये समुन्नतरोचिषमुत्कृष्टदीप्तिमन्तं सुतं तनयमसूत अजनयत्। उपमालङ्कारः ॥४९॥

५०

मृदु ववौ मरुदुज्ज्वलितो रविः
विशदमास नभः प्रससाद च।

---

[1] लुप्तः (क). [2] सन्दा (क).

सरिदगाः फलपुष्पयुजस्तदा
रुरुचिरे रुचिरे पुरनन्दने ॥

मृद्विति ॥ तदा प्रसवसमये मरुद्वायुः मृदु मन्दं यथा तथा ववौ चचार वा गति गन्धनयोरिति धातोर्लिट् । रविः सूर्यः उज्ज्वलितः प्रकाशितः आस । नभः गगनं विशदं निर्मलमास । सरित् नदी च प्रससाद प्रसन्नाऽभूदित्यर्थः । रुचिरे पुरनन्दने नगरोद्याने अगाः वृक्षाः 'शैलवृक्षौ नगावगावि'-त्यमरः । फलपुपष्युजः फलपुष्पयुक्तास्सन्तः रुरुचिरे रेजिरे । अनेन शिशोर्नि-रतिशयवैभवेन भविष्यत्वं व्यज्यते ॥५०॥

५१

ननृतुरप्सरसस्सुरदुन्दुभिः
दिवि रराण सहानकनिस्वनम् ।
नृपगृहेऽपि च तूर्यरवश्शुभः
समुदितो मुदितो हि महीजनः ॥

ननृतुरिति ॥ दिवि अप्सरसः स्वर्वेश्याः 'स्त्रियां बहुष्वप्सरसस्स्वर्वेश्या' इत्यमरः । ननृतुः नृत्तं चक्रुः । सुराणां दुन्दुभिः भेरी आनकानां पटहानां निस्वनैस्सह [इति] सहानकनिस्वनं यथा तथा रराण दध्वान । रण शब्द इति धातोर्लिट् । [1]नृपगेहेऽपि च[1] शुभः शुभकरः तूर्यस्वनः वाद्यविशेषध्वनिः समुदितः जातः । महीजनः मुदितः सन्तुष्टः हि प्रसिद्धौ ॥५१॥

---

[1] लुप्तः (क).

५२

तनयजन्मशुभश्रवणान्नृपः
कथयते च यथेष्टमदात्स्वयम् ।
सुवसनाभरणादिकमुत्सुकः
तदुदयादुदयारुणभास्वरः ॥

तनयेति ॥ तदुदयात् सुतोद्भवात् उत्सुकः प्रीतः उदये उदयकाले योऽरुणस्सूर्यः स इव भा[1]स्व[1]रः प्रकाशमानः सः नृपः राजा तनयजन्म [2]पुत्रो[2]त्पत्तिरेव शुभं तस्य श्रवणात् आकर्णनात् कथयते एतच्छुभभाषिणे जनाय स्वयं सुवसनाभरणादिकं सद्वस्त्रभूषणादि यथेष्टमदात् दत्तवान् ॥५२॥

५३

गिरिशवेश्मसु तद्यजनोत्सवः
शिवगणाङ्घ्रिसमर्चनसम्भ्रमः ॥
शुभविधिस्स्वगृहे परिवर्धितः
पुरि महोऽरिमहोऽपहृताधिकः ॥

गिरिशेति ।। अरीणां शत्रूणां महस्तेजः अपहरतीति तथोक्तः तेन राज्ञा अधिकः गिरिशवेश्मसु शिवालयेषु तद्यजनं शिवपूजनमेव उत्सवः परिवर्धितः कारितः । शिवगणानां जङ्गमानामङ्घ्र्योश्चरणयोः समर्चनं पूजा तस्मात् सम्भ्रमः सन्तोषः परिवर्धित इत्यनुषज्यते। स्वगृहे शुभविधिर्मङ्गलाचारः

---

[1] स्क (क). [2] उ (क).

परिवर्धितः। पुरि नगर्यां महः उत्सवः 'मह उद्धव उत्सवः' इत्यमरः। परिवर्धितः ॥५३॥

५४

कुलसमुद्धरणोत्सवहर्षभाक्
प्रविदधे बहुधा परितोषणम्।
बुधचयस्य धनाभरणादिभिः
वितरणी तरणीलितवंशजः॥

कुलेति॥ वितरणी दानवान् 'अत इनिठनावि'तीनिप्रत्ययः। तरणेः [1]सूर्यस्य[1] ईलिते प्रशस्ते वंशे कुले जायत इति तथोक्तः राजा कुलसमुद्धरणस्य वंशोद्धारकस्य उद्भवात् जननात् हर्षं सन्तोषं भजतीति तथोक्तस्सन् धनाभरणादिभिः बुधचयस्य विद्वत्समूहस्य बहुधा बहुप्रकारेण परितोषणं सन्तोषं प्रविदधे चकार ॥५४॥

५५

शरधिरिन्दुमवेक्ष्य विवर्धते
सकलमस्य मुदब्धिरपि स्वयम्।
तरुणचन्द्रमवेक्ष्य विवर्धते
निभृतमाभृतमानमहीभृतः॥

शरधिरिति॥ शरधिस्समुद्रः सकलं कलासहितं पूर्णमिति भावः। इन्दुमवेक्ष्य विवर्धते। आभृतो धृतः मानः चित्तसमुन्नतिः येन स तथोक्तस्तस्य

[1] लुप्तः (क.)

राज्ञः मुदब्धिरपि हर्षसागरस्तु स्वयं तरुणो बाल एव चन्द्रः तरुणश्चासौ चन्द्रश्च तरुणचन्द्र इति च तमवेक्ष्य निभृतमत्यन्तं विववृधे।

अत्र पूर्णचन्द्रोदयसंवर्धितसिन्धोरुपमानान्नृपतिहर्षाब्धेरुपमेयबालचन्द्रदर्शनमात्रेण वृद्धिरिति विशे[1]ष[1]वर्णनाद्व्यतिरेकालङ्कारः ॥५५॥

५६

गुरुभिरेत्य शिवोक्तविधानतः
जननकर्म विधाय स संस्कृतः ।
ज्वलितसन्मणिदीप इवाबभौ
महितलोहितलोलतनुद्युतिः ॥

गुरुभिरिति ॥ महिता अधिका लोहिता अरुणा लोला चलन्ती तनुद्युतिश्शरीरकान्तिर्यस्य सः तथोक्तः सः शिशुः गुरुभिः एत्यागत्य शिवोक्तविधानतः शैवागमविधानात् जननकर्म जातकर्म विधाय कृत्वा संस्कृतः संस्कारवान् [2]कृतस्सन्[2] ज्वलितः प्रज्वलितः सतः प्रशस्तस्य मणेः दीप इव आबभौ रेजे। उपमालङ्कारः ॥५६॥

५७

अभिधया च चकार विशांपतिः
तमपि *'सौन्दरचोलम'निन्दितम् ।

---

[1] षण (क.) [2] सन् (क). * 'पुगल्चोलः'–'पगल्चोलः' इत्ययं भाषाप्रबन्धेषु प्रख्यातः ॥

स्फुरितरूपमवेक्ष्य स सार्थकं
निजतनूजतनूप्रकृतिस्थितम् ॥

अभिधयेति ॥ सः विशां पतिः नृपोऽपि निजतनूजस्य स्वतनयस्य तनूप्रकृत्या शरीरस्वभावेन स्थितं सिद्धं स्फुरितरूपं प्रकाशमानसौन्दर्यमवेक्ष्य अनिन्दितं निर्दुष्टं तनयं सार्थकमर्थसहितं यथा तथा अभिधया नाम्ना च सौन्दरचोलं सुन्दर एव सौन्दरः। स्वार्थे अण्। चोलानां देशविशेषाणां राजा चोलः सौन्दरश्चासौ चोलश्च तथोक्तस्तं चकार कृतवान् ॥५७॥

५८

नयनयोरनयोरमृताञ्जनं
सुतमदात्सुखवर्धनमीदृशम्।
मृड इति प्रमुदौ वनितानृपौ
अभजतां भजतां तमभीष्टदम् ॥

नयनयोरिति ॥ मृडश्शिवः अनयोः आवयोः नयनयोर्नेत्रयोः सुखवर्धनं सुखसम्पादकममृताञ्जनभूतमीदृशं सुतं तनयमदात् दत्तवान् इति प्रमुदौ प्रकृष्टसन्तोषिणौ वनितानृपौ राजानौ भजतां भजमानानां अभीष्टदमिष्टार्थप्रदं [तं] मृडमभजतामसेवेताम्। भजसेवायामितिधातोर्लङ् ॥५८॥

५९

शुककिशोर इवास्फुटजल्पने
तरुणहंस इवाल्पपदक्रमे।

प्रियकरस्स बभूव तयोर्भृशं
भुवि तथाऽवितथार्चनयोस्सुतः ॥

शुकेति ॥ तथा तेन प्रकारेण अवितथार्चनयोः अमोघपूजावतोः तयोः राज्ञोः स सुतः अस्फुटजल्पने अव्यक्तभाषणे शुककिशोर इव कीरशिशुरिव अल्पपदक्रमे स्वल्पपादविन्यासे तरुणहंसः बालमराल इव भृशं प्रियकरः बभूव ॥५९॥

६०

पदतलक्रमनिक्वणदन्दुकः
प्रचलकुण्डलमुग्धमृदुस्मितः ।
करतलाहततालरवात्तयोः
महितलाहितलास्यपरोऽभवत् ॥

पदतलेति ॥ पदतलक्रमेण चरणविन्यासेन निक्वणन्तो ध्वनन्तः अन्दुकाः भूषणविशेषाः यस्य स तथोक्तः । प्रच[1]लाभ्यां[1] कुण्डलाभ्यां मुग्धं मनोहरं मृदुस्मितं मन्दहासो यस्य स तथोक्तः सुतः तयोर्मातापित्रोः करतलैराहतस्तालरवः लयस्वरः तस्मात् महितले आहितं कृतं लास्यं नर्तनं परं प्रधानं यस्य [2]स[2] तथोक्तः अभवत् । स्वभावोक्तिरलङ्कारः ॥६०॥

६१

प्रतिफलेन शिशोर्मणिकुट्टिमे
महिरराजत सूतवती सुतम् ।

---

[1] लन्द्रयां (क). [2] सुतः (क).

समममिवास्य सपत्न्युदितेर्ष्यया
भुजगता जगतामधिरक्षितुः ॥

प्रतिफलेनेति ॥ जगतामधिरक्षितुः अस्य राज्ञः भुजं बाहु गता प्राप्ता । द्वितीयाश्रितेत्यादिना समासः । महिः भूमिः समानः पतिर्यस्याःसा सपत्नी तस्यामुदितोत्पन्ना ईर्ष्याऽसूया तया मणिकुट्टिमे मणिनिबद्धभूम्यां 'कुट्टिमोऽस्त्री निबद्धा भूरि'त्यमरः । शिशोः प्रतिफलेन प्रतिबिम्बेन सुतं [1]समं[1] समानं यथा तथा सूतवती अजनयदिवाराजत बभावित्युत्प्रेक्षा । सपत्नीसम-सुखानुभूतिलोल[[2]तायाः[2]] स्त्रीमात्रसाधारणत्वादिति भावः ॥६१॥

६२

कमलिनी मकरन्दमिवालये
स्फुरितकोशगतं स्तनसम्भृतम् ।
नवसुधारसमङ्कगताय सा
ततरसा तरसाऽऽत्मभुवे ददौ ॥

कमलिनीति ॥ ततरसाऽधिकानुरागवती मकरन्दवती च सा राज्ञी अङ्कगतायोत्सङ्गगताय आत्मभुवे तनुजाय कमलिनी नलिनी अलये भृङ्गाय स्फुरितकोशगतं विकसितकुट्मलगतं मकरन्दमिव स्तनसम्भृतं स्तनाभ्यां सम्भृतं धृतं नवसुधारसं स्तन्यं तरसा त्वरया ददौ । उपमालङ्कारः ॥६२॥

---

[1] लुप्तः (क). [2] तया (क. ग.)

६३

समुपदिष्टमिलापतिना मुहुः
गिरिशनाम शिवेशपुरस्सरम् ।
स्खलितवर्णमनूदितमञ्जसा
तरळतारलतान्वितसूनुना ॥

समुपदिष्टमिति ॥ इलापतिना भूपतिना मुहुः समुपदिष्टमुक्तं शिवश्च ईशश्च शिवेशौ शिवेशशब्दौ पुरस्सरौ आदी यस्य तत्तथोक्तं गिरिशस्य शिवस्य [1]नाम[1] नामधेयानि तरळया [2]चञ्चलया[2] तारलतया ळळयोरभेदात् मुक्तालतया अन्वितेन संयुतेन सूनुना सुतेन 'तारोऽत्युच्चस्वरे मुक्तौ विशुद्धौ शुद्धमौक्तिके' इति रत्नमालायाम् । अञ्जसा त्वरया स्खलितवर्णं विगलिताक्षरं यथा अनूदितं उक्तम् ॥६३॥

६४

अवतरन्निजमातुरसौ करात्
अधिगतः करमात्मपितुर्विभौ ।
तरुणहंस इवाम्बुजमम्बुजात्
उपगतोऽपगतोपमविभ्रमः ॥

अवतरन्निति ॥ अपगतोपमविभ्रमः अपगता निरस्ता उपमा येषां ते तथोक्ताः विभ्रमाः विलासाः यस्य स तथोक्तः । असौ शिशुः निजमातुः स्वजनन्याः करात् हस्तात् अवतरन्, आत्मपितुः करमधिगतः प्राप्तस्सन्

---

[1] लुप्तः (क). [2] लुप्तः (क).

अम्बुजादवतरन् अम्बुजं कमलमुपगतः प्राप्तः तरुणहंसः बालमराल इव बभौ रेजे। उपमालङ्कारः ॥६४॥

६५

स्तनसुधां निजमातुरयं पिबन्
उरसि हारमणीन् करतस्स्पृशन्।
स गणयन्नवषड्दश चेति तान्
व्यतनुतातनुतान्वितमुत्सवम् ॥

स्तनसुधामिति। सोऽयं बालः निजमातुः स्वजनन्याः स्तनसुधां स्तन्यं पिबन् उरसि वक्षसि हाराणां मुक्तावलीनां मणीन् मौक्तिकानि करतः हस्तेन स्पृशन् नव षट् दशेति मणीन् तान् गणयन् सङ्ख्यां कुर्वन् अतनुतया आधिक्येन अन्वितं युक्तमधिकमित्यर्थः। उत्सवं व्यतनुत अकरोत्। स्वभावोक्त्यलङ्कारः ॥६५॥

६६

नभसि बालविधुर्नगसानुनि
द्विपशिशुश्च यथा परिवर्धते।
स च तथा रुचिभद्रगुणोन्नतः
स्वभवने भवनेऽत्र कृतोत्सवम् ॥

नभसीति॥ यथा नभसि व्योम्नि बालविधुः परिवर्धते, यथा नगस्य शैलस्य सानुनि प्रस्थे 'स्नुः प्रस्थस्सानुरस्त्रियामि'त्यमरः। द्विपस्य गजस्य शिशुः कलभः परिवर्धते, तथा रुच्या कान्त्या भद्रगुणेन कल्याणगुणेन अन्यत्र भद्रजातीयगजगुणेन च उन्नत उत्कृष्टः स च शिशुश्च स्वस्य

द्रव्यस्य भवने आवासे, अत्र भवने गृहे, कृत उत्सवो यस्मिन् कर्मणि तद्यथा तथा परिवर्धते [1]एधते[1]। उपमालङ्कारः ॥६६॥

६७

शिवमतोचितदेशिकदीक्षितः
सकलवाङ्मयवारिधिपारगः।
गुरुचरेशसमर्चनतत्परो
हरमते रमते जनपात्मजः॥

शिवेति॥ शिवमते शैवमते उचितेन योग्येन देशिकेन गुरुणा दीक्षितः दीक्षया संस्कारितः सकलस्य, वाङ्मय[2]मागमशास्त्रं तदेव वारिधिः तस्य[2] वारिधेः समुद्रस्य पारमन्तं गच्छतीति तथोक्तः गुरूणां देशिकानां चराणां जङ्गमानां ईशस्य शिवस्य च समर्चने पूजायां तत्पर आसक्तः जनपात्मजो राजसुतः हरमते शैवमते रमते क्रीडति ॥६७॥

६८

मृडनिरीक्षणलक्षणमीक्षणं
श्रवणमीशकथाश्रवणोत्सुकम्।
नृपसुतस्य शिवाङ्घ्रिरतिर्मति-
प्रकृतिराकृतिरास शिवात्मिका॥

---

[1] उद्यते (क)· [2] स्यागमशास्त्रादेरेव (ग).

मृडेति ॥ नृपसुतस्य राजकुमारस्य ईक्षणं नयनं 'ईक्षणं चक्षुरक्षिणी' इत्यमरः । मृडस्य निरीक्षणं दर्शनमेव लक्षणमसाधारणं यस्य तत्तथोक्तमासेति सर्वत्र सम्बन्धः । श्रवणं श्रोत्रमीशकथायाः शिवचरित्रस्य श्रवणे आकर्णने उत्सुकमुद्युक्तम् । 'श्रवणं मे श्रुतौ कर्णे' इति रत्नमालायाम् । मतिप्रकृतिः बुद्धिप्रकारः शिवाङ्घ्र्योरीशचरणयोः रतिरासक्तिः आकृतिराकारश्शिवात्मिका शिवस्वरूपिणी* ॥६८॥

६९

मधुरिवाम्रवणस्य सुधारुचः
शरदिवार्क इवाम्बुरुहस्ततः ।
विरहिणोऽस्य तनोश्च समाययौ
शिशुतयाऽऽशु तया नवयौवनम् ॥

मधुरिति ॥ आम्रवणस्य माकन्दवनस्य 'प्रणिरन्तश्शरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि' इति वन नकारस्य णत्वम् । मधुर्वसन्त इव 'मधुर्वसन्ते चैत्रेचे'ति विश्वः । सुधारुचः चन्द्रस्य शरत् शरदृतुरिव अम्बुरुहः कमलस्य अर्कस्सूर्य इव तया शिशुतया शैशवेन विरहिणः वियोगवतोऽस्य नृपसुतस्य तनोश्शरीरस्य शेषविवक्षया षष्ठी । ततश्शैशवविरहानन्तरमाशु द्रुतं नवयौवनं तारुण्यं समाययौ आगतं । वसन्तसमयसमवेत वनादिसादृश्येन नृपसुतस्य शैशवापेक्षया तारुण्ये उत्कर्षो व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः ॥६९॥

---

* अत्र किञ्चिल्लोप इति S. A. 414 (क) मातृकायां वर्तते ॥ 'ग' मातृकायां एतावानेव वर्तते ॥

७०

ततमुरस्थलमस्य गलो महान्
मुखमुदाररुचि स्फुरितं वपुः ।
भुजयुगं युगदीर्घमधिप्रभं
नियतमायतमास दृगम्बुजम् ॥

ततमिति ॥ 'अस्य नृपसुतस्य उरस्थलं वक्षः ततः विस्तृतं आस । गलः कण्ठः महान् 'कण्ठो गलोऽथ ग्रीवायामि'त्यमरः । *'ततमुरः परिणद्धमभूद्गलमि'ति पाठे गलशब्दस्य नपुंसकत्वं चिन्त्यम् । [1]मुखमुदाररुचि उत्कृष्टकान्तिमत् । 'उदारो दातृमहतोरि'त्यमरः । वपुश्शरीरं स्फुरितं प्रकाशितम् । भुजयुगं बाहुयुग्मं युगस्सीराङ्गमिव दीर्घमायतम्[1] । 'युगं हस्तचतुष्केऽपि रथसीराङ्गयोर्युगः । युगं कृतादौ युगले' इति विश्वः । नियतमधिगता प्राप्ता प्रभा यस्य तत्तथोक्तं दृगम्बुजं नयनकमलमायतं दीर्घम् ॥७०॥

७१

श्रितममुष्य दृगब्जमपि श्रिया
मुखसरोरुहमस्य तथा गिरा ।
समतयैव तयोरपि वर्तते
स हि तदा हितदानगुणोन्नतः ॥

श्रितमिति ॥ अमुष्य नृपसुतस्य दृगब्जं नयनकमलं श्रिया लक्ष्म्या श्रितं तथाऽस्य मुखसरोरुहं गिरा वाण्याऽपि श्रितम् । तदा हितस्येष्टस्य दानं

---

* व्याख्यातृसूचितपाठभेदः ॥ [1] लुप्तभागः (क)·

वितरणमेव गुणस्तेनोन्नतः सः नृपसुतः तयोः लक्ष्मीसरस्वत्योः समतया साम्येनैव वर्तते । हि प्रसिद्धौ । अनेन दक्षिणनायकत्वं व्यज्यते ॥७१॥

७२

वपुषि चातनुभूतिरथालये
विधुरुचिर्वदने च महाहवे ।
परमवर्तत तस्य गुरुक्रमो
गिरि पुरारिपुरातनवर्त्मनि ॥

वपुषीति ॥ अथ तस्य नृपसुतस्य वपुष्यङ्गे आलये गृहे च अतन्वी बह्वी भूतिर्भस्म सम्पच्च अवर्तत । 'भूतिर्भस्मनि सम्पदी'त्यमरः । वदने मुखे महाहवे रणे च । विधोश्चन्द्रस्य विष्णोश्च रुचिश्शोभा अवर्तत । 'विधुर्विष्णौ चन्द्रमसी'त्यमरः । गिरि वाचि पुरारेः शिवस्य पुरातनानां पूर्वपुरुषाणां वर्त्मनि मार्गे च गुरोर्बृहस्पतेः पितुश्च क्रमः अवर्तत । 'गुरुर्गीष्पतिपित्राद्योः' [1]इति वैजयन्ती[1] ।

अत्र प्रकृतेष्वेकशब्दोपात्ततयैक्याध्यासेन समानधर्मवत्ता प्रतिपादनात्तुल्ययोगिताविशेषः । 'वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिते'ति लक्षणात् ॥७२॥

७३

अपि सुधाब्धिगुणानमृतद्युतिः
भृशमिवात्मपितुः प्रथितान् गुणान् ।

---

[1] इत्यमरः (क).

स खलु बिभ्रदवत्यखिलान् जनान्
घनयशा नयशास्त्रविचक्षणः ॥

अपीति ॥ अमृतद्युतिश्चन्द्रः सुधाब्धेः क्षीरसमुद्रस्य गुणान् [1]धावल्यादिगुणानिव[1] आत्मपितुः स्वजनकस्य प्रथितान् [2]प्रसिद्धान् गुणान्[2] शौर्यौदार्यादीन् बिभ्रत् वहन् 'नाभ्यस्तादि'ति शतुर्नुमभावः। घनं सान्द्रं यशः कीर्तिर्यस्य स तथोक्तः भृशं नयशास्त्रे नीतिशास्त्रे विचक्षणो विशारदः सः सकलानपि जनानवति रक्षति खलु। उपमालङ्कारः ॥७३॥

७४

हरिरिवाश्रितमानवमुत्प्रदः
कमलभूरिव तामरसाश्रयः।
सुरवरेण्य इवारिबलान्तको
हृततमास्ततमास्थितिरर्कवत् ॥

हरिरिति ॥ सः हरिर्विष्णुरिव आश्रितानां मानवानां जनानां मुदं सन्तोषं प्रददातीति तथोक्तः। अन्यत्राश्रिताया वक्षस्थितायाः मायाः लक्ष्म्याः नवां मुदं प्रददातीति तथोक्तः। कमलभूर्विरिञ्चिरिव तामरसाश्रयः *तामरसस्य सुवर्णस्य आश्रयः। अन्यत्र तामरसं कमलं आश्रयः यस्य स तथोक्तः 'अथो तामरसं। ताम्रे स्वर्णे सरोरुहे'त्युभयत्र नानार्थरत्नमाला। सुरवरेण्य इन्द्र इव अरिबलानां शत्रुसैन्यानां अन्तकः। अन्यत्रारेः प्रत्यर्थिनः बलस्य बलासुरस्य

---

[1] लुप्तः (क). [2] लुप्तः (क.) * अत्र व्याख्यानलोप इति 'क' पुस्तके॥ अन्यार्थस्तु लुप्तः। लुप्तार्थस्त्वत्र लिखितः॥

★

अन्तको नाशकः 'बलो दैत्ये बलं सैन्ये' इति विश्वः। अर्कवत् सूर्य इव हृतं परिहृतं तमः अज्ञानं तमिस्रञ्च यस्य स तथोक्तः 'तमोऽन्धकारे स्वर्भानौ तमश्शोके गुणान्तरे' इति विश्वः। ततं विस्तृतं यथा तथा मायाः [1]मेधा[1]याः स्थितिर्यस्य। अन्यत्र तता मासां मासानां स्थितिर्येन स तथोक्तः। सूर्यगत्यैव कालस्य निर्णयादिति भावः। 'खर्परे शरि वा विसर्गलोपो वाच्य' इति विसर्गलोपः। 'चन्द्रे मासे च माः पुमान्। मा स्त्री माने मृतौ वेला मेधा-श्रीमध्यमातृष्वि'ति रत्नमालायाम्। अभूत्। उपमालङ्कारः ॥७४॥

७५

गजहयाद्यधिरोहणकर्मणि
स्फुटधनुश्शरशस्त्रचमत्कृतौ।
प्रभवति स्म कलास्वखिलास्वपि
स जनकाज्जनकाद्भुतवृत्तिमान् ॥

गजेति ॥ जनकस्य विदेहराजस्येव अद्भुता वृत्तिर्व्यापारोऽस्यास्तीति तथोक्तः। जनकस्साम्राज्यधुरन्धरोऽपि समधिगततत्त्वसाक्षात्कारवानिति प्रसिद्धिः। अथवा जनकानां जनानां स्वार्थे कप्रत्ययः। अद्भुतवृत्तिमान् सः गजाश्च हयाश्च गजहयम्। सेनाङ्गत्वादेकवद्भावः। तदादेः अधिरोहणकर्मणि आरोहणक्रियायां स्फुटं यथा तथा धनुषः शरासनस्य शराणां बाणानां शस्त्राणां खड्गादीनां च चमत्कृतौ चमत्क्रियायामखिलासु समस्तासु कलासु विद्यास्वपि जनकात् पितुः प्रभवति समर्थो भवति स्म। सारालङ्कारः ॥७५॥

---

[1] वेला (क.)

७६

नृपसुतोत्तमरूपजितं च मां

परिहसत्यबलाजन इत्यलम् ।

हृदि निगूढवपुर्वसति ह्रिया

रतिवरोऽतिवरोदितचापलः ॥

नृपसुतेति ॥ किञ्च अबलाजनः स्त्रीजनः नृपसुतस्य राजकुमारस्य उत्तमरूपेणोत्कृष्टसौन्दर्येण 'रूपं स्वभावे सौन्दर्य' इति शाश्वतः । जितं मां परिहसति अपहासं करोति । इत्यलमत्यन्तं ह्रिया लज्जया हृदि हृदये अतिवरमुत्कृष्टं यथा तथा उदितमुत्पन्नं चापलं चाञ्चल्यं यस्य स तथोक्तः रतिवरः मदनः निगूढं विलीनं वपुर्यस्य स तथोक्तस्सन् वसति तिष्ठति । स्मरवपुर्निलयनस्य नृपकुमारस्य सौन्दर्यकृततिरस्कारप्रयुक्तप्रमदापरिहासजनितलज्जाऽहेतुकत्वेऽपि तद्धेतुकत्ववर्णनाद्धेतूत्प्रेक्षा । सा च व्यञ्जकाप्रयोगाद्गम्या ॥७६॥

७७

प्रथितमीशपदार्चनकर्मणा

प्रभुमभीक्ष्य पदच्युतिशङ्कया ।

प्रतिनिशं गतनिद्रतयोषितं

मघवताऽघवता दिवि चात्मनः ॥

प्रथितमिति ॥ ईशपदार्चनकर्मणा शिवचरणार्चनक्रियया प्रथितं ख्यातं प्रभुं नृपसुतमभीक्ष्य आत्मनः स्वस्य पदच्युतिशङ्कया स्थानभ्रंशभयेन अघवता दुःखवता 'अंहो दुःखव्यसनेष्वघमि'त्यमरः । मघवता इन्द्रेण प्रतिनिशं

निरन्तरञ्च गतनिद्रतया उषितम्। त्रिदशेश्व[1][रे स्वभाव][1]सिद्धस्य निद्राराहित्यस्य नृपसुतकृतशिवपूजाजनितभयहेतुकत्वोत्प्रेक्षणादियमपि हेतूत्प्रेक्षा, गम्या च ॥७७॥

७८

भुजभुजङ्गचलत्पटुजिह्विका
सुरवधूरिपुसङ्गमदूतिका।
नृपसुताऽसिलता च भिनत्त्यमुं
धुरि च योऽरिचयोऽतिमदागतः ॥

भुजेति॥ भुजो बाहुरेव भुजङ्गस्सर्पः तस्य चलन्ती पटुः शक्ता जिह्विका रसना सुरवधूनामप्सरसां रिपुभिः शत्रुभिः सङ्गमे दूतिका सङ्घटनकारिणी च। नृपसुतस्य असिः खड्गः लतेव तथोक्ता। यश्च अरिचयः शत्रुसङ्घः धुर्यग्रे अतिमदेन गर्वातिशयेन आगतः, अमु शत्रुसङ्घं भिनत्ति।* [रूपकालङ्कारः] ॥७८॥

७९

द्विषदसृग्जलसेचनवर्धिता
युधि कृपाणलतेव सकुट्मला।
प्रमिलिता दलितद्विपमौक्तिकैः
अवनतावनतारकमेदिनः ॥

---

[1] लुप्तः (क. ग.)

* अत्रापि 'किञ्चिल्लोप' इति 'क' पुस्तके वर्तते। लोपः केवलं अलङ्कारनिरूपणमात्रे।

द्विषदिति ॥ अवनतानां नम्राणामवने रक्षणे तारकभेदिनः षण्मुखस्य 'बाहुलेयस्तारकजिद्विशाखश्शिखिवाहन' इत्यमरः । अस्य द्विषतां शत्रूणामसृग्रुधिरमेव जलं तेन वर्धिता समेधिता । [1][वृध धातोः][1]ण्यन्तात्कर्मणि क्तः । कृपाणलता खड्गलता युधि युद्धे दलितानां छिन्नानां द्विपानां मौक्तिकैः कुम्भस्थलस्थितमुक्ताफलैः 'करीन्द्रजीमूतवराहशङ्खमत्स्याहिशुक्त्युद्भववेणुजानि । मुक्ताफलानि प्रथितानि [2][लोके तेषां च शुक्त्युद्भवमेव भूरि]'[2] प्रमिलिता संयुता सती सकुट्मला कोरकसहितेव आस ।

अत्र लतात्वेनारोपितखड्गधारासङ्गतरिपुगजकुम्भसमुद्भूतमैक्तिकपुञ्जे कुट्मलतादात्म्योत्प्रेक्षणाद्रूपकोत्प्रेक्षयोस्सङ्करः ॥७९॥

८०

अथ तनुद्युतिभूष्यविभूषणः
सविभवं समुपेत्य सभास्थितम् ।
जनकमस्य ननाम युवा तदा
स चरणे च रणेऽहितभञ्जनः ॥

अथेति ॥ अथ यौवनप्रादुर्भावानन्तरं रणे अहितान् शत्रून् भञ्जयतीति तथोक्तः । कर्तरि ल्युट् । युवा सः राजसुतः तनुद्युत्या देहकान्त्या भूष्याणि परिष्कर्तव्यानि विभूषणानि आभरणानि यस्य स तथोक्तस्सन् । स्वतस्सिद्धलावण्यातिशयवानयमिति भावः । सविभवं वैभवसहितं यथा भवति तथा सभायामास्थाने स्थितं जनकं पितरमुपेत्य तदा अस्य पितुः चरणे पादौ ननाम च नमस्कृतवान् । णम प्रह्वत्वे शब्दे[3]चेति धातो[3]र्लिट् ॥८०॥

---

[1] वृद्धिशब्दात् (क. ग.) [2] लुप्तः (क. ग.) [3] लुप्तः (क).

८१

भुजयुगात्परिरभ्य निजासनं
गमयितुं पितुराक्रमतो गलन् ।
विनयतः पदपीठतले वसन्
घनरसो नरसोम इवाबभौ ॥

भुजेति ॥ आत्मजं परिरभ्य आलिङ्गय निजासनं स्वकीयसिंहासनं गमयितुं प्रापयितुमाक्रमतः आददतः पितुर्भुजयुगात् गलन् निर्गच्छन् विनयतः विनयात् पदपीठतले पादपीठे वसन् घनरसः अधिकवीर्यवान् नरसोमः मानुषरूपवान्परमेश्वर इव इत्युत्प्रेक्षा । आबभौ ॥८१॥

८२

दृगलिरस्य युवास्यसरोरुहे
रुचिरसं प्रपिबन्नतितृप्तितः ।
अनलमुत्पतितुं मृदु सञ्चरन्
निवसतीव स तीव्रकरौजसः ॥

दृगिति ॥ तीव्राः तीक्ष्णाः कराः किरणाः यस्य स तीव्रकरस्सूर्यः स इव ओजः प्रतापः अथवा तीव्रश्च तत्करौजः बाहुबलं तेन सहितस्तथोक्तस्तस्य अस्य नृपस्य दृगेवालिर्भृङ्गः यूनो राजपुत्रस्य आस्यसरोरुहे मुखकमले रुचिः कान्तिरेव रसः तं प्रपिबन् पानं कुर्वन् अतितृप्तितः अतिसौहित्यात् उत्पतितुं गन्तुमनलमशक्त इव मृदु मन्दं सञ्चरन् चलन् निवसति ।

अत्र प्रेमातिशयलब्धदृष्टिनैश्चल्यस्य मुखकमलकान्तिसमास्वादनसौहित्यातिशयहेतुकत्वोत्प्रेक्षणादुत्प्रेक्षालङ्कारः । रूपकसङ्कीर्णश्च ॥८२॥

८३

अयमिलाभरणक्षमतां गतः
गुरुभुजोऽस्य भुजे विनिवेश्य मे ।
महिमहं गतधूस्सुखमावसे
पुररिपोररिपोत्रिहृतोऽर्चने ॥

सुतस्य पट्टाभिषेककरणाय मन्त्रिभिस्सहालोचनक्रममेव प्रथमं प्रस्तौति । अयमिति ॥ गुरोः पितुः भुज इव भुजो यस्य स तथोक्तः अत एवायमिलाभरणक्षमतां भूभरणसामर्थ्यं गतः । अस्य तनयस्य भुजे मे मम महिं भुवं [1][वि][1]निवेश्य निधाय अहं गतधूः अपगतभारस्सन् सुखमरिं शत्रुं पोत्रिणं वराहं हरति प्रहरतीति तथोक्तः तस्य 'कोलः पोत्री किरिः किटिरि'त्यमरः । विष्णोरवतारभूतवरा[ह]समाप्तिकरश्शङ्कर इति भावः । पुररिपोः शिवस्यार्चने आवसे तिष्ठामि ॥८३॥

८४

इति सह सचिवेन क्ष्मापतिर्भाषमाणः
समुदितसुमुहूर्ते सम्भ्रमादद्भुतश्रीः ।
न्यतनुत निजसूनोस्स्फारसाम्राज्यपट्टं
शुभविभवनियुक्तं बन्धुभूपैरुपेतः ॥

---

[1] लुप्तः (क. ग.)

इतीति ॥ अद्भुता श्रीस्सम्पद्यस्य स तथोक्तः क्ष्मापतिः राजा सचिवेन मन्त्रिणा सह इत्युक्तप्रकारेण भाषमाण बन्धवश्च ते भूपाः राजानः तैरुपेतस्सहितस्सन् समुदितः समुद्भूतः सुमुहूर्तः तस्मिन् । शुभविभवेन कल्याणवैभवेन नियुक्तं प्रयुक्तं यथा तथा सम्भ्रमात् सन्तोषात् निजसूनोः स्वसुतस्य स्फारसाम्राज्ये मण्डलाधिपत्ये पट्टं पट्टा[1]भिषेकं[1] व्यतनुत [2]कृतवान् । मालिनीवृत्तम् । सर्गान्तत्वाद्वृत्तभेदः[2] ॥८४॥

८५

नृपककुदमनूनं सूनवे तं नृपालः
सपदि सदसि दत्त्वा त्यक्तभोगाभिलाषः ।
शमितचपलचेतोवृत्तिरुद्दीप्तबोधः
शिवचरणसरोजध्यान[3]युक्तोऽवतस्थे ॥[3]

नृपेति ॥ नृपालो 'विक्रमचोलमहीपालः' सपदि तदा सदसि सभायां सूनवे सुताय अनूनमशेषं तं नृपककुदं राजलक्ष्म 'ककुत्स्यात्ककुदि श्रेष्ठ वृषाङ्गे राजलक्ष्मणी'ति विश्वः । दत्त्वा त्यक्तः परिहृतः भोगे सुखे अभिलाष इच्छा येन स तथोक्तः शमितारशान्ताः चपलस्य चञ्चलस्य चेतसः वृत्तयो विकारा यस्य स तथोक्तः उद्दीप्त उद्भासितः बोधः ज्ञानं यस्य स तथोक्तः शिवचरणसरोजयोर्ध्यानेन युक्तस्सन् अवतस्थे स्थितवान् । मालिनीवृत्तम् ॥८५॥

---

[1] द्बन्धं (ग)· [2] लुप्तः (क). [3] युक्तावतोऽभूत् (ख.)

८६

*क्षमा चित्ते नेत्रेवनमपि शुचिर्यस्य चरिते
मरुत्सङ्घः पार्श्वे सुखमपि निजात्मन्यसदृशम् ।
कलापोऽङ्के भानुर्वपुषि मघवान्पादयुगले
स वः पायाद्देवः प्रथितविभवश्चाष्टतनुमान् ॥

क्षमेति ॥ यस्य शिवस्य चित्ते मनसि क्षमा शान्तिः भूमिश्च 'क्षिति क्षान्त्योः क्षमा प्रोक्ते'ति विश्वः । नेत्रे नयने अवनं पालनं वनं जलञ्च 'जीवनं भुवनं वनमि'त्यमरः । चरिते चरित्रे शुचिः नैर्मल्यं अग्निश्च 'शुचिश्शुद्धेऽनुपहते शृङ्गाराषाढयोस्सिते । ग्रीष्मे हुतवहेऽपि स्यादि'ति विश्वः । पार्श्वे मरुतां देवानां वायूनाञ्च सङ्घः । 'मरुतौ पवनामरावि'त्यमरः । निजात्मनि असदृशं निरुपमं सुखं गगनञ्च । अङ्के अवयवे कलापः भूषणं चन्द्रश्च । वपुषि देहे भानुर्दीप्तिस्सूर्यश्च 'भानुः किरणसूर्ययोरि'ति विश्वः । पादयुगले मघवान् इन्द्रः सोमयाजी च । 'मघवाबहुलमि'ति तृ इत्यादेशे 'उगिदचां सर्वनामस्थाने चा धातोरि'ति नुमागमः । अष्टतनुमान् पृथिव्याद्यष्टमूर्तिः प्रथित विभवः सः पायात् । 'भूमिर्जलञ्च तेजश्च वायुराकाशमेव च । अर्केन्दू यजमानश्च शङ्करस्याष्टमूर्तय' इति ।

अत्र श्लेषभङ्ग्या चित्तादिषु पृथिव्याद्यष्टकमुदाहृत्य तेनाष्टमूर्तित्वव्यवस्थापनाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥८६॥

---

* तृतीयसर्गान्ते 'स्वर्भेरी भोरिराव' इति मङ्गलपद्यानन्तरमयं श्लोकोऽपि 'ख' पुस्तके लिखितः ॥

इति सकलभुवनैकवल्लभनिखिललेखनायकनिकायसन्ततसमर्चित-
परम'शिवलिङ्ग'पादारविन्दषट्पदायमानलसदुभयकविता-
विशारद'श्रीषडक्षरिदेव'विरचिते 'चोलभूपालीये'
'कविकर्णरसायनाख्ये' महाकाव्ये सुन्दर-
चोलसाम्राज्यपट्टाभिषेकवर्णनं नाम
चतुर्थस्सर्गः ॥

व्याख्यातमेतत् ॥

इति समस्तसुजनस्तोमसंस्तूयमाननिस्तुलगुणग्रामाभिरामश्रीमत्सालिराज-
कुलकलशजलनिधिपूर्णकलाधरश्रीचेन्नबसवनृपतनूभवश्रीमुदियमहीपाल-
प्रोत्साहित'श्रीवेङ्कनसुधी'विरचितायां कविकर्णरसायनव्याख्यायां
'साहित्यसुधोदयाभिख्यायां'
चतुर्थस्सर्गः ॥

पञ्चमस्सर्गः

१

कश्चिद्भक्तो भुवि पुरभिदस्सत्प्रियस्सत्यवादी
प्रत्यर्थिक्ष्माधर[1]कुलपविर्वि[1]श्रुतस्फारकीर्तिः ।
विद्याराशिर्वितरणनिधिश्श्रीयुतस्सूर्यवंश्यः
क्ष्मा[2]भृत्तस्थौ[2]'कुसुमनगरे' 'मानकञ्जारकाख्यः' ॥

अथ अस्य विवाहवर्णनम् ॥

कुलसम्बन्धयोग्यं राजान्तरं प्रस्तौति—कश्चिदिति ॥ भुवि पुरभिदः शिवस्य भक्तः सतां साधूनां प्रियः सत्यं ऋतं वदतीति सत्यवादी । ताच्छील्ये णिनिः । प्रत्यर्थिनः परिपन्थिनः क्ष्माधराः पर्वताः तेषां कुलस्य पविः कुलिशभूतः 'कुलिशं भिदुरं पविरि'त्यमरः । विश्रुता प्रसिद्धा स्फारकीर्तिरधिककीर्तिर्यस्य स तथोक्तः विद्याराशिः सकलविद्याविशारद इत्यर्थः । वितरणस्य दानगुणस्य निधिराश्रयः । 'विश्राणनं वितरणं स्पर्शनं प्रतिपादनमि'-त्यमरः । श्रीयुतः सम्पद्युक्तः सूर्यवंश्यस्सूर्यवंशसम्भूतः 'तत्र भव इत्यर्थे यत्प्रत्ययः' । मानकञ्जार इत्याख्या नाम यस्य स तथोक्तः कश्चित् क्ष्माभृत् राजा कुसुमनगरे तस्थौ स्थितवान् ।

उदात्तालङ्कारः । अस्मिन् सर्गे मन्दाक्रान्तावृत्तानि ॥१॥

---

[1] धरपतिः वि (ख.) [2] वृत्तिस्थः (ख.)

२

प्रेयस्या[1]सीत्कि[1]ल गुणवती सारसौन्दर्य[2]सीमा
ला[2]वण्यश्री[3]र्मृदुतरवपुस्त[3]स्य राज्ञो मनो[4]ज्ञा[4] ।
[5]तद्गेहिन्या स[5]ममनुभवन्सारसंसारसौख्यं
कन्यारत्नं[6]विभुरलभत[6] प्रार्थितेशप्रसादात् ॥

प्रेयसीति ॥ सारस्य प्रशस्तस्य सौन्दर्यस्य सीमा मर्यादा भूः 'सीमसीमे स्त्रियामुभे' इत्यमरः । लावण्ये सौन्दर्ये श्रीः लक्ष्मीः तत्सदृशीत्यर्थः । मृदुतरवपुः कोमलाङ्गी गुणवती सौजन्यादिगुणशालिनी मनोज्ञा कान्ता तस्य राज्ञः मानकञ्जारकाख्यस्य प्रेयसी प्रिया आसीत् अभूत्किल । सा च सा गेहिनी च तद्गेहिनी तया समं भार्यया सह सारं न्याय्यं संसारे सौख्यं सुखं स्वार्थे ष्यञ्प्रत्ययः । अनुभवन् विभुः राजा प्रार्थितस्य याचितस्य ईशस्य शिवस्य प्रसादात् अनुग्रहात् कन्यारत्नं कन्यासु रत्नं श्रेष्ठां 'रत्नं स्वजातिश्रेष्ठेऽपी'त्यमरः । अलभत प्राप्तवान्* ॥२॥

३

प्रेम्णा पित्रोस्सुललिततनुस्साऽपि 'सोमप्रभाख्या'
कन्या सोमप्रतिनिधिमुखी वर्धिता वल्लरीव ।
कल्पाख्याऽभूत्समुदितसखीकेलि[7]भिर्मोदमाना[7]
निस्तीर्य प्राक्परिचितरसं शैशवं यौवनस्था ॥

---

[1] स्या कि (ख.) [2] भूमिर्ला (ख.) [3] मधुरिमवपुष्म (ख.) [4] ज्ञे (ख)
[5] देहीन्यस्यस्स (ख.) [6] रलभत भुवि (ख.)
* अलङ्कारलोपः इति (क) पुस्तके । [7] क्रीडमाना इति व्याख्यातृदृष्टपाठभेदः

प्रेम्णेति ॥ माता च पिता च पितरौ तयोः प्रेम्णा प्रीत्या कल्पाख्या वल्लरी कल्पलतेवेत्यर्थः । वर्धिता वृद्धिं प्रापिता '[वृधु धातोः] ण्यन्तात्कर्मणि क्तः' सुष्ठु ललिता रम्या 'ललितं चारुणि त्रिष्वि'त्यमरः । तनुरङ्गं यस्यास्सा तथोक्ता सोमस्येन्दोः प्रतिनिधिः समानं मुखं यस्यास्सा तथोक्ता 'स्वाङ्गाच्चे'त्यादिना ङीप् । सोमप्रभेति आख्या नाम यस्यास्सा तथोक्ता साऽपि कन्या समुदितानां मिलितानामथवा सह मुदितं मोदो यासाम् । 'भावे क्तः' । सखीनां केलिभिः क्रीडाभिः मोदमाना सन्तुष्टा सती प्राक् प्रथमं परिचितोऽनुषक्तः रस उत्कर्षो यस्य स तथोक्तः शैशवं शिशुत्वं निस्तीर्योल्लङ्घ्य यौवनस्था अभूत् ।

अत्र 'समुदितसखीकेलिभिः क्रीडमानेति' पाठश्चिन्त्यः । क्रीडतेरात्मनेपदनिमित्ताभावात् । उपमालङ्कारः ॥३॥

४

श्लक्ष्णौ चो[1]रू न[1]यनयुगलं व्यायतं मध्यदेशः
क्षा[2]मः[2]कामं कुचयुगमभूत्पीवरं रोमराजिः
श्यामा तन्वी जघनमलघु स्फाररोचिर्मुखाब्जं
लावण्याक्तं वपुरभिनवे यौवने[3]ऽस्या मृ[3]गाक्ष्याः ॥

इतःपरं चतुर्भिः श्लोकैरस्यास्तारुण्यं वर्णयति—श्लक्ष्णाविति ॥ अस्याः मृगाक्ष्याः सोमप्रभायाः अभिनवे यौवनप्रादुर्भाव इति भावः । ऊरू सक्थिनी 'सक्थिक्लीबे पुमानूरुः' इत्यमरः । श्लक्ष्णौ स्निग्धौ अभूतामिति

---

[1] रुर्नय (ख.) [2] माः (ख.) [3] तन्मृ (ख.)

वचनविपरिणामः। नयनयुगलं व्यायतं विस्तृतमभूत्। मध्यदेशः अवलग्नं कामं नितान्तं क्षामः कृशः अभूत्। कुचयुगं[1]स्तनयुग्मं पीवरं पृथुलं अभूत्। रोमराजिः वलित्रयी श्यामा श्यामला तन्वी च अभूत्। जघनं कटिपुरोभागः अलघु विशालं अभूत्। 'जघनं कामिनीश्रोणिपुरो[1]भागे कटिस्थल' इति रत्नमालायाम्। मुखाब्जं वदनकमलं स्फारमधिकं रोचिः कान्तिर्यस्य तत्तथोक्तमभूत्। वपुरङ्गञ्च लावण्येन आक्तं व्याप्तमभूत् ॥४॥

५

याने मान्द्यं तदपि हसने कुन्तले वक्रभावो
नेत्रान्ते[2]ऽस्यास्स[2] च कुचयुगे गौरवं [3]तन्नि[3]तम्न्वे।
बिम्बोष्ठे चास्फुरदरुणिमा सोऽपि पादप्रवाले
[4]प्रादुर्भूते वयसि विलसत्पञ्चबाणैकसङ्ख्ये[4] ॥

यान इति ॥ विलसत् प्रसिद्धं पञ्चबाणस्य मन्मथस्य एकसख्यं मुख्यमैत्री यस्य तत्तथोक्तम्। स्मरयौवनयोस्समकालिकत्वनियमादिति भावः। तस्मिन्वयसि प्रादुर्भूते सति अस्याः सोमप्रभायाः याने गतौ 'यानं गतौ वाहने स्यादि'ति विश्वः। मान्द्यं मन्दत्वमस्फुरत् रेजे। तत् मान्द्यं हसने स्मितेऽपि अस्फुरत्। मन्दस्मितमुखीति भावः। कुन्तले अलके वक्रभावो वक्रता अस्फुरत्। स्त्रीणामलकेषु वक्रता सौमङ्गल्यादिशुभकारिणीति सामुद्रिकशास्त्रे प्रसिद्धम्। सः वक्रिमा नेत्रान्ते अपाङ्गे चास्फुरत्। बिम्बं

---

[1] (क) पुस्तके लुप्तभागः [2] सा स (ख.) [3] तं नि (ख.)
[4] सो व्यायासीद्वयसि च ययौ नूतने तां मनोभिः (ख.)

बिम्बफलमिव ओष्ठोऽधरः तस्मिन् 'ओत्वोष्ठयोस्समासे वे'ति पररूपता। अत्रो'पमानानि सामान्यवचनैरि'ति न समासः। सामान्यशब्दप्रयोगात् नाप्युपमितं व्याघ्रादिभिरिति समासः। उपमानोत्तरपदत्वाभावात् किन्तु बिम्बपदस्य तत्सदृशलक्षणमाश्रित्य 'विशेषणं विशेष्येण बहुलमि'ति समासः। एतदर्थव्यक्तीकरणायैव विग्रहवाक्ये इव शब्दप्रयोगः। अरुणिमा रक्तिमा अस्फुरत्। पादप्रवाले चरणपल्लवेऽपि सः रक्तिमा अस्फुरत्।

अत्र मान्द्यादिगुणानां यौगपद्यवर्णनात्समुच्चयालङ्कारः। याने तदपि हसन इति वर्ण्ययोः गतिस्मितयोरेकधर्मस्य शब्दभेदेन वर्णनादावृत्तिदीपकालङ्कारश्च। 'वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः। त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकमि'ति लक्षणात् ॥५॥

६

वक्त्रान्नेत्रान्मृदु[1]ल[1]हसनान्निर्जितं नासिकायाः
तन्व्या प्रा[2]तः[2]स्मितसरसिजं कैरवं चारु कुन्दम्।
चाम्पेयं तद्भुवि कुसुमितं पीनवक्षोरुहश्री-
निर्धूतोऽभूदपिच कुधरस्सुभ्रुवस्तुङ्गशैलः॥

वक्त्रादिति॥ तन्व्या युवत्या (कर्त्र्या) वक्त्रात् मुखात्। हेत्वर्थे पञ्चमी। नेत्रात् दृशः मृदुलहसनात् मन्दहासात् नासिकायाः घ्राणात् प्रातः प्रातःकाले स्मितं विकसितं सरसिजं कमलं 'तत्पुरुषे कृति बहुलमि'ति सप्तम्या अलुक्। स्मितशब्देन नैशिकदोषनिवृत्तावपि कालान्तरातिशयसूचनाय

---

[1] ल (ख). [2] प (ख).

प्रातश्शब्द इति ध्येयम् । कैरवं कुमुदं चारु रम्यं कुन्दं माध्यं 'माध्यं कुन्दमि'-त्यमरः । चाम्पेयं चम्पककलिका निर्जितं परिभूतं तत् तस्मात्कारणात् भुवि क्रुसुमितं पुष्पितं सञ्जातनेत्ररोगञ्च अभूत् । यथा लोके केनचिद्बलवता पराजितस्य तत्केशकृ[न्तना]दिना दृशि रोगो भवति तद्वदिति भावः । 'कुसुमं पुष्पफलयोः स्त्रीरजो नेत्ररोगयोरि'ति विश्वः । तुङ्गशैलः उन्नत-नगोऽपि च सुभ्रुवः पीनयोः पीवरयोः वक्षोरुहयोः स्तनयोः श्रिया शोभया निर्धूतः निवारितः अत एव कुधरो महीधरः कुत्सितनगश्च 'धरश्शैले धरा भूमावि'ति विश्वः । अभूत् ।

अत्र श्लेषभङ्ग्या प्रतीयमाने सरोजादिगतकुसुमवत्त्वादौ वक्त्रादिकृत-पराभवहेतुकत्वोत्प्रेक्षणादुत्प्रेक्षा । वक्त्रात्सरोजमित्यादिना क्रमेणान्वयलाभात् यथासङ्ख्यालङ्कारश्च । तयोः परस्परनैरपे[1][क्ष्या][1]त्संसृष्टिः ॥६॥

७

पद्मा[2]प[2]द्मं नयनमिषतः स्थापितं तन्मुखेन्दौ
वैरं मा भूदिति तदुभ[3]ये ब्र[3]ह्मणा [4]वीक्ष्य हृष्टा[4] ।
निर्दो[5]षेऽ[5]स्मिन्निवसति सदा त्यक्तपद्माब्जवासा
'[6]स्थाने[6] स्त्री[7]णामधिकविभवो[7] यत्र त[8]त्रैव[8] रागः' ॥

पद्मेति ॥ तदुभये चन्द्रपद्मद्वये वैरं द्वेषं मा भूत् मास्त्विति ब्रह्मणा विधात्रा तस्याः सोमप्रभायाः मुखमेवेन्दुश्चन्द्रः तस्मिन्नयनमिषतः नेत्रव्याजात्

---

[1] क्षणा (क). [2] सद्म (ख). [3] योर्ब्र (ख). [4] क्ष्मापकन्या (ख).
[5] ष्य (ख). [6] सास्थ (ख). [7] णां द्विगुणितसुखं (ख). [8] त्राते (ख).

स्थापितं निवेशितं पद्मं कमलं वीक्ष्य दृष्ट्वा सन्तुष्टा पद्मा लक्ष्मीः त्यक्तः परिहृतः पद्माऽब्जयोः कमलचन्द्रयोः वासः स्थितिर्या सा तथोक्ता सती निर्दोषे दूषिकादिरहिते चन्द्रकृतपरिभवरहिते नैशिकसङ्कोचवातप्रकोपादिरहिते च अस्मिन्नयनकमले सदा निवसति तिष्ठति। तथा हि—यत्र यस्मिन् स्थाने अधिकविभवः अत्यन्तातिशयः तत्रैव स्त्रीणां रागः आसक्तिः भवति।

अत्र लक्ष्म्याश्चन्द्रकमलप्रहाणेन ललनानयनकमलनिवासरूपेण वर्ण्य[1]-[विशेष][1]स्य सामान्येन समर्थनादर्थान्तरन्यासः ॥७॥

८

पुत्रीमेवं नवतरुणिमालङ्कृतां[2] तां म[2]हीशः
सार्धं पश्यन्निजमहिलया प्रेमसारान्तरङ्गः।
तस्याः कांक्ष[3]न्ननु[3]गुणवरं सम्यगभ्यर्च्य शम्भुं
[4]भक्त्या[4]भूयः प्रणमनपरश्शङ्करं तं ययाचे॥

पुत्रीमिति॥ एवमुक्तप्रकारेण नवतरुणिम्ना नूतनयौवनेन अलङ्कृतां परिष्कृतां तां पुत्रीं महीशो मानकञ्जारकः निजमहिलया सार्धं स्वस्त्रिया सह पश्यन् वी[5][क्ष][5]माणः प्रेमसारः प्रीत्यतिशयः अन्तरङ्गे अन्तःकरणे यस्य स तथोक्तः। तस्याः पुत्र्याः अनुगुणोऽनुरूपो वरः जामाता 'वरो जामातृषिद्गयोरि'ति विश्वः। तं कांक्षन् अभिलषन् शं सुखं करोतीति शङ्करः तं शम्भुं भक्त्या सम्यगभ्यर्च्य पूजयित्वा भूयो बहुशः प्रणमनपरः प्रणामासक्तस्सन् तं वरं ययाचे याचितवान् ॥८॥

---

[1] वैशेष्य (क). [2] तन्म (ख). [3] न्नव (ख). [4] वक्ष्ये (ख). [5] क्ष्य (क).

★

९

भावं बध्वा क्षणमपि ततः पारवश्यं गतस्य
तस्मिन् भक्त्या भृशमुपवि[1]श[1]न्मानसे तस्य राज्ञः ।
मद्भक्तोऽस्ति प्र[2]णुतगु[2]णवान् सुन्दरश्चोलभूपः
तस्मै दे[3]या त[3]व तनु[4]भ[4]वेत्यञ्जसोवाच शम्भुः ॥

भावमिति ॥ ततो याचनानन्तरं भावं चित्तं बध्वा निरुध्य तस्मिन् शिवे भक्त्या क्षणं क्षणमात्रमत्यन्तसंयोगे द्वितीया । पारवश्यं परवशत्वं गतस्य प्राप्तस्य तस्य मानकञ्जारकस्य राज्ञः मानसे मनसि उपविशन् निविष्टश्शम्भुः मद्भक्तः प्रणुताः प्रशस्ताः गुणा अस्य सन्तीति प्रणुतगुणवान् सुन्दरस्सुन्दर इति नामा चोलभूपश्चोलराजः अस्ति । सुन्दरचोलभूपाय तव तनुभवा पुत्री देया इति अञ्जसा शीघ्रं उवाच ॥९॥

१०

शृण्वन्नेवं [5]गदितमधिपः[5] स्थाणुना स प्रजानां
हृष्टस्सप[6]दि स[6]पु[7]ल[7]कवपुस्तद्वचः श्रद्दधानः ।
स्वप्रेयस्यै तदपि कथयन्मन्त्रिणे च [8]प्रश[8]स्तं
शुद्धान्तस्थः पुनरपि मृडं पूजयन् सो[9]ऽत्र[9]तस्थे ॥

शृण्वन्निति ॥ प्रजानां जनानामधिपः 'प्रजा स्यात्सन्ततौ जन' इत्यमरः । सः मानकञ्जारकः एवमुक्तप्रकारेण स्थाणुना शिवेन गदितमुक्तं

---

[1] त (ख). [2] णितरु (ख). [3] यात्त (ख). [4] भु (ख).
[5] प्रथितनृपतिः (ख). [6] ष्ट स (ख). [7] ळ (ख). [8] व (ख). [9] म (ख).

शृण्वन् आकर्णयन् हृष्टो हर्षयुक्तः अत एव स्पष्टं सपुलकं रोमाञ्चसहितं वपुरङ्गं यस्य सः तद्वचश्शिववचनं श्रद्दधानो विश्वसन् प्रशस्तं तत् शिववचोऽपि स्वप्रेयस्यै स्वप्रियायै मन्त्रिणे अमात्याय च कथयन् वदन् शुद्धान्तस्थः अन्तःपुरस्थितः पुनरप्यभीक्ष्णं मृडं शिवं पूजयन् अवतस्थे ॥१०॥

११

आयातो[1]ऽद्य[1] स्मरमदकरः कामिनां मानहारी
क्लृप्ताऽम्रश्रीः परभृतततेर्मूक[2]ता रुग्भिषग्यः[2] ।
वीरुत्कान्तातनुसुखकृदध्यापकः कीरपालेः
मन्दा[3]क्रान्त[3]क्रम[4]गु[4]रुरसौ माधवो मारुतस्य ॥

अथ सुन्दरचोलाह्वानोपयोगिशिवमहोत्सवप्रस्तावनाय वसन्तागमनं तावदाह आयात इति ॥ अथ शिवोपदेशानन्तरं यो वसन्तः स्मरस्य मदनस्य मदं दर्पं करोतीति तथोक्तः कामिनां यूनां मानमभिमानं हरतीति तथोक्तः क्लृप्ता उत्पादिता आम्राणां रसालानां श्रीः सम्पत् येन सः परभृतानां कोकिलानां ततेः समूहस्य 'वनप्रियः परभृतः कोकिलः पिक' इत्यमरः । मूकता मूकभाव एव रुग्रोगः तस्य भिषक् चिकित्सकः वसन्तसमय एव तेषां स्वरमाधुर्यादिति भावः । वीरुधः लता एव कान्ताः ललनाः तासां तनुसुखं शरीरसुखं करोतीति तथोक्तः कीरपालेः शुकपङ्क्त्याः 'कृद्योगात्कर्मणि षष्ठी' अध्यापयतीत्यध्यापकः वाग्मित्वसम्पादक इत्यर्थः । मारुतस्य पवनस्य मन्दाक्रान्तक्रमे मान्द्यगुणप्राप्तिप्रकारे गुरुर्देशिकः भवतीति शेषः । असौ माधवो वसन्तः आयातः आगतः 'विष्णौ वसन्ते वैशाखे माधवो माधवीलते'ति रत्नमाला ।

---

[1] ऽथ (ख). [2] शारुङ्गिषग्द्वयः (ख). [3] न्त्रांति (ख). [4] रु (ख).

अत्र मन्दाक्रान्तेति वृ[1][त्त][1]नामकथनान्मुद्रालङ्कारः ॥११॥

१२

भेरीरावः पिककलरु[2]तं[2] कीरवाग्वन्दिनादः
सङ्गी[3]तञ्च स्फुरदलिरवो वाणिनी मल्लिकाऽपि ।
[4]मल्लीवल्ली[4]मुकुलमिलितो मौक्तिकच्छत्रमा[5]म्र[5]ः
[6]चै[6]त्र[7]स्या[7]भूद्भुवि जनपतेश्चामरं पुष्पगुच्छः ॥

भेरीति ॥ चैत्रस्य वसन्तस्यैव जनपतेः राज्ञः इति व्यस्तरूपकं । पिकानां कोकिलानां कलरुतं कलरव एव भेरीरावः भेरीध्वनिरभूत् । कीरवाक् शुकसल्लापः वन्दिनां स्तुतिपाठकानां नादः आसीत् । 'वन्दिनस्स्तुतिपाठका' इत्यमरः । अलिरवः स्फुरत्सङ्गीतमासीत् । मल्लिकालता वाणिनी नर्तकी आसीत् । 'वाणिनी नर्तकी मत्ता विदग्धा वनिता च से'ति विश्वः । मल्लीवल्याः मल्लिकालतायाः मुकुलैः कुट्मलैः मिलितः युक्तः आम्रो रसालद्रुमः मौक्तिकयुक्तं छत्रं पुष्पगुच्छश्च चामरमासीत् । रूपकालङ्कारः ॥१२॥

१३

पद्मामोदं विदधदभितः कामसूस्सत्परागः
[8]श्रीवर्धि[8]ष्णुर्मरुदुपगतस्सौमनस्यातिचारुः ।

---

[1] ति (क). [2] तिः (ख). [3] तां चत्स्फु (ख). [4] मालीवल्लया (ख). [5] म्रो (ख). [6] चे (ख). [7] स्यो (ख). [8] रश्रीद्र (ख).

व्याप्ताशोकस्थितिरुपलसच्चक्रकः कालका[1]न्तः[1]
[2]तस्यैवं यः प्रभवति[2] कथं माधवाख्यानमुख्या ॥

पद्मामोद इति ॥ यो वसन्तः अभितः सर्वत्र पद्मानां कमलानामामोदं सौरभं विदधत् कुर्वन् , कामसम्भोगेच्छा तं सूत इति कामसूः 'षूञ् प्रणिप्रसव इति धातोः कर्तरि क्विप् । सन् प्रशस्तः परागः पुष्परजो यस्मिन् स तथोक्तः श्रिया सम्पदा वर्धिष्णुः मरुता मलयपवनेन उपगतस्सङ्गतः सुमनसः पुष्पाणि तान्येव सौमनस्यम् । स्वार्थे ष्यञ् । तेनातिचारुरतिश[3][यितः][3] । व्याप्ता अशोकानां वकुलकुसुमानां स्थितिर्यस्मिन् सः । उपलसन्तश्च[4][क्र][4]काश्चक्रवालका यस्मिन् सः । 'शेषाद्विभाषे'ति वैकल्पिकः कप् प्रत्ययः । कालेभ्यो हेमन्तादिभ्यः कान्तो रम्यः प्रभवति । तस्य वसन्तस्य इयं माधवाख्या माधवनाम कथं न मुख्या मुख्यैवेत्यर्थः ।

अन्यार्थस्तु—यो विष्णुः पद्मायाः लक्ष्म्याः आमोदं सन्तोषं विदधत् 'आमोदो गन्धहर्षयोरि'ति विश्वः । कामसूः मदनजनकः 'इच्छा मनोभवौ कामावि'त्यमरः । अभितः सतस्सुजनान् पाति रक्षतीति सत्पः । तादृशो राग इच्छा यस्य सः श्रिया सम्पदा वर्धिष्णुः । पद्माश्रीशब्दयोर्वि भिन्नार्थपरत्वान्न पुनरुक्तिः । मरुद्भिर्देवैरुपगतस्सेवितः 'मरुतौ पवनामरावि'त्यमरः । सौमनस्येन सौहार्देनातिचारुः । व्याप्ता अशोका क्लेशरहिता स्थितिर्यस्य सः । उपलसदुज्ज्वलत् चक्रं सुदर्शनं यस्य सः कालः श्यामलः कान्तो रम्यश्च प्रभवति । तस्य विष्णोः माधवाख्या कथं न मुख्या ?

---

[1] न्तो (ख). [2] मातस्येय प्रवतति (ख). [3] यः (क) [4] क्रा (क).

अत्र प[1][क्ष][1]साध्यहेतूनां सचमत्कारप्रतिपादनादनुमानालङ्कारः। स च श्लेषित इति सङ्करः ॥१३॥

१४

काले तस्मिन् [2]स्मृ[2]तमृ शूलिनस्सम्प्रवृ[3]त्ते[3]
सं[4]रम्भोत्थ[4]प्रविभवरथप्रोत्स[5]वे द[5]र्शनाय।
तस्यावश्यं करिपुर[6]पते[6]र्नन्दनं चोलराजं
प्रेम्णाऽऽनेतुं स्वकपुरमसौ प्रेषयामास दूतान् ॥

काले इति॥ तस्मिन्काले वसन्तसमये असौ मानकञ्जारकः स्मृतमूहितं मृडवचश्शिववाक्यं येन स तथोक्तस्सन् सम्प्रवृत्ते प्रवर्तमाने शूलिनः शिवसम्बन्धिनि संरम्भेण सम्भ्रमेणोत्थ उत्पन्नः प्रविभवः प्रकृष्टवैभवशाली रथप्रोत्सवः तस्मिन् करिपुरपतेः विक्रमचोलस्य नन्दनं तनयं चोलराजं सुन्दर-चोलभूपं तस्य रथोत्सवस्य दर्शनाय प्रेम्णा प्रीत्या स्वकं निजं पुरमानेतुं दूतान् प्रेषयामास प्रेषितवान् ॥१४॥

१५

[7]ते चा[7]भ्येत्य [8]द्विरद[8]नगरीं पूर्णसम्पत्स[9]नाथां[9]
नाथस्या[10]स्यास्स[10]दसि [11]वसतश्चो[11]लभूपालकस्य।
प्राविश्यान्तश्चरणनलिनं भक्तिभावात्प्रणम्य
प्रोचुर्वाचं तदधिकदयाऽपाङ्गतो दत्तधैर्याः॥

---

[1] क्षे (क). [2] स्मि (ख). [3] त्तिः (ख). [4] गंभोष (ख). [5] तिदं (ख).
[6] मति (ख). [7] दूता· (ख). [8] करिण (ख). [9] मृद्धां (ख).
[10] स्य स (ख). [11] सवदच्चो (ख).

त इति ।। ते च दूताः पूर्णसम्पत्सनाथां सम्पूर्णसम्पत्तिसहितां द्विरदनगरीं करिपुरमभ्येत्यागत्य अन्तः प्राविश्य प्रवेशं कृत्वा अस्याः नगर्याः नाथस्य पत्युः सदसि सभायां वसतश्चोलभूपालकस्य चरणनलिनं पादकमलं भक्तिभावात् प्रणम्य नमस्कृत्य तस्य चोलभूपालस्य अधिका दया यस्य स तथोक्तः स चासावपाङ्गश्च तदधिकदयापाङ्गः तेनेति तृतीयार्थे सार्वविभक्तिकस्तसिः दत्तं धैर्यं येभ्यस्ते तथोक्तास्सन्तः वाचं प्रोचुः उक्तवन्तः ॥१५॥

१६

नाथोऽस्माकं महितगुणवान्मानकञ्जा[1]ख्य[1]भूभृत्
स्वग्रामो[2]त्थस्म[2]रहर[3]रथप्रो[3]त्सवालोकनाय ।
त्वामानेतुं नृपवरसमुत्कण्ठया सन्दिदेश
क्षिप्रं [4]नस्ते[4] पद[5]मुप[5]गतास्तद्वयं सम्भ्रमेण ॥

नाथ इति ।। भो नृपवर ! अस्माकं नाथः महितगुणवान्महागुणशाली मानकञ्जारक इति भूभृत् स्वग्रामोत्थस्य निजनगरीसमुद्भूतस्य स्मरहररथ-प्रोत्सवस्य शिवरथोत्सवस्य आलोकनाय दर्शनाय त्वां क्षिप्रं तूर्णं आनेतुं समुत्कण्ठया प्रीत्या नः अस्मान् सन्दिदेश आज्ञापितवान् [तत्] तस्मा-त्कारणात् वयं सम्भ्रमेण त्वरया ते पदं चरणमुपगताः प्राप्ताः ॥१६॥

१७

श्रावं श्रावं बुधजनमुखात्त्वद्यशश्शस्तमुच्चैः
प्रे[1]म द्र[1]ष्टुं प्रसरति *किल* स्वामिनस्त्वां मही[2]यः[2] ।

[1] र,(ख). [2] त्स्म (ख). [3] थो (ख). [4] तस्मिन् (ख). [5] नास्ति (ख).
माद्र (ख). * मम (ख) [7] पः (ख).

त[1]त्त्वं[1] गत्वा सफलमधुना कुर्वि[2]ति[2] प्रार्थितोऽसौ
प्रीतस्सद्यो[3][ऽददत] सु[3]तरामर्थजातं [4]चरेभ्यः[4] ॥

श्रावं श्रावमिति ॥ बुधजनमुखाद्विद्वज्जनमुखात् शस्तं प्रशस्तं त्वद्यशो भवत्कीर्तिं उच्चैः श्रावं श्रावं श्रुत्वा श्रुत्वा 'आभीक्ष्ण्ये णमुलि'ति णमुल्, नित्यवीप्सयोरिति द्विर्भावः। त्वां द्रष्टुं महीयः महत्तरं स्वामिनः मानकञ्जारकस्य प्रेम प्रीतिः प्रसरति किल। त्वमधुनेदानीं गत्वा तत्प्रेम सफलं सार्थकं कुर्विति प्रार्थितः असौ सुन्दरचोलः प्रीतस्सन् सद्यः तदानीं सुतरामत्यन्तमर्थजातं वस्तुसमूहं चरेभ्यो दूतेभ्यः [7][अददत][7] ददौ। दद दान इति धातोर्लङ् ॥१७॥

१८

अस्मद्बन्धुः प[5]दि[5] पशुपतेर्भक्तिमा[6]न्नो[6] दिदृक्षुः
सोऽयं शम्भोरपि रथमहं दर्शयिष्यन् स्वदूतैः।
मामानेतुं यतत इह [7]यस्त[7]द्वचोऽलङ्घनीयं
स्वा[8]त्मन्ये[8]वं स च परिमृश[9]न्नुत्थि[9]तोऽभूत्कुमारः ॥

अस्मदिति ॥ यः अस्मद्बन्धुः मानकञ्जारकः पशुपतेः ईश्वरस्य पदि चरणे भक्तिमान् 'पद्दन्नोमासि'त्यादिना पादशब्दस्य पदादेशः सोऽयं नः अस्मान् दिदृक्षुः द्रष्टुमिच्छुः शम्भोः रथमहं रथोत्सवं 'मह उद्धव उत्सव' इत्यमरः। दर्शयिष्यन् [10][सन्][10] 'लृटस्सद्वे'ति दृशेर्ण्यन्तात् लृटश्शत्रादेशः।

---

[1]त्रा (ख). [2]तो (ख) [3]ऽददतसु (क) दददति (ख).
[4]च तेभ्यः (ख). [5]अदत् (क). [6]पर (ख). [7]नो (ख).
[8]ते त (ख). [9]त्माने (ख). [10]न् प्रस्थि (ख). [11]सनन् (क).

स्वदूतैर्मामानेतुं यतते यत्नं करोति। इह तस्य मानकञ्जारकस्य वचः वाक्यमलङ्घनीयं न तिरस्कार्यम्। एवं स च कुमारः सुन्दरचोलः स्वात्मनि स्वमनसि परिमृशन् विचारयन् सन् उत्थितोऽभूत्।

अस्मद्बन्धुरित्यादि वाक्यार्थ[1][स्य][1] मानकञ्जारकवचनातिरस्करणहेतुत्वेन प्रतीतेर्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥१८॥

१९

शुद्धान्तस्थं पितरम[2]भवद्ध्यानयोगाभियुक्तं
गत्वा[2]ऽऽनम्याशिषमधि[3]गतः[3] प्राप्य विज्ञप्तकार्यः।
तस्यानुज्ञां सपदि स युवा सन्मुहूर्ते प्रशस्ते
स्फूर्जद्भेरीपटुरवमिलद्दिक्तटस्सैन्ययुक्तः॥

शुद्धान्तेति॥ सन् सुधीः युवा तरुणः सः सुन्दरचोलः शुद्धान्तस्थमन्तःपुरस्थं ध्यानमिति योगस्तेनाभियुक्तं पितरं विक्रमचोलं गत्वा आनम्य नमस्कृत्य तस्य पितुः आशिषमाशीर्वचनं अधिगतः प्राप्तः विज्ञप्तं निवेदितं कार्यं मानकञ्जारकनृपनगरीप्रयाणरूपं येन स तथोक्तस्सन् अनुज्ञामनुमतिं प्राप्य सपदि सद्यः प्रशस्ते मुहूर्ते स्फूर्जता विजृम्भता भेरीणां पटुरवेणोच्चैर्ध्वानेन मिलन्ति दिक्तटा यस्मिन् तथोक्तः सैन्येन सेनया युक्तः अभवत् ॥१९॥

२०

इन्द्रेभेन्द्रप्रतिमकरिणः स्कन्धपीठे निषण्णो
मुक्ताछत्रच्छविपरिमिलद्रत्नकोटीरकूटः।

---

[1] स (क). [2] वदध्यानमेकाधिरुह्य तत्रा (ख). [3] लभन् (ख).

[1]दी[1]व्यत्स्वर्णाभरण[2]किर[2]णैरावृ[3]तस्स्तुत्य[3]कीर्तिः
वन्दिव्रातैरतु[4]ल[4]विभवः प्रस्थितोऽभूत् स भूपः ॥

इन्द्रेति ॥ स भूपस्सुन्दरचोलराजः इन्द्रेभेन्द्रस्यैरावतस्य प्रतिमा साम्यं यस्य तस्य करिणो गजस्य स्कन्ध एव पीठे निषण्ण उपविष्टः मुक्ताछत्रस्य मौक्तिकातपत्रस्य *[छव्या]* कान्त्या परिमिलतः व्याप्तस्य रत्नकोटीरस्य मणिमकुटस्य कूटं शिखरं यस्य सः दीव्यतां विलसतां 'हलिचे'ति दीर्घः । स्वर्णाभरणानां किरणैः आवृतः परिवृतः वन्दिव्रातैः स्तुतिपाठकसमूहैः स्तुत्या स्तूयमाना कीर्तिर्यस्य सः । अतुलो *[अनुपमः]* विभवः यस्य सः तथोक्तस्सन् प्रस्थितोऽभूत् । उदात्तालङ्कारः ॥२०॥

२१

दानासारैस्सरणिरभवत्पङ्किलानेकपा[5]नां[5]
प्रौद्यद्धूरी[6]हतिरव[6]नभश्चुम्बिवी[7]चिः[7]पयोधिः ।
वाजिव्रा[8]तोत्कट[8]खुररजोराजि[9]भिन्नः[9] खरांशुः
तत्प्रस्थाने बहुबलभरा[10]द्भुग्न[10]कण्ठः फणीन्द्रः ॥

दानेति ॥ तस्य सुन्दरचोलस्य प्रस्थाने प्रयाणे सरणिः पद्धतिः [11]'[सरणिः पद्धतिः][11] पद्या' [12][इत्यमरः][12] । अनेकपानां गजानां 'द्विरदोऽनेकपो द्विप' इत्यमरः । दानासारैर्मदधाराभिः 'धारा सम्पात आसार'

---

[1] दि (ख) [2] करि (ख) [3] तः स्सत्व (ख). [4] ल (ख). * छविषा (क).
* ऽननुरूपः (क). [5] नं (ख). [6] रव इति (ख). [7] चेः (ख).
[8] त स्फुर (ख). [9] रूक्षः (ख). [10] ब्द्रध्न (ख). [11] लुप्तः (क). [12] लुप्तः (क).

इत्यमरः। पङ्किला पङ्कवती अभवत्। पङ्कशब्दान्मत्वर्थीय इलच्प्रत्ययः। पयोधिस्समुद्रः नभो गगनं चुम्बन्तीति नभश्चुम्बिन्यः प्रोद्यता उत्पन्नेन भेरीहत्या भेरीताडनेन जनितो यो रवस्तेन नभश्चुम्बिन्यो वीचयस्तरङ्गा यस्य सः अभवत्। खरांशुस्सूर्यः वाजिव्रातस्य अश्वसमूहस्य उत्कटानां क्रूराणां खुराणां शफा[1][नां][1] 'शफं क्लीबे खुरः पुमान्' इत्यमरः। रजोराजिभिः पांसुपरम्पराभिः भिन्नः [2][आच्छादितः][2] अभवत्। फणीन्द्रश्शेषः बहुबल-भरस्सैन्यभारः तस्मात् भुग्नो भग्नः कण्ठो यस्य स तथोक्तः अभवत्।

अत्र सरण्यादीनां गजमदासारकृतपङ्कवत्त्वाद्यसम्बन्धेऽपि तत्सम्बन्ध-वर्णनादतिशयोक्त्यलङ्कारः ॥२१॥

२२

[3]पुन्नागैश्च[3] प्रमिलितरजःकेसरैर्वाजिभिश्च
व्याप्तं वंशोज्ज्वलबहुलताशोभि चञ्चद्रथाङ्गम्।
प्रोद्यद्गन्धाकलितसुमनःषट्पदातिप्रकी[4]र्णं
त[4]स्योद्यानं परभृतप[5]दं भा[5]ति पत्राभियु[6]क्तम्[6] ॥

पुन्नागैरिति॥ पुन्नागैः पुरुषश्रेष्ठैः पुरुषगजैर्वा प्रमिलितरजसः पांसुयुक्ताः केसरास्सटाः येषां तैर्वाजिभिरश्वैश्च व्याप्तं, वंशेन वर्गरूपेण उज्ज्वलाः बहुलतया अतिशयेन शोभन्त इति तथोक्ताः चञ्च[7][न्त][7]श्चलन्तो रथा इत्यङ्गं सेनाङ्गं यस्मिन् तत्, रथानामङ्गानि चक्राणि यस्मिन्निति वा। प्रोद्यता उद्भूतेन गन्धेन दर्पेणाकलितैर्व्याप्तैस्सुमनोभिर्धीरैष्षट्पदातिभिः षड्विधबलैः

---

[1] णां (क). [2] लुप्तः (क). [3] व्रातानदै (ख). [4] र्णंस्त (ख). [5] ठद्धा (ख). [6] क्तः (ख). [7] त (क).

प्रकीर्णं व्याप्तं परभृतपदं परैश्शत्रुभिः भृतानि वृतानि पदानि ध्वजादिलक्ष्माणि पादा वा यस्मिन् तत् पत्रैर्वाहनैश्च अभियुक्तं तस्य सुन्दरचोलस्य उद्यानं उद्यतप्रयाणं भाति ।

अन्यार्थस्तु-पुन्नागैर्वृक्षविशेषैः 'पुन्नागौ द्रुम पुंश्रेष्ठावि'ति रत्नमालायाम् । प्रमिलितरजः परागो येषां ते तथोक्ताः केसराः बकुलाः तैश्च 'सिंहस्य केसराः केशाः किञ्जल्को केसरोऽस्त्रियां । नागकेसरपुन्नागवकुलेषु पुमानि'ति रत्नमाला । वाजिभिः पक्षिभिश्च 'वाजिनोऽश्वेषु पक्षिष्वि'त्यमरः । व्याप्तं वंशेषु वेणुषु उज्ज्वलन्त्यः बह्व्यो लता वल्ल्यः ताभिः शोभत इति तथोक्तः चञ्चन्तो रथाङ्गाश्चक्रवाका यस्मिन् तत् प्रोद्यता गन्धेन सौरभेणाकलिता सुव्याप्ता सुमनस्सु पुष्पेषु षट्पदैः भ्रमरैः अतिप्रकीर्णं परभृतनां कोकिलानां पदं स्थानं पत्राभियुक्तं पल्लवसहितं तस्य राज्ञः उद्यानमाक्रीडः 'पुमानाक्रीड उद्यानं राज्ञस्साधारणं वनमि'त्यमरः । भाति ।

अत्र विशे[1][प्यस्या][1]पि [2][श्लिष्ट][2]त्वान्न समासोक्तिः । शब्दशक्तेः प्रकृतार्थमात्रपर्यवसानान्न श्लेषः किन्तु शब्द[3][श][3]क्तिमूलो ध्वनिरेव ॥२२॥

२३

गच्छन्नेवं जनपदजनानीतवस्तूपदाभिः
स्वीयैर[4]र्थै[4]र्द्रविडविषयक्षेत्रलिङ्गान्यवे[5]क्ष्य[5] ।
भक्त्याऽऽगत्य प्रयतमनसा सम्यगभ्यर्च्य[6] नम्रः
सा[6]ङ्गं तत्राप्यलभत कृ[7]ती त[7]त्प्रसादं महीशः ॥

[1] व्या (क). [2] श्लेष (ख). [3] भ (क). [4] रथ्यै (ख). [5] क्ष्यन् (ख).
[6] वर्मः सा (ख). [7] तिस्त (ख).

गच्छन्निति ॥ जनपदजनैः देशस्थितजनैः आनीतानि वस्तूनि धनकनकवस्त्वादीन्येव उपदाः कराः ताभिरुपलक्षितः कृती कुशलो महीशः सुन्दरचोलः एवमुक्तप्रकारेण गच्छन् द्रविडविषये द्रविडदेशे क्षेत्रेषु पुण्यस्थलेषु लिङ्गानि शिवलिङ्गानि भक्त्या अवेक्ष्य आगत्य प्रयतमनसा नियतभावेन स्वीयैरर्थैरानीतगन्धपुष्पफलादिभिः सम्यक् अभ्यर्च्य सम्पूज्य साङ्गं यथा भवति तथा नम्रः प्रणतस्सन् तत्र शिवक्षेत्रेषु तत्प्रसादं शिवप्रसादमलभत प्राप ।

'उरसा शिरसा दृष्ट्या मनसा श्रद्धयाऽपि वा ।

पद्भ्यां कराभ्यां कर्णाभ्यां प्रणामोऽष्टाङ्ग [1][उ][1]च्यत' इति लक्षणं द्रष्टव्यम् ॥२३॥

२४

अग्रे दृष्टः करिकट[2]ग[2]लद्दानकस्तूरिकाङ्कः
प्रोद्यत्सानुप्र[3]ग[3]लितझ[4]र[4]स्फारहारप्रयुक्तः ।
भूकान्तायाः स्तन इव मिलद्धातुकाश्मीरलिप्तः
तेनाश्लिष्टो हरिनख[5]पदैर्भूधरो[5] रत्नकूटः ॥

अग्र इति ॥ करिकटेभ्यो गजगण्डेभ्यः गलत् स्रवत् दानं मद एव कस्तूरिका अङ्को लक्ष्म यस्य सः प्रोद्यद्भ्यः उच्छ्रितेभ्यः सानुभ्यः प्रगलिताः च्युताः झराः प्रवाहा एव स्फारहारः मुक्तावली यस्मिन् प्रयुक्तः [6][सं][6]युतः धातुना गैरिकादिनैव काश्मीरेण कुङ्कुमेन लिप्तो दिग्धः हरिनखपदैः सिंहनखाङ्कैर्विष्णुनखाङ्कैश्च आश्लिष्टो व्याप्तः विष्णोर्भूदेवीवल्लभत्वादिति

---

[1] मु (क). [2] द (ख). [3] द (ख). [4] री (ख). [5] परद्वैर्भृतो (ख).
[6] स (क).

भावः । अतः भूरेव कान्ता वनिता तस्याः स्तन इव स्थितः । रत्नानि कूटे शिखरे यस्य स रत्नकूट इत्यर्थः । भूधरः पर्वतः तेन सुन्दरचोलेन अग्रे पुरतो दृष्टो विलोकितः ।

अत्र रूपकश्लेषोपमानामङ्गाङ्गिभावेन सङ्करः ॥२४॥

२५

स्रोतस्विन्यास्तटभुवि [1]गिरेस्त[1]स्य पाटीरसा[2]न्द्र-
च्छाया[2]च्छन्ने शिशिरपुलि[3]ने रोधसि श्रान्तसैन्यम्[3] ।
तिग्मांशूद्यत्किरणहतिभिस्संनिवेश्य क्षितीशः
तस्था[4]व[4]प्ता[5]व[5]निपस[6]चिवैस्स्वर्णदूष्यान्तरस्मिन्[6] ॥

स्रोतस्विन्या इति ॥ तस्य गिरेः रत्नकूटस्य कटकभुवि सानुप्रदेशे पाटीरस्य चन्दनद्रुमस्य सम्बन्धिनी सान्द्रच्छाया तया आच्छन्ने पिहिते शिशिरं पुलिनं सैकतं यस्मिन् तस्मिन् 'तोयोत्थितं तत्पुलिनं सैकतं सिकतामयमि'त्यमरः । स्रोतस्विन्याः नद्याः रोधसि तीरे तिग्मांशोस्सूर्यस्य उद्यतामुद्गतानां किरणानां हतिभिः श्रान्तसैन्यं खिन्नबलं सन्निवेश्य स्थापयित्वा आप्ताः वयस्याः अवनिपा राजानः सचिवा मन्त्रिणश्च तैस्सह क्षितीशः सुन्दरचोलः स्वर्णदूष्यान्तरस्मिन् सुवर्णपटगृहमध्ये तस्थौ स्थितवान् । 'दूष्याद्यं वस्त्रवेश्मनि' इत्यमरः ॥२५॥

---

[1] दिशन्य (ख). [2] न्द्रः छाय. (ख). [3] नी रोघसी शान्तसेव्यः (ख).
[1] ना (ख). [2] वव (ख). [3] जैतैस्वर्णदूष्यान्तरस्थः (ख).

२६

स्नात्वा नद्यां विधिवदभवं पूजयन् [1]स प्र[1]सादं
स्वीकृत्याथ क्षितिपतिसुतैरारु[2]ह[2]न्नश्वमुच्चैः ।
तस्याप्यद्रेः कटकविपिनं द्रष्टुकामोऽतिभीमं
लीलावेगादरिगजमृगाधीश्वरस्संविवेश ॥

स्नात्वेति ॥ अरयश्शत्रव एव गजास्तेषां मृगाधीश्वरः सिंहः सः क्षितिपतिः सुन्दरचोलः नद्यां स्नात्वा विधिवत् यथाशास्त्रं 'तेन तुल्यं' इत्यादिना वतिप्रत्ययः । न विद्यते भव उत्पत्तिर्यस्य सोऽभवश्शिवः तं पूजयन् अर्चयन् प्रसादं निर्माल्यं स्वीकृत्य अथानन्तरं अतिभीममत्यन्तभयङ्करं तस्याद्रेः रत्नकूटस्य कटकविपिनं नितम्बप्रान्तवनं 'कटकोऽस्त्री नितम्बोऽद्रेरि'-त्यमरः । द्रष्टुं कामय[3][ते][3] वाञ्छतीति द्रष्टुकामः 'तुं काममनसोरपि' इति तुमुनो मकारस्य लोपः । उच्चैरुन्नतमश्वं आरुहन् आरूढस्सन् क्षितिपतिसुतैः राजपुत्रैस्सह लीलावेगात् विलासजनितरयात् संविवेश प्राविशत् ।

अत्र राज्ञि गजात्मनाऽऽरोपितशत्रुराजसिंहरूपत्वारोपणाद्रूपकालङ्कारः ॥२६॥

२७

तस्याश्चर्यं व्यतनुत दृशोः पश्यतः कीर्णभू[4]ज[4]-
प्रच्छन्नाभ्रं रविरथहयान् तर्जयत्सिंहनादैः ।

---

[1] तत्प्र (ख) [2] लुप्तः (ख) [3] ति (क) [4] जैः (ख).

गु[1]प्तं[1] स्वान्तस्तिमिततिमिरं सङ्कतं भूरि[2]सत्त्वैः[2]
मत्तेभानां मदसुरभितं काननं तन्नितम्बे ॥

तस्येति ॥ कीर्णास्सङ्कुलाः भूजाः महीरुहाः [3][तैः][3]प्रच्छन्नं पिहितमभ्रं गगनं [4][यस्य][4]तत् सिंहानां नादैः रविरथहयान् सूर्यरथाश्वान् तर्जयत् भर्त्सयत् । वर्णसाम्यादिति भावः । गुप्तं रक्षितं । स्वस्यान्तस्तिमितमभ्यन्तरस्थितं तिमिरं तमिस्रं येन तत् भूरि प्रचुरं सत्त्वैः जन्तुभिः सङ्कतं मत्तेभानां मदगजानां मदेन सुरभितं सौरभ[5][वत्][5] तस्य गिरेर्नितम्बे कटकप्रदेशे काननं वनं (कर्तृ) पश्यतो विलोकयतः तस्य राज्ञः दृशोर्नेत्रयोराश्चर्यं विस्मयं व्यतनुत अकरोत् ।

अत्र वनवृक्षाणामभ्रङ्कषत्वायोगेऽपि तद्योगवर्णनादतिशयोक्तिः ॥२७॥

२८

बिल्वाशोकाम[6]ल[6]कखदि[7]र[7]प्लक्ष[7]जम्बीरजम्बू-
निम्बा[8]श्वत्थ[8]प्रमुखतरुभिर्गाढमा[9]भात्यर[9]ण्यम् ।
सिंहव्याघ्रद्विरदमहिषक्रोड[10]भल्ला[10]दिसत्त्वैः
गृध्रोलूककरफणिभुक्कङ्कपारावताद्यैः ॥

बिल्वेति ॥ बिल्वाशोकामलकखदिरप्लक्षजम्बीरजम्बूनिम्बाश्वत्था एव प्रमुखा येषां तैस्तरुभिर्वृक्षैः सिंहाः व्याघ्राः महिषाः द्विरदाः क्रोडाः भल्लाः

---

[1] प्त (ख) [2] संतै (ख) [3] लुप्तः (क) [4] येन (क) [5] वन्तं (क)
[6] ळ (ख) [7] सम्ल (ख) [8] स्वाथ [9] ख्यातर (ख) [10] भावा (ख)

भल्लूकाः 'भल्लो भल्लूकवाची स्याद्भल्लो भल्ली च सायके' इति रत्नमालायाम्। आदयो येषां तैस्सत्त्वैर्मृगैः 'दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपी'त्यमरः। गृध्राः उलूकाः घूकाः कृकराः कृकणाः 'कृकणक्रकरौ समावि'त्यमरः। फणिभुजो मयूराः कङ्काः लोहपृष्ठाः 'लोहपृष्ठस्तु कङ्कःस्यादि'-त्यमरः। पारावताः कपोताः आद्याः येषां तैर्गाढमरण्यमाभाति ॥२८॥

२९

सोमार्काभ्य[1]न्मरुदुपगतं[1] व्याप्तमृक्षप्रतानैः
शस्तागस्त्यं गुरुकुजयुतं सद्विमानोपयुक्तम्।
व्योमेवान्तः प्र[2]ब[2]ल[3]तमसा[3] सङ्गतं दिव्यनागं
खेलन्नानाखगरवमिलत्काननं तद्विरेजे ॥

सोमेति ॥ तत्काननमरण्यं सोमेन सोमलतया चन्द्रेण च 'सोमः कुबेरे कर्पूरे लताभेदे सुधाकरे' इति रत्नमाला। अर्केण द्रुमविशेषेण सूर्येण च अञ्चत् रम्यं मरुता वायुना मरुद्भिस्सुरैश्च उपगतं सङ्गतं 'मरुतौ पवनामरावि'त्यमरः। ऋक्षप्रतानैर्भल्लूकसमूहैः नक्षत्रसमूहैश्च व्याप्तं 'नक्षत्रमृक्षं भल्लूके शोणके च पुमानि'ति रत्नमालायाम्। शस्तः प्रशस्तः अगस्त्यो वृक्षविशेषः कुम्भसम्भवश्च यस्मिन् तत् गुरुभिर्महद्भिः कुजैर्महीरुहैः युतं। अन्यत्र गुरुणा बृहस्पतिना कुजेन भौमेन युतं सतां वसतां वीनां पक्षिणां माने दर्पे उपयुक्तं अनुकूलम्। अस्य मदकरत्वादिति भावः। अन्यत्र सद्भिः प्रशस्तैः विमानैः

---

[1] न्नरपरतुळव्याप्त (ख) [2] ळ (ख) [3] तनुना इति (क) पुस्तकस्थमूलपाठः। तमसा इति क पुस्तकव्याख्यानपाठः। तमसा इति (ख) पाठोऽपि।

देवयानैरुपयुक्तं 'देवयानं विमानोऽस्त्री'त्यमरः। अन्तर्मध्ये प्रबलतमसा गाढान्धकारेण बलवत्तरराहुणा च 'तमो राहौ गुणे ध्वान्ते शोके' इति रत्नमाला। सङ्गतं दिव्याः कमनीयाः नागाः गजा यस्मिन् तत्। अन्यत्र दिवि भवाः दिव्याः नागा ऐरावतादयो यस्मिन् तत्। खेलतां दीव्यतां नानाखगानां नानाविधपक्षिणां रवेन रुतेन मिलत् व्याप्तमत एव व्योमाकाशमिव विरेजे। श्लेषमूलोऽयमुपमालङ्कारः ॥२९॥

३०

दन्तिस्फूर्जद्रदनमुसलैर्वैणवस्तण्डुलौ[1]घः[1]
[2]चञ्च[2]द्बाहुप्रचलवलयैस्स्रस्तधम्मिल्लमा[3]लैः[3]।
[4]लो[4]लापाङ्गैर्युवतिनिवहैर्वल्गुवल्गत्कुचाग्रैः
[5]लीलायुक्तैश्श[5]शिमणिकृतो[6]लूखलेऽघानि यत्र[6] ॥

दन्तीति ॥ यत्र कानने चञ्चत्सु चलत्सु बाहुषु हस्तेषु प्रचला वलयाः कङ्कणानि येषां तैः स्रस्तानि प्रच्युतानि धम्मिल्लमाल्यानि कबरीस्थितमालिका येषां तैः लोलाश्चञ्चलाः अपाङ्गा नेत्रान्ता येषां तैः वल्गु मनोहरं यथा तथा वल्गन्ति चलन्ति कुचाग्राणि येषां तैः लीलायुक्तैः विलाससहितैः युवतीनां-स्तरुणीनां निवहैस्समूहैः (कर्तृभिः) 'यूनस्तिरि'ति तिप्रत्ययः। दन्तिनां गजानां स्फूर्जद्भिः सद्भिः दन्तैरेव मुसलैः (करणैः) वैणवः वेणुसम्बन्धी तण्डुलौघः तण्डुलसमूहः शशिमणिभिश्चन्द्रकान्तैः कृते उलूखले अघानि अवघातितः।

---

[1] घं (ख) [2] न्यंच (ख) [3] ल्यैः (ख) [4] ली (ख) [5] यंत्राघातः श (ख)
[6] येञ्छिले तल्लुठद्भिः (ख)

हनहिंसागत्योरिति धातोर्लुङ् । 'च्लेश्चिणि' 'होहन्तेरि'ति कुत्वम् । 'अत उपधाया' इति दीर्घः । स्वभावोक्तिरलङ्कारः ॥३०॥

३१

श्रीखण्डद्रुद्वयक्[1]तदृढ[1]स्तम्भसम्ब[2]द्ध[2]वीरु-
[3]द्रज्जुस्फूर्जद्द्वि[3]परदकृतस्फारपर्य[4]ङ्किका[4]सु ।
खेलन्त्युच्चैर्मणिमयतुलादण्डरम्यास्वजस्रं
[5]गीताहूतावृत[5]मृगकुला यत्र [6]दोलासु[5] बा[7]लाः[7] ॥

श्रीखण्डेति ॥ यत्र वने श्रीखण्डद्वयेन 'पलाशी द्रुद्रुमागमा' इत्यमरः । कृतयोर्दृढयोः स्तंभयोः सम्बद्धाः सहिताः वीरुधो लता येन रज्जवः प्रग्रहास्ताभिः स्फूर्जन्त्यो विलसन्त्यः द्विपरदकृताः गजदन्तनिर्मिताः पर्यङ्कि*[काः]* शयनानि यासां तासु । मणिमयैस्तूलिकादण्डैः रम्यासु रमणीयासु उच्चैरुन्नतासु दोलासु दोलिकासु बालाः कितववनितादयः गीतेन गानेन आनीतानि आहूतानि आवृतानि मृगकुलानि हरिणयूथानि याभिस्तास्तथोक्तास्सत्यः अजस्रं निरन्तरं खेलन्ति क्रीडन्ति । अतीव मदनोद्रेककरमेतदिति भावः । अतिशयोक्तिरलङ्कारः ॥ ३१ ॥

३२

मध्वाज्याक्तं परिमलमिलत्स्वादु पक्वं कपित्थं
[8]भुक्त्वा[8]भूयस्तटकुजपतत्पुष्पसौरभ्यमम्भः ।

---

[1] शरथ (ख) [2] न्ध (ख) [3] द्वद्भ्राजद्वि (ख) [4] ङ्किता (क) ङ्कका (ख)
[5] गीतानीता व्रज (ख) [6] डो (ख) [7] लः (ख) * ताः (क) [8] क्ता (ख)

पीत्वा [1]कम्र[1] शिशिर[2]मभि[2]तस्सार्धमात्माङ्गना[3]भिः[3]
[4]तस्थुर्व्याधाः[4] क्षपितमृगयाश्रान्तयस्तद्वनान्ते ॥

मध्वेति ॥ तद्वनान्ते व्याधाः किराताः मधु क्षौद्रमेव आज्यं घृतं तेन आक्तं सिक्तं परिमलमिलत् सुगन्धयुक्तं स्वादु मधुरं पक्वं कपित्थं कपित्थफलं भुक्त्वा भक्षणं कृत्वा [5]भूयः पुनरपि तटसम्बन्धिनः कुजाः तटकुजाः तेभ्यः पततां पुष्पाणां कुसुमानां सौरभ्यं सुगन्धः यस्य तत्तथोक्तं कम्रं कमनीयं शिशिरं शीतलं अम्भः जलं पीत्वा पानं कृत्वा अभितः परितः[5] क्षपिता परिहृता मृगयाश्रान्तिः आखेटजनितश्रमो यैस्ते तथोक्तास्सन्तः आत्माङ्गनाभिस्सार्धं निजवनिताभिस्सह तस्थुः स्थितवन्तः । स्वभावोक्तिरलङ्कारः ॥ ३२ ॥

३३

सारङ्गाक्षी किसलयपदा वेणुपत्रो[6]प[6]मभ्रूः
श्रीता[7]लीस[7]त्फलनिभकुचा पक्वबिम्बाधरोष्ठी ।
सिंहीमध्या मदगजगतिर्व्यालवेणी लताङ्गी
काचिद्रेजे शबर[8]रमणी[8] देवतेवाटवीनाम्

सारङ्गेति ॥ सारङ्गस्य हरिणस्य अक्षिणीव अक्षिणी यस्यास्सा अक्षिशब्दात् समासान्तटच्प्रत्यये 'टिड्ढाणञि'त्यादिना ङीप् । किसलये पल्लवाविव पदे चरणौ यस्यास्सा । श्रीताल्याः तालस्य सत्फलयोः समौ

---

[1] ण्ठं (ख) [2] परि (ख) [3] च (ख) [4] तस्थुः वातांधाः त (ख)
[5] (क) पुस्तके लुप्तभागः [6] नास्ति (ख) [7] ळ (रव) [8] महिळा (ख)

श्रीतालीसत्फलनिभावित्यस्वपदविग्रहः । तादृशौ कुचौ स्तनौ यस्यास्सा । पक्वबिम्बमिव अधरोष्ठो यस्यास्सा पक्वबिम्बाधरोष्ठी । 'नासिकोदरौष्ठ-जङ्घादन्तकर्णशृङ्गाच्च' इत्यादिना ङीप् प्रत्ययः । सिंह्याः केसरिण्याः मध्य इव मध्यं यस्यास्सा । मदगजस्य गतिरिव गतिर्यस्यास्सा । व्यालः फणीव वेणी जटा यस्यास्सा । लतेव अङ्गं शरीरं यस्यास्सा 'अङ्गगात्रकण्ठेभ्यो वक्तव्यमि'ति ङीप् । काचिच्छबररमणी किरातवधूः अटवीनां देवता वनदेवतेव रेजे । अत्र विशेषणानां साभिप्रायत्वात् परिकरालङ्कारः उत्प्रेक्षासङ्कीर्णश्च ॥२३॥

३४

पीत्वा मद्यं [1]समधु[1] मणिभिः कल्पितं पात्रमेकं
पाणौ धृत्वा गलितकबरीनर्ति[2]त[2]भ्रूलतान्ता ।
पाला[3]शस्रक्कि[3]सलयपटप्राञ्चिता रक्तनेत्रा
श्यामा सत्त्वा समदशबरी भरवीवाननर्त ॥

पीत्वेति ॥ समदा मत्ता शबरी किरातवधूः मद्यमासवं पीत्वा आस्वाद्य मणिभिः कल्पितं रचितं समधु मद्यसहितं 'मधु मद्ये पुष्परसे क्षौद्रे' इत्यमरः । एकं पात्रं पाणौ हस्ते धृत्वा निधाय गलिता शिथिला कबरी केशपाशो यस्यास्सा । नर्तिते भ्रुवौ लते इव तयोरन्तः यया सा । पालाश्यः पलाश-कुसुममय्यः स्रजो यस्यास्सा । किसलयाः पल्लवा एव पटस्तेन प्राञ्चिता आवृता । रक्ते लोहिते नेत्रे यस्यास्सा । श्यामा नीलवर्णा यौवनमध्यस्था

---

[1] मधु सु (ख) [2] ता (ख) [3] शास्तकि (ख) श्यस्तकि(क) स्थ व्याख्यानपाठः ।

च । सश्वा शुनकसहिता अत एव भैरवी कापालिकीव आननर्त नर्तितवती । उपमालङ्कारः ॥ ३४ ॥

३५

निर्भिन्नेभाः खरतरशरैश्छिन्नहर्यक्षशीर्षाः
प्रध्वस्तोद्यन्मृगरिपुचयाः कृत्तचञ्चत्कुरङ्गाः ।
[1]श्यामा भीमस्फुरितवपुषः कालदूतोपमानाः
चेरुस्स्वैरं महति गहने श्वानुयाताः किराताः[1] ॥

निर्भिन्नेति ॥ श्यामाः नीलवर्णाः अत एव भीमं भयङ्करं यथा तथा स्फुरितानि प्रकाशितानि वपूंषि यैस्ते तथोक्ताः अत एव कालदूतोपमानाः यमदूतसमानाः श्वभिः शुनकैः अनुयाताः अनुसृताः किराताः शबराः खरतरां शरैः अतिनिशितविशिखैः निर्भिन्नाः दलिताः इभाः गजाः यैस्ते । 'रदाभ्य-निष्ठातो नः पूर्वस्य च दः' इति निष्ठातस्य भिदेर्दकारस्य च नत्वम् । छिन्नानि खण्डितानि हर्यक्षाणां सिंहानां शीर्षाणि शिरांसि यैस्ते । प्रध्वस्ताः नाशिताः उद्यतामुद्गच्छतां मृगरिपूणां शार्दूलानां चयाः यूथानि यैस्ते । कृत्ताः छिन्नाः च[[2]ञ्चन्त[2]]श्चलन्तः कुरङ्गा हरिणा यैस्ते तथोक्तास्सन्तः महत्ति गहने वने स्वैरं स्वच्छन्दं यथा तथा चेरुः सञ्चरितवन्तः । अत्र किरातेषु कालदूतसादृश्य-प्रतिपादनादुपमालङ्कारः ॥३५॥

---

[1] वामास्तासां निजकरतलादर्पयामास तस्याः ।
सा स्रक्प्रासस्फुटतनुरुचा नीलमानोपमानम् ॥ (ख).
अयं तु (क)पुस्तके निर्मुक्तास्त्रेति पद्यस्य उत्तरार्धः ।

[2] चञ्चत (क)

३६

[1]निर्मुक्तास्त्रप्रहतशिरसः कुम्भिनः स्रस्तमुक्ताः
सद्यो गुम्फन्गुरुकुचतटे योषितः कोटिभिल्लः[1] ।
[2]मालां तासां निजकरतलादर्पयामास तस्याः
सा स्रक्प्रापासिततनुरुचा नीलमालोपमानम् ॥[2]

निर्मुक्तेति ॥ तस्मिन् गहने कोटिभिल्लः व्याधः निर्मुक्तैः प्रयुक्तैश्शस्त्रैः शरैः प्रहतं शिरो यस्य तस्मात् । कुम्भिनो गजात् स्रस्तमुक्ताः गलितमुक्ताफलानि सद्यः गुम्फन् ग्रथनं कुर्वन् योषितः प्रियायाः गुरुकुचतटे निजकरतलात् तासां मुक्तानां मालां मालिकामर्पयामास समर्पितवान् । सा स्रक् मुक्तावती तस्याः शबर्याः असिततनुरुचा श्यामलदेहकान्त्या नीलमालोपमानमिन्द्रनीलमालिकासाम्यं 'भावे ल्युट्' प्राप प्राप्तवती ।

अत्र मुक्तावल्यां निजधवलिमपरित्यागेनान्यदीयनीलिमग्रहवर्णनात्तद्गुणालङ्कारः ॥३६॥

३७

मुक्ताव[3]ल्या[3] कुचयुगमथालंकृतं यत्सपत्न्याः
तत्पश्यन्ती सपदि शबरी प्रेयसा निश्वसन्ती ।

---

[1] लुप्तभागः (ख) [2] निर्भिन्नेमेति पद्ये उत्तरभागः (ख). वामास्तासां निजकरतलादर्पयामास तस्याः । सा स्रक्प्रास्फुटतनुरुचा नीलमालोपमानं इति (ख).
[3] ल्या (ख).

चक्षु[1]र्निर्य[1]ज्जलकणगणस्वच्छमुक्ताकलापैः
स्व[2]स्यास्तु[2]ङ्गं गुरुकुचयुगं काचनालञ्चकार ॥

मुक्तेति ॥ तत्र वने सपत्न्याः सभर्तृकायाः कुचयुगं प्रेयसा [कर्त्रा] मुक्तावल्या मौक्तिकहारेण अलंकृतं परिष्कृतमिति यत् सपदि तत् पश्यन्ती काचन शबरी अथ निश्वसन्ती निश्वासं कुर्वती सती चक्षुर्भ्यां निर्यतां निस्रुतान जलकणानामश्रुबिन्दूनां गणा एव मुक्तकलापाः मौक्तिकभूषणानि तैस्तुङ्गमुन्नतं स्वस्याः आत्मनः गुरुकुचयुगमलञ्चकार परिष्कृतवती ।

अत्र नायिका त्वधीरा, नायको धूर्तः । अश्रुबिन्दुषु मुक्ताकलाप-तादात्म्यरूपणाद्रूपकालङ्कारः ॥२७॥

३८

रक्ताशोकप्रसवविलसन्मञ्जरीकर्णपूरं
दत्तं प्रेक्ष्य श्रवणविधृतं द्राक्सपत्न्याः प्रिये[3]ण[3] ।
कर्णे[4]ऽधायि[4]प्रकटितजपालोहितापाङ्गकान्त्या
त[5]त्रा[5]त्मीये शबर[6]सुदृशाऽ[6]शोक[7]गुच्छा[7]वतंसः ॥

रक्तेति ॥ तत्र वने प्रियेण दत्तं प्रतिपादितं सपत्न्याः श्रवणे कर्णे विधृतं रक्ताशोकस्य प्रसवैः पुष्पैः विलसन्ती गुच्छ एव कर्णपूरं कर्णावतंसः तां प्रेक्ष्य शबरसुदृशा [8][शबरस्त्रिया][8] द्राक् द्रुतं प्रकटितया जपालोहितया जपा–

---

[1] क्षूषीय (ख). [2] स्यै तु (ख). [3] को (क). [4] र्नदाय (ख).
[5] त्मा (ख). [6] सदृशो (ख). [7] गुंज्याव (ख). [8] लुप्तः (क).

कुसुमवद्रक्तया अपाङ्गकान्त्या नेत्रान्तशोभया रोषजनितयेति भावः । अशोक-गुच्छावतंसः अशोकमञ्जरीकृतकर्णभूषणं आत्मीये कर्णे अधायि निहितः । ददातेः कर्मणि लुङि चिणि 'आतो युक्चिण्कृतोरि'ति युगागमः ।

अत्र नायिका खण्डिता धीरा च । नायको धूर्तः । पूर्व[1][व][1]दल-ङ्कारः ॥३८॥

३९

गुञ्जाभूषाऽरुणकिसलयच्छन्नचञ्चन्नित[2]म्बा[2]
स[3]न्ध्यारक्ता[3] रजनिरिव [4]या[4] दृश्यते षट्पदाभा ।
व्याधः कश्चित्करिवरशिरोमौक्तिकै[5]स्संयुताङ्गीं[5]
चक्रे तारातातिभिरिव तां नीलनीरेजनेत्राम् ॥

गुञ्जेति ॥ तत्र वने षट्पदस्य भ्रमरस्य आभेवाभा यस्यास्सा श्यामेत्यर्थः । या शबरी गुञ्जाविकाराः कुरुविन्दरूपाः भूषाः भूषणानि यस्यास्सा । अरुणकिसलयैः छन्नः आच्छादितः चञ्चन् नितम्बः कटिर्यस्यास्सा । अत एव सन्ध्यारक्ता सन्ध्यारागयुक्ता रजनिः रात्रिरिव दृश्यते । जनैरिति शेषः । कर्मणि लट् । क ः शबरः नीलनीरेजे इन्दीवरे इव नेत्रे यस्यास्तां शबरवधूं तारा क्षत्राणां ततिभिस्समूहैरिव स्थितैः करिवरशिरो-मौक्तिकैः दन्तीन्द्रकुम्भच्युतमुक्ताफलैः संयुतं व्याप्तमङ्गं शरीरं यस्यास्तां चक्रे चकार। अत्र नायिका स्वाधीनपतिका नायकोऽनुकूलः। उपमालङ्कारः ॥३९॥

---

[1] लुप्ताक्षरः (क). [2] म्बः (ख). [3] न्धामश्रा (ख). [4] य (ख).
[5] स्सयुतानि (ख).

४०

मद्योन्मत्तां ज्वलितमदनां कुञ्जमानीय का[1]न्तां[1]
[2]पौष्पे तल्पे[2] स्मितनतमुखीं गाढमालिङ्ग्य दोर्भ्याम् ।
पायं पायं मधुरमधरं किञ्चिदामीलिता[3]क्षीं[3]
कामं [4]रेमे[4] स[5]पुल[5]कवपुः क्लृप्तबन्धः पुलिन्दः ॥

मद्येति ॥ तत्र वने पुलिन्दो व्याधः मद्येनासवेनोन्मत्तामुत्कृष्टमदवतीं ज्वलित उद्दीप्तः मदनः कामो यस्याः ताम् । स्मितं हसनयुक्तं स्मितलक्षणं तु—

'विकसत्कपोल[6][युग्मं][6] यदपाङ्गोन्मुखतारकम् ।
अलक्ष्यमाणदशनं स्मितमित्यभिधीयत ॥' इति ।

नतं नम्रं मुखं यस्यास्तां 'स्वाङ्गाच्चोपसर्जनादि'त्यादिना ङीप् । कान्तां कुञ्जं लतागृहमानीय नीत्वा पौष्पे पुष्पमये तल्पे आस्तरणे दोर्भ्यां गाढं दृढमालिङ्ग्य आश्लिष्य मधुरमधरं पायं पायं पीत्वा पीत्वा किञ्चिदामीलिताक्षीमीषन्मुकुलितनयनां सपुलकं रोमोद्गमसहितं वपुरङ्गं यस्य स तथोक्तः क्लृप्ताः कृताः बन्धाः सुरतविषयाः येन स तथोक्तस्सन् रेमे क्रीडितवान् ।

अत्र नायिकानायकयोरालम्बनविभावयोः पुष्पशय्यादिरूपोद्दीपनविभाव[7][स्य][7] रोमोद्गमरूपसात्त्विकभावस्य अर्थसूचितौत्सुक्यादिसञ्चारिभावस्य अक्षिचालनादिलक्षणानुभावस्य च प्रतीतेरालिङ्गनाधरास्वादनादिसंयोगप्रतिपादनात्सम्भोगशृङ्गारः । नायिका मध्या ॥ ४०॥

---

[1] मौ (ख). [2] यौ वै रूपौं (ख) [3] क्षी (ख) [4] भेजे (ख). [5] ळ (ख).
[6] लुप्तभागः (क). [7] श्च (क).

४१

कान्तापाङ्गोपचितरुचिभिर्धूयमा[1]ने[1] निकुञ्ज-
ध्वान्ते लज्जाऽवनतवदनां वे[2]पिताङ्गीमवेक्ष्य[2] ।
आलिङ्ग्याङ्गं परवशतया मीलिताक्षीं विधाय
प्रायो रन्ता तमसि निचिते [3]धीवरोऽन्वर्थकाख्यः[3] ॥

कान्तेति ॥ तत्र वने निकुञ्जध्वान्ते लतागृहस्थिततमिस्रे कान्तयोः रम्ययोः अपाङ्गयोः उपचिताभिस्समृद्धाभिः रुचिभिः कान्तिभिः धूयमाने निवार्यमाणे सति, स्त्रीकटाक्षाणां धावल्यं कविसम्मतं इति भावः । लज्जया अवनतं वदनं यस्यास्सा । 'न क्रोडादि बह्वचः' इत्यनेन स्वाङ्गादित्वेऽपि ङीब्निषेधः । वेपितं कम्पितमङ्गं यस्यास्तां नवोढामिति शेषः । धीवरः कैवर्तः अवेक्ष्य अङ्गमालिङ्ग्य परवशतया सुखपारवश्येन निमीलिताक्षीं निमीलितनयनां विधाय तमस्यन्ध[4][का][4]रे निचिते सान्द्रे सति तत्रोदितकान्ताकटाक्षाणां निमीलनेन निवृत्तेरिति भावः । प्रायः भृशं रन्ता क्रीडि[5][ता सन्][5] अन्वर्थका अर्थवती आख्या धीवरनाम यस्य स तथोक्तः धिया बुद्ध्या वरः श्रेष्ठः इत्यन्वर्थसंज्ञावानिति यावत् अभूदिति शेषः ।

अत्र पूर्ववाक्यार्थस्योत्तरवाक्यार्थहेतुत्वात्काव्यलिङ्गमलङ्कारः ॥४१॥

४२

अध्वश्रा[6]न्तां[6] मृदुकिसलयैर्वीज[7]य[7]न्मन्दमन्दं
ताम्यन्मध्यां गुरु[8]कु[8]चभ[9]रां[9] मार्जयन् स्वेदबिन्दून् ।

---

[1] ना (ख) [2] पितां तामवेक्ष्यन् (ख) [3] मीतिमान् वर्धकारव्यः (ख)
[4] लुप्तः (क) [5] तस्सन् (क) [6] न्तं (ख) [7] लुप्तः (ख) [8] क (ख) [9] रा (ख)

सान्द्रच्छा[1]यं शिशिरित[1]लताकुञ्जमानीय कान्तां
कश्चित्तस्यां रहसि सुरता[2]न्निर्वृ[2]तिं तत्र लेभे ॥

अध्वेति ॥ तत्र वने अध्वना मार्गसञ्चारेण श्रान्तां खिन्नां ताम्यन् खिन्नः मध्योऽवलग्नं यस्यास्तथोक्तामतिसूक्ष्मत्वादिति भावः। गुरुर्महान् कुचभरो यस्यास्तां कान्तां प्रियाम्। सान्द्रा छाया अनातपो यस्मिन् तं सान्द्रच्छायं शिशिरितश्शीतीकृतो लताकुञ्जो लतागृहं तम्। * 'सान्द्रच्छाया शिशिरितलताकुञ्जमि'ति पाठे छाययेति तृतीयासमासः। कश्चिद्व्याधः मन्दमन्दं 'प्रकारे गुणवचनस्ये'ति द्विर्भावः। आनीय नीत्वा रहसि विजने मृदुकिसलयैः कोमलपल्लवैः वीजयन् वीजनं कुर्वन् स्वेदबिन्दून् घर्मपृषतान् मार्जयन् परिहरन् तस्यां कान्तायां सुरतात् निर्वृतिं सुखं लेभे प्राप्तवान्।

अत्र नायिका स्वाधीनपतिका। नायकोऽप्यनुकूलः। स्वभावोक्तिरलङ्कारः ॥४२॥

४३

मध्वास्वा[3]द्यं[3] त्यजति तृणवद्धीवरस्तत्र ल[4]ब्धं[4]
पीत्वा स्फीतं [5][स][5]दधररसं सुभ्रुवस्स्वस्य तस्याः।
[6]न्यक्कु[6]र्वाणो मृगमदमथाघ्राय निश्वासगन्धं
सन्धत्तेऽन्तर्व[7]ण[7]विहरणं [8]सोऽ[8]पि तत्केलिरक्तः ॥

---

[1] याश्रितवर (ख) [2] तानिवृ (ख) * व्याख्यातृदर्शितः पाठभेदः।
[3] द्यां (ख) [4] ब्ध्वा (ख) [5] त (ख) [6] आकु (ख) [7] न (ख)
[8] सा (ख)

मध्विति ।। तत्र वने धीवरः कैवर्तः स्वस्यात्मनः सुभ्रुवः वनितायाः [1][सन्तं][1] प्रशस्तमधररसमधरामृतं स्फीतमधिकं पीत्वा निपीय लब्धं प्राप्त-मास्वाद्यमास्वादनयोग्यं मधु क्षौद्रं तृणवत् तृणमिव त्यजति जहाति। अथानन्तरं तस्यां निश्वासगन्धं नासामारुतं सौरभमाघ्राय मृगमदं कस्तूरिकां न्यक्कुर्वाणः निराकुर्वन् सः धीवरः तस्याः वनितायाः केल्यां क्रीडायां रक्तः आसक्तस्सन् वनस्यान्तोऽन्तर्वणं 'प्रनिरन्तःशरे'त्यादिना वननकारस्य णत्वम् । तत्र विहरणं विहारं सन्धत्ते सन्दधाति ।

अत्र प्रियाऽधररसनिश्वासगन्धादीनां मृगमदरूपोपमानतिरस्करणात् प्रतीपालङ्कारः ।।४३।।

४४

[2]भिल्ली भ[2]ल्लं धनुषि नि[3]हि[3]तं [4]संहिता[4]कर्णकृष्टं
व्यामुञ्चन्ती शिरसि करिणस्तत्र निर्भिन्नकुम्भः ।
मुक्तायुक्तस्स वियति शरो निर्गतस्तावदासी-
दु[5]ल्कापा[5]तोपमितविभवस्तद्व[6]नस्थेऽ[6]न्धकारे ।।

भिल्लीति ।। तत्र वने भिल्ली व्याधवनिता धनुषि निहितं संहित-माकर्णकृष्टं कर्णपर्यन्ताकृष्टं भल्लं शरं 'भल्लं भल्ले च बाणे स्याद्भल्लो भल्लूक इष्यत' इति विश्वः । करिणो गजस्य शिरसि तूर्णमाशु व्यामुञ्चन्ती प्रयुञ्जाना आसीत् । निर्भिन्नो दलितः कुम्भः करिशिरो येन सः 'कुम्भौ घटेभमूर्धानावि'त्यमरः । मुक्तायुक्तः करिकुम्भस्थितमुक्ताफलसहितः शरः

---

[1] सन्ततं (क) [2] भीतीभि (ख) [3] यु (ख) [4] तूर्णमा (ख) [5] ल्लापं (ख)
[6] नास्तं (ख)

निर्गतस्सन् वियति तावति गगन एव 'यावत्तावच्च साकल्ये मानाद्यर्थेऽवधारण' इत्यमरः। तद्गनस्थे तत्काननस्थिते अन्धकारे उल्कापातेनोपमितस्तुलितः विभवो यस्य सः आसीत्। 'उल्का स्यान्निर्गतज्वाले'त्यमरः।

अत्र वर्ण्यस्य भिल्लीमुक्तशरस्योपमानत्वप्रतीतेः प्रतीपालङ्कारः ॥४४॥

४५

निर्जित्यापि स्तन[1]तटभरेणैव मत्तेभ[1]कुम्भं
[2]निर्भिद्यास्त्रैस्तदुदितमहामौ[2]क्तिकै[3]स्तत्र[3] चक्रे।
[4]भिल्ली काचिद्गुरुकुचयुगं भूषितं[4] 'कामिनीनां
क्रोधो[5]द्रेकस्स[5]दृशगतिषु प्रायशो दुर्निवारः' ॥

निर्जित्येति ॥ तत्र वने काचिद्भिल्ली शबरवधूः स्तनतटभरेण कुच-स्थलातिशयेनैव मत्तेभकुम्भं गजकुम्भस्थलं निर्जित्य जित्वाऽपि अस्त्रैस्सायकैः निर्भिद्य तस्मात्कुम्भस्थलादुदितान्युद्गतानि महामौक्तिकानि पृथुमुक्ताफलानि तैः गुरुकुचयुगं भूषितमलंकृतं चक्रे चकार। जयशालिन एव मुक्तावल्याद्यलङ्कारेण यो[6][ज्य][6]त्वादिति भावः। ननु निर्जितस्य पुनर्विभेदनमनुचितमिति शङ्कां सामान्यविशेषसमर्थनमुखेन निरस्यति कामिनीनामिति। सदृशगतिषु समान-गतिषु गजानां स्त्रीणां च मान्द्येन गतिसादृश्यस्य लोककाव्यसिद्धत्वादिति भावः। सदृशी गतिः पतिसङ्गतिर्यासां तासु सपत्नीषु च कामिनीनां स्त्रीणां

---

[1] युगमिलद्गौरवात्कुम्भिभ (ख) [2] तन्निर्भीत्य क्षरितविलसन्मौ (ख) [3] रेव(ख)
[4] काचिद्भिल्ली तदुरसिरुहालंकृतं (ख) [5] द्रक्तः स (ख) [6] ग्य (क)

क्रोधोद्रेकः रोगातिशयः प्रायशः वारयितुं तिरस्कर्तुमशक्यो दुर्निवारः भवतीति शेषः । अर्थान्तरन्यासः । वृणोतेर्ण्यन्तात् 'ईषद्दुस्सुषुकृच्छ्राकृच्छ्रार्थेषु खल्' इति खल् प्रत्ययः ॥ ४५ ॥

४६

ता[1]म्य[1]न्मध्या स्फुटभुजलता किञ्चिदाकुञ्चिता[2]ङ्गी[2]
व्याकृष्टास्त्रा प्रकटितबृहद्दक्षिणो[3]रोजभागा[3] ।
चञ्चन्नेत्रा चकितहरि[4]णं प्रत्यमुञ्चत्सरोषं[4]
का[5]मस्स्वी[5]यं शरमपि तदा पश्यतस्तां मुमोच ॥

ताम्यदिति ॥ तत्र वने काचित् शबरी ताम्यत् खिन्नं मध्यमवलग्नं यस्यास्सा । स्फुटा व्यक्ततरा भुजलता वामबाहुर्यस्यास्सा । किञ्चिदीषत् आकुञ्चितं निकुञ्चितं अङ्गं यस्यास्सा । व्याकृष्टं विशेषेणाकृष्टमस्त्रं शरो यया सा । प्रकटितः प्रकाशितः बृहन् पृथुलः दक्षिणो वामेतरः उरोजभागः कुच-तटं यया । चञ्चले नेत्रे यस्यास्सा । तथोक्ता सती चकितहरिणं त्रस्तकुरङ्गं प्रति सरोषं यथा तथा शरममुञ्चत् । तदा कामो मदनोऽपि तां शबरवधूं पश्यतो विलोकयतः यूनः प्रति स्वीयं स्वकीयं शरं मुमोच । शरप्रयोगसमय-सम्भूतविलासविलसितकिरातवनिताविलोकनेन यूनां कामोद्रेकोऽभूदिति भावः ।

अत्र कार्यकारणयोर्यौगपद्यप्रती[6][ते][6]रतिशयोक्तिः ॥४६॥

---

[1] व (ख) [2] ङ्गा (ख) [3] जा मभङ्ग (ख) [4] णा स्वात्यमुञ्चत्सरोषा (ख)
[5] मः पा (ख) [6] ति (क)

४७

व्याधोऽध[1]स्थ[1]स्तपनघृणिभिः प्राप्तसन्तापखि[2]न्नः
तालस्याभू[2]त्सपदि [3]कपिना पातितं द्राक्तदग्रे[3] ।
तस्यावश[4]यं[4] शिरसि[5] तरसाऽऽगत्य शत्रोर्मृ[5]गाणां
[†]स्थूलं पक्वं फलमल[6]भत[6] क्षिप्तपाषाणशोभाम्[†] ॥

व्याध इति ॥ व्याधः किरातः तपनघृणिभिः सूर्यकिरणैः प्राप्तेन सन्तापेन सज्वरेण खिन्नः श्रान्तस्सन् तालस्य अधस्थः अधोदेशस्थितः अभूत् । तदग्रे तस्य व्याधस्याग्रे पुरोदेशे द्राक् द्रुतं कपिना वानरेण पातितं क्षिप्तं स्थूलं बृहत् पक्वं फलं मृगाणां शत्रोस्तस्य व्याधस्य शिरसि अवश्यमागत्य सपदि सद्यः तेन वानरेण क्षिप्तस्य पाषाणस्य महोपलस्य शोभां कान्तिमलभत प्राप ।

अत्र तालफलस्य पाषाणशोभासम्भावनेन तत्सदृशशोभाक्षेपान्निदर्शनालङ्कारः ॥४७॥

४८

ताल्याः कीशः पवनपति[7]ते मद्यमास्वाद्य कुम्भे
तत्रो[7]न्मत्तः करिवरशिरोमौक्तिकं रक्तसिक्तम् ।

---

[1] स्ता (ख) [2] न्नास्तालश्यामा (ख) [3] कपि पत्तितं द्राकराग्रे (ख)
* तुरीयचरणः (ख) [4] स्या (ख) [5] सरुषा तेन शन्तो मृ (ख)
† तृतीयचरणः (ख) [6] वव (ख) [7] तान्मध्यमास्तद्य कुम्भाद्भग्नो (ख)

[1]खादन् कीर्णं[1] बदरफलविभ्रान्तितो रुग्णद[2]न्तः
तास्ताश्चे[2]ष्टा विवृतवदनोऽदा[3]द्विकारप्रयुक्तः[3] ॥

ताल्या इति । तत्र वने कीशः कश्चिन्मर्कटः 'मर्कटो वानरः कीशो वनौका' इत्यमरः । पवनेन वायुना पतिते कुम्भे कलशे ताल्या मद्यमास्वाद्य पीत्वा उन्मत्तः उन्मादवान् अत एव कीर्णं च्युतं रक्तेन रुधिरेण सिक्तं करिवरशिरोमौक्तिकं बदर्याः फलं बदरं तस्य विभ्रान्तितो भ्रमात् खादन् अदन् रुग्णाः भग्नाः दन्ता यस्य स तथोक्तस्सन् विवृतं विस्तृतं वदनमास्यं येन सः विकारैर्विकृतिभिः प्रयुक्तः प्रकर्षेण युक्तस्सन् तास्ताः वाचामगोचराः चेष्टाः क्रियाः अदात् दत्तवान् । भ्रान्तिमदलङ्कारः ॥४८॥

४९

लाङ्गूलाग्रं शिरसि निहितं चालयन्नग्रपा[4]दौ
उत्क्षिप्य स्वैश्शितनखमुखैः[4] क्रोधरूक्षाक्षिको[5]णः[5] ।
गर्जन्नुच्चैर्विवृतवदनो लङ्घयन्नद्रि[6]कूटान्[6]
क्षिप्रं वप्रप्रचलकरिणं पाटयामास सिंहः ॥

लाङ्गूलेति ॥ तत्र वने सिंहः क्रोधेन रोषेण रूक्षौ तीक्ष्णौ अक्षिकोणौ नेत्रान्तौ यस्य स तथोक्तः अत एव शिरसि निहितं लाङ्गूलं पुच्छं चालयन् प्रचलयन् उच्चैस्तारं गर्जन् गर्जनं कुर्वन् अद्रिकूटान् गिरिशृङ्गाणि लङ्घयन्

---

[1] बाढं गीर्णं (ख) [2] दन्तोस्तास्ताः श्चे (ख) [3] द्धकीकाप्रवृत्तः (ख)
[4] दं प्रोत्रप्रोद्यन्नभिमुखमथ (ख) [5] ण (ख) [6] श्र-गान् (ख)
★

लङ्घनं कुर्वन् विवृतवदनो विस्तृतास्यस्सन् अग्रपादौ पूर्वपादौ उत्क्षिप्योन्नमय्य स्वैः स्वकीयैः शितनखमुखैः निशितनखाग्रैः वप्रे तटे प्रचलः धावन् करी गजस्तं क्षिप्रं द्रुतं पाटयामास दलितवान् । स्वभावोक्तिरलङ्कारः ॥४९॥

५०

मत्तेभस्य च्युतमदरसैर्मौक्तिकै[1]ः प[1]त्पतद्भिः
सिं[2]हस्यास्य[2] प्रगलिततृणैर्वर्त्म सद्यो मृगीणाम् ।
[3]स्रस्तैः[3] फेनैर्महिषवित[4]तैः[4]कीर्णप[5]ङ्कैः[5]किटीनां
ज्ञात्वा यातास्तदनु विशिखै[6]स्तांश्च[6] जघ्नुः किराताः ॥

मत्तेति ॥ तत्र वने किराताः च्युतमदरसैः स्रुतमदोदकैर्गजस्य पद्भ्यः पादेभ्यः पतन्ति पतितानि तैर्मौक्तिकैः सिंहस्य आस्येभ्यो वदनेभ्यः प्रगलित-तृणैः प्रच्युतघासैः मृगाणां हरिणानां स्रस्तैः च्युतैः फेनैः डिण्डीरैः महिषवितते लुलायसमूहस्य कीर्णपङ्कैः स्रस्तकर्दमैः किटीनां वराहाणां च वर्त्म मार्गं ज्ञात्वा विदित्वा तदनु मार्गमनुसृत्य याताः गतास्सन्तः तान् गजा[7][दीन्][7] जघ्नु-र्हिंसितवन्तः ।

अत्र मार्गस्रुतमदधारादीनां वध्यगजादिलाभरूपकार्यसौकर्यप्रतीते-स्समाधिरलङ्कारः ॥५०॥

---

[1] ग (ख) [2] हं प्राप्य (ख) [3] स्तन्यैः (ख) [4] तैः (ख) [5] ङ्क्तैः (ख)
[6] स्तान्वि (ख) [7] नास्ति (क)

५१

ह[1]न्त्येतं[1] मे पतिमिति त[2]दा तं[2] तिरोधाय मध्ये
याता जाता व्यसुरपि जवान्मुक्तबाणा[3]त्कुरङ्गी[3] ।
व्याधेनासौ सपदि हरिणस्तां मृतां वीक्ष्य कान्तां
त्यक्तप्राणस्स्वयमपि तथाऽऽसीदनङ्गास्त्रपातात् ॥

हन्तीति ॥ तत्र वने व्याधः मे मम एतं पतिं हन्ति एतं प्रियं हन्ति हनिष्यति वर्तमानसामीप्ये वर्तमानव्यपदेशाल्लट् । इति मत्वेति शेषः । गम्यमानत्वादप्रयोगः । तदा हिंसासमये तं पतिं तिरोधाय आवर्त्य मध्ये याता कुरङ्गी हरिणी व्याधेन जवाद्वेगात् मुक्तबाणात्प्रयुक्तशरात् विगताः असवः प्राणा यस्यास्सा तथोक्ताऽपि जाता । असौ हरिणः मृतां मृतिं प्राप्तां कान्तां वीक्ष्य तथा हरिणीवदेव स्वयमपि अनङ्गास्त्रपातनात् मदनशरपातनात् त्यक्ता विसृष्टाः प्राणा येन स तथोक्तः आसीत् ।

अत्र सत्यपि प्रतिबन्धके कार्योत्पत्तिवर्णनाद्विभावना ॥ ५१ ॥

५२

गुप्ताङ्गायाः किसलयचयैर्भूरुहश्शङ्कमानः
कश्चिद्व्याधः प्रकटितकुचौ कुम्भि[4]नो[4]कुम्भयुग्मम् ।
मुक्तास्त्रोऽभूत् सपदि[5] च[5] तथाऽऽशङ्क्य तन्मध्य[6]गामी[6]
छिन्नस्तूर्णं शिरसि पतितस्तेन बाणेन सिंहः ॥

---

[1] त्यस्तं (ख) [2] दंगं (ख) [3] त्करं भी (ख) [4] नः (ख) [5] स(ख)
[6] पाति (ख)

गुप्तेति ।। तत्र वने भूरुहो वृक्षस्य किसलयैः पल्लवचयैः गुप्तं छन्नमङ्गं शरीरं यस्यास्सा 'अङ्गगात्रे'त्यादिना प्राप्तस्य ङीषः वैकल्पिकोऽभावः । तस्याः कस्याश्चिच्छबर्याः प्रकटितकुचौ कुम्भिनो गजस्य कुम्भयुग्मं कुम्भस्थलद्वयं शङ्कमानः उत्प्रेक्षमाणः कश्चिद्व्याधः मुक्तं प्रयुक्तमस्त्रं शरः येन स तथोक्तः अभूत् । सपदि तदानीं तथा कुचौ कुम्भिकुम्भात्मना आशङ्क्य सम्भाव्य तयोः कुचद्वयशबरमुक्तशरयोर्मध्ये गच्छतीति तथोक्तः सिंहः तेन बाणेन शिरसि छिन्नः भेदितस्सन् तूर्णं पतितोऽभूत् ।

अत्र सिंहस्य कुम्भिकुम्भविदलनरूपेष्टसमुद्यमेन व्याधविमुक्तशरघातलक्षणानिष्टप्राप्तेर्विषमालङ्कारः ॥५२॥

५३

कन्तुक्रीडाश्रमविधुरि[1]तौ यौ पुलिन्दी पुलिन्दः
ताभ्याम[1]भ्यन्तरगतगजः पा[2]र्श्वयोस्तत्र विद्धः[2] ।
ब[3]ष्मोंपान्ते[3] महति बहुशः पत्रिभि[4]र्निश्चला[4]ङ्गः
[5]प्रेक्ष्य प्राञ्चन्न[5]ग इव बभौ दानवा[6]रिप्रवाहः[6] ॥

कन्त्विति ॥ तत्र वने कन्तुक्रीडाश्रमेण सुरतश्रमेण विधुरितौ विह्वलौ । विभिन्नदेशवृत्तित्वापादनार्थमिदम् । अथवानेकशरप्रयोगसन्ध्यर्थः । अन्यथा द्वित्रशैरेव तत्प्रहरणसामर्थ्यात्तयोरिति भावः । पुलिन्दी पुलिन्दश्च

---

[1] तेमौ पुलिन्दी पुलिन्दौ तत्रा ता (ख) [2] श्च विद्धः (ख) [3] र्षे पांथे (ख)
[4] निश्चिता [5] पक्षः प्रांचः मृ (ख) [6] र्निर्झरौघः (ख)

यौ अभ्यन्तरमन्तरालं पुलिन्दाभ्यां बहुशः पत्रिभिः शरैः 'पत्रिणौ शरपक्षिणा- वि'त्यमरः । महति महनीये वर्ष्मणः शरीरस्योपान्ते ऊर्ध्वभागसमीपे 'शरीरं वर्ष्म विग्रह' इत्यमरः । पार्श्वयोः विद्धो वेधितः अत एव निश्चलमङ्गं यस्य सः । दानं मद एव वारिप्रवाहो निर्झरो यस्य स तथोक्तः । गजः प्रेक्ष्य प्राञ्चन् अङ्कितो नगः [1][पर्वत][1] इव बभौ रराजेत्युत्प्रेक्षा ॥५३॥

५४

[2]मध्ये या* [तं]*शबरत[2]नयौ पार्श्वयोः कृष्णसारं
प्रोन्मुक्तास्त्रौ युगपदचिरा[3]दूर्ध्वमुल्लङ्घ्य तावत्[3] ।
[4]धावत्यस्मिन् सपदि निहतौ तूर्णमन्योन्यमुञ्च-
द्बाणाभ्यां[4] तौ 'तृणमुख[5]ह[5]तिः कस्य नाशं न धत्ते ॥'

मध्य इति ॥ तत्र वने शबरतनयौ किरातसुतौ मध्ये अन्तराले यातं प्रयात कृष्णसारं हरिणं प्रति पार्श्वयोः युगपत् एकदैव प्रोन्मुक्तौ प्रयुक्तौ अस्त्रौ शरौ ययोस्तौ तथोक्तौ बभूवतुः । अस्मिन् हरिणे तावत् अचिरात् शीघ्रं ऊर्ध्वमुपरि उल्लङ्घ्य धावति प्रयाति सति, सपदि सद्यः तौ शबरतनयौ अन्योन्येन परस्परेण मुञ्चन्तौ विमुक्तौ यौ बाणौ ताभ्यां तूर्णं निहतौ प्रहृतौ । तथा हि— तृणं मुखे यस्य सः तृणमुखः भक्षणार्थं पराजयसूचनार्थं च तस्य हृतिर्हरणं कस्य पुरुषस्य नाशं न धत्ते न करोति । करोत्येवेति भावः ।

---

[1] पार्श्वतः (ख) [2] निर्जित्यापि शर इव (ख) * तौ (क) [3] लङ्घयन्नूर्ध्व- मुच्चैः (ख) [4] तावद्धावान् स च विनिहतौ तूर्णमन्येभ्य मुञ्चन् बाणाभ्यं (ख) [5] ह्व (ख)

र[1][णे][1] मुखनि[2][हि][2]ततृणस्य प्रहरणं दोषावहमिति भावः । अत्र सामान्येन विशेषसमर्थनादर्थान्तरन्यासः ॥ ५४ ॥

५५

स्वप्रेयस्याः पृथुतरकुचश्रीधरौ पीनकुम्भौ
बिभ्राणं [3]तन्न[3]यनसमयो[4]र्युग्म[4]मक्ष्णोदधानम् ।
सन्त्यज्ये[5]भं[5] मृगमपि तयो[6]र्विद्विषो[6] वीक्ष्य [7]भिल्लः
सिंहान्व्याघ्रान्नि[7]भृतमभितः पत्रि[8]णा स[8]ञ्जघान ॥

स्वेति ॥ तत्र वने कश्चिद्भिल्लः स्वप्रेयस्याः निजप्रियायाः पृथुतरयो-रतिपृथुलयोः कुचयोः श्रियश्शोभायाः धरौ पचादित्वादच् । पीनकुम्भौ पीनौ पीवरौ कुम्भौ बिभ्राणं दधानमिभं गजं तस्याः प्रेयस्याः नयनयोर्नेत्रयोः द्वयं युग्मं दधानं मृगमपि हरिणं च सन्त्यज्य हित्वा, प्रेयसी सादृश्यप्रयुक्तप्रेमाति-शयादिति भावः । तयोर्गजमृगयोर्विद्विषो वैरिणः सिंहान् व्याघ्रान् अभितः पत्रिणा बाणेन सञ्जघान संहृतवान् ।

अत्र प्रेयसीकुचकुम्भयोर्नयनयोः प्रसिद्धयोः कुम्भिकुम्भयोर्मृगनेत्रयोश्च उपमेयत्वकल्पनात्प्रतीपालङ्कारः ॥ ५५ ॥

---

[1] ण (क) [2] ह (ख) [3] तं न (ख) [4] र्मर्म (ख) [5] वं (ख)
[6] र्वांधिमौ (ख) [7] ल्लः वेगात्संधानि (ख) [8] णस्स (ख)

५६

गर्जद्व्याघ्राच्चकितहृद[1]या[1]मङ्गनां वेपिता[2]ङ्गीं-[2]
[3]आलोक्या[3]शु स्फुटमभिगतं [4]भीमदंष्ट्रा[4]करालम् ।
व्याश्लिष्टास्यं करत[5]ल[5]चल[6]त्खड्ग[6]तस्तं ज[7]घान[7]
प्रेयस्याऽथो विजयरमयेवायमालिङ्गितोऽभूत् ॥

गर्जदिति ॥ तत्र वने गर्जतः गर्जनं कुर्वतः व्याघ्रात् शार्दूलात् चकितं त्रस्तं हृदयं मनो यस्यास्तामत एव वेपितशरीरामङ्गनां वधूमालोक्य दृष्ट्वा अयं [8][भि][8]ल्लः आशु [9]आ[शु अभि][9]मुख[10][मा][10]गच्छन्तं भीमाभ्यां भीषणाभ्यां दंष्ट्राभ्यां करालं क्रूरं स्फुटं व्यक्तं यथा भवति तथा श्लिष्टं विवृतमास्यं येन तं व्याघ्रं करतले चलत्खड्गतः चञ्चत्खड्गेन जघान् व्यापादितवान् । अथोऽनन्तरं 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथे'त्यमरः । प्रेयस्या दयितया विजयरमया जयलक्ष्म्येव आलिङ्गितः आश्लिष्टो अभूत् । उत्प्रेक्षालङ्कारः ॥ ५६ ॥

५७

निर्भि[11]द्ये[11]भ नखरकुलिशात्कुम्भपीठे निषण्णः
तस्याविद्धश्शबरपतिना पत्रिणा गाढ[12]रोषः[12] ।

---

[1] य (ख) [2] ङ्गीं (ख) [3] मश्वाख्या (ख) [4] ष्म दंष्ट्रं (ख) [5] ळ (ख)
[6] न्द्रीत (ख) [7] हार (ख) [8] भ (क) [9] शा (क) [10] म (क)
[11] न्ने (ख) [12] गोपः (ख)

तूर्णं गर्जन्निव जलभृतो मेघव[1]ह्रिर्मृ[1]गेन्द्रः

[2]स्वं[2] विध्यन्तं द्विरदशिरसो लङ्घयन् [3]सञ्जघान[3] ॥

निर्भिद्येति तत्र वने नखरं कुलिशमिव नखरकुलिशं तस्मात् वज्रसदृशनखात् इभं गजं निर्भिद्य छित्वा तस्य गजस्य कुम्भ[पीठे] पीठसदृश-कुम्भस्थले निषण्णः आसन्नः शबरपतिना शबरनायकेन (कर्त्रा) पत्रिणा शरेण (करणेन)आविद्धः प्रहृतः अत एव गाढरोषः सान्द्रक्रोधः मृगेन्द्रः सिंहः मेघवह्रि-रशनिः जलभृतो जलधरादिव द्विरदशिरसः करिकुम्भात् तूर्णं लङ्घयन् लङ्घनं कुर्वन् गर्जन् सन् स्वमात्मानं विध्यन्तं व्यथयन्तं शबरपतिं सञ्जघान । उपमालङ्कारः ॥५७॥

५८

[4]डोलाके[4]ल्यां नभसि चलितं प्रेयसीकेशपाशं

माल्याकीर्णं मनसि शब[5]रस्संस्म[5]रन्नुत्पतन्तम् ।

चञ्चद्बर्हं शिखिनमिषुणा [6]नागतं सञ्ज[6]हार

'प्रे[7]म[7] प्रायस्सदृशविषये कामिनां कामिनीनाम्' ॥

डोलेति ॥ तत्र वने शबरः डोलाकेल्यां डोलाक्रीडायां चलितमुच्चलितं माल्यैराकीर्णं व्याप्तं प्रेयस्याः दयितायाः केशपाशं केशकलापं मनसि संस्मरन् अनुसन्दधानः नभसि व्योम्नि उत्पतन्तमुच्चलन्तं चञ्चलन्ति बर्हाणि पिञ्छानि

---

[1] ह्री मृ (ख) [2] स्तं (ख) [3] तं जघान (क) मञ्जघान इति (क) पुस्तक-व्याख्यानपाठश्च । [4] धोळत्के (ख) [5] रः सन्मु (ख) [6] नग्रतस्तं ज (ख) [7] मः (ख)

यस्य तं शिखिनं मयूरं आगतमुपयातमपि तं इषुणा बाणेन न सञ्जहार न संहृतवान् । उक्तार्थमेव सामान्यतो वर्णयति —प्रेमेति— कामिनीनां स्त्रीणां सदृशविषये सदृशार्थे कामिनां यूनामपि प्रायः प्रेम प्रीतिर्भवतीति शेषः । स्मृतिमदर्थान्तरन्यासयोस्सङ्करः ॥ ५८ ॥

५९

दृप्य[1]द्द्वीपि[1]द्विपरिपुवपुश्छेदिनः कर्कशाङ्गाः
चञ्च[2]द्वीरुद्ग्रथितचिकुराः[2] फुल्लपुष्पावतंसाः ।
व्याप्तक्ष्माज[3]च्छदरुचिपटाः प्रावृडभ्र[3]प्रभाङ्गाः
धानुष्कास्ते श्वभिरनुगताः पक्कणं तेऽभियाताः ॥

दृप्यदिति ॥ दृप्यतां दृप्तानां द्वीपिनां व्याघ्राणां द्विपरिपूणां सिंहानां वपूंष्यङ्गानि छिन्दन्तीति तथोक्ताः चञ्चद्भिः वीरुद्भिः लताभिः ग्रथिताः बद्धाः चिकुराः शिरोरुहाः यैस्ते फुल्लानि विकसितानि पुष्पाण्येवावतंसाः शिरोभूषणानि येषां ते व्याप्ताः पिहिताः क्ष्माजस्य वृक्षस्य छदाः पत्राणि तेषां रुचिरिव रुचिर्येषां ते तथोक्ताः पटाः वस्त्राणि येषां ते अथवा व्याप्तक्ष्माजच्छदरुचय एव पटा येषां ते तथोक्ताः प्रावृडभ्रस्य वर्षाकालमेघस्य प्रभेव प्रभा कान्तिर्येषां तानि तथोक्तान्यङ्गानि शरीराणि येषां ते श्वभिश्शुनकैरनुगताः अनुसृताः कर्कशान्यङ्गानि अवयवाः येषां धानुष्काः धनुर्धराः किराताः तदस्य प्रहरण-मित्यर्थे ठकः 'इसुसुक्तान्तात्कः' इति कादेशः । पक्कणं शवरगृहं अभियाताः

---

[1] द्वीप (ख) [2] द्वंथीचिकुरकुचराः (ख) [3] भरुचिपटप्रप्रदभ्र (ख)

'घोष आभीरपल्ली स्यात्पक्कणश्शबरालय' इत्यमरः । स्वभावोक्तिरलङ्कारः ॥५९॥ * †

६०

बाणादेणीमभि[1][म][1]तगतामर्भकैर्दष्टदूर्वां
व्याधो विध्यन् सदयसदृशा चोदितो मा वधेति ।
यावत्तां न स्पृशति स शरस्तावदे[2][वै][2]त्य वेगात्
जग्राहास्त्रं 'प्रियजनवचोलङ्घने कस्समर्थः' ॥

६१

चश्चद्दृ[3]ष्टः[3] प्रकटित[4][जवोऽ][4]भूत्क्रिटिर्बाणविद्धः
क्रुद्धस्सद्यश्शबरपतिना त[5][द्य][5]थामप्यजानन् ।

---

* टिप्पणी—पद्यानां सङ्ख्याक्रमस्त्वस्मिन् सर्गे (क)(ख)योर्मातृकयोस्समान एव । परन्तु ४१ पद्यादारभ्य ५९ पद्यसमाप्त्यन्तं (ख)मातृकायां केवलं भिन्नक्रमस्सूचितः । अत्रस्थ पद्यसङ्ख्या एव (ख)मातृकाक्रममनुसृत्य प्रदश्यंते— ४७, ४१, ४४, ४८, ४९, ४२, ४३, ४५, ५०, ५१, ५२, ५३, ५४, ४६, ५५, ६०, ५७, ५८, ५९ ॥

† (क)(SA 144) पुस्तके ५९ तमपद्यसमाप्त्यन्तमात्रं व्याख्यानं वर्तते । ततश्च ६०तम पद्यादारभ्य ९९तम पद्यपूर्त्यन्तं आहत्य ४० पद्यानि लुप्तानि । उत्तरत्र १०० तमपद्यादारभ्य दशमसर्गान्तं मूलमात्रं वर्तते । एतावत्पर्यन्तमात्रं व्याख्यानमुपलभ्यते ॥

[1] द्द (ख) [2] बे (ख) [3] ष्टाः (ख) [4] सतो (ख) [5] द्य (ख)

पश्यन् ल[1][ग्नं ज][1]घननि[2][य][2]तं रोपमुत्खाय भूजान्
हन्तुं [3][यास्यन्नभिमुखमभीः][3] स प्रकृत्तः [4][क्षणेन][4] ॥

६२

ब[5][र्हि][5]व्रातं मृदुमृगमदं चामरं दन्तिदन्तान्
मुक्ताजालं फणिफणमणीन् मांसगन्धं वहन्तः ।
भारान् बध्वा दलदि[6][भवृ][6]हत्कृत्तिभिस्ते पुलिन्दा
*रेजुस्तूलनिव गिरिभृतो मस्तके रामभ्रा[7][तुः][7] ॥

६३

[8][अ][8]म्भोजाम्भः प्रमिलितसरस्सत्फलानम्रभू[9][जं][9]
गायद्भृङ्गं मृदुचल[10][मरु][10]न्मञ्जुवीरुन्निकुञ्जम् ।
खेलन्नानाखगरुतयुतं त्यक्तसापत्न्यसत्त्वं
योगीन्द्राणां विलसति वनं पुष्पसौरभ्ययु[11][क्तम्][11] ॥

६४

भस्मापाण्डु स्ववपुषि ततः पूतरुद्राक्षमालाः
धृत्वा स्फीताम्बुरुहकुहरीमण्डलाग्रे म[12][हे][12]शम् ।

---

[1] ग्नाज्ज (ख) [2] यु (ख) [3] यस्यस्यपिमुखमुखी (ख) [4] लुप्तः (ख) [5] हिं (ख)
[6] भिभृ (ख) * चतुर्थचरणस्त्वस्फुटार्थः । [7] ताः (ख) [8] स (ख)
[9] जा (ख) [10] मृद्ध (ख) [11] क्त (ख) [12] ही (ख)

ध्यायन्त[1][स्ते नि][1]कृतविषयाश्चिद्रसानन्दसा[2][न्द्रा][2]
स्तस्थुस्तस्मिन् प्रणिहितधियस्तद्वने तापसेन्द्राः ॥

६५

गाढं गाढं फलमपि द[3][द][3]त्यञ्जसा वल्कलश्च
क्ष्माजास्तेभ्यो मरुदपि रजो मार्जे[4][य][4]त्य[5][ब्द][5]सङ्घः ।
सिञ्चत्यम्भः ऋतु[6][हुत][6]वहं कर्णवातैर्द्विपेन्द्राः
कुर्वन्त्याशु ज्वलितमुट*जन्पीतमस्तापसेन्द्राः ॥

६६

आज्ञाचक्रद्विदलनलिने प्रस्फुरत्कर्णिकाग्रे
ज्योतिर्लिङ्गं प्रणवकरणं चिद्दृशाऽऽलोकयन्तः ।
§निश्शङ्काङ्कस्थिधृतमतशीशुद्राप्तपीताशुधारां
शान्तस्वान्तास्तिमितमरुतस्तस्थिरे तद्यमीन्द्राः ॥

६७

अङ्गुष्ठाग्रे प्रकटितरसश्चोर्ध्वमुत्क्षिप्तबाहुः
भास्वद्भानोरभिमुखमुखाम्भोरुहस्तस्य पश्यन् ।

---

1 स्तन्नि (ख) 2 न्द्र (ख) 3 ध (ख) 4 यं (ख) 5 ब्ज (ख) 6 हर (ख)
* अस्पष्टः चतुर्थचरणे चरमभागः । § अस्फुटः तृतीयचरणः ।

[1]‡विम्बे साम्बं सगरलगलं द्रक्तमायाविधूतं
वक्त्रं ध्यायन्कनकवपुषं पूरुषं पूरूर्णपम् ॥

६८

भोगाभोगस्स्फुरति मणिरुग्भोगिनस्त[2][द्व][2]नान्तः
गूढाङ्गस्य स्तिमितशिरसो मस्तकाग्रेऽस्य भूयः ।
भ्रूचक्रान्तर्ज्वलितपरमज्योतिषश्चोत्तमाङ्गात्
उत्ती[3][र्णोऽथ][3] व्यरुच[4][त शशी क][4]स्यचिद्योगभाजः ॥

६९

स्कन्धारूढश्चलति क[5][रिणः][5] केस[6][री][6] स्तन्यपानात्
[7][व्याघ्री चै][7]वं तरुणहरिणं तर्पयत्युष्णर[8][श्मेः][8] ।
तप्तं तापात्फणिनमवति स्फारबर्हा मयूरी
छा[9][यां][9] कृत्वा पथि यमव[10][तो][10]योगिनस्तत्प्रभावात् ॥

७०

हेमन्तेऽपि क्वणति मधुरं कोकिलः पद्मपुञ्जं
नक्तं चापि स्मितमथ म[11][धाव][11]प्यलिर्याति जातिम् ।

---

‡[1] तृतीयचतुर्थचरणौ अस्फुटौ । [2] ज (ख) [3] र्णेव(ख)
[4] शशिशाख (ख) [5] रुण (ख) [6] रे (ख) [7] द्व्रेमा (ख) [8] श्मिः (ख)
[9] यं (ख) [10] ता (ख) [11] धाम (ख)

ग्री[1][ष्मे][1]ऽपि क्ष्मारुहकिसलयं म्लानतां नैति जातु
प्राघृ[2][ट्कालेऽप्यशिशिरतया वा][2]ति मन्दं समीरः ॥

७१

जित्वा वातं प्रसभमभितः सञ्चरद्दुर्निवारं
चेतश्चापि स्तिमितवपुषा बद्धपद्मासनस्थः ।
शृण्वन्नादं दशविधमधःकृत्य मायामनन्तं
तेजः पश्यन्विमलमतुलं शैवमास्ते मुनी[3][न्द्रः][3] ॥

७२

योगाभ्यासं कतिचिदपरे गूढवेदान्तवाचो-
व्याख्यामन्ये विदधति ज[4][टा][4]संस्कृतिं केऽप्यतन्द्राः ।
[5][रौ][5]द्रीमिष्टिं विधिवदभितः श्रौतभस्मानुलिप्तिं
[6][के][6]चित्तस्यां वनभुवि परे पूजनं चन्द्रमौलेः ॥

७३

तानालोक्य स्थिरतरतपस्तेजसश्शैवमु[7][द्रा][7]-
भाजः पृथ्वीपतिरवतरन्नेव तत्तत्स[8][प[8]र्याम् ।

---

[1] ष्मो (ख) [2] ट्कालेपरशुरतियाया (ख) [3] न्द्रः (ख) [4] टां (ख)
[5] का (ख) [6] केचि (ख) [7] द्रां (ख) [8] फ (ख)

कुर्वन् भक्त्याऽऽशिषमधिगतस्तत्प्रसादातिहृष्टः
सैन्योपेतः 'कुसुमनगरी'नन्दनं सञ्जगाम ॥

७४

तत्राभ्येत्य प्रणयभरितो स[1][म्भ्रमा][1]ड्डूरिभेरी-
तूर्यध्वानैस्सह बहुबलैः प्रे[2][त्य][2] चोलावनीशम् ।
बन्धुक्ष्माभृन्निजगजपृथुस्कन्धमारोप्य रागात्
अ[3][त्या(?)][3]लम्बि ध्वजयुजममुं प्रापयद्राजधानीम् ॥

७५

मुक्तारङ्गैर्मसृणघुसृणालिप्तभित्तिप्रतानैः
†विच्यद्धीतप्रकरमुकुरप्रोल्लसत्तोरणौघैः ।
नानाचित्राम्बरपरिम[4][लैः कौ][4]सुमस्रग्वितानैः
*प्राप्ताभिक्या मलिनधरिणीभृ[5][द्व][5]रो राजवीथीम् ॥

७६

अग्रे या[6][तो][6]रथमथ सुमेरुश्रियं हेमभासं
कामारातेः कनककलशद्योतविद्योतिताभ्रम् ।

---

[1] म्भ्रा (ख) [2] क्य (ख) [3] व्या (ख) † * द्वितीयचतुर्थचरणौ अस्फुटौ ।
[4] लकु (ख) [5] त्प (ख) [6] तां (ख)

पश्यन् भक्त्या मुकुलितकरः कुम्भिनस्सोऽवतीर्य
[1][प्राप्त][1]श्चोलस्तदवनिभृता सम्भ्रमात्तं सिषेवे ॥

७७

र[2][थ्यां][2] यातो रथमनुगतो मानकञ्जारयुक्तः
सान्द्रानन्दः सचिवसहितो तद्गृहं प्राप्य भूयः ।
लिङ्गाकारं मृड[3][मभियजन्][3] भक्तितः तत्प्रसादं
प्राश्नङ्कूरा[4][वलि][4]भिर[5][भज[5]त्पार्थिवः पुष्पमा[6][ल्यम्][6] ॥

७८

नीत्वा रात्रिं पुरहर[7][पदा][7]भ्यर्चना[8][द्यु][8]त्सवेन
क्ष्माभृत्तत्रोषसि च स यजन् प्राप्तवांस्तत्प्रसादम् ।
तुष्टस्सम्य[9][ग्गु][9]णमणिगणालङ्कृ[10][तस्त][10]न्नियोगात्
आरूढे[11][भः][11]सुरप[12][इव त][12]द्राजधानीं प्रपेदे ॥

७९

काश्चित्कन्याः कनकरुचयस्तत्र लाजान् कराग्रैः
अग्रायातं नृपतिमकिरन् भूरिशः प्रे[13][क्ष][13]माणाः ।

---

[1] प्राय (ख) [2] थ्यं (ख) [3] मथमहा (ख) [4] तति (ख) [5] जय (ख)
[6] लैः (ख) [7] रहि (ख) [8] भ्यु (ख) [9] द्र (ख) [10] तिसं (ख)
[11] भ्यः (ख) [12] मिव (ख) [13] क्ष्य (ख)

शक्रग्रावारचितरु[1][चिसद्यो][1]त सौधाग्रसंस्थाः
विद्युल्लेखा इव जलशि[2][लाः][2] संश्रिताम्भोधरा[3][ग्राः] ॥

८०

[4][स्वेदाद्राङ्गा नवनख][4]पदश्राजिवक्षोजभागा
किञ्चिन्नीवी[5][गलितरशना नेत्रद][5]ष्टाधरोष्ठा ।
[6][द्राकपा][6]दान्तस्फुरदरुणिमा स्रस्तधम्मिल्लमाला
बाला काचिन्निधुवनगृहाद्वीक्षितुं तं जगाम ॥

८१

पादालक्तद्रवविलिखितक्ष्मातला मन्दहास-
ज्योत्स्नापूरैर्धवलितककुल्लिप्तनेत्रान्तकान्त्या ।
[7][वद्धा सिन्धू][7]त्पलसुविलसत्तोर[8][णीं][8] काचिदेत्य
प्रीत्या वीथ्यामभिगतमिलावल्लभं द्राग्ददर्श ॥

८२

व्याधुन्वाना करतलचलच्चारुलीलारविन्दात्
आ[9][स्याश्वा][9]सस्फुटपरिमलभ्राम्यदुद्भृङ्ग[10][मालाम्][10] ॥

---

[1] चयद्यो (ख) [2] वाः (ख) [3] गाः (ख) [4] श्वेदाद्राङ्गानवनभि (ख)
[5] विलसिदशनानेत्र (ख) [6] द्राकपं (ख) [7] बद्धासिन्धो [8] णी (ख)
[9] श्यास्वा (ख) [10] ला (ख)

★

प्रोन्मुञ्चन्ती कुसुमविशिखान् दक्प्रभाव[1][र्ण][1]तोऽभूत्
*रक्ताक्षी द्रागधिप[2][ति][2]वने कीरसंरागतोऽन्या ॥

८३

वीणापाणिः कचविचकिलस्रग्दधा[3][कु][3]न्ददन्ती
सा[4][न्द्र][4]ज्योत्स्ना धवलवसना चन्दनालेपिताङ्गी ।
भास्वन्मुक्ताभरणमिलिता काऽपि चन्द्राभवक्त्रा
वाणी[5][त्वे][5]नं नलिननयनाऽऽलोकय[6][ल्लो][6]कनाथम् ॥

८४

तप्तस्वर्णच्छविमयतनुः सारकाश्मीरलिप्ता
बिभ्राणाब्जं क्षितिपतनयं काञ्चनाञ्चद्दुकूला ।
वि[7][द्यु][7]द्रत्नाभरणकलिता पद्मिनी पद्मवक्त्रा
‡साम्रादन्याश्रितवनरुहाप[8][श्य][8]दा[9][साद्य][9]हर्म्यम् ॥

८५

चक्रद्वन्द्वस्तनयुगवती चारुपीताम्बरश्रीः
स्मेरास्या[10][ब्जा][10] स्फु[11][रित][11]सुरभिभ्राजिता स्वर्णरोचिः ।

---

[1] र्न (ख) * अस्फुटाशयः । [2] रु (ख) [3] तुं (ख) [4] न्द्रा (ख)
[5] नास्ति (ख) [6] न्लो (ख) [7] द्य (ख) ‡ चतुर्थचरणस्य पूर्वार्धस्त्वस्पष्टार्थः ।
[8] स्य (ख) [9] शीत्य (ख) [10] ब्ज (ख) [11] रति (ख)

धृत्वा हस्ते रविमिव कनद्दर्पणं भासमाना
काचित्त[1][स्थौ][1]तमपि दिवसश्रीरिवालोकयन्ती ॥

८६

मध्यो रुग्णस्तनु[2][रि]ह भवेत्पीनवक्षोजभारात्
[3][मन्दं][3] याहीत्यनु[4][र][4]णनतो मेखला किङ्किणीनाम् ।
वक्तीवाग्रे विपुलकवरी स्वीयभारातिभीत्या
मुञ्चन्तीव प्रसवनिवहं भाति शीघ्रं हि यान्त्याः ॥

८७

स्रस्तं हस्तात्कुचकलश[5][योश्ची][5]नचेलाचला[6][न्तं][6]
[7][वि][7]न्यस्यांसे गलितकब[8][रीं][8] क्षिप्रमालम्ब्य कण्ठे ।
कर्णाभ्यर्णप्रचलमलकं स्वाङ्गुलीभिर्विनीय
स्थित्वाऽपश्यद्विकचनयना कापि ह[9][र्म्ये][9] नरेन्द्रम् ॥

८८

[10][मूर्धो][10]पान्तस्फटिकरुचिमत्सौधजालान्तरेषु
श्रेणी त्रस्यन्मृगशिशुदृशां दीप्तवक्त्राम्बुजानाम् ।

---

1 स्थे (ख) 2 रु (ख) 3 मंदं (ख) 4 गु (ख) 5 या ची (ख)
6 न्त (ख) 7 न्वि (ख) 8 री (ख) 9 र्मे (ख) 10 मार्दो (ख)

बद्धादर्शावलिरिव तदा दीर्घलोलत्कटा[1][क्षै-][1]
रावद्धेव स्फुटहरिमणिप्रोल्लसत्तोरणश्रीः ॥

८९

[2][कोटीरा][2]श्चन्मणिरुचिलस[3][त्सा][3]न्ध्यरागांशुभिन्नं
स्मेरज्योत्स्नापरिणतमुरोहारतारालियुक्तम् ।
इन्दोर्बिम्बं नृपमुखमभूत् अन्यथा दृक्चकोराः
पीत्वा तृप्ताः कथमिह तथा स्युः पुरस्त्रीव्रजस्य ॥

९०

राजानं तं द्रष्टुमाशंसनी[4][यं][4]
प्राक्पश्यन्त्या शंसितं प्राणसख्या ।
सौन्दर्याङ्कं सा च 'सोमप्रभाख्या'
सौधे स्थित्वाऽपश्यदालोलनेत्रा ॥

९१

तेजोभाजो[5][श्चक्षुषो][5]श्चाभि[6][षेकैः][6]
प्राक्सौरभ्यभ्रान्तभृङ्गीसुगीतैः ।

---

[1] क्षे (ख) [2] कोचिरा (ख) [3] त्स (ख) [4] या (ख) [5] चक्षुष (ख)
[6] षक्ष (ख)

श्वेतच्छत्रं यच्छतीवास्य रेजे
सा लीलाब्जात्कामसाम्राज्यलक्ष्मी[1][:][1] ॥

९२

साङ्गोऽनङ्गः किं मृगा[2][ङ्कोऽ][2]कलङ्कः
सूरोऽक्रूरो वृत्रहाऽगोत्र[3][हा][3]री ।
कृष्णोऽकृ[4][ष्णो कोऽपि नेत्येक][4]रत्या
कान्ताऽऽक्रान्ता शङ्कया तं ददर्श ॥

९३

स्विद्यद्वक्त्रा कम्पमानोरुयुग्मा
विस्पन्दाङ्गा सोष्मनिश्वासवेगा ।
*ताम्यन्नेत्रा कण्ठकाञ्चन्नात्मपो (?)
बालाऽभूत्सा दर्शना[5][त्त][5]स्य राज्ञः ॥

९४

†आरुह्यैनं हृद्यसौधे निवासी
तस्थौ क्ष्मापं चित्तिकोपादिवैनाम् ।

---

[1] नास्ति (ख) [2] ङ्कः (ख) [3] का (ख) [4] ष्णोंगोपिनेत्यक्त (ख)
* तृतीयचरणोत्तरभागस्त्वस्फुटः । [5] त (ख) † अस्फुटार्थः

कान्ताकन्तुस्तद्दयामास बाणैः
तीक्ष्णैस्ता[पं] प्राप सा तैरमन्दम्* ॥

९५

यो[1][द्धाऽ][1]नङ्गः कौसुमस्तस्य बाणः
तेनावि[2][द्धस्त][2]स्कर[3][श्छ][3]न्न [4][आ][4]सीत् ।
गाढस्थूलोरोजशैलान्तर[5][स्थः][5]
नैत[6][च्चि][6]त्रं *यद्विधौ क्रुद्धमारे (?) ॥

९६

[1]स्नेहात्सिद्धं तन्मनः कामवाही
स्फारज्वाला दीपमासीत् त्ततस्याः ।
सोष्मश्वासा वातपातात् विलीना
पद्मं प्राप प्रालिता चाब्दशोभाम्[1] ॥

९७

ज्योत्स्नामायाभस्म कायेऽव[7][की][7]र्य
क्षिप्रं धैर्यद्रव्यमस्यास्समग्रम् ।

---

[1] घा (ख) [2] विंदं (ख) [3] श्चि (ख) [4] मा (ख) [5] स्थं (ख)
[6] च (ख) * तुरीयचरणोत्तरभागस्त्वस्पष्टार्थः । * अस्फुटाशयः [7] रे (ख)

स्वान्तस्था[1][यी][1] प्रापयन् पारवश्यं
मारश्चोरोऽदृश्यमू[1][र्तिर्जं][1]हार ॥

९८.

तां पश्यन्तीं निर्निमेषात्कटाक्षान्
सौधस्याग्रे स्वाङ्ग[3][मेवातिरे(?)][3]कात् ।
साक्षाल्लक्ष्मीमञ्जसं[4][स्थां विलज्जो
वी][4]क्षन्नासीत्सोऽपि साश्चर्यचेताः ॥

९९

*तस्याः पदान्यवनपि निनयेवं
प्रेम्णाभिवीक्षिततुरङ्गवशीकृतस्य ।
व्याजहृदस्य निभृतं परितो मनोज्ञाः
ते मानसञ्च पथि चोलमहीधरस्य* ॥

१००

नासा[5][ग्र][5]मौक्तिकलसन्मणिरोहि[6][णीं][6] तां
आलिङ्ग्य वक्रशशिना [7]तरसा [8][वि][8]सृष्टा ।

---

[1] र्थि (ख) [2] र्तीज (ख) [3] मीरेकती (ख) [4] स्थापि लज्जैर्वि (ख)
* अस्फुटार्थः । [5] न्तर्गत (ख) [6] णी (क) [7] शि (क) [8] दि (क)

ताराव[1]ली[1]व विरहात्पदपल्लवस्था
रेजुः पदाम्बुजनखास्तर[2]ले[2] क्षणायाः ॥

१०१

कान्ता[3][मुखेन्दुनिभृतोद्गतमन्दहास-
पीयूषनिर्झरकणाः कुचशैलपातात्][3] ।
कीर्णाः पतन्त इव पल्लविने विरेजुः
[4][अङ्घ्यङ्गुली][4]स्फुरितचारुनखास्तरु[5][ण्याः][5] ॥

१०२

पादैकदेशरुचिसाम्यत[6]ए[6]व तस्याः
स्यात्पल्लवाह्वययुतस्तरु[7]णः[7] प्रवा[8](लः ।
म्लानत्वमाप विजितं नलिनञ्च तेन
[9][का][9]न्त्या [10][त][10]योस्तदुपमानक[11][था][11] कथं वा[8])॥

१०३

श्लक्ष्णोरुकान्तिविजिताब्ज[12][दृशो][12] वनान्तं
रम्भाऽधिगम्य परिनम्रतया ह्रियेव ।

---

[1] ली (क) [2] णे (ख) [3] अयं भागः (क) पुस्तके लुप्तः । [4] रुद्रांगुली (क) रंघ्रांगुरि (ख) [5] ण्यः (ख) [6] ये (ख) [7] ण (क) [8] अयं भागः लुप्तः(क) [9] क (ख) [10] स्त (ख) [11] थं (ख) [12] विशो (क ख)

आधारबन्धपयसि प्रतिबिम्बिताङ्ग-
व्याजान्म[1]मज्ज[1] सुचिरं (मुकुलीकृ[2][तास्या][2]) ॥

१०४

(कुम्भीन्द्रकुम्भनिभतुङ्गनितम्बबि[3][म्बं][3]
[4][वे][4]णीम)मुन्मिलितमिन्दुनिभाननायाः ।
भास्वत्कलिन्दतनयान्वितसैकतस्य
शोभां बभार नवयौवनभूषिता[5][ङ्ग्याः][5] ॥

१०५

लोके रिपूनभिभवन्ति समृ([6][द्धि][6]भाजः
कार्श्येन वाऽपि तनु[7][मध्य][7]लता मृगा[8][क्ष्याः][8] ।
प्रायो मृगे)न्द्रमजयत्किल सोऽ[9]प्यु[9]पेत्य
लज्जाभरेण गिरिगह्वरमाविवेश ॥

१०६

श्लक्ष्णोऽचलो भवति दूरत एव [10][दृष्टः][10]
[11][ह्य][11]स्पर्श एव नितरां करिकुम्भ एषः ।

---

[1] नज्ञ (ख) ( ) एतच्चिह्नाङ्कितभागः (क)पुस्तके लुप्तः । [2] तस्य (ख)
( ) अयं भागः क पुस्तके लुप्तः । [3] म्ब (क ख) [4] मे (क ख) [5] ङ्गयः (क ख(
( ) लुप्तभागः क पुस्तके । द्ध (ख) [7] बद्ध (ख) [8] क्ष्यः (ख)
[9] प्य (क) [10] दृष्टे (क ख) [11] र (क) प्र (ख)

वा[1][रि][1]क्रमा[2][द्द][2]लितसैकतमप्यतो[3][ऽस्याः
सा][3]म्यं भजेत जघनस्य कथं मृगा[4][क्ष्याः][4] ॥

१०७

अस्य[5][र्च्य][5] हा[6][रि][6]सुममालिकयाङ्गजेन
वक्षोजलिङ्गमनुलिप्य च चन्दनेन ।
विन्यस्तनाभिवसुपात्रजधूपधूम-
(रे[7][खे][7]व रोमलतिका सुदृशश्चकासे ॥

१०८

लावण्यवारिपरि)पूर्णसरो हि नाभिः
त[8][न्निर्नि][8]मग्नमदनेभकिशोरकस्य ।
शुण्डेव रोमलतिका लसति [9][ग्र][9]हीतुं
ऊर्ध्वो[10][द्धृता][10] स्तनसरोरुहकोशम[11][स्याः][11] ॥

१०९

हारामलद्यु(तिसुधारसपातुकामः
कृष्णोऽहिशाव इव रोमलता बभासे) ।

---

[1] ध्यो (क) र्यं (ख) [2] द (क ख) [3] सा सा (क ख) [4] क्ष्यः (ग)
[5] र्चे (क ख) [6] र (क ख) ( ) लुप्तभागः क पुस्तके । [7] जे (ख)
[8] न्वीनि (क) [9] गृ (क ख) [10] द्ध (क ख) [11] स्य (ख) () लुप्तभागः (क)

तन्नाभिरन्ध्ररयनिर्गमितः फणाग्र-
र[1]त्न[1]श्रियं तरलरत्नमवाप यस्य

११०

माभूदितः पर[2]मती[2]व कृशत्वम[3]स्याः[3]
म[4][ध्य][4]स्य चेति विकचोद्गमरेणुभू[5][त्या][5]।
(हारांशुरञ्जितवलित्रयमुत्पला[6][क्ष्याः][6]
रेखात्र[7][यं कृ][7]तमिवाङ्गभुवा व)भासे ॥

१११

कान्ताव[8]लि[8]त्रयसमानतरङ्गरेखां
उत्पादयाम्यहमिति त्रिदिवा[9]प[9]गायाः।
पू[10]र्वो[10]र्मिकाः परमि[11]माः[11] समतां न यान्ति
तेनेति ताः पु(नरहो क्षपयत्यजस्रम् ॥

११२

लावण्यवार्भवमृणालविलासम[12][स्याः][12])
धत्ते भुजद्वयमुदग्रकरप्रवालः।

---

[1] त्वं (व) [2] वशी (ख) [3] म्या (ग्व) [4] ध्या (ख) [5] ता (क) त्या (ख)
() लुप्तभागः (क) [6] क्ष्यः (ख) [7] याक्र (ख) [8] लि (क) [9] स (क)
[10] तो (ख) [11] मां (ख) () लुप्तभागः (क) [12] स्या (ख)

तस्याग्र [1]ए[1]व जनिताऽरुणपद्मशोभां
अङ्गीचकार चपलायतलोचनायाः ॥

११३

चेतो वि[2]भेत्तु[2]म[3]न[3]लं यमिनामसा(वि-
त्याम्रप्रवालविशिखस्य मनोभवेन ।
अग्रे निबद्धसित[4][कै][4]तकबर्हगर्वै
का)न्ताकराग्रनखरः सुतरां जहा[5][र][5] ॥

११४

का[6][मे][6]न भीमनिटिलेक्षणवह्निपात-
भीत्या समेत्य हृदयालयमाश्रितेन ।
न्य[7]स्तौ[7] बहिस्सलिलपूर्णसुवर्णकु[8][म्भौ][8]
(मन्ये कु[9]चौ[9] कलितकान्तिमुचा मृगा[10][क्ष्याः][10] ॥

११५

चेलाञ्चलोज्ज्वलप[11][टः][11]) स्तन[12]कुम्भरम्य[12]-
रोमालिदण्डकलितः कलशध्वजोऽयम् ।

---

[1] ये (क) [2] जेतु (ख) [3] व (ख) () लुप्तभागः (क) [4] रै (रव)
[5] व (क) वः (रव) [6] ये (रव) [7] स्थौ (रव) [8] भ (क) भो (रव)
( ) लुप्तभागः (क) [9] चा (रव) [10] क्ष्यः (रव) [11] तेः (रव) [12] बद्धकुम्भ (क)

द्रोणं विजित्य धनुरागमकौशलेन
व्या[1]कृष्ट[1]तद्ध्वज इवाङ्गभुवा बभासे ॥

११६

अब्जाभिधा तव [2]म[2](मापि सरोरुहस्य
वैरं त्यजाननविधो [3][स्वसु][3]रालयेऽस्मिन् ।
तस्मात्त्व[4][मि][4]त्यधि[5][वहन्नि][5])व कम्बुरेनं
प्रे[6]म्णा[6] रराज रजनीशमुखीसुकण्ठः ॥

११७

[7]तातोऽ[7]ग्रहीत्स्वकमुखानिलतो [8]ध्वन[8]न्तं
शङ्खं मुकुन्द इति तज्जल(जं विहस्य ।
गायन्निव स्वयमुदारसुवर्णशङ्खः
सम्पा)दितोऽङ्गजनुषा सुमुखीसुकण्ठः ॥

११८

यद्वक्त्रमण्डलविनिर्जितमेत्य भीत्या
पद्मं पयः प्रचुरभङ्गमुदीक्ष्य जातम् ।

---

1 क्रष्टु (ख) 2 व (ख) () लुप्तभागः (क) 3 स्यसु (ख) 4 म (ख)
5 कवन्हि (ख) 6 म्णो (क) 7 कान्तो (ख) 8 द्वनान्तं (ख) () लुप्तभागः (क)

राकाशशाङ्क(मपि तन्मुखबिम्बशङ्कि
सङ्कोचमावहति साध्वसतो स्म)[1][ण्याः][1] ॥

११९

पद्मं जडाशय[2]क[2]मेवमुरस्थल[3]श्च
दोषावभासि वनमालिहरेः कल[4]ङ्की[4] ।
चन्द्रस्सदे[5]ति[5] परिहाय तदानना[6]ब्जे[6]
निर्दो(षसुन्दरतरे लसति स्म लक्ष्मीः ॥

१२०

स्वान्तस्सुधांशुरु)चिपूर्णमलिप्रयुक्तं
भूत्वा विकासि निशि कैरवमम्बुजा[7]क्ष्याः[7] ।
चक्षु[8]र्निभ[8]त्वमधिगन्तुमथाप्यशक्तं
सङ्कोचमुद्वहति त[9]च्च[9] दिवा ह्रियेव ॥

१२१

ताट(ङ्करत्नरुचिवागुरया निबद्धं
उत्सर्पि पक्षपुटपक्ष्मराल [10][केश्याः][10]

) लुप्तभागः (क) [1] ण्यः (ख) [2] म (ख) [3] ल (क) [4] ङ्का (क)
[5] पि (क) [6] ब्धि (ख) ( ) लुप्तभागः (क) [7] क्ष्यः (ख) [8] निर्भ (ख)
[9] स्य (ख) () लुप्तभागः (क) [10] कैश्यः (ख)

चञ्चद्विलोचनचकोरयुगं रराज
कन्दर्पधीवरनिबद्धमिवाननाब्जे ।

१२२

भ्रूकार्मुकं नयनतीक्ष्णशरं निधाय
ताटङ्करत्नरुचिदीप[1]युताऽऽ[1]स्यपीठे ।
(पूजार्थचम्पकमिवार्पि[2][त][2]मङ्गजेन
तन्नासिकामुकुळमुज्ज्वलतां व)भार ॥

१२३

लावण्यवाप्कृतविधिस्नपनेन त[3]स्याः[3]
कामेन चर्वि[4][तु][4]मिवाननपात्रमध्ये ।
निक्षिप्तनिम्बदलमाददृशे युगादौ
‡ तद्भ्रूर्दृशोरधिरुचाऽधिग[5][ता][5] प्रश[6][स्तिम्][6] ॥

१२४

(निश्वासमन्दमरुदूदितमञ्जुलास्य-
लावण्यवारि[7][भ[7]]ववीचिरिवा)रराज ।

---

[1] मुपा (ख) () लुप्तभागः (क) [2] नास्ति (ख) [3] स्य (क) [4] त (क ख) ‡ अत्र इवेति पदस्यावश्यकत्वात् 'तद्भ्रूर्दृशोरिवरुचाधिगता प्रशस्तिम्' इति स्यात् । [5] ते (क. ख) [6] स्तं (क.ख) () लुप्तभागः (क) [7] द्द (ख)

भ्रूवल्लरीप्रचुरप[1]क्ष्म[1]रुचिप्रयु[2][क्ता][2]

नम्राय[3]ताति[3]कुटिला नळिनेक्षणायाः ॥

१२५

कस्तूरिकामकरिकाकलितं कपो[4]लं[4]

राकेन्दुसन्निभमपाकुरुतेऽङ्गजस्य ।

सर्वा[5]ङ्गकं[5] प्रतिफलान्वितदर्पणस्य

शोभाञ्च काञ्चनलताञ्चितकोमला[6]ङ्ग्याः[6] ॥

१२६

सन्ध्यारुणैन्दववपुर्भुवि रत्नबीजं

ज्यो[7][त्स्नां] निषि[7]च्य घुसृणाम्बु य[8]दि प्र[8]यत्नात् ।

संवर्धितारुणलता[9]सु फलं प्रसूते[9]

त[10]स्या[10]स्त[11][दै][11]व तुलयेदधरं मृगा[12]क्ष्याः[12]॥

१२७

तन्नासिकामुकुलचम्पकदण्डलग्नः

फालः सुपर्वविजयाय मनोभवेन ।

---

[1] क्ष (ख) [2] क्ता (क) क्तं (ख) [3] कांत्ति (ख) [4] ल (क·ख) [5] ङ्ग (ख)
[6] ङ्गयः (ख) [7] त्स्नानिषि (क) ब्यासानिहो (ख) [8] दीव (ख) [9] तृ फलितं
सुतेव (ख) [10] स्यो (ख) [11] दे (क·ख) [12] क्ष्यः (ख)

भ्रूचापसंहित इवा[1]र्धे[1] शशाङ्कबाणः
सम्भाव्यते जितनरोरगसङ्कुले[2]न[2] ॥

१२८

[3][यं][3]जीवयन्तमधरे मदनं पुरारि-
[4]प्लुष्टं[4] सुधारसममर्त्यश्रुति प्रसिद्धम् ।
निक्षिप्तवान्वि[5][धिरधीरदृशस्ततस्त
प्रा][5]हुर्बुधा नवसुधारस इत्यमु[6]ष्याः[6] ॥

१२९

वक्त्राम्बुजेन निगृहीत[7][मिवेन्दु][7]खण्डं
फालो विभाति समयोऽयमिति प्रकोपात् ।
भूयस्तदा[8]वृ[8]तमिवान्धतमस्तरु[9]ण्याः[9]
संलक्ष्य[10][ते][10] भ्रम[11]रको[11] भ्रम[12]रौघ[12]नीलः ॥

१३०

आरुह्य दिव्यतनुचन्दनचारु[13]शाखां[13]
आलेढुमाननविधुं नयने निरीक्ष्य ।

---

[1] र्थं (ख) [2] व (ख) [3] ये (क ख) [4] पुष्पं (ख) [5] धिरसारदृशस्तत स्तत्प्रा (क) न्विररधीरदृशस्ततस्त प्रा (ख) [6] ष्य (ख) [7] मुखेन्दु (क ख) [8] व (ख) [9] ण्यः (ख) [10] ति (क ख) [11] कृतो (क) [12] मेघ (क) [13] शोभा (ख)

★

+ सारङ्गलोचनधिया [1]भय[1]तस्स्थितेव
: वेणीसिताहिवनितासुदृशश्चकासे ॥

१३१

स्वर्भानुभीतिविधुरो विधुरङ्गनाया
जातो मुखाकृति[2][रु][2]पेत्य [3]भु[3]वं तथाऽपि ।
वेणीमि[4]पा[4]त्स पुनराक्रमते हि ह[5]न्त[5]
+बु[6]द्धयप्रतीतिवि[6]हतं प्रविलङ्घते कः ॥

१३२

वक्त्रश्रिया मृदुगतेन जिताब्जहंसौ
तादृङ्मनोज्ञरुचिमन्दग[7][ती][7]च लब्धुम् ।
धातुस्सुखासनसुवाहनतामुपे[8][तौ]
[ना][8]द्यापि साधु भज[9]तस्सम[तां][9] रम[10][ण्याः][10] ॥

१३३

सा भाति [11]सोज्ज्वलकला[11] शशिमण्डलीव
धात्रीव मञ्जु[12][ल][12]कुचा नवनन्दनस्य ।

---

[1] भवय (ख) ++ सारङ्गलोचनधिया, सिताहिवनिता इतिपदद्वयमस्फुटं [2] मु (क ख) [3] भ (ख) [4] ल (ख) [5] न्त्या (क) [6] ध्यात्र ती विनिहतं. (ख) + तुरीयचरणस्त्वस्फुटाशयः । [7] तिं (क ख) [8] ताव (क ख) [9] तस्समरं (क) ते समरं (ख) [10] ण्यः (ख) [11] सज्जलकया (ख) [12] ल (क ख)

काष्ठेव कुम्भजघन[1][स्थिति][1]रर्कजस्य
रम्भोरुविभ्रमवती बलभित्सभेव ॥

१३४

सञ्जातरूपविभवाऽप्यवलग्नकार्श्या
चञ्चत्पयोधरयुताऽपि चिरप्रभाङ्गा ।
भूभृन्नितम्बरुचिराऽ[2]प्यधरा[2]त्तरागा
लावण्यसार[3]स[3]हिताऽपि सुधारु[4]चि[4]श्रीः ॥

१३५

चक्रं कुचे दृशि शरान् भ्रुवि चापम[5]श्वान्[5]
वाण्यां निधाय मदनः+ [6]स्न[6]पितावनूनम् ।
स्त्रीरूपमेतदुररीकृतवान्विये [7]स्यात्[7]
काप्यन्यथा वरकथा मृदुतश्शरस्स्यात्+ ॥

१३६

मुक्ताफलै[8]श्च[8] दशनैश्शशिनाऽऽननेन
कण्ठेन रम्यजलजेन[9]च[9]विद्रुमेण ।

---

[1] स्थलि (क) स्थित (ख) [2] प्यथदत्त (ख) [3] नि (ख) [4] ण (ख) [5] श्वां (ख)
[6] प्र (क) [7] सा (क) + अस्पष्टः । [8] र्वि (ख) [9] न (ख)

दन्तच्छदेन सह तै[1]रुप[1]शोभमाना
लक्ष्मीर्ध्रुवं पुनरियं जगति प्रसन्ना ॥

१३७

पादाब्जेऽस्याः सञ्चरन्नूरुरम्भा-
स्तम्भा[2]लम्बात्त[2]त्कटाक्षद्विरेफः ।
प्रा[3]प्यो[3]रोजाम्भोजकोशं प्रसन्नः
[4]श्रान्तः[4] का[5]न्ताऽऽ[5]स्याब्जसारे ममज्ज ॥

१३८

निर्मायैनामात्मभूर्वैजयन्तीं
तेजोद्रव्यैर्विद्युदाद्यैर्विधाता ।
[6][सृष्टेः][6]स्पष्टं सद्यशः स्वस्य[7][चक्रे][7]
+ [8]दोर्द्रं प्राञ्चावार्य[8]मन्दोद्भवस्य ॥

१३९

+ गूढाविष्णो[9][र्व][9]क्षसि श्री[10][र्नि][10]रीक्ष्य
विद्रोपेता सारसौन्दर्यमस्याः ।

---

[1] रम (ख) [2] याम्भःस्त (ख) [3] त्पो (ख) [4] शांत्रः (क ख) [5] न्त (ख)
[6] सृष्टि (ख) [7] चुन्नि (क) चक्री (ख) [8] द्रोंर्दंषांचावार्या (क) + अस्पष्टार्थः ॥
[9] व (ख) [10] नि (ख)

वक्त्रस्थायी योन्विधेर्माधेयद्दश्या

................मीनकेतः ॥

१४०

\+ [1][भ्रू][1]विक्षेपे पौष्पचापीश्वरोपं

नस्यंतस्यात्रीक्षणे संक्षणोऽयम् ।

मृत्केषु स्यात्तत्क्षणं चानुयायी

मायी मारस्तद्विधेयोहयमुष्याः ॥

१४१

कन्तु[2]र्जिष्णु[2]र्जिष्णु[3]चा[3]पं कला[4]पः[4]

प्रांशुर्विद्युत्तद्दृशः कान्तिरस्याः ।

लावण्या[5]म्भः[5]पूर्णकादम्बिनीयं

चेतोऽग्निं [6][सन्दी][6]पयत्यत्र चित्रम् ॥

१४२

इत्यात्मन्यालोच्य तां पूर्णशोभां

नि[7]ष्प[7]न्दाक्षीं वीक्ष्य भूयोऽनुरागात् ।

\+ असमग्रः अस्पष्टश्च । [1] भ्रू (क ख) +अस्फुटः । [2] र्विष्णो (ख) [3] शा (क) [4] प (क) [5] भः (ख) [6] दी (क ख) [7] स्प (क)

तीक्ष्णैरस्त्रैर्दर्पकस्य प्रजेशः

[1]छिन्न[1]स्वान्तोऽभूत्स्वयं वि[2]स्मृ[2]ताङ्गः ॥

१४३

वक्षःपातिस्फारने[3]त्र[3]त्रिभागात्

एतैस्तस्यास्सोऽपि पुष्पेषुमुक्तैः ।

नीलाम्भोजाशोकमल्लीसुमास्त्रै-

राविद्धोऽभू[4]द्द्रा[4]गिवापातितापम् ॥

१४४

+कीर्णञ्चेतस्त[5]द्वि[5]निर्या[6]त्म[6]धैर्यात्

मन्दं धीरोदात्तवर्यः क्षितीशः ।

चक्षुर्मार्गं त[7]त्र[7] निस्तीर्य त[8]स्मिन्[8]

+................................ ॥

१४५

+...................सत्क्रिया[9]वद्व[9]धूभिः

व्याप्ते सौधे [10]दि[10]व्यवस्तूप[11]धा[11]भिः

---

[1] दीन (क) [2] स्तृ (क) [3] त्रा (क) [4] द्रा (क ख) [5] द्दि (ख) [6] त (क)
[7] त्य (ख) [8] स्याः (क) [9] वत व (ख) [10] दिं (ख) [11] द (ख)

श्रृण्वन् गानं साधु नृत्यञ्च पश्यन्
त[1][स्थौ][1] कुर्वन् भर्गपूजां महीशः ॥

१४६

अथ विपुळमनोजज्वालकीलाभितप्तां
वपुरुपगतमूर्छां पल्लवान्दोलि[2][कां ताम्][2] ।
किसलयमृदुशय्यां मन्दमावेश्य सख्यः
शिशिरवननिवेशं निन्युरेनां विषण्णाः ॥

१४७

मदनदहनतापापोहनार्थं[3][तदा][3]ल्यः
कुसुममृदु[4]ळ[4]तल्पं क्षिप्रमानीय बालाम्
हिममलयजमिश्रैर्वार्भि[5]रासिच्य[5] [6]वीज्य (?)[6]
क्षयितुमपि[7][हि][7]नालं [8]वी[8]जनैस्तापमुग्रम् ॥

१४८

उर्वीश्वरोऽपि [9]पर[9]भावनयाऽनुबद्धः
सौन्दर्यशोभि[10][सु][10]दृशो हृदि तीव्रतापः ।

---

[1] स्थे (क ख) ++ पदद्वयमप्यसमग्रं अस्फुटार्थं च [2] काथां (ख) () लुप्तभागः (क) [3] प्रवा (क ख) [4] च (ख) [5] रभ्यर्च्य (क) [6] वीज्य (क ख) [7] नास्ति (क) वि (ख) [8] बी (ख) [9] स स (क) [10] स (क ख)

सन्तापमाप शरकल्पितमङ्गजस्य
शैलात्मजापतिपदाम्बुजमत्तभृङ्गः ॥

इति सकलभुवनैकवल्लभनिखिललेखनायकनिकायसन्ततसमर्चित-
परम'शिवलिङ्ग'पादारविन्दषट्पदायमानलसदुभयकविता-
विशारद'श्रीषडक्षरिदेव'विरचिते 'चोलभूपालीये'
'कविकर्णरसायनाख्ये' महाकाव्ये सोमप्रभा-
सुंन्दरचोलयोः विरहवर्णनं
नाम पञ्चमस्सर्गः ॥

षष्ठस्सर्गः

१

हृत्पयोजज[1]नुषा[1]स्मराग्निना
तप्तपीवरकुचौ मृगीदृशः ।
सान्द्रकुङ्कुमविलि[2]प्त[2]गैरि[3]कौ[3]
दावदग्धकुधराविव स्थितौ ॥

२

याति नैल्यमतनुज्वलोष्मणा
पल्लवास्तरण[4][मेव साऽनिशम्][4]
[5][तो][5]यदाग्रगतविद्युतश्श्रियं
प्राप तप्तकनकोज्ज्वलप्रभा ॥

३

दर्पकोग्रशरपातसाध्वसात्
[तो]†यभृत्कवचधारिणीव सा ।

---

[1] निता (ख) [2] प्ति (ख) [3] का (ख) [4] वशवशनि (क) सावशानि (ख)
[5] नास्ति (ख) † तो (क ख)

[1]कर्द[1]मेन तनुतापकार्ण्यभृ-
चन्दनस्य दद[2]शेऽ[2]म्बुजेक्षणा ॥

४

दुस्सहा[3]स[3]मशरा[4]ग्नि[4]तापिनी
[5]सोष्म[णः]श्व[5]सितसन्निपा[6][त][6]तः ।
नीलिमानम[7]ल[7]यः [8][पिकाश्च ते[8]]
प्रापुरन्तिकगतास्तदाऽद्र[9]वन्[9] ॥

५

बाष्पवारिसरिदाननेन्दुना
सम्भवा कुचकुभृद्युगादधः
निर्ययौ मिलितरोमवल्लरी
शैवलाव[10]लि[10]तरङ्गसङ्गता ॥

६

दीप्यमानहिमचूर्णवद्वपुः
प्राप[11]ता[11]पशिखिनैव सुभ्रुवः ।

---

[1] कुर्व (ख) [2] शा (ख) [3] सु (क) [4] ग्नि (ख) [5] शोषणस्व (ख) [6] ति (क ख)
[7] ल (ख) [8] पिकाशके (क), विकाशते (ख) [9] वं (ख) [10] लि (ख)
[11] ला (क)

कायजार्क[1]जनि[1]तस्फुलिङ्गभा[2]क्[2]
प्रोज्ज्व[3]ल[3]द्दिनकरोपलोपमाम् ॥

७

निष्पतद्ब[4]हु[4]लबाष्पवारिभिः
क्षाल्यमान इव निर्ग[5]तस्त[5]दा
स्वाप एव द[6][ल]वीजना[निलैः]
वा[रितेव][6]गलि[7]ता[7]स्मितद्युतिः ॥

८

पद्मकुट्म[8]ल[8]मराजत स्तन-
[9]स्था[9]यि भे[10]तु[10]मनलं कुचाचलम्
कुण्ठितास्त्रमिव[11]चित्त[11]जन्मनः
कि[12][ञ्चिदग्र][12]दलितं नतभ्रुवः ॥

९

सो[13]ष्म[13]निश्वसितजातकार्ष्ण्यभृ-
न्नासिकाभरणमौक्तिकं बभौ

---

[1] स्फुरि (ख) [2] नास्ति (ख) [3] लो (ख) [4] ह (ख) [5] तात (ख)
[6] लिनी जनानिद्दिस्र्वांवितीव (क) लिवी जनानितिर्वांदितीव (ख) [7] त (ख)
[8] द्दल (ख) [9] स्ता (ख) [10] तु (ख) [11] चेत (ख) [12] ञ्चिदुद्र (क)
दुर्ग (ख) [13] ष्ण (ख)

घ्राणचम्पककपतत्प्रवर्धि[1]तः
ष[1]ट्पदार्भकइवाङ्गनाम[2]णेः[2] ॥

१०

कण्ठलम्बितमृणालमालिका
नीलतामुपगता स्मराग्निना ।
पातुमेतदसुमारुतं [3]बलात्[3]
कामकालफणवानिवावृतः

११

स्वांश[4]जी[4]वमरुतः प्रतापना[5]त्
मन्[5]द एष म[6][धु(?)][6]राश्रयं स्वकम् ।
मानसं ददति शम्बरार्दनः
सोऽपि मन्द[7]इ[7]ति किं न भण्यते ॥

१२

[8]वर्ष[8]सिक्तमधुराम्बुलिप्सया
पातुमाग[9]त[9] इहैव बाडबः ।

---

[1] तप्र (क) [2] णिः (क) [3] प्रिये (ख) [4] जा (क) [5] जी (ख) [6] दुदा (क)
[7] दु (ख) [8] य (क) [9] धर्म (ख) [10] नास्ति (ख)

स्यादयं स्मर[1]शिखी[1] न चेत्स्वयं
वारितोऽपि न कथं प्रशा[2]म्य[2]ति ॥

१३

साञ्जनाश्रुजलधारया कुच-
द्वन्द्वमध्यगतया परिप्लुता ।
भाति रोमलतिकाऽसि[3]ताहिना[3]
ग्रस्तबालभुजगीव सुभ्रुवः ॥

१४

निर्गलन्नयनवारिवाहिनी
शै[4]व[4]लत्वमगमन्मृगीदृशः ।
पाण्डुगण्डत[5]ल[5]लग्नकुन्तलं
चन्द्रमध्यगतलक्ष्मस[6]न्निभम् ॥

१५

तप्तचन्दनरजांसि रेजिरे
कामिनीतनुलतावृतान्यहो ।

---

[1] सिजे (ख) [2] स्य (ख) [3] हिमना (क) [4] त (ख) [5] नास्ति (ख)
[6] म्भवम् (क)

दर्पकग्रहनिवारणोचिता
भस्मरेणव इवालिभिः कृताः ।

१६

सोष्मनिश्वसितगन्धलोभतः
प्राप्य[1]द[ग्ध][1]मधुभृन्नतभ्रुवः ।
नासिकामुकुलशङ्कया पुनः
चम्पकस्य मुकुलं त्यजत्यहो ॥

१७

बालिका बकुलपुष्पमालिका
ग्रीष्मभानुकरशोपितेव सा ।
दुर्दशामुपगता सखीजनः
प्रेक्ष्य तां बहु विषादमाययौ ॥

१८

तावदात्मगृहिणीं स भूपतिः
प्राह [2][जातरसयुक् नि][2]जालये ।

---

[1] दग्धु (क) धाध्व (ख) परहसन्नि (क) [2] प्रीतिरससन्नि (ख)

चोलभूभृदधुनाऽऽगतो युवा
 'सुन्दरः' सुमुखि बान्धवप्रियः ॥

१९

शक्तिमानन्वययुतो मृडार्चकः
 श्रीमहान्भवति मत्सुतामिमाम् ।
शूलिनोक्तमनुसृत्य साम्प्रतं
 दातुमस्य मनसा समुत्सहे ॥

२०

इत्युदीरितवतस्सुतासखी
 तावदेत्य सविधं प्रणम्य [1]सा[1] ।
[2]साध्व[2]भाषत तदा 'सुभाषिणी'
 तद्दशाम[3]तनु[3]तापदुस्स[4]हाम्[4] ॥

२१

क्षित्यधीश ! दुहिता तवागतं
 चोलभूभुजमलोकयद्यदा ।

---

[1] च (क) [2] ताम (ख) [3] नुप (ख) [4] हा (ख)

सा तदाप्रभृति मारबाधिता
तापमाप बिसकाण्डकोमला ॥

२२

रिक्तकज्जलदृशावलङ्कृते
पल्लवारुणरुचा कुचद्वयम् ।
बाष्पवारिकणराजिरञ्जितं
त्यक्तहारमधुना मृगीदृशः ॥

२३

वाक्कचौघकुचरावनिर्जिताः
कीरचन्द्रकिरथाङ्गकोकिलाः ।
तां तुदन्ति समये समाग[1]ताः
स्वोक्तिभिश्च[1] परिसर्पणस्वनैः ॥

२४

चन्द्रिकाशिखिनि[2]भा[2] विजृम्भिता
चन्दनाद्रि[3]मरुता[3] वियोगिनीम् ।

---

[1] वी सोक्तियेस्य (ख) [2] भां (क) [3] रघुना (क)

दग्धुमत्र यतते सुदुस्सहा
तन्निवर्तनवि[1]धौ[1] करोमि किम् ॥

२५

हृत्पयोजमुखकुण्डसम्भृते
पावके [2]पि[2]कनिनादमन्त्रतः ।
[3][क्षेप्तु][3]मेतदसुहव्य[4][मुद्यतो][4]
हन्त सोमसहितस्स्मरा[5]ध्वरी[5] ॥

२६

लिप्तचन्दनकु[6]चा[6] हिमा(म्बुना
[7][च][7]ञ्चदाम्रदलतल्पशायिनी ।
वीज्य पूग[8][सुम][8]चामरैः सखी–
श्रेणिभिस्समुपचर्य[9][ते][9]हि सा) ॥

२७

चन्दनं न सहते सुधाकरं
न्यक्करोति च मधुं विनिन्दति ।

---

[1] धो (क) [2] नास्ति (ख) [3] क्षिप्तु (क ख) [4] मद्यते (क) मध्यतो (ख)
[5] द्ययं (ख) [6] चे (क ख) ( ) एतच्चिन्हाङ्कितभागः क पुस्तके लुप्तः।
[7] चि (ख) [8] कुसुमौघ (ख) [9] ती (ख)

★

गन्धवाहमपि मन्दमङ्गना
नेहते नहि सरोऽवगाहते ॥

२८

तापहारि सुमपल्लवादिकं
ताप[1]का[1]रि युव[2][तिः][2] स्वयं पुनः ।
दग्धमेव [3][वपुरङ्ग][3]जाग्निना
"भुज्यते हि भुवि चात्मना कृतम्" ॥

२९

मार एव मदनः प्रभञ्जनो
वायुरिन्दु[4]रभ[4]वन्निशाचरः ।
काल एप मधुकाल ईरितः
षट्पदो हि सुदृशः शि[5]ली[5]मुखः ॥

३०

शैशिरोऽयमुपचार[6][ऊ][6]र्जितो
यस्य शान्तिकरणाय कल्पितः ।

---

[1] हा (ख) [2] तिः (क) ति (ख) [3] पुनरङ्ग (क) घनगं (ख) [4] वभ (ख)
[5] ली (क) [6] ये (क ख)

तं प्रवर्धयति वह्निशान्तये
[1]सिञ्चि[1]ताज्यमिव तापमुत्कटम् ॥

३१

हंस एष मृदुया[2]न[2]निर्जितः
तापयत्वयमिमां तु बर्हिणः ।
केशपाशघननिर्वृतः कथं
मत्सखीं प्रति[3][दु][3]नोति चागतः ।

३२

मल्लिकाऽपि कुटिला दृशोर्जलं
सन्तनो[4]तु[4] रजसा स्मितैर्जि[5]ता[5] ।
स्नि[6]ग्ध[6]तामुपगता मुखेन्दुना
किं [7]दु[7]नोति रमणीं कुमुद्वती ॥

३३

मा[8]ल्य[8]गन्धमहितेति माधवो
मा[9][र][9]यत्वयमिमां मनो[10]भवः ।

---

[1] सेचि (क) [2] वि (ख) [3] धु (क ख) [4] ति (ख) [5] तो (ख) [6] क्ष (ख)
[7] धु (ख) [8] घ (ख) [9] न (क ख) [10] भु (ख)

मात्रधिष्ठितमुखाम्बु[1]जां[1] भृशं
मारयत्यहह किं वदाम्यहम् ॥

३४

चन्दनं विषधरैस्समन्वि[2]तं[2]
तापकृद्भवतु गन्धबन्धुरम् ।
चूत[3]ए[3]ष सुमनोभिरन्वितः
[4]खे[4]दयत्यसकृदेतदद्भुतम् ॥

३५

मानसान्तरगतं मनःप्रियं
साऽभिवीक्षितुमिवान्तर[5]क्षि[5]णी ।
भू[6]व[6]रेण्य ! विनिमी[7]ल्य[7] वर्तते
मूर्छिताऽतनुशि[8]खि[8]प्रबाधिता ॥

३६

यावदीश ! चरमां दशां सखी
[9]नैति घोर[9]मदनेषुताडिता ।

---

[1] जं (ख) [2] ता (ख) [3] वे (ख) [4] मे (ख) [5] क्ष (क) [6] नास्ति (ख)
[7] र्य (ख) [8] खा (ख) [9] नेष्यतेर (ख)

तावदेव भवतोचि[1]त[1]क्रिया
चिन्त्यतां तदसुरक्ष[2]णेऽधुना[2] ॥

३७

* " क्षिप्रमेत्य पतिमात्मनस्तदा
तन्निवेद्य सकलं समीरितम् ।
कार्यमस्य रचयन्मनोमुदं
तत्पु[3]रं[3] [4]सचिवराट्[4] जवाद्ययौ ॥

३८

चोलराजपितरं प्रणम्य त-
त्सर्वमेव कथयन्प्र[5]णम्य[5] च ।
[6][प्राप्य साध्वनुमतिं][6] पुन[7]र्ययौ[7]
स्वामिनः परिणयाय तं विभुम् ॥

३९

कार्यमेतदवगम्य तन्मुखात्
तद्गुरुस्सपदि हृ[8]ष्टमा[8]नसः ।

---

[1] तं (ख) [2] णोद्यता (क) [3] रीं (ख) [4] चरो (ख) [5] लभ्य (क) [6] तस्य साध्यममार्तिं (क ख) [7] र्मैया [8] न्मा (क) * इदमत्रावधेयं—चरमानङ्गावस्थां गतायाः सोमप्रयभायाः असुरक्षणोपायः बाणवेगेन पञ्चभिः श्लोकैरत्र साधितः । प्रौढिः चतुर्विधा। तत्र चतुर्थ्याः समासाख्यायाः प्रौढेरुदाहरणरूपोऽयम् । काव्यप्रकाशे— ' पदार्थे वाक्यरचना ' इत्यादिना द्रष्टव्यम् ॥

तत्तथाऽ[1]स्त्वि[1]ति जगाद सम्भ्रमात्
इत्यवोचदधिपं स मन्त्रिराट् ॥

४०

तद्वचश्श्रवणतः प्रसन्नता
वक्रशीतमहसो[2]ऽतिर[2]क्तता ।
य[3][त्तदै][3]व विकचं मनोऽम्बुजं
तस्य चित्रमबलाभिलाषिणः ॥

४१

मान[4][से][4]ऽतिविश[5]दे[5] विराजितः
तद्वचः स्फु[6]टसुधा[6]रसं मुहुः ।
[7]यन्निपीय[7] मुदित[8]स्स[8] कर्ण[9]तो
राजहं[9]स इति किं न साम्प्रतम् ॥ ”

४२

साङ्ककोकनदवाससम्मिल-
द्रक्त[10]म[10]म्बरविहारतत्परः ।

---

[1] स्थि (ख) [2] ररि (ख) [3] यत्तदै (क) यत्तदे (ख) [4] सी (क ख)
[5] ते (क) [6] टाघर (क) [7] यं नियम्य (क) [8] स्व (क) [9] कोलासहा (क)
[10] मा (ख)

पश्चिमाब्धितटमागतस्तदा
राजहंस इव चास्तभास्करः ॥

४३

व्योमविष्णुधृतदी[1]स[1]कौस्तुभः
पश्चिमाद्रिगजवक्त्रदर्पणः ।
वारुणीकरतलारुणाम्बुजं
दृश्यतेऽरुणखरांशुमण्डलम् ॥

४४

सङ्कुचद्दलगलन्मधु[2]स्र[2]व-
द्बाष्पवारिनलिना[3]म्बकान्वि[3]ता ।
पद्मिनी पतिवियोगविह्व[4]ला[4]
रो[5][दि][5]तीव मधुपस्वनैर्बभौ ॥

४५

अम्बुजा[6]क[6]रतरङ्गबिम्बितं
स्वीयमङ्गमवलोक्य चञ्चलम् ।

---

[1] प्ति (ख) [2] स्त (ख) [3] म्बिकाञ्चिता (ख) [4] या (ख) [5] द (ख)
[6] त (क)

कामकम्पितनिजाङ्गनाधिया
तापमाप सुतरां रथाङ्गकः ॥

४६

[1]औ[1]र्वतप्तजलधिं विहाय य-
त्पद्ममाश्रितवती रमा पुनः ।
अद्य भानुविरहाग्निसंवृतं
तद्विमुच्य कुमुदश्च शिश्रिये ॥

४७

पश्चिमाद्रिकुह[2][रे][2] विहारि[3]णो
[यद्रम][3]द्रज इवारुणं वपुः ।
भाति भानुसुभटस्य साम्बरं
सोऽपि धौ[4]तुमिव[4] तद्गतोऽम्बुधिम् ॥

४८

कालरत्नवणिजा नभोमणिं
दत्तमग्र्यमुपगृह्य सिन्धुना ।

---

[1] पू (ख) [2] रुलौ (क) हरौ (ख) [3] णोयग्रमु (क) णौ यन्नम (ख) [4] तम (ख)

नी[1][त्त][1]मौक्तिकततिर्यथा पुनः
तस्य भाति भगणस्त[2]द[2]म्बरे ॥

४९

तारकाकलितबिन्दुजालक-
व्योमदन्तिवरदानवारिभिः ।
व्याप्तमित्यथ जगद्विभाव्यते
दिक्प्रपूर्णतमसा महीयसा ॥

५०

कालशूलिनिटिला[3]ग्नि[3]लोचनं
यामिनीकरतलारुणाम्बुजम् ।
पूर्वभूभृदिभवक्त्रदर्प[4]णो[4]
ल[5]क्ष्य[5]तेऽरुणसुधांशुमण्डलम् ॥

५१

राशिरेव हिमचूर्णस[6]न्त[6]तेः
चन्द्रमा यदि त[था] न चेदयम् ।

---

[1] त (क ख) [2] दा (क) [3] क्ष (ख) [4] णं (ख) [5] क्ष (ख) [6] हृ (ख)

सन्निकृ[1]ष्ट[1]रजनीप्रयोगतः
तस्य रागमयता कथं भवेत् ॥

सारदीधितिरुदा[2]त्त[2]तारकः
स्फारलक्ष्मनवप[3]क्ष्म[3]विभ्र[4]मः[4] ।
व्योम[5] विष्णु[5]नयनश्रियं दधौ
पूरितामृतनिधिः [6]कला[6]निधिः ॥

५३

नाकलोकगमनाय यत्कृतं
रन्ध्रमिन्दुवपुषि स्फुटं विटैः ।
त[7]त्र[7]विष्टमवलोक्य शङ्कते
व्योमकार्ष्ण्यमबुधोऽस्य लाञ्छनम् ॥

५४

व्योमदन्तिदनुजाजिनोल्लस-
त्पक्षरक्षसितचन्द्रिकावृषः ।

---

[1] ष्ण (ख) [2] र (ख) [3] क्ष (ख) [4] माः (ख) [5] केश (ख) [6] ला (क)
[7] त्र (क)

चन्द्रबिम्बककु[1]दा[1]न्वितो बभौ
तारकार[2]ज[2]तकिङ्किणी[3]व्रजः[3] ॥

५५

क्षिप्तवानुरसि मत्सहोदरीं
विष्णुरित्यपि विधुर्निशावधूम् ।
स्वात्मवक्षसि द[4]धन्नि[4]वाबभौ
लक्ष्म[5]णां[5] च जगतां विमोहिनीम् ॥

५६

चालितालिकु[6]ल[6]कर्बुराम्बरो
भेदितोद्धततमः कलिन्दजः ।
शुभ्ररोचिरगम[7]द्धल[7]श्रियं
श्लिष्टकृ[8]ष्ण इव[8] यस्य लाञ्छनम् ॥

५७

जिष्णुभूभृदुदितः कलादिभूः[9]
उर्विजाति[9]सुख[10]दस्सु[10]खाश्रितः ।

---

[1] द (ख) [2] चि (ख) [3] कृतः (क) [4] धावि (ख) [5] णा (ख) [6] ल (क)
[7] ललमे (ख) [8] ष्यति (ख) [9] वींतजात (ख) [10] तस्तु (ख)

रामचन्द्र इव लक्ष्मणान्वितः
चन्द्रमाः कुमुदतारकान्वितः ॥

५८

दु[1]ग्ध[1]सिन्धुरिव भाति चन्द्रिका
शेषतल्प[2]मि[2]व पुष्करा[3]प[3]गा ।
व्योमविष्णुरिव तस्य नाभिजं
पुण्डरीकमिव चन्द्रमण्डलम् ॥

५९

त[4]दुद्भव[4]मिवाङ्गजं शमयितुं प्रभुः पावकं
विधाय विमलैर्जलैः स्नपनमुत्पलान्यर्पयन् ।
विलिप्य हरिचन्दनैर्वि[5]दित[5]धूपदीपादिभिः
यथाविधि जितस्मरं परमपूजयद्धूर्जटिम् ॥

६०

अथ [6]गण[कवरेण्यै][6]र्निश्चयन्साधुलग्नं
दुहितृपरिणयायाहूतबन्धुप्रतानः ।

---

[1] ष्ट (ख) [2] इ (ख) [3] शु (ख) [4] दोद्धत (क) [5] दध (ख) [6] सुगणककीर्णै (क) गणविकरेणै (ख)

स्वनग[1]रम[1]धिशोभं कारयन् [2]केत[2]नाद्यैः
अभवदतिनियुक्तो 'मानकञ्जाररराजः' ॥

६१

कनकचषकमालाक[3]र्णि[3]काराबलीभिः
चलदरुणपताकापल्लवैस्तद्विरेजे ।
[4]वन[4]मिव नवमुक्ताजाल[5]कैश्चैवयुक्तं[5]
पुरमगारिपुरत्नप्रोल्लसच्चञ्चरीकैः ॥

६२

सुरभि[6]सलिल[6]स्नातस्सम्यङ्नवाम्बर[7]संवृ[7]तः
[8][विकचकुमुदोत्कृष्टैर्मु][8]क्ताहारैरलङ्कृतविग्रहः ।
सरससुमनोमालामौ[9]लिः[9] प्रलिप्तहरिचन्दनः
सपदि स युवा रेजे राजा शिवाङ्घ्रिसमर्चकः ॥

६३

मौलौ [10]चका[10]स्ति शिव ! चन्द्रकला[11][जटाग्रे][11]
चिन्तामणिर्वपुषि भास्वति चण्डभानुः ।

---

[1] दरु (ख) [2] कीर्त (ख) [3] र्नि (क ख) [4] नव (ख) [5] कस्यैत्रयुवतः (ख)
[6] सल्ललित (ख) [7] सर्व (ख) [8] कपटकुसुमकुष्टै (क) कपटकुसुदकुष्ठै (ख)
[9] लि (क ख) [10] यतो (ख) [11] ग्रे (क) ग्र (ख)

सञ्जीवनं दृशि यदग्निकुमार[1][कोऽन्ते][1]
तस्माच्च[2][मे][2]व भजतां भवरोगवैद्यः ॥

६४

श्रीकर्णाकृष्टबाणाकृतिमधुरिपुवक्षःस्थलस्थाब्धिकन्या
लीलाब्जेनेव फालज्वलितशिखिशु[3][खैः][3]स्वास्थ्यमुद्दिश्य भर्तुः ।
[4]जुह्वत्येवा[4]ज्यधाराहुतिं[5][म][5]धिकमधुस्यन्दिभिर्यस्य रेजे
सोऽयं पायात्क्षणेन त्रिपुर[6]द[6]नुभवध्वंसक[7]स्त्रयम्बको[7] नः ॥

इति सकलभुवनैकवल्लभनिखिललेखनायकनिकायसन्ततसमर्चित-
परम'शिवलिङ्ग'पादारविन्दषट्पदायमानलसदुभयकविता-
विशारद'श्रीषडक्षरिदेव'विरचिते 'चोलभूपालीये'
'कविकर्णरसायनाख्ये' महाकाव्ये सुन्दरचोल-
सोमप्रभयोः विवाहार्थं विक्रमचोल-
सम्मतिवर्णनं नाम षष्ठस्सर्गः ॥

---

[1] कोंके (क) कान्ते (ख) [2] यो (क) ये (ख) [3] खे (क ख) [4] जिह्वातैला (ख)
[5] य (क ख) [6] घ (ख) [7]शङ्करो (ख)

सप्तमस्सर्गः

१

स्वर्णस्तम्भैश्शशिमणिलसत्कुट्टिमस्थानलब्धैः
विद्युद्द्योतस्फुटपटमिलद्रत्नमालावितानैः ।
मुक्तादामग्रथितविलसत्तोरणैरुत्पता[1]कैः[1]
शोभां धत्ते शुभरुचियुतस्तत्र वैवाहगेहः ॥

२

मुक्तारङ्गैर्मृगमदरसालिप्तनीलाश्मवेदी
व्योमस्थल्याश्श्रियमतनुत स्फारतारान्वितायाः ।
पू[2]र्णः[2]कुम्भः शशिमणिमयोऽलङ्कृतः पुष्पगुच्छैः
तत्रोड्डूनां परि[3]वृ[3]ढ इवाभासते [4]निर्य[4]दंशुः ॥

३

चि[5]त्रं[5] भित्तावपि विदधिरे सारकाश्मीररा[6]गा[6]त्
[7]काश्चिं[7]च्चक्रुः कुसुमविसरैर्मालिकां सम्यगन्याः ।

---

[1] कः (ख) [2] र्णा (ख) [3] बृ (ख) [4] नीय (ख) [5] त्तं (ख) [6] ग (ख)
[7] त्कच्च (ख)

तेनु[1]र्वे[1]द्यास्तरणमपराः काश्चन प्रौढकान्ताः
सन्माङ्गल्यं [2]व्यधु[2]रुपहितप्राज्यवस्तुप्रतानैः ॥

४

दूर्वामाधूकफलतिलकुशाद्राक्षताम्भोजशुक्ति-
श्रीखण्डा[3]द्यै[3]र्दधिमधुसुधालाजगोरोजनाद्यैः ।
चूतद्राक्षालिकुचकदलीसत्फलादर्श[4]शङ्खैः[4]
पूर्णैः कुम्भैर्धवलकुसुमैर्वेदिका[5][ऽऽसी][5]त्सनाथा ॥

५

सम्बद्धाभिस्सुरभिसुम[6]नः[6]स्रग्भिरुद्यद्द्विरेफैः
सङ्क्रान्ताभिर्मिलितघृणिभिर्मालिकाभिर्मणीनाम् ।
[7]दिव्यं छ[7]त्राम्बरपरिकरं चामरैर्लम्बमानैः
बद्धादर्शैर्ग्रथितचपकैश्शोभते तद्विता[8]नम्[8] ॥

६

[9]आवृण्वा[ना][9]स्स्तनभरमु[10]रः[10]स्रस्तचेलाञ्चलेन
व्याकी[11]र्णश्चा[11]प्यालिकमलकं स्थानमानीतव[12]त्यः[12] ।

---

[1] विं (ग)   [2] व्यदधु (क)   [3] ज्यो (ख)   [4] शुभ्रैः (ख)   [5] ची (क ख)
[6] न (ख)   [7] द्वीध्र्याच्च (क)   [8] ना (ख)   [9] श्रीवृण्वान (क ख)   [10] र (ख)
[11] र्णाचा (ख)   [12] त्याः (क)

नीवीबन्धं[1]श्लथमथ[1] दृढं बद्धकाञ्चीकलापैः
व्यातन्वानाः परिचयपरास्तत्र चेरुः पुरन्ध्रयः ॥

७

वल्गत्कुम्भस्तनभर[2]पत[2]त्कुङ्कुमोद्यत्परागैः
सन्ध्यारागं क्षरितमृगभूरेणुभिः केशहस्तैः ।
योषिद्बृन्दं व्यतनुत तमस्तत्र ने[3]त्रान्त[3]कान्त्या
[4]ज्योत्स्ना[4]पूरं पुनरपि समायातमुद्वाहगे[5]हे[5] ॥

८

ताराश्लिष्टो विधुरिव मिलत्स्वेदवार्बिन्दु[6]बृन्[6]दं
सिक्तं मन्दस्मितसितरुचा योषिता[7]मा[7]स्यबिम्बम् ।
तत्सान्निध्ये चलदिव भिया चक्रयुग्मञ्च व[8]ल्ग-
त्पी[8]नोरोजद्वयमपि बभौ तत्र सेवापराणाम् ॥

९

श्रीकान्ता[9][ढ्यश्श][9]रनिधिवदाकाशवत्सौरभाङ्कः
प्राञ्चत्कुम्भो द्विपवदलिवत्सौमनस्याभिरामः ।

---

[1] शरमद (ख) [2] लस (ख) [3] कान्त्य (ख) [4] भित्मा (ख) [5] हं (ख)
[6] बृ (क) [7] म (क) [8] ल्गं पी (ख) [9] द्य: श (क), द्यश्श (ख)

चित्रारम्यो वि[1]धु[1]व[2]दि[2]नव[3]त्क्लृ[3]प्तसच्चक्रराग:
[4]पाञ्चाल्यञ्च[4]प्रवरदहिव[5][द्योऽप्य][5]भूद्दिव्यभोग: ॥

१०

भूभृद्युक्तोप्यजडवसति: सा[6]र्ध[6]वे[7]द्य[7]ञ्चितोऽपि
आजन्मु[8]ग्धा[8]वलिरतिशयानेकपा[9]ल्या[9]श्रितोऽपि ।
हीरोपेतो मृगमदयुतोऽ[10]प्युन्मिष[10]च्चित्रकाय:
कान्ताराग्रस्थितियुग[11]पि त[11]न्मण्टपो विद्रुमाङ्क: ॥

११

राज्ञ:कन्यामथ युवतय: श्वेतसिद्धार्थमिश्रै:
दूर्वापत्रैरधिगतशरैस्सार[12]काश्मीरयुक्तै:[12] ।
अभ्य[13]ङ्गाद्री[13]प्रहितरचनां ग[14]न्ध[14]तैलाभिषिक्तां
[15]तामा[15]निन्युर्मणिमयचतुष्कं[16]भवत्स्व[16]र्णपीठम् ॥

१२

तत्र स्थितां तदुचितोद्वसनावृताङ्गीं
तूर्यस्वनैस्सह सुगन्धिपयोभिरेनाम् ।

---

1 धि (ख) 2 व (क) 3 लि (क) 4 प्राञ्चद्गुञ्ज (ख) 5 त्सोप्य (क) त्योप्य (ख) 6 र्थं (ख) 7 ध्यं (ख) 8 स्ता (ख) 9 लि (क) 10 प्यन्वितश्चि (ख) 11 विट (ख) 12 कोशीयवस्त्रै: (क) 13 गार्थं (ख) 14 न्धि (क) 15 लता (क) 16 वर स्व (ख)

कुम्भैस्सुवर्णरचितैः स्नपयाम्बभूवुः
[1]सख्यः[1]स्फुरत्सुरलतामिव देवनार्यः ॥

१३

स्नात्वाऽथ मञ्जुलवपुर्वसनं वसाना
[2][हृद्यं][2]निजालिकर[3]सम्भृ[3]तमम्बुजाक्षी ।
बालारुणातपमिवेन्द्रहरित्प्रणी[4]तं[4]
रेजेऽब्जिनी मृदुतरङ्गपयोऽभिषिक्ता ॥

१४

कान्ताकुचार्द्रघुसृणाङ्कितकन्तुपाणि-
संस्पर्शपिङ्गरुचिभृङ्ग[5][ग][5]णोऽङ्ग[6]नायाः[6] ।
पादाब्जमावृत इवाशुशुभे मरन्द-
लोलः पदाङ्गदमुदाररवप्रयुक्तः ॥

१५

सन्ध्यांशुभिन्ननलिनप्र[7]तिमां ब[7]भार
[8]ला[8]क्षारसारुणितमङ्घ्रितलं तरु[8]ण्याः[9] ।

---

[1] शल्यः (क) [2] ह्रिरुं (क) ह्योरुं (ख) [3] संत्र (ख) [4] त (ख) [5] गु (क ख)
[6] वायुः (ख) [7] भमाभ (ख) [8] य (ख) [9] ण्यः (ख)

कन्तोर्वियुक्तजनताहृदयोपयुक्त-
रक्ताभिषिक्तनवपल्लवबाणलीलाम् ॥

१६

यत्प्रावृतप्रचुररत्नकलापशोभां
काञ्चीमणिस्फुरितदीधितिराजगाम ।
तेनाङ्गनाघनलसज्जघनं बभार
कन्दर्परागकरिणः पृथुकुम्भलक्ष्मीम् ।

१७

गम्भीरनाभिसरसी[1]गत[1]कन्तुदन्ति-
रोमावलीक[2][रसमीरित][2]वाष्कणालिः ।
प्रोत्तुङ्ग[3]पी[3]नकुचशैलयुगाग्रदेशे
की[4]र्णे[4]व भाति नवहारलता लता[5]ङ्ग्याः[5] ॥

१८

वक्षोजदुर्गमधिरुह्य वलित्रयोच्च-
सोपान[6]तः[6]स्थितमनङ्गमुपेत्य कोपा[7]त्[7] ।

---

[1] रव (ख) [2] रसरैयित्र (क) रिसरी इव (ख) [3] ली (ख) [4] र्णा (ख)
[5] ङ्ग्यः (ख) [6] क (ख) [7] न् (ख)

ज्वाला[1][स्थितेव][1] हरनेत्रशिखिप्रभू[2]ता[2]
वा[3]ला[3]स्तनाग्रमणिहाररु[4]चि[4]र्दिदीपे ॥

१९

डिण्डीरपिण्डचयसंव[5]लि[5]तस्मरेभ-
शुण्डाग्रवल्लसति मौक्तिककङ्कणाङ्कम् ।
कान्ताकराग्रमलिलम्बितपल्लवस्य
नीलोर्मिकायुतकराङ्गुलिराप शोभाम् ॥

२०

* प्रोत्खातखड्गलतिका ललनाङ्गय[6]ष्टेः[6]
[7]वे[7]णी[8]यदा[8]श्रयति तत्सितकोशभावम् ।
कामेन दिग्जयकृते[9]र्चि[9]तपुष्पमाला-
लीलां व्यधत्त नवमौक्तिकमण्डनश्रीः ॥

२१

तादृक्चकोरयुगसन्ततृप्तिहेतोः
विन्यस्तमुज्ज्व[10]लकरं[10]शशिबिम्बयुग्मम् ।

---

[1] वृतेव (क) भृतेव (ख) [2] त (ख) [3] ल (क) [4] चे (ख) [5] लि (क)
[6] ष्ट्रि (क) [7] वे (ख) [8] लता (क) [9] र्जि (ख) * पूर्वार्धमस्पष्टम् ।
[10] लितकं (ख)

धा[1]त्रै[1]व भाति नवमौक्तिक[2][क][2]कर्णपत्र-
द्वन्द्वं तदङ्क इव [3]मध्य[3]गतेन्द्रनीलः ॥

२२

वेणीवि[4]धुन्तुदसमा[4]क्रमणातिभीत्या
स्विन्नालिका[5][र्ध][5]शशिन[6]स्स्रुत[6]घर्मबिन्दुः ।
व्या[7]लम्ब[7]मान इव भात्यमृतस्वभावः
नासासुमौक्तिकमणिस्तरलेक्षणायाः ॥

२३

नेत्रासिताब्जसमुपान्तविशत्तदीय-
रे[8]णू[8]पमांजन[9][समं][9]चितप[10]क्ष्म[10]प[11][ङ्क्तेः][11] ।
छायेव[12]तत्र[12]कलिता ददृशे [13][त्व][13]स[14]ङ्ख्या[14]
सम्भावितं भ्रमरमेचकम[15]म्बुजाक्ष्याः[15] ॥

२४

वेणीफणाधरफणामणिसन्निभोऽयं
एणीदृशः स्फुरितफालविराजमानः ।

---

[1] त्रे (ख) [2] नास्ति (क ख) [3] मूर्ध्वं (ख) [4] धुं तदपि मा (क) [5] र्थं (खक)
[6] स्मृ (ख) [7] लंवि (ख) [8] णो (क ख) [9] मुदं (क ख) [10] क्ष (क)
[11] ङ्क्ति: (ख) [12] सा च (क) [13] स्व (क ख) [14] ख्य (क)
[15] ञ्जुलाक्ष्य: (ख)

अर्धेन्दुसङ्गतसमुज्ज्वल[1]भौ[1]मशोभां
चूडामणिः स्फुट[2]मवाप[2]स लोहितार्चिः ॥

२५

सौवर्णकर्णमणिभूषणभानुरो[3][चि-][3]
स्स्निग्धं विकासि भवतु स्फुटमाननाब्जम् ।
हारांशुचन्द्ररुचियुक्तमुरोजयुग्म-
कोकद्वयं विघटते न कदाऽपि चित्रम् ॥

२६

मा भूत्तदूरुकदली मणिभूषणांशु-
[4][भास्वत्त][4]पावरणसङ्क्रमणात्समन्तात् ।
म्लानेति वेष्टित इवेन्दुकरो विधात्रा
क्षौमाम्बरं मृगदृशो ददृशेऽवदातम् ॥

२७

वक्षोजचक्रमिथुनस्य मुखेन्दुकान्त्या
मा भूद्वियोग इति सान्द्रनवार्करोचिः ।

---

[1] भू (ख) [2] मुवास (ख) [3] चे (ख) [4] हासात (क) भास्वात (ख)

धात्रेव तस्य पिहितं प्रविभाति तस्याः
सौवर्णवर्णरुचिकञ्चुकमुज्ज्वला[1]ङ्ग्याः[1] ॥

२८

चोराविभावविधिरु[2]चा[2]मुरुपद्मकोश-
[3]को[3]कव्रजस्य बहुधेत्य[4]धि[4]र[5]श्मिजातैः[5] ।
बद्धाविवाश्रमणिना[6]वभ[6]तुस्स्तनौ तौ
सौवर्णमञ्जुलनिचोलयुतावमुष्याः ॥

२९

श्रीर[7]त्न[7]हारगुलिकाभरणाय मध्ये
स्थानं न[8]द[8]त्तमिति गोपितमात्म[9]वक्त्रम्[9] ।
त[10]न्व्याः[10] कुचाब्जमुकुलेन निचोलबन्ध-
व्याजा[11]'[द][11]शत्रुषु जनस्य[12]कुतोऽस्ति[12] मन्युः' ॥

३०

दृ[13]ग्दोष[13]शान्तिकरणाय समस्तभू[14]षं[14]
तत्तत्प्रतीकमवलोकयतां रम[15]ण्याः[15] ।

---

[1] ङ्गयः (ख) [2] न्चो (ख) [3] शो (ख) [4] घ (क) [5] स्मिताञ्जैः (क)
[6] भभु (ख) [7] न्न (क) [8] ध्र (ख) [9] दत्तं (क) [10] न्वा (ख)
[11] दि (क ख) [12] नास्ति (क) [13] ग्दोह (ख) [14] षा (क) [15] ण्यः (ख)

*मध्ये कृशत्वमविभू[1]षि[1]तया बभूव
तद्दृष्टिपातवशतः कथमन्यथा स्यात् ॥

३१

सख्या कयाचिदथ दर्शितदर्पणस्य
मध्ये स्वकीयमुखमिन्दुमुखी ददर्श ।
दीर्घेक्षणांशुनवचन्द्रिकया प्रपूर्य
साक्षाद्विधुं कृतवती मुकुरं त[2]मे[2]व ॥

३२

सादृश्यमा[3]प्तु[3]मनलं भवदाननेन
[4]बाले[4] तथा[5][ऽप्य][5]हमनेन समा[6][न(?)[6]बिम्बम् ।
सं[7]ल[7]ब्धवानिति पु[8]रस्स्थ[8]मिवेन्दुबिम्बं
तद्वक्त्रबिम्बविलसन्मुकुरश्चका[9]से[9]

३३

सा कृ[10]ष्ण[10]वेण्यपि च भोगवती कवेर-
*जाता सृता सुवर[11][दा][11], स्फुटचन्द्रभागा ।

---

[1] ष (क) * अस्फुटाशयः। [2] दे (ख) [3] प्र (ख) [4] भाती (ख)
[5] स्य (क ख) [6] स्य (क ख) [7] य (ख) [8] पुरस्थ (ख) [9] र (ख) [10] ष्य (ख)
* अस्फुटार्थः। [11] णा (क ख)

स्याद्गोमती सरिदिवोज्ज्वलतुङ्गभद्रा
'कान्तानुकूलचरितेति किमत्र चित्रम्' ॥

३४

जीवातु[1][रिक्षु][1]धनुषः स्मरमन्त्रशक्तिः
कामागमार्थनिधिदर्शनदीपवर्तिः ।
कन्दर्पराजविजयाद्भुतवैजयन्ती
[2]से[2]यं रराज मदनेभ[3]म[3]दोदयश्रीः ॥

३५

तत्पूर्वमेव रचितस्नपनस्सुगन्ध-
वार्भिर्मनोज्ञकनकाम्बरवेष्टिताङ्गः ।
भू[4]ष्यो[4]विभूषणगणैरपि गन्धमा[ल्यैः
वि] भ्राजितः परिणयाय युवा प्रतस्थे ।

३६

स्कन्धारूढं [5]प्रमद[5]करिणः पुष्पचापस्व[6]रू[6]पं
दी[7]प्य[7]द्रत्नाभरणकिरणप्रावृ[8]ता[8]ङ्गं युवानम् ।

---

[1] पुष्र (क) रीषु (ख) [2] स्वी (ख) [3] व (ख) [4] पो (ख) [5] विमद (क)
[6] रा (ख) [7] द्य (क) [8] तो (ख)

भास्वन्माधूफलकरतलं कान्चनाश्वद्दुकूलं
मौलौ बद्धं दधतमभितः शेखरं दीप्यमानम् ॥

३७

भेरीढक्कापटहमुरजाकाहलीशङ्खताल-
स्फूर्जद्घोषैर्बधिरितदि[1]शश्चा[1]भिजग्मुः पुरन्ध्रयः ।
चञ्च[2]द्भूप[2]स्फुट[3]रुचि [तिरो]भूत[3]तिग्मांशुभासं
मुक्ताछत्रच्छविपरि[4]मि[4]लन्मौलिमीशं प्रजानाम् ॥

३८

बिम्बञ्चोष्ठ[5]स्स्मि[5]तमपि सुमं दर्प[6]णश्चा[6]रुवक्त्रं
तुङ्गोरोजौ कनककलशौ[7]सिञ्जि[7]तं साधुनादः ।
मत्स्यद्वन्द्वं नयनयुगलं चाभिया[8]ता[8]ङ्गनानां
[9]भद्रा[ङ्गं तत्][9]स्फुटतरमभूद्भूपतेस्सर्वमेतत् ॥

३९

प्रत्युद्यातः कुसुमनगरीभर्तृणा वैभवेन
प्रायश्शोभाविभवसहितोद्वाहगे[10]हप्र[10]देशे ।

---

[1] शं ब्दा (ख) [2] द्वाप्प (क) [3] पटतिमिरोदन्तभूत (क) रुचि रुचोभूत (ख) [4] म (ख) [5] स्मि (ख) [6] णं चा (ख) [7] संचि (ख) [8] त्ता (ख) [9] भद्रां तन्नि (क) भद्रां तांगी (ख) [10] हार्ध (ख)

कुम्भिस्कन्धादयमवतर[1]द्व[1]न्दिभिस्स्तूयमानः
तूर्यध्वानैस्सह ससचिवः प्राप कल्याणगेहम् ॥

४०

रत्नस्तम्भद्युतिपरिवृते दर्पणश्लक्ष्णभित्तौ
मुक्तादामाकलितव[2]ल[2]भौ पूर्णकु[3]म्भ[3]प्रयुक्ते ।
पुष्पस्रग्भिस्सुरभितदिशि प्राज्यमाङ्गल्यवेदीं
अ[4][ध्या][4]स्यास्ते परिणयलसन्मण्टपे स क्षितीशः ॥

४१

मध्यक्षिप्ताऽमलमणि[5]मधु[5]श्लिष्टमानीय ग[6]व्यं
दत्तं वासोद्वयमपि समं[7]प्रक्रमं तेन राज्ञा ।
पीठासीनः परिणयगृहे सोऽग्रहीद्भद्रवेषः
कान्तापाणिस्फुटमणिमयारात्रिकस्तत्कुमारः ॥

४२

पित्रादेशादथ निजवपुर्भूषणालोकरोचि-
स्सम्प्राप्ताशा क्षितिपतिसुता[8]यात्य[थो][8] धात्रियुक्ता ।

---

[1] न्वं (क) [2] ल (ख) [3] म्भे (ख) [4] स्यास्ते (क) स्तस्थे (ख) [5] तुधु (ख)
[6] म्यं (ख) [7] व (क) [8] यात्यथा (क) यत्यघा (ख)

सा सं[1][रं][1]भा रतसहचरी संयुता पूर्ण[2]शो[2]भा (?)
प्रापाभ्यर्णं शुभमयगृहे तस्थुपस्तस्य राज्ञः ॥

४३

लोलापाङ्गद्युतिधवलिते योपितां भद्रगेहे
म[3]ध्योत्प[3]न्नं व्यरुचत तयोः कान[4]कं[4] काण्डवासः ।
क्षीरोदन्वत्यभिमु[5]ख[5]रमाचक्रिणोरन्तरो[6][त्था][6]
वी[7]चिः[7] प्रोच्चैरिव परिमिलत्स्वर्णपङ्केजरे[8]णुः[8] ॥

४४

सन्ध्यारागे ह्यपसि गलिते पद्मिनी पद्मपाणिं
गृह्णन् [9]घर्म[9]द्युतिरिव क[10]रात्स[10]न्मुहूर्ते नृपालः ।
पाणिं गृह्णन् मृदुमपगते काण्डवासस्यमुष्याः
स्विन्नाङ्गुल्याः[11]प्रपुलक[11]वपुर्भासते[12][तर्षयुक्तः][12] ॥

४५

सस्वेदा[13]म्भःक[13]णतनु[14]लता[14] कुट्[15]मला[15]श्लि[16]ष्ट[16]मल्ली-
वल्लीवत्सा सपुलक इवा[17]म्र[स्स सत्कोर]कान्तः[17] ।

---

[1] गं (ख) [2] तो (ख) [3] ध्येत्वं (ख) [4] नं (ख) [5] खि (ख) [6] द्धा (क) द्दा (ख) [7] चेः (ख) [8] जुः (ख) [9] नियम (ख) [10] न् स (ख) [11] पुलकित (क) [12] तथ्ययुक्तम् (क) तत्यमुक्तं (ख) [13] म्भक्क (क) [14] यत्ता (ख) [15] ला (ख) [16] ष्य (ख) [17] मृदुश्रीकोरकान्तः (क) म्रस्यश्रीः कोरकान्तं (ख)

[1][द्वावप्येतौ तरुणिमयुजौ][1] रेजतुः कु[2]म्भ[2]वार्भिः
धा[3]रां[3]पाण्योर्व्यतनुत तयो[4]श्चै[4]त्रचत्तत्प्रजेशः ॥

४६

रोहिण्येन्दुर्नग[5]मि[5]व सह स्वर्णरूपं वरोऽसौ
बध्वा सार्धं हुत[6]हुत[6]वहं दीप्यमानं पुरस्तात् ।
प्रा[7]द[7]क्षिण्यक्रम[8][म][8]तनुत प्रागुपक्षिप्य लाजान्
मध्यग्रीवाद्गिरिश[9]महि[9]तं पूतधूमानुभा[10]व[म्][10] ॥

४७

शुभ्राम्भोजे त्रिधिरिव[11]गिरा[11]संस्थितः पद्मषण्डे
सार्धं[12]दीव्यन्नृ[12]पतिरनया वज्रपर्यङ्कमध्ये ।
नीतश्चा[13]द्रा[13]क्षतमथ व[14][हन्][14] वृ[15]द्धकैः तां[15]कराग्रात्
जग्राहाशीर्वचननिनदैश्श्राव्यमाङ्गल्यगीतैः ॥

४८

कान्ता[16]स्येन्दु[16]प्रसृमररुचिं कामिनीदृक्चकोरः
पातुं कि[17]ञ्चि[17]च्चलति विततव्रीडजालान्तरस्थः ।

---

[1] द्वौ तरुणिमयरुचा (क) द्वौ तरुणिमप्रजौ (ख) [2] भि (ख) [3] रो (ख)
[4] श्च (ख) [5] इ (ख) [6] वह (ख) [7] ग्द (ख) [8] नास्ति (क ख) [9] मंहि (ख)
[10] वः (क ख) [11] निला (ख) [12] विद्यो नृ (ख) [13] र्ध (ख) [14] सन् (क ख)
[15] कः का (क) [16] तासिन्धु (ख) [17] ञ्चे (ख)

चञ्चत्पक्ष्मप्रचलितगरुत् क्षोभमायाति भूयो
रागाधिक्या[1]त्स्फुर[1]ति पुरतो मन्दमेत्याशु पश्चात् ॥

४९

[2]य[2]त्सौन्दर्यं वरमभिनवं यौवनञ्चापि रम्यं
लावण्यश्रीरपि निरुपमा [3]निस्तु[3]लः सद्विलासः ।
निस्सामान्या परिणतकला[4][चै][4]नयो[5][रि][5]त्यभीक्ष्य
प्राप्तानन्दाश्चतुरवनिता दम्पती[6]तुष्टुवु[स्तौ][6] ॥

५०

बन्धुक्ष्माभृत्ततिमतितरां स्वर्ण[7]पा[7]त्रोपनीतैः
भास्वद्भू[8]षा[8]वसुवसनसद्वीटिकागन्धमाल्यैः ।
स [9]प्रत्ये[9]कं सतनयवधूसङ्कुलं तर्पयित्वा
विद्वद्भ्यो[10]ऽथ द्र[10]विणनिवहं भूरि[11]शः[11]संववर्ष ॥

५१

पत्युः पार्श्वेऽप्यवनत[12]मुखी[12] भृङ्गमालाभवेणी
मु[13]क्ता[13]वल्या [14][ल][14]लितविलसद्वज्रपर्यङ्कदेशे ।

---

[1] त्यरु (ख) [2] म (ख) [3] संस्थ (ख) [4] जै (क ख) [5] दि (क ख)
[6] तुष्टयोसौ (ख) [7] प (क) [8] नास्ति (क) [9] प्रेमै (ख) [10] ऽदाद्द्र (क)
[11] तः (ख) [12] मभि (ख) [13] क्त्वा (ख) [14] व (क ख)

[1]पौष्पे तल्पे[1]कुसुमधनुषस्तस्थुषश्चापवल्ली
पार्श्वस्थेव स्फुरदलिगु[2]णा[2]लक्ष्यते ह्रीनताङ्गी ॥

५२

स्थाणुस्तावद्धृतचरवपुर्भस्मलि[3]प्तो[3] जटा[4]वान्[4]
रुद्राक्षाङ्कः कनकरुचिमद्व[5]ल्क[5]लस्सस्मितास्यः ।
बिभ्रत्पाणौ वृषभविलसत्केतनं प्रादुरासीत्
भक्तेरस्य प्रकटनपरो मानकञ्जारनाम्नः ॥

५३

तं दृ[6]ष्ट्वाऽथ[6]स्फुरितमहसं मानकञ्जारभक्तः
सान्द्रानन्दस्सपुलकवपुः क्लृप्तदण्डप्रणामः ।
प्रक्षाल्याङ्घ्री शिरसि च वहन् तत्पयस्तस्य पूतं
नीत्वा वेश्म स्वयमुपददौ योगिने दिव्यपीठम् ॥

५४

तत्पादाब्जं पुनरपि समभ्यर्चयन् भक्तिभावात्
स्वात्मानं तत्पदपरिचयात् पावनं मन्यमानः ।

---

[1] पुष्पै तल्पै (ख) [2] णो (क) [3] ता (ख) [4] ला (ख) [5] ल्ग (ख)
[6] ष्वे व (ख)

प्रोवाचेत्थं तदधिकदयार्द्रेक्षणा[1]द्वी[1]क्ष्यमाणः
पादा[2]भ्य[र्णा][2]स्तरण[3]नि[3]वसन् प्राञ्जलिस्तन्नियोगात् ॥

५५

मोहध्वान्तोच्चयदिनमणिस्तापकान्तारवह्निः
मेघज्योतिर्दुरितफणिनः सन्ततप्रार्थितानाम् ।
कल्पक्ष्मारुड्भवति भवतो दर्शनं [4][यन्म][4]हद्भिः
लब्धं पुण्यैर्बहुभिरधुना स्वर्गिणामप्यलभ्यम् ॥

५६

पीयूषांशुर्भवति सुकृतोदन्व[5][तस्त्व]त्कटाक्षः[5]
पादाम्भोजाद्विगलितरजोभूतिरेनोग्रहघ्नी ।
सद्भिश्श्राव्यं तव [6]सुवचनं[6] शैवतत्त्वप्र[7]दीपः[7]
किं वर्ण्येत स्फुटतरकृपाम्भोनिधे त्वत्प्रभावः ॥

५७

प्लु[8]ष्टः काम[8]श्चिदनलदृशा क्रोधशार्दूलरक्षः
[9][शान्तं] स्त्री[9]ण[10]हृदमधिकरं(?)[10] मानकुम्भीन्द्रशत्रुः ।

---

[1] दी (क) [2] भ्याशा (क) भ्यर्ण (ख) [3] वि (ख) [4] ये म (क ख) [5] सितकटाक्षः (क) सीत्वत्कटाक्ष्यः (ख) [6] च सुवचः (क) [7] काशः (ख) [8] ष्टाः कामा (ख) [9] शान्ते स्त्रे (क) शान्ते स्त्रीण (ख) [10] हुतवहमधिकं (क)

★

सत्त्वोद्रेकत्रिशिखनिहतो[1][यत्त्वया][1] मर्दितोऽभूत्
मोहा[2][ग्रा[[2]ख्यस्सुचरितपदादीश्वरोऽसि द्वितीयः ॥

५८

यस्मिन् न्यस्तं पदतलमिदं भूतले तत्प्रशस्तं
क्षेत्रं वीक्षापदमिह भ[वे]त्सोऽपि धन्यः पुमान्यः ।
पादाम्भोज[3]स्पृ[3]गपि भवतः [4]भा[4]ग्ययोगात्परागो
मौलौ यस्यापतति स महान् मुक्तिमाप्नोत्यवश्यम् ॥

५९

दूराद्र[5]म्या[5]विमलयति सा स्वर्ण[6]दी[6]यन्मृगा[7]ङ्कः
नाहस्तापं[7] हरति रज[8]मा दे[8]व देहावसाने ।
कुर्वन्निष्टं सुरतरुरु[9]पेत्यैव वैमल्यकारी[9]
नित्यं ताप[10]च्छि[10]दिह फलदस्त्वं [11]त्व[11]पा[12]स्तो[12]पमानः ॥

६०

धन्यं कर्तुं यमिवर समायातवान् मां महा[13]न्स्त्वं[13]
नैरा[14]श्यं[14] ते सहजमनिशं बाह्यवस्तुष्वथा[15]पि[15] ।

---

[1] मत्वया (क) मत्पया (ख) [2] दा (क ख) [3] स्त (ख) [4] भो (ख)
[5] म्य (क) म्यं (ख) [6] भू (ख) [7] ङ्कस्तेपाटोपरि (क) ङ्कः सावष्टोपं (ख)
[8] सावे (क) वादे (ख) [9] पेतैव वैमल्यकारी (क) हे केवलैमाल्कारी (ख)
[10] च्च (ख) [11] स्त्व (ख) [12] त्तो (ख) [13] न्तं (क) [41] स्यं (ख) [15] हि (ख)

मत्प्रीत्यर्थं किमपि कृपया सम्प्रति प्रार्थितव्यं
द्रव्यं दास्ये "जगति हि सता[1][म][1]न्यतोपिप्रवृत्तिः" ॥

६१

तस्मिन्नेवं वदति तरसा तापसस्सप्रमोदः
प्रोवाचेदं दशनरुचिभिर्भास[2]यन्[2] भस्मलेपम् ।
शृण्वन् दूरादि[3]ह[3] तव यशः प्राप्तवान्स्त्वां दिदृक्षुः
किं वक्ष्येऽहं तव च विनयं निस्तुलं भक्तिभावम् ॥

६२

राजा[4]नोऽन्ये[4] किमिह न सदा जाग्रति स्वार्थवृत्ताः
श्रीभि[5]र्मत्तास्त्व[5]मपि न तथा [6]संहृ[6]तात्मार्थवृत्तः ।
श[7]म्भो[7]र्भक्तः परहितरतस्त्वामिह प्रेक्ष्य भूयः
क्षीरोदन्वानिव विधुम[8]हं[8] यामि तोषाभिवृद्धिम् ॥

६३

कर्णोऽदाच्च त्वचमपि शिबिर्मांसमङ्गं बलीन्द्रः'
जीमू[9][तोऽदाज्ञ][9]नपति[10]र[10]स्थून् स्वास्थि धीरो दधीचिः ।

---

[1] मा (क ख) [2] मान् (ख) [3] व (ख) [4] न्योन्ये (ख) [5] र्मत्तास्त्व (क) र्मुक्तास्त्व [6] प्रोज्झि (क) [7] म्भु (ख) [8] हे (ख) [9] तारदज (क) तारुग्ज (ख) [10] न (क)

[1]तादृग्दानी[1] त्व[2]मसि[2] नृपते ! दातुमन्यैरशक्यं
त्रैलोक्यां [3]त[3]त्किमपि यदहं वस्तु याचे भवन्तम् ॥

६४

कन्यायास्ते कचभरममुं यामुनाम्भःप्रवा[4]ह[4]-
[5]प्रख्यं छि[5]त्त्वा वितर नृपते मह्यमेतद्ध्वजस्य
नन्दिभ्राजत्पटपरिसरे चामरं तेन कुर्वन्
धर्तुं वाञ्छा मम तदितरे नास्ति व[6]स्तुन्यपेक्षा[6] ॥

६५

नि[7]र्मर्या[7]दं कपट[8]प[8]टुना व्याहृतामेवमुक्तिं
शृण्वन्स्तेन क्षितिभृदचिरं सो[9]त्सवस्त्यक्त[9]शङ्कः ।
मालाकीर्णां महितकबरीं व्यायतामात्मजायाः
[10][खड्गात् छित्वा][10]प्रकटमदिशद्योगिने भक्तवर्यः ॥

६६

न्य[11]स्ता[11]साङ्ग्रावनतिमता [12]ते[12]न नीलालका[13]लिः[13]
कालिन्दीवाभवदवनता पादयोस्तस्य लग्ना ।

---

[1] तद्दानानं (ख) [2] दाप (ख) [3] ता (ख) [4] हं (ख) [5] प्रेंखद्दि (ख)
6 स्तूनपेक्ष्यं (ख) [7] मांया (क) [8] व (ख) [9] त्यवस्त्यक्त्व (ख)
10 खड्गाच्छेद्य (क) खड्गाभेद्य (ख) [11] स्त्वा (ख) [12] ली (ख) [13] लिं (ख)

त्व[1]न्मौ[1]लावावह सह विभो दक्षिणाक्षिप्र[2]सू[2]तां
स्वर्णद्या[3]मा[3]मिति मधुकरध्वानविज्ञापनोक्त्या ॥

६७

प्रत्यक्षोऽभूत्सपदि परमां भक्तिमालोक्य शम्भुः
[4]म[स्ते]त्र्य[4]क्षस्त्रिदिवसरिता सार्धमिन्दुं द[5]धा[5]नः ।
नीलग्रीवः फणिपवलयः शूलसारङ्गपाणिः
[6].................................[6] सुन्दरः कृत्तिवासाः ॥

६८

ध्वानैर्भेर्यास्सह [7]दिविषदां[7]पुष्पवृष्टिः पपात
श्रीशाजेन्द्राद्यमरसमितिः सम्भ्रमा[8][दाजगाम][8] ।
नृत्यन्ति स्म त्रिदशगणिकाः किन्नराः कीर्तयन्तः
स्थाणोर्लीलां जगुरधिययौ भूरिशस्तद्गणेन्द्रः ॥

६९

देवस्तावन्निजपदन[9]तं तं[9] समालिङ्ग्य दो[10]र्भ्यां
भ[10]क्तं चञ्चत्पुलकवपुषं पाणिनोद्धृत्य भूयः ।

---

[1] ग्नौ (ख) [2] भू (ख) [3] ह (क) [4] स्तस्यत्र्य (क) न्मस्तस्त्र्य (ख)
[5] दा (क) [6] लुप्तः (क ख) [7] परिषदां (ख) [8] स्सज्ञगाम (?) (क ख)
[9] तस्तं (ख) [10] र्भिर्भ (ख)

चोलादींश्च स्वपदनमतस्तोषयन् दक्प्रसादात्
तत्कन्यायाः कचभरमदात्पाणि संस्पर्शनेन ॥

७०

[1]प्रीतोऽस्म्य[1]द्यादूभुततरभवद्भक्तिभावेन राजन्
किं दातव्यं भवदभिमतं त[2]द्वृ[2]णीष्वेत्युवाच ।
देवस्सोऽपि त्रिभुवनविभुत्वादिकं नेष्टम[3]न्यत्[3]
[4][त्व][4]द्भ[5]क्तिं[5]मे दिश सु[6]खकरी[6]मित्यवोचत्प्र[7]जे[7]शः ॥

७१

शृण्वन्वाणीमिति जनपतेः प्रीतवान्सोऽपि भूयः
पुत्र्याः केशान् प्रण[8][यन][8]युजः सस्रजो भद्रभाजः ।
[9][प्रच्छेद्यैतान्][9] प्रकटमधु[10]ना[10]दत्तवान्मे समानः
को वानेनेत्यवददधिकं नन्दिने चन्द्रमौलिः ॥

७२

प्रादा[11]त्स्वी[11]यं तनयमनघो दभ्रभ[12]क्तः[12]स्वकी[13]यां[13]
मह्यं पत्नीमदिशदतुल[14]स्सि[14]न्धुवल्लालभक्तः ।

---

[1] पित्रोऽस्म्य (ख) [2] त्प्र (ख) [3] न्यं (ख) [4] त्व (क ख) [5] क्तं (ख)
[6] वि (ख) [7] दे (ख) [8] यिनि (क ख) [9] प्रच्छेद्यातु (क ख) [10] रा (क)
[11] ता (क) [12] क्तो (ख) [13] यं (ख) [14] दिश (ख)

द[1]त्तायाः प्राग्दु[1]हितुरपरक्ष्माभुजे य[2]द्दौ मे[2]
[3][प्रच्छेद्येमां][3]सुभगकबरीमद्भुता भक्ति[4]रस्य[4] ॥

७३

वाञ्छा मे स्यादसुलभत[5]रे[5]वस्तुनि प्रार्थिते तत्
[6][भक्तेनैवा][6]क्षुभितमनसा दीयते निस्पृहेण ।
मत्तो भक्तस्तदधिकतरस्त[7]च्चत[7]स्तन्म[8]हत्त्वं[8]
को वा वेत्ति त्रिदशसमितावित्यवादीत्पुरारिः ॥

७४

"नाहं वश्यो जगति तपसा सर्वदा [9]नैव[9]चेष्टया
श्रौतस्मार्तप्रहितविधिभिर्ध्यानमौनव्रताद्यैः ।
भक्त्यैव स्याम[10]नितर[10]सुरेन्द्रस्पृशा शान्ति[11]मत्या[11]
वश्यः क्षि[12]प्रं व[12]हति य इमां मोक्षमस्मै ददामि "॥

७५

पश्यन् दृ[13]ष्ट्या[13]परमकृपया चोलम[14]स्या[14]पि भा[15]र्यां[15]
सम्भाव्याथ [16]प्रमथनियते[16] दीप्यमाने विमाने ।

---

[1] दत्तौ यः प्राद (ख) [2] त्पदौ ये (ख) [3] प्रच्छिद्येमां (क) प्रच्छेद्यायं (ख)
[4] सारा (क) [5] र (ख) [6] द्भक्तिनैवा (क ख) [7] त्पद (ख) [8] हात्म्यं (ख)
[9] नेन (क) [10] विरत (ख) [11] वात्स्य (ख) [12] प्तंव (ख) [13] ष्टः (ख)
[14] स्या (ह्या) (क) [15] यान् (क) [16] प्रमथनियुते (क) प्रमदनियते (ख)

आरोप्यैनं[1]विनयमनघं[1] मानकञ्जारभक्तं
नीत्वा लोकं गणपद[2]म[2]दादात्मनः स्थाणुरग्रयम् ॥

७६

दृष्ट्वा स्पष्टं तदखिलमसौ वर्तनं तत्र पश्यन्
प्राप्तश्शय्यां स्मृतमृड[3]वचा[3]स्तस्य भक्तिं प्रशंसन् ।
बद्धश्रद्धोऽभवदतितरां शैवमुद्राङ्कितानां
'*चोलश्रेण्याः*भवति विदुषां प्रत्ययो ह्यार्यवृत्तौ' ॥

७७

*[4]यत्पादोऽसौ (?)[4]निजपरिणयानन्तरं सप्रमोदं
क्रीडावेश्मस्फुटमणिमयस्वर्णपर्यङ्कदेशे ।
कन्तुक्रीडोचितपरिकरे[5]स[5]न्मृदुस्वच्छ[6]तल्पे[6]
लिप्सुः कान्ताऽऽगमनमवसन्मञ्जुवेषः कुमारः ॥

७८

तावन्नीता निजसहचरीसञ्चयैस्सान्त्वगीर्भिः
बाला लीलागतिजितगजा तुङ्गवक्षोजभारा ।

---

[1] सलिलनयया (ख) [2] मु (ख) [3] पद (ख) * चोलं श्रेण्यां (क)
[4] द्वाद्वासौ (?) * अस्पष्टः । [5] त (ख) [6] तैले (ख)

चञ्चन्मध्या चकितनयना सौरभाहूतभृङ्गा
किञ्चित्काञ्चीक्वणितरुचिरा तद्गृहान्तर्विवेश[1] ॥

७९

मेघ[2]ध्वानै[2]रिव स तृषितश्चातकः काञ्चनाञ्च-
न्मञ्जीरस्य ध्वनिभिरभवत्सप्रमोदोऽभिलापी ।
कामं कान्तस्तदधिग[3]मिता[3]मञ्चतल्पार्धभागे
ह्रीनम्रास्याऽऽसदिनकराकर्षणात्स्विन्नपाणिः ॥

८०

आ[4]रोप्या[4]ङ्कं भ्रमरकस[5]माव[5]ङ्गुलीभिर्विनीय
स्नेहान्मुग्धामुरसिजयुगं साधु संस्पृश्य तस्याः ।
[6]गाढा[6]श्लेषादुचितवचनान्मन्दमुत्सार्य लज्जां
चुम्बन् बिम्बाधरमतनुत क्ष्मापतिः कन्तुरागम् ॥

८१

कामात्कामप्रतिमविभुनाऽऽकृष्टचेलाञ्चलायाः
प्रायः कायः किरति परितस्स्वर्णतेजोऽधि[7]गे[7]हम्

---

[1] प्रवेशः (ख) [2] ध्वन्यै (ख) [3] गते (क) गमिते (ख) [4] रुह्या (ख)
[5] सौव (ख) [6] रागा (क) [7] पे (ख)

मुञ्चत्यञ्चत्कुवलयदलश्रेणिकास्तत्कटाक्षः
स्वेदोद्भे[1]दात्प्र[1]सरति वपुः सौरभं तन्मृगा[2]क्ष्याः[2] ॥

८२

तद्बाहुभ्यां वलयितवपुर्द्रा[3][ग्दघे][3]रोमहर्षं
पीते स्फीते सदधरदले किञ्चिदामीलिताक्षी ।
[4][नीतं नैवा][4]निभृतजघनस्पर्शने तत्करा[5]ग्रं
त्रुटय[5]त्काञ्ची शशिमणिरिवे[6]न्दुत्विषा[6]सा विली[7]ना[7] ॥

८३

प्रेम्णा वीक्षाविधिरसकृदापीतबिम्बाधरोष्ठः
*स्वीयद्वन्धः (?) पुलकितवपुः स्वैरसंक्लप्तबन्धः ।
गाढाश्लेषो नखरदह[8]तिव्या [प्तृति][8]र्गद्गदोक्तिः
सम्भोगोऽभून्निभृतमनयोः कण्ठनादानुविद्धः ॥

८४

त्यक्तो रागा[9]त्स[9]दधरमणि[10]श्चात्त[10]रागोऽम्बकान्तः
स्वान्तं रागाविलमुरसिजश्चापि लुप्ताङ्गरागः ।

---

[1] दप्र (ख) [2] क्ष्यः (ख) [3] दे (क) गृदे (ख) [4] शीतेनैवासि (क) सीते नैवासि (ख) [5] ग्रात्रुटय (क) ग्रत्तुष्ट (ख) [6] न्दूपले (क) [7] नः (ख)
* अस्पष्टः [8] तिं व्याप्तति (क) तिं व्याप्यति (ख) [9] त्म (ख) [10] श्रान्त (ख)

निर्याता ह्री रतिरधिगता जृम्भितः कण्ठनादो
दैन्यालापः सपदि मृदुलः सुभ्रुवः कन्तुकेल्याम् ॥

८५

द्वन्द्वीभूता तनुरिव गता चैक[1][तां][1]जातसौ[2][ख्या][2]
स्वान्तेनान्तस्सह सपुलकस्वेदवार्बिन्दुबृन्दा ।
गाढा[3]श्लिष्टा सुखपरव[3]शा कुड्मलीभूतचक्षुः
भ्रान्त्याऽन्योन्यं निभृतमुभयोस्तद्रतिश्रान्तिभाजोः ॥

८६

रागोन्मिश्रौ प्रियहिमरु[4]चा[4]सङ्गते दृक्चको[5]रौ[5]
जातो[6][ह्यार्द्र][6]स्तनु[7]श[7]शिमणि[8][र्मु]त्पयो[8]धिर्विवृद्धः ।
प्रा[9]प्तक्ले[9]शं कुचयुगरथाङ्गद्वयं साम्प्रतं त-
द्वक्ताम्भोजं मृगशिशुदृशश्चित्रमेतत्प्रसन्नम् ॥

८७

रागादेवं रचितसुर[10][ते][10]निर्वृतिप्राप्तिभाजोः
[11]द्राग्द[11]म्पत्योर्निमिषसमतामाप*कापीलिव[12]र्हः[12](?) ।

---

[1] ता (क ख) [2] ख्य (क) ख्यं (ख) [3] श्रीमिस्सुरभितदि (क) [4] चौ (क)
[5] रा (क) [6] हार्द्र (क) ह्यर्थं (ख) [7] त (ख) [8] र्मुत्पयो (क) र्मत्सया (ख)
[9] प्ताके (ख) [10] ता (क ख) [11] स्तद्द (क) [12] र्घः (क) * अस्पष्टः ।

तस्मिन्नासीदपिच समये तत्क[1]ला[1]केलिवीरु-

[2]द्वैतीवादी[2]दिन परिगतोऽभ्रागमः साभ्रमानः ॥

(अस्पष्टः)

८८

॥[*]पृथ्वीवृत्तम्॥

स तत्र वसुधापति[3]स्सख[3]सखीसमाजावृतः

महात्मनवयोषिता सविभवं समाराधयन् ।

कपर्दिपदपङ्कजं परमभक्तिभावान्वितः

स्थितस्स्थिरशुभोदयश्शिवमताम्बुरुड्भास्करः ॥

इति सकलभुवनैकवल्लभनिखिललेखनायकनिकायसन्ततसमर्चित-

परम'शिवलिङ्ग'पादारविन्दषट्पदायमानलसदुभयकविता-

विशारद'श्रीषडक्षरिदेव'विरचिते 'चोलभूपालीये'

'कविकर्णरसायनाख्ये' महाकाव्ये 'सुन्दरचोल-

सोमप्रभयोः विवाहवर्णनं' नाम

सप्तमस्सर्गः ॥

---

[1] ला (क) [2] हदैतीत्रा (क) [3] (क) अत्र सखशब्दप्रयोगश्चिन्त्यः । * क

अष्टमस्सर्गः

१

अथ प्रतीच्यब्धितरङ्गमालिकानटीलसत्ताण्डवसूत्रधारकः ।
कदम्बपुष्पासव[1]भृ[1]त्तटीव[2][ने][2]स्खल[3]न्य[3]यौ पश्चिमदिक्समीरणः ।।

२

ध्वनिर्घनौघस्य मृदङ्गनिस्वनः [4]शि[4]लीरवस्तालनिकाय[5]निक्व[5]णः ।
कलापि[6]नां[6] ताण्डवडम्बरे बभौ चलत्तटीजर्झरदण्डविभ्रमः ।।

३

[7]घनस्तमा[7]सेव्य पुराऽमृताप्तये[8][रसाश्रयं][8]श्रीगुरुमिन्दुभास्वतोः ।
निरुध्य मार्गं मरुतः परं ययौ यमीव सज्योतिरनन्तसम्प[9][दाम्][9] ।।

४

ज्वलत्तटित्काञ्चन[10]शुङ्खला[10]युजः समुत्थितस्फू[11]र्जि[11]थुर्वृंहितध्वनेः ।
मदाम्बुधारा इव मेघदन्तिनः[12][च्यु][12]ताम्बुधाराः परितो विरेजिरे ।।

---

[1] त (ख) [2] न (क ख) [3] द्य (ख) [4] सि (क ख) [5] वीक्ष (ख)
[6] ना (ख) [7] स घनसामान (ख) [8] नास्ति (क) रसा (ख) [9] दं (क ख)
[10] शुंडलाभा (ख) [11] र्जिथु (ख) [12] श्च (क) श्चु (ख)

५

यदुत्थितं स्फूर्जथुघोषविभ्रमं ज्वलत्तटिद्दंष्ट्रक[1]मभ्र[1]मण्डलम् ।
खरद्यु[2][तौ][2] चक्रव[3]द[3]ग्रतस्स्थ[4][तेः ह][4]रिप्रकृत्तारिशिरश्श्रियं दधौ ॥

६

स्वपानयोग्याम्बु निपीय निर्ग[5][तः][5] सहो[6]त्थि[6]तः क्रोधभरेण वाडवः ।
[7]दहन्निवो[7]च्चैस्तटि[8]दर्चिषा[8]ऽम्बुदान् बभौ सघो[9]षो[9]द्धतमेघपावकः ॥

७

पतत्कबन्धैश्च शि[10]ली[10]मुखान्वितैः[11]प्रथा[व]मानैर्व[11]लराजहंसकैः ।
श[12]रौघ[12]भङ्गाकुलवाहिनीकुलैः घनागमः प्रा[13]प[13]रणाजिरोपमाम् ॥

८

द्विजातिसन्मार्गरतिप्रबन्ध[14][ने][14] कुजातिवृद्धिं कुरु[15]ते[15]यतोऽम्बुदः ।
अत[16][स्तथा][16]द्धोपलदन्तहारि[17][णा][17] स नीरदत्वं मरुतै[18]व[18]लब्धवान् ॥

---

[1] मञ्ज (क) शब्द (ख) [2] द्युता (क) द्युतिता (ख) [3] दा (ख) [4] ति ह (क) तिःह (ग) [5] ता (क ख) [6] चि (ख) [7] सुदुस्सहो (ख) [8] त चेष्टां (ख) [9] नास्ति (ख) [10] ली (ख) [11] प्रधानमानैर्व (क) प्रथावमाना (ख) [12] राट (क) [13] नास्ति (ख) [14] नं (क ख) [15] तो (ख) [16] अत कृता (क) अतः तथा (ख) [17] ण (क) णः (ख) [18] र (ख)

९

स्वनै[1][स्स्व]ता[1]पापहमेघसूचकान्
विमृश्य भेकान् क्षमयाऽऽत्मसम्भवान् ।
प्रकल्पि[2]त[2]च्छत्रकदम्बवद्भ्रमौ
प्र[3]सृ[3]ज्य तेभ्यो हि शिलीन्ध्रसङ्कुलम् ॥

१०

तटित्कटाक्षेण निरीक्ष्य सादरं तदाऽऽत्म[4]नः[4] प्रावृडसौ पयोधरान् ।
विनिर्यदुद्यत्पयसाऽभ्यतर्पयन् तृषातुरांश्चातकपोतकान् [5]मुहुः[5] ॥

११

विभज्यते जीवनमेव मिश्रितं [6][सदा]ऽमृते[6]नेदमनेन चेयत्‌यम् ।
प्रतर्जयन् गर्जनगाढनिस्वनैः मरालमुद्राव[7]य[7]ति[8]स्म[8]वार्धरः ॥

१२

सुराध्वजम्बूफलगुच्छवद्भ्रमौ
*सिता(?)भ्रमभ्येत्य सुरेन्द्रनन्दनात् ।
बुभुक्षया तद्गतकीररा[9][जि][9]वत्
विराजते गोत्रभिदो धनुर्लता ॥

---

[1] स्वता [क] स्वतां ख) [2] नास्ति (ख) [3] स्त (ख) [4] नास्ति (ख)
[5] स मुहुः (क) [6] मधूमृते (क) अथामृत (ख) [7] नास्ति (ख) [8] यस्त (ख)
* सितेति विशेषणं चिन्तनीयम् । [9] ज (क ख)

१३

अतिप्रबन्धादभिवर्धितान्यसौ छिनत्ति च व्रीहिफलानि भूरिशः ।
इति प्रबद्धाम्बु[1]मुचा[1] शुकावली स्थितेव रेजे तटितेन्द्रकार्मुकम् ॥

१४

धरापरा[2]गोपच[2]यो जडोन्नतिः कुजन्म वृद्धिश्च हतातपस्थितिः ।
सरोगतापोद्गतिरुच्चकैर*भूत् नमर्दिनं चेत्कथमीदृशस्थितिः (?) ॥

१५

घनाच्युतो जिष्णुधनुर्भृदुद्रवः समस्तधात्रीजनतापकारिणम् ।
शरा[3]न्प्र[3]मुच्याशु जहार [4]तै[4]रमुं 'निदाघमागस्सहते हि कः प्रभुः ॥'

१६

पयः कृताजीर्णरु[5]जो[5] मरुद्भिषक् विधाय भङ्गं वपुषः पयोमुचः ।
दहंस्तटित्तत्पशलाक[6]या[6] ततः तदुज्झितं [7]वृ[7]ष्टिमिषात्पतत्पयः ॥

१७

निपीतवारी[8]णि[8] वि[9]मुच्य[9] वा[10]र्धितः[10]
तदा[11]त्त[11]रत्नोज्ज्वलमौक्तिकान्यपि ।

---

[1] दा (ख) [2] गापज (क) * अस्पष्टाशयः [3] त्प्र (ख) [4] कै (क)
[5] चो (ख) [6] मा (क) [7] पु (क) [8] नास्ति (ख) [9] विमुक्त (ख)
[10] र्भि (ख) [11] न्त (क)

समुज्झितानीव [1]वभुः[1] पयोधरैः
[2][च्यु][2]तेन्द्रगोपाभ्रशिलास्ततः परम् ॥

१८

तटिन्मयं दिग्वलयं पयोमयं धरातलं चा[3]ब्द[3]मयं नभस्थलम् ।
घनागमाम्भोजभवेन निर्मितं नवीनकृत्यं भुवनातिशायिना ॥

१९

नृपस्तदाऽभ्रंकषहर्म्यमारुहन् गवाक्षनिक्षिप्तदृ[4]ग[4]ङ्गनान्वितः ।
घनाघनं शक्रधनुस्समन्वितं सवर्षमालोक्य मुदं समादधे ॥

२०

व्यधायि कर्पूरविमिश्रवारिभिः कदम्बपुष्पैः कु[5]ट[5]जैस्सुगन्धिभिः ।
तदातिभक्त्या विधिना समर्चनं पुरद्विषस्तेन महीभृता भृशम् ॥

२१

सुर[6]द्विपो[6]द्यत्कटदानगन्धभृत्पु[7]रन्दराशाब्धि[7]तरङ्गशीतलः ।
मरुद्धधूतुङ्गकु[8]चा[8]चलस्खलन् शनैस्समायाति हिमागमानिलः ॥

---

[1] बभौ (ख) [2] च्यु (क ख) [3] ब्धि (ख) [4] रं (ख) [5] ज (क ख)
[6] षो (ख) [7] राधराशाब्धि (क) पुरन्दराब्धि (ख) [7] चौ (क)

२२

विशालमाच्छाद्य नभोगजाजिनं तदन्तरे कालकपालमालिना ।
तुषारसङ्घः कृतधूपधूमवद् रराज कुन्दोद्गम[1][रुण्ड][1]सम्भृतः ॥

२३

हिमाभिभूतानि महांसि भास्वतः समीक्ष्य चन्द्रांशुधिया चको[2]रकाः[2] ।
प्रपातुमिच्छन्ति विवर्धतेऽम्बुधिः कुमुद्वती चापि न मुञ्चति स्मितम् ॥

२४

हिरण्यगर्भाण्डकरण्डकोदरे प्रपूर्णकर्पूरपरागविभ्रमम् ।
वहन्ति[3]च व्याप्त[3]हिमानि[4] सर्वतः स[4]मानि दिव्यद्रुमरेणुभि[5]स्समम्[5] ॥

२५

विभाकरः कुण्ठितपाद[6][तां]तदा
[त्व][6]लातव[7]त्प्राप[7]हिमातिपाततः ।
शिखाविहीन[8]स्तु[8] सभस्मकञ्चुकः
शिखी च सन्यासिवदाप शा[9] [न्तताम्][9]

---

[1] रन्द्र (क) रंध्र (ख) [2] हाः -(ख) [3] चाव्याप्यास्त (क) [4] संवृतं स (ख)
[5] :स्पृहा (क) [6] कान्तरा स्व (क) कान्त तदास्वस (ख) [7] त्प्रपा (ख) [8] सृ (ख)
[9] तिं (क) तं (ख)

२६

महाबला[1]स[1]श्रितकृष्णपद्धतिं
धनञ्जयश्चापि विधाय निष्प्रभम् ।
हिमागमं कर्णमिव स्थितं मुदा
समीक्ष्य कूजन्ति हि धार्तराष्ट्रकाः ॥

२७

सुधान्धसां वक्त्रबिलेषु लीनतां
अवाप वह्निस्तुहिनातिसाध्वसः ।
तदीयधूमस्तु मुखे नृणां स्थितः
ततो हि जीवन्ति सु[2]रा[2]श्च मानुषाः ॥

२८

हिमातुरैरध्वचरै [:] क्वचित्क्वचित्प्रदीपितः शुष्कतृणैश्च पावकः ।
पतन्निवाभाति प[3]थि[3] प्रखण्डितः तुषारपातैरहिमार्चिषः करः ॥

२९

पथि प्रदेशान्तरपातिपावकः प्रणीतनार्णः पथिकैः परिश्रितः ।
विभाति धूमैर्हिमपा[4]त[4]साध्वसो वसन्निवान्तः पटमण्टपोदरे ॥

---

[1] त्पा (ख) [2] रं (ख) [3] ति (ख) [4] ति (ख)

३०

तुषारशीर्णाधरपादपाणयः
 ससीत्कृतो[1]द्यद्धु[1]हुहुस्वनान[2]नाः[2] ।
वसन्ति पा[3]न्थाः[3]पुळकाङ्कुरान्वि[4]ताः[4]
 पथि स्फुटाकुञ्चितजानुमस्तकाः ॥

३१

समि[5]न्वि[5]गूढाहिफणा[6]मणिं[6]स्पृशन्
 करेण[7]चोष्णांशु[7]धियाऽभियाऽऽशु[8][गः][8]
प्रसर्पदुद्यत्फणमीक्ष्य कोऽप्य[9]हिं
 भि[9]या चकम्पे तुहिनेन चा[10]ध्व[10]गः ॥

३२

हिमाशुगप्राशनगाढशीतळं
 विमुच्य[11]है[11]माहतनाभिपङ्कजः ।
फणीन्द्रतल्पं परि[12]र[12]भ्य भार्गवीं
 विमुक्तवार्धिः स्वपुरे हरिस्स्थितः ॥

---

[1] द्यु (ख) [2] नः (ख) [3] न्थः (ख) [4] तः (ख) [5] त्यु (ख) [6] मणि (ख)
[7] चांग्रात (ख) [8] गा (क) ग (ख) [9] हिं श (ख) [10] द्जगा (ख)
[11] हे (ख) [12] रं (ख)

३३

हिमाह[1]तं[1]म्लानसरोरुहास[2]नं[2] वि[3]धि[3]र्विसृज्यात्मवधूसमन्वितः ।
स्वजन्मकर्माहितकर्मदुर्मनाः समागत[4]स्सत्य[4]मुवास मन्दिरे ॥

३४

हिमांशुमुत्सृज्य तथाभ्रनिम्न[5]गां[5]
नभस्यथाच्छाद्य गजाजिनाम्बरम् ।
मृडस्समालिङ्ग्य दृढं नगेन्द्रजां
ज्वलल्ललाटाग्निरगान्तरेऽवसत् ॥

३५

सु[6]प[6]र्णमुत्पीड्य निहत्य सारसं खगस्य पा[7]द[7]श्चवलं शिखावतः ।
तुषारजालेन निरुध्य लीलया चचार[8]कै[8]वर्तसमो हिमागमः ॥

३६

प्रलिप्तकाश्मीरघनस्तनाङ्गना-
वपुस्समाश्लेषसुखेन कामिनः ।
विलङ्घ्य बाधां हिम[9]जां[9]यथा स्थि[10]ता[10]
वियोगिनश्चापि तथा स्मराग्निना ॥

---

[1] ति (क) [2] वं (ख) [3] धु (ख) [4] स्वस्य (क) [5] गं (ख) [6] व (क)
[7] दा (ख) [8] रै (ख) [9] जं (ख) [10] तौ (ख)

३७

यदूष्मणोपप्लवमङ्गनास्तनः समाश्रितस्याप्यपनुद्य रक्षति ।
हिमोद्भवं [1]दग्ध[1]वपु[2]स्त्रि[2]चक्षुषा स्मरोऽस्ति तत्रेति ततोऽनुमीयते ॥

३८

द्विजाभिधा नैव पिकस्य युज्यते
विजातिजस्येति विधाय मूकताम् ।
[3]मुदं व्युद [स्यास्य][3] सदग्रजन्मनो
व्य[4][धा][4]द्रुजं[5]है[5]मऋतुर्द्विजेशितुः ॥

३९

प्रसारितं प[6]क्ष[6]युगं स्वचञ्चुभिः वि[7]धा[7]य निर्धूततुषारशी[8]करम्[8] ।
विहङ्गमास्तुङ्गकु[जा]ग्रवासिनः सिषेविरे बालदिनाधिपातपम् ॥

४०

हरार्धदेहे[9]पि वि[9]वेश पार्वती
हरेरुरस्यब्धिसुता च भारती ।

---

[1] बद्ध (ख) [2] श्रित्र (ख) [3] मुदं व्युदस्यस्य (क) मुदव्यव्यदस्य (ख)
[4] था (क ख) [5] हये (ख) [6] क्षम (ख) [7] दार्य (क) [8] तळं (ख)
[9] निवि (ख)

मुखे[1][वि][1]धातुस्तुहिनागमे स्त्रियः
कथं हि जीवन्ति विनेनमङ्गमम् ॥

४१

पिशङ्गजीर्णच्छदमीक्ष्य शाखिनां
उपेत्य बालातपशङ्कया कपिः ।
करेण निर्धू[2]य[2] निजाङ्गपातिभि-
[3]र्हिमैः[3]प्रकम्पन् विवृतास्यमास्थितः ॥

४२

मृगेन्द्रशार्दूलशिखण्डिनां हिमात्
सभी तो न प्रभवन्ति धावितुम् ।
गजेन्द्रसारङ्गभुजङ्गमाश्च[4] तान्
न[4] शक्नुवन्त्येव हि ते प्रबाधितुम् ॥

४३

हिमानिलोद्धूतनगेर्न[5][गो][5]बभौ हिमातिरेकादिव जातवेपथुः ।
तरङ्गमालाभिरिवात्तकञ्चुकः सरित्पतिश्चापि हिमापनुत्तये ॥

---

[1] व (ख) [2] म (ख) [3] हिमे (ख) [4] तो न (ख) [5] रो (क ख)

४४

हिमातिपा[1][तादथ शीत][1]या श्रिया
विहाय पद्मानि हरेरुरः श्रि[2]तम्[2] ।
*स्मराग्निसन्तप्तमिदं न चेत्कथं
तथा विनष्टानि सरोरुहाण्यपि (?) ॥

४५

प्रियाभुजाचम्पकदामकन्धरः
तदीयवक्षोजमिलद्भुजान्तरः ।
व्यतीत्य हैमागममेव संस्थितः
तथैव चोळावनिभृ[3][त्सुखा][3] न्वितः ॥

४६

कदुष्णकाश्मीरजलैस्सुगन्धिभिः मनोहरैर्माध्यसुमैस्समाहितः ।
स धूप[4]दीपादि[4]भिरीश्वरो भुवः प्रपूजयामास पदं कपर्दिनः ॥

४७

अथोग्रतेजो(ऽ)नललक्ष्मणाञ्चितः प्रकृष्टभास्वद्रुचिराप्तजाध्वगः ।
गृहीतचक्राशुगधर्मविभ्रमः शुचिर्ययौ राम इवावनीतलम् ॥

---

[1] तोदभि (क) तोऽथभि (ख) [2] तुं (ख) * अस्फुटाशयः । [3] त्सभा (ख)
[4] धूमादि (ख)

४८

दवानलप्लुष्टतरूत्करं वनं प्रशुष्यदम्भांसि स[1]रां[1]सि भूभृतः ।
प्रशीर्णपाषाणगणा *बभूविरे धरा तदा तप्तरजोभिरन्विता ॥

४९

अजाण्डभाण्डार्कमुखान्तरागतः
तदण्डसौवर्णर[2]सो[2]बहिस्स्थितः ।
विलीलयेवोग्रनिदाघवह्निना
प्रपूरित[3][स्तप्त][3]इवातपो बभौ ॥

५०

मरीचिका चण्डमरीचिरोचिषा भृशं विलीनस्य तुषारभूभृतः ।
स्रवन्तुषारौघनदीव लक्ष्यते विवञ्चितायातमृगीकदम्बका ॥

५१

वनानि निर्दह्य भुवि क्षुधातुरः
पुनर्वनं दग्धुमसौ दिवौकसाम् ।
[4][समुद्यतो यातु[4]]मिवोर्ध्वमा[5]बभौ[5]
दवाग्नि[6][रारूढ][6]नगाग्रभूरुहः ॥

---

[1] वां (ख) * अपाणिनीयम् । [2] जो (क) [3] स्ताप्त (क) स्ताप (ख)
[4] सामध्यतोय (क) समुद्ययौ तोय (ग) [5] ययौ (ख) [6] रारोढ (क) ना रुद्ध (ख)

५२

खरां[1]शुना त[1]प्तवपुर्वसुन्धरा सुरापगा[प्स्वप्य] व[2]गाहनेप्सया ।
समुत्थितेवाभ्रतळे च दृश्यते प्रवृद्धच[3]क्रा[3]निलधूतधूलिका ॥

५३

कलापिनस्तत्र खरांशुनिर्दळद्द्विपेन्द्रकुम्भच्युतमौक्तिकान्यपि ।
चुचुम्बिरे चञ्चुपुटेन तर्षिताः घनच्युता[4]म्भःक[4]णराजिशङ्कया ॥

५४

न चेन्नदी[5]चन्द्रधरस्य[5]मीशितुः
न चेत्पयोराशिनिवासि[6]ता[6]हरेः
न चेत्सरोजासनता विधेरि[7]मे[7]
कथं तरेयुर्व्यसनं निदाघजम् ॥

५५

हविर्भुजश्चन्द्रकलाभु[8]जः कृता[8]
धराऽप्यसौ सप्त[9]स[9]रोधि[10]वे[10]ष्टिता ।
निदाघभीत्या विधिना मनीषिणा
पयस्युपक्षिप्तमजाण्डमण्डलम् ॥

---

[1]तसनाथा (ख) [2]नास्ति (ख) [3]क्रोऽ (ख) [4]म्भक (क) [5]तं धृनरत्न (ख)
[6]तो (ख) [7]ति (ग) [8]जस्तथा (ख) [9]श (क) [10]विं (ख)

५६

खरांशुसन्तप्तबृहत्फणामणि-
ज्वलत्फणः प्राप फ[1][णी] शि[1]खण्डिनाम् ।
कलापिगुच्छान्तरमुल्मुकप्रभः
प्र[2][भासित][2]स्तेन कलापसञ्चयः ॥

५७

समाश्रित[3][श्चा][3]यमतिष्ठद ध्वनि
प्रतप्त[4][कुम्भं] करिणं[4] मृगाधिपः ।
विनिश्चलं या तु[5]मशक्त[5]मर्करु-
क्प्र[6][भा][6]भिरन्वस्तसमस्तविक्रमः ॥

५८

[7]उप[7]प्लवं ग्रीष्ममहोष्मजं जनाः तरन्ति संश्लिष्य सरोजलोचनाः ।
मृणालबाहूरमृतप्रभाननाः सुवृत्तरम्भोरुयुगाश्च योषितः ।

५९

हरस्त[8]दा[8] हैमवतीं सरोजभूः
सरस्वतीं चक्रधरोऽपि सैन्धवीम् ।

---

[1] षिदिश (क) णिःशि (ख) [2] दात्रि (क) पेहि (ख) [3] छा (क) च्छा (ख)
[4] रिणा करिणं (क) कंभकरिणां (ख) [5] प्रशस्त (ख) [6] ता (ख) [7] ये (ख) [8] वा (ख)

[1]नदीमिवा[1]श्रित्य निदाघजं क्लमं
[2]व्युदस्य[2] ते दिव्यसुखं प्रपेदिरे ॥

६०

पयोजमित्रोऽपि पयोजजीवनं
जहार[3] तिग्मांशुरिति स्वयं[3] भयात् ।
मृगीदृशां स्विन्नमभून्मुखाम्बुजं
'हितेऽहिते कस्य भ[4]यं[4] न जायते' ॥

६१

*जडा[5]श्र[5]यानामिह शोषणं कृतं
सपङ्ककानां कुभृ[6]तां विदारणम्[6] ।
स्वतेजसा येन रवेश्शुचि[7]स्पृ[7]शः
ततोऽस्य युक्तं [8]दि[8]वि[9]चो[9]त्तरायणम् (?) ॥

६२

वियोगिनः श्वासनि[10]भः[10] प्रभञ्ज[11]नः[11]
प्रतप्तम्[12]यश्च[12]समं क्ष्मातलम् ।

---

[1] अमूरधि (क) [2] व्यधास्य (ख) [3] मित्रोऽपि इति स्फुटं (ख) [4] या (ख)
[5] श (क) [6] तं निधारणं (ख) [7] प्र (ख) [8] जी (ख) [9] तो (ख)
* अस्फुटाशयः । [10] भा (ख) [11] ना (ख) [12] यश्च (ख)

रजांसि मार्गेऽग्निकणोपमान्यहो
बभू[1]वुरत्युग्र[1]निदाघयोगतः ॥

६३

*वसन्तकान्तस्य वियोगवह्निना
भुवः प्रतप्तेन कुजेन चाचलः ।
निदाघतप्तस्फुरितः प्रभञ्ज[2]नः
त[2]दीयसोष्मश्वसिताशुगोपमः ॥

६४

प्रतप्तलोकस्य रवेः खरांशुभिः
किमस्य मित्रत्वमिति स्फु[3][टं][3]निशा ।
जहा[4]स[4]पूर्णेन्दुमुखेन चन्द्रिका-
मिषेण 'हास्याय हि नाम केवलम्'

६५

निपीतशीतांशुमु[5]खी[5]सुधाध[6]रः[6] त[7]दीयबाहावि[7]सकाण्डकन्धरः ।
नृपस्समालिङ्गिततत्तनूलतः ततार घर्मागमसम्भवश्र[8]मम्[8] ॥

---

[1] वतुग्र (ख) [2] नःत (ख) * अस्फुटाशयः । [3] टा (क ख) [4] र (ख)
[5] चि (ख) [6] रा (क) [7] या बहाभि (ख) [8] मः (ख)

६६

उशीरकर्पूरविमिश्रवारिभिः
सरोरुहैश्चन्दनगन्धलिप्तिभिः ।
दधीक्षुसारादिरसैस्तदा[1]ऽय[1]जत्
रसाधिपः [2]स्वादु[2]रसा[3]दु[3]माप्रियम् ॥

६७

अथ सचिवसमेतस्सम्भ्रमात्सन्मुहूर्ते
प्रबलबलनियुक्तः स्वीय[4]जायास[4]हायः ।
मुखरितहरिदद्रिस्तूर्यघोषैरिलेशः
करिनगरमि[5]भे[5]न्द्राधिष्ठितस्सञ्जगाम ॥

६८

पताकाकीर्णा[6] [तां] मणि[6]गणमहातोरणम[7]यीं[7]
[8]प्रतोळीं[8] निस्तीर्य प्रथितविभवो भित्रनृपतीन् ।
स्वगेहा[8][नि प्रेष्य[[9] प्रणयवचसा चान्यसुभटान्
[10]प्रि[10]यायुक्तश्चोळः क्षिति*मवतर[11]त्कु[11]म्भिशिरसः ।

[1] यु (ख) [2] साधु (ख) [3] धु (ख) [4] जेत्रस्स (ख) [5] ळे (ख) [6] स्तान्मणि (क, ता·मणि (ख) [7] यान् (क) [8] नास्ति (क) [9] त्संलक्ष्य (क) न् सम्प्रेष्य (ख [10] स्त्रि (क) * अवतरदिति अपणिनीयम् । —'मत्ततारेभशिरसः इति कर्तुं शक्यतं । [11] न् कुः (क ख) [12] स्नानोन्नतपुर (क) सोन्त.पुर (ख,

६९

मनोज्ञं शुद्धान्तं स च सलिल[1][स्नानोत्थित][1]वधू-
कदम्बैरुद्यातः कनककलशादर्शनकरैः ।
प्रविश्य स्वाग[2]त्या[2] मुदितहृदयावेत्य पितरौ
प्रणाम्याशीर्वादा[3]न[3]लभत तदाऽ[4]श्ले[4]षसुखितः ॥

७०

[5]तयोर्दम्पत्योस्तौ स[5]दृशमुदितं वीक्ष्य पितरौ ।
वयो रूपं शीलं सुगुणमधि[6]कानन्दनियतौ[6] ।
*त[7][दा][7]ऽभूतां तत्र क्षिति[8]धव[8]मसौ [9]दोष्णि[9] निभृतं
[10]अभूदद्धा[10]रेजे हरपदपयोजार्चनरतः [?] ॥

७१

प्र[11]च्छे[11]द्यास्याः कचौ[12]घं भृतचरवपुषे शूलिने याचयित्रे
दत्वा तस्य प्रसा[13]दा[13]त् पुनरपि कबरीं लब्धवान् भक्तवर्यः ।
किं वक्ष्ये तत्प्रभावं शिवपुरमगमन्मानकञ्जारकाख्यः
श्रीमानित्येव ता[14]भ्याम[14]वददवनिपः शम्भुपादाब्जभृङ्गः ॥

---

[1] स्नानोन्नतपुर (क) सोन्तःपुरः (ख) [2] त्य (क) [3] न्य (ख) [4] शे (ख)
[5] तयो तत्रक्षितिदम्पत्यो स्तौ स (क) तयोर्दम्पत्योस्तत्स (ख) * अस्फुटार्थः ।
[6] कांनन्दनियतौ (क) —युतौ (ख) [7] थाऽ (क ख) [8] वधु (ख) [9] द्रोष्ठि (क)
[10] तदघचा (क) [11] चो (ख) [12] घ (ख) [13] नास्ति (ख) [14] भ्यमा (ख)

इति सकलभुवनैकवल्लभनिखिललेखनायकनिकायसन्ततसमर्चित-
परम'शिवलिङ्ग'पादारविन्दषट्पदायमानलसदुभयकविता-
विशारद'श्रीषडक्षरिदेव'विरचिते 'चोलभूपालीये'
'कविकर्णरसायनाख्ये'- महाकाव्ये 'कुसुमनगरीतः
करिपुरागमनवर्णनं' नाम
अष्टमस्सर्गः ॥

अथ नवमस्सर्गः

१

वीते च माध्यमगणे शिशिरेन्दुबिम्बे
[1]या[1]त्य[2]स्त[2]मुन्मदवति स्फुटमम्बुजाते ।
कूजत्युदारपिककुक्कुटके प्रवाल-
सन्ध्यारु[3]चा[3]समुदियाय वसन्तभानुः ॥

२

श्रीखण्डपण्डनवसौरभभू[4]रिभारं[4]
उद्वाह्य तद्गिरिझरोत्करशीकरा[5]र्द्रः[5] ।
मार्गान्तरालगतनागनिपीतशेषो
मन्दं चचाल मलयाचलगन्धवाहः ॥

३

वक्त्रं प्रफुल्लमभवत्प्रथमं वधूनां
पद्मं ततस्तनुर[6][भू][6]ल्लिलता लता च ।

---

[1] य (ख) [2] स्त (ख) [3] चौ (ख) [4] तिभारा (ख) [5] र्धः (ख) [6] या (क ख)

पश्चात्पुरस्फुरितमास कपोलमासां
पूर्णेन्दुविम्बमथ याति तदा वसन्ते ।।

४

माकन्दराजमहि[1]पीं[1] मरुदेत्य चोरः
मल्लीलतां सुमरजोभसितं विकीर्य ।
मालां म[2]दालिवरनी[2]लमयीं जहार
*[3]वीक्षन् पि[3]कस्तमिव कूजति दीर्घनादैः ।।

५

मल्लीवधूर्मधुपसाधुरवच्छलेन
पुंस्कोकिलध्वनिमिषेण रसालकान्तः ।
सार्धं परस्परमुभौ मधुरागतोऽयं
इत्युत्सुका[4][विव च तौ][4] जगतुर्निनादात् ।।

६

अश्वान[5]व[5]त्ययमिमान् फलसारपूरैः
कीरान्मदालिनिवहञ्च गुणं मरन्दैः ।

---

[1] षं (क) [2] धुलिहनि (क) [3] वीक्ष्यस्पा (क) वीक्षत्पि (ख) *वीक्षन् इत्यपाणिनीयम् [पश्यन् पिकस्तमिव] इति चेत् साधु । [4] मवचतौ (क) ववचतौ (ख) [5] नास्ति (खे)

[1]वन्दिध्वनिं[1] किसलयैः पिकमित्यनङ्गः
चूतं चकार सहकारपदाभिधानम् ॥

७

सौन्दर्यमीक्षितुममुष्य च चूतनेतुः
मल्ली लतान्तनयनानि बहूनि लेभे ।
चै[2]त्रा[2]दयं तु परि[3]रब्धुमि[3]मामनेक-
शाखाभुजान[4]ल[4]भत प्रणयातिरेकात् ॥

८

[5]आवृत्य[5] यत्र परितः स्थितव[6][द्भि][6]रेभिः
इन्दिन्दिरैस्सुमरजोविसरावदातः ।
चूतो बभार मधुमत्ततयाऽतिनील-
वस्त्रावृताङ्गरुचिरस्य[7]बलस्य[7] लीलाम् ॥

९

भृङ्गावलीमधुरमन्द्ररवेण शौक-
मध्यस्वरेण पिकतारकनिस्वनेन ।

---

[1] मध्वादिनं (क) [2] त्रो (ख) [3] रटद्भुवि (क) [4] व (ख) उद्धुत्य
[5] ध्वि (क ख) [6] नास्ति (क)

पुष्पायुधस्य पुरतो मधुसं[1]यु[1]तस्य
गायन्निव व्यरुचत स्फुरितो रसालः ॥

१०

आन्दोलकेलिमरुणाम्रदले विधाय
चञ्चत्फलैरपि च कन्तुकचारुलीलाम् ।
मन्दो मरुत्सुमरजः पिहितश्च[2]चा[2]ल
बालो मधोरिव मधुव्रतकाकपक्षः ॥

११

शाखासु पल्लवयुतासु पिकप्रणादः
पुष्पान्वितेषु विटपेष्वलिनीविरावः ।
शृङ्गेषु पक्वफलवत्सु शुकप्रतान-
कोलाह[3]लश्च[3] समजृम्भत चूतभूजे ॥

१२

मा[4]कन्द[4]मत्तकरिणोर्घटितो[5]च्च[5]शाखा-
शुण्डाग्रयोर्मधुमनोजदृगुत्सवाय ।

---

[1] हि (क) [2] जा । (क) [3] स्व (ख) [4] तङ्ग (ख) [5] श्च (ख)

योद्धुं परस्परमिवाश्रितयोरिवाग्रे
यत्र ध्वनिः पिकपटुध्वनिरा[1]ज[1]जृ[2][म्भे][2] ॥

१३

म्लाना भवेत्तव वियोगशुचा वनश्रीः
आयाहि माधव जवादिति चैत्रदूती ।
स्मेरप्रसूनवदनालिरुताऽऽ*ह्वयन्ती (?)
सार्थं चकार निजनाम तमानय[न्ती] ॥

१४

निर्भिन्नपान्थवनिता हरि[3]णी[3]प्रतान-
रक्तार्द्रवक्र[4]नख[4]विभ्रममावहन्ति ।
यस्यारुणानि मुकु[5]ला[5]नि जगाम काम-
सिद्धाधिरूढमृगभित्समतां पलाशः ॥

१५

तन्नन्दनस्तिमितशीतलताभिभूत-
दावानलः किमय[6]मु[6]र्वितलं विभिद्य ।

---

[1] जि (ख) [2] भि (क) भ (ख) * रुताऽऽह्वयन्तीति समासः अपाणिनीयः ।
[3] ण (क) [4] मपि (ख) [5] ली (ख) [6] मू (क)

निर्यत्फणीश्वरफणामणिरु[1]क्स[1]मूहः
किं वाऽथवाऽरुणतरप्रसवः पलाशः ॥

१६

कामक्षमाभुजसमागमनोत्सवाय
चामीकरोद्धचपकव्रजतोरणानि ।
चैत्रेण चारु रचितानि वितर्कयामि
तत्कर्णिकारकुसुमानि [2]वि[2]कस्वराणि ॥

१७

जेतुं दिशां जिगमिषोर्बलि[3]न[स्स्म][3]रस्य
[4]रम्ये[4]न्द्रगोपकृतदूष्यमिवाविभाति ।
सम्पादितश्च मधुना भुवि नन्दनस्य
युक्तः प्रवालविसरैररुणैरशो[5]कः[5] ॥

१८

ना[6]म्ना[6]ऽप्यभूत्सुरभिरु[7]द्रुम[7]गन्धसारैः
पुष्पाकरस्तु पवनोऽपि च गन्धवाहः ।

---

[1] त्स (ख) [2] पि (क) [3] नं स्म (क ख) [4] रेमे (ख) [5] की (ख)
[6] मा (ख) [7] द्रुसु (ख)

[1]तैरे[1]व धात्रिरपि गन्धवती तदानीं
मारस्तदीयकुसुमैरपि पुष्पवा[2]णः[2] ॥

१९

योषिद्वियोगविधुरस्य जनस्य
पाटल्युदारकुसुमासवमापिबन्तः ।
सं[3]स्मा[3]र्य तापमधिकं जनयन्ति कान्ता-
बिम्बोष्ठपा[4]न[4]क[5]ल[5]नां मदचञ्चरीकाः ॥

२०

पद्मास्यमुल्लसति माधवसङ्गमेन
[6]प[6]त्राधरस्थमदभृङ्गरदक्षताङ्कम् ॥
चञ्चन्मरन्द[7]लव[7]घर्मकणाभिरामं
सामोदमञ्चितमरुच्छ्वसितं सरस्याः ॥

२१

योन्निद्रकेसररजःपरिपिञ्जराङ्ग-
भृङ्गावली पवननर्तितमल्लिकायाः।

---

[1] तेनै (क) [2] णाः (ख) [3] स्म (ख) [4] ल (क) [5] ली (क ख) [6] पि (ख)

संश्रित्य वृक्षकुसुमानि[1] [ददौ][1] रवेण
पादस्फुरत्कनककिङ्कि[2]णिका[2]विलासम् ॥

२२

स्वर्णच्छविच्छुरितचम्पककर्णिकार-
पुन्नागकौसुमरजो[3]भिरिला[3] बभूव ।
युक्तेव कन्तुललनाकुचकुम्भयुग्म-
सङ्घर्षणक्षरितकुङ्कुमरेणुजालैः ॥

२३

चञ्चत्प्रवालविलसन्नगराजिरम्यं
उत्पादिताब्जकमलाकरताभियुक्तम् ।
कन्दर्पशोभि मरुदाश्रितमाधवेन
विभ्राजि तद्व[4]न[4]मवाप सरोधिसाम्यम् ॥

२४

वातावधूतनवपुष्परजांसि पश्यन्
कोलाहलं शुकपिकप्रकरप्रभूतम् ।

धौ (क) दतो (ख) [2] णा (ख) [3] रिवा (ख) [4] नि (क)

शृण्वन्वियोगिनिव[1]हः[1] [2]स्मर[2]दण्डयात्रा-
भीत्या वने परवशः परितो बभूव ॥

२५

कामोऽथ चैत्रमवलोक्य कृताञ्जलिं तं
अग्रे वसन्तम[3][वदन्मु][3]दवाप्तचेताः ।
सर्वस्समञ्जसमभूद्भवतां यतस्त्वं
उद्यान[4]वृद्धि[4]मकरोन्मम कार्यजातम् ॥

२६

चूतेभकीरहयचक्ररथाङ्ग[5][नौ][5]घ-
पत्तिप्रवालशरपुष्पधनुर्विभूतिः ।
भ्रात[6]स्त्व[यै][6]व[7]य[7]दकार्यहमेव तस्मात्
जिष्णुर्भवामि करणीयमतः प[8]रं[8]किम् ॥

२७

सङ्गी[9]य[9]मानमदनक्षिति[10]प[10]प्रश[11]स्ति[11]-
पद्यावली भृतसुमोचितभूषणश्रीः ।

---

[1] हं (ख) [2] गन्ध (ख) [3] दवन्मु (क) दवान्मु (ख) [4] वार्धि (ख)
[5] कौ (क ख) [6] स्त्वयेव (क) स्वयेव (ख) [7] म (ख) [8] रः (ख) [9] त (क)
[10] पं (ख) [11] स्त (क)

निःश्वाससौरभसमाहृतभृङ्गपालिः
आन्दो[1]लकेलि[1]मकरो[2]त्पुर[2]कन्यकालिः ॥

२८

पुन्नागपू[3]ग[3]वति मञ्जुलतावभासि
सद्गन्धवाहसुमनःप्रमदालिकीर्णे ।
केलीवनश्रियमुपेयुषि चैत्रराज-
लीलां द्ध[4]त्स[4]द[5]सि[5] तत्र बभौ नरेन्द्रः ।

२९

कान्ताप्रतानकविवृन्दकलाधुरी[7]ण[7]-
सन्दोहभूभुजसमाजसमाकुलायाम् ।
स्वर्णस्फुरन्मणिगणावृतसिंहपीठे
तस्थौ स भूरिविभवः क्षितिभृत्सभायाम् ॥

३०

देदीप्यमानकटकाङ्गदतारहार-
कोटीरकुण्डलविभूषणभासमानः ।

---

[1] लिकीव (ख) [2] त्सु (क) [3] र (क) [4] त्प (ख) [5] स (ख) [6] णा (ख)

दिव्याम्बराश्रितवपुर्दिविजेन्द्रनील-
सौन्दर्यसार[2]भवनस्स्थ[2]तवान्नरेन्द्रः ॥

३१

तत्रा[3]न्तरे[3]भृतनिचोलपृथून्नताङ्गः
सौवर्णवेत्रपरितर्जितराजलोकः ।
रा[4]ज्ञि[4] निवेद्य वनपालकमानिनाय
सन्देशतस्सपदि तस्य च सौविदल्लः ॥

३२

मल्लीलतान्तमरविन्दमशोकगुच्छं
आम्रप्रवालम[5]थ[5] चम्पकचारुपुष्पम् ।
रम्भारसालपनसादिफलानि राज्ञे
दत्वा प्रणम्य स कृताञ्जलिरेवमूचे ॥

३३

सन्ध्यांशुयुक्त[6]म[6]भवत्तरुणप्रवालैः
उद्यत्तमो मधुकरैरुडुराजिरम्यम् ।

---

[1] विभवः स्थि (ख) [2] न्ते (ख) [3] ज्ञा (ख) [4] द (ख) [5] नास्ति (ख)

पुष्पैर्वनाश्रम[1]पि देव[1] यतोऽसि राजा
[2][तत्त्वत्स][2]मागमन[3]मत्र[3] परं हि युक्तम् ॥

३४

[4]चै[4]त्रोऽभि[5]षिच्य मधुना भुवि नन्दनस्य
रङ्गं विरच्य सुमन[6]श्च्यु[6]तरेणुजा[7]लैः[7] ।
आ[8]बध्य[8] चाम्रनवपल्लवतोरणानि
स्वा[9]मिंस्त्वदाग[9]मनमिच्छति कन्तुयुक्तः ॥

३५

राजा निशम्य वनपालवचस्तदित्थं
उक्तं ददद्वसनभूषणवित्त[10]म[10]स्मै ।
सिंहासनादवतरन् सह वन्दिनाद्यैः
अन्तः पुरान्तरमियाय विसृष्टसभ्यः ॥

३६

तत्र प्रविश्य मणिमन्दिरमुर्विपालः
सख्या कयाऽपि मणिकाण्डपटे निरस्ते ।

---

[1] विवेश (ख) [2] त्वं तत्स (क), त्पंतीस (ख) [3] मंत्र (ख) [4] चे (ख)
[5] षे (ख) [6] च्यु (ख) [7] तैः (क) [8] च्छाद्य (ख) [9] मिं स्वदार (ख)
[10] त (ख)

पीठात्समुत्थितवतीं सहसा ददर्श
सोमप्रभां कनकपङ्कजचारुवक्त्राम् ॥

३७

स्वर्णाम्बराभरणभूषितकोमलाङ्गीं
पीनस्तनीं पृथुनितम्बभराभिरामाम् ।
मन्दस्मितां मधुकरालकभासमानां
सौन्दर्यनिर्जितरतिं चपलायताक्षीम् ॥

३८

दृष्टप्रहृष्टहृदयस्सहसा गृहीत्वा
हस्ताम्बुजं मणिमयाञ्चितपीठतल्पे ।
देव्या त[1]या सह वसन् *कलया रवेण (?)
संवीक्ष्य (?) तद्भ्रमरकं प्रणयाज्जगाद ॥

३९

मन्दानिलञ्च मदयन् मधुभिर्मृ[2]दा[2]लीन्
सन्तर्पयन् प्रजनयन् परितोषमुर्व्याः ।

---

[1] न (ख) * कलयाथरेण्य (क) अस्पष्टः । [2] रा (ख)

संवर्धयन् व[1]न[1]तरून् मधुराजगाम
कल्याणि ! तद्वनमुपेत्य स दर्शनीयः ॥

४०

गिभश्शुकान् कलरवेण पिकान्मरालान्
गत्या च कुन्तलरुचा भ्रमरान्विजेतुम् ।
गच्छाद्य सुन्दरि वनं मम स[2]म्भ्रम[2]दाय
कन्तोर्वसन्तसचिवस्य च कौतुकाय ॥

४१

इत्यादरात्स्मितमुखीं तरुणीं नियम्य
गन्तुं प्रयाणपटुदुन्दुभितूर्यघोषैः ।
देव्या तया सह ससम्भ्रममारुरोह
सज्जीकृतं द्विपप[3]तिं[3] नृपसार्वभौमः ॥

४२

ऐरावणाकृतिभृतः परिपश्यताञ्च
चक्षुःप्रभाभिरभितः करिणोऽग्रदेशे ।

---

[1] र (ख) [2] म्मु (ख) [3] वरं (ख)

वज्रोपमाङ्कुशभृदद्रिभिदो विलासं
श[1]च्या[1]ऽन्वितस्य जगृहे स तया समेतः ॥

४३

किं वाऽ[2]ति[2]सुन्दरमिदं द्विपकुम्भयुग्मं
किं वाऽनयोर्युगलम[3]द्य[3] परीक्षितव्यम् ।
इत्युर्विपं प्रणुदतीव कुचद्वयं तत्
प[4]श्चा[4]न्मुहुर्घटितमस्य बभौ मृगा[5]क्ष्याः[5] ॥

४४

कौमुद्यतः प्रचित[6][ता][6] प्रहतं तमोऽपि
[7][तेनाय][7]मुज्ज्वलकलः समतां समाप्तः ।
रा[8][जेति] वीक्षितु[8]मिवागतमिन्दुबिम्बं
तस्योपरि स्फुरति चारु सितातपत्रम् ॥

४५

आन्दोलि[9]काः[9] कतिचनालिज[10]नाः[10]परे च
चञ्चत्करेणुततिमर्वत एव चान्ये ।

---

[1] च्या (ख) [2] त (ख) [3] ध्य (क) [4] श्यन् (ख) [5] क्ष्यः (ख)
[6] तः (क, ख) [7] येनाम (क, ख) [8] जत्यवीक्षुत (ख) [9] कां (ख) [10] नः (ख)

आरुह्य जग्मुरपरे विनियोगभाजः
    कान्ता[1][:] कराम्बुरुह[1]चालितमुर्दीप[2]स्य[2] ॥

४६

सौवर्णभूषणमरीचिचयातपेन
    चञ्चत्कटाक्षरुचिचन्द्ररुचा च [3]यू[3]नाम् ।
नेत्रोत्पलस्य हृदयाम्बुरुहस्य योषि -
    त्सन्तानमाकलयदुत्सवमाजगाम ॥

४७

*पीनोन्नतस्तननितम्बभरातिभारं
    यत्नात्स[4] [मृद्धमसमुद्वहनप्रतीतम्][4] ।
भोगीश्वरस्य भ[5]रणे[5]व बभौ वधूनां
    पादाङ्गदस्य मणिकिङ्किणिकानि[6]नादः[6] ॥ (?)

४८

यस्याधरः किसलयश्च दृगञ्चलांशुः
    पुष्पं म[7]दा[7]लिरलक[8][स्सर][8] एव नाभिः ।

---

[1] जनाः चलित (ख) [2] श्य (ख) [3] मू (ख) [4] मुद्वह समुद्वह् संप्रतीति (क) मद्ध स समुद्ध सनं प्रतीने (ख) [5] णती (क) - [6] दानः (ख) *अस्पष्टम् ।
[7] रा (ख) [8] श्च स (क, ख)

वीरुद्भुजा कचभरोऽपि च बर्हिणोऽभूत्
उद्यानवल्लसति तद्युवतिप्रता[1]नम्[1]

४९

पादाग्रयावकरसेन महीलता[2]यां[2]
उद्भ्राव्य पल्लवमपाङ्गरुचा प्र[3]सूनम्[3] ।
[4]तद्व[4]ल्लरीषु च[5] वि[5]धाय वसन्तल[6]क्ष्मीं[6]
शेषस्थलेऽपि च ततान वधू[7]प्र[7]तानम् ॥

५०

काचित्करीन्द्रमधिरुह्य निजाननेन
मुक्तामयश्रुतिविभूषणभूषितेन ।
[8]पार्श्वोडुमात्तहरिदिग्गज[तल्लजास्य-
शोभा]म[8]मुष्य करिणः कलयाञ्चकार ॥

५१

पार्श्वप्र[9]बद्ध[9]चलचामरम[10]ञ्जु[10]नाश्वं
एकाऽधिरुह्य कनकोज्ज्वलकोमलाङ्गी ।

---

[1] नः ख) [2] य (क) [3] सन्नं (क) [4] दिग्व (ख) [5] नि (ख) [6] क्ष्मीः (क)
[7] त्रि (क) [8] पाश्वोयुद्धिधुनुतो हरिदिग्गजस्य शोभाम (क) पार्श्वेंडुमात्तहरिदिग्ग-
जस्यतोभूद (ख) [9] बन्ध (क) [10] चिं (ख)

★

क्षीराब्धिफेनचयचारुतरङ्ग[1]कोर्ध्व-[1]
प्रादुर्भवत्कमलया समतां जगाम ॥

५२

आन्दोलिका मणिम[2]यी[2]सरु[3]चि[3]र्बिभर्ति
सन्ध्याभ्रविभ्रममुपाश्रितसल्लताङ्गी ।
तत्रोदितैन्दवकलेव, कटाक्षरोचिः
ज्योत्स्नेव कौतुकरसं तनुते जनानाम् ॥

५३

ता[4]राभि[4]रिन्दुरिव ताभिरसौ नरेन्द्रः
सार्धं ससम्भ्रममुपेत्य वनोपकण्ठम् ।
नागाधिपादवरुरोह वधूपयुक्तः
[5]तौ[5]र्य[6]त्रि[6]कध्वनिविजृम्भितपूर्णकर्णः ॥

५४

लीलावलोकनकलापकरापनुत्त-
सान्द्रद्रुमान्तरत[7][माः][7] प्रियया‌ऽनुयातः ।

---

[1] कार्दा (क) [2] या (ख) [3] चे (ख) [4] रेभ (ख) [5] तौ (ख) [6] ष्ति (ख)
[7] मः (क) पाः (ख)

सख्युः प्रकोष्ठनिहितात्मकरो जगाम ।
केलीसहायजनतासहितः क्षितीशः

५५

उद्यानपालपरिदर्शितपादपालिः
[1]आत्मा[1]ङ्गसौरभसमाहृतभृङ्गपालिः ।
शृण्वन् ययौ शुकपिकप्रकरप्रणादं
तन्नन्दनातिसु[2]ष[2]माहितहृत्प्रमोदः ॥

५६

पश्यात्र देव ! वकु[3]लं[3]तिलकं तमालं
आम्रश्च पाटलमशोकमिमाश्च रम्भाम् ।
पुन्नागचम्पकमुखानि च तत्र तत्र
सन्दर्शयन्वनभृ[4]द[4]स्य पुरो जगाम ॥

५७

त्रोटीपुटत्रुटितपक्वफलस्य सारैः
आपूर्यमाणमथ वीक्ष्य शुकाङ्गनानाम् ।

---

[1] रत्ना (ख) [2] षु (ख) [3] लं (क) [4] त (ख)

[1]चूताल[वालमयमेव] रसालसद्द्रुः
[इत्यात्त][1]विस्मयमसौ नृपनराददर्श ॥

५८

एवं विलोकयितुरुत्सुकमानसस्य
देव्याऽन्वितस्य नृपतेस्सविधं समेत्य ।
काचि[2]द्विदग्ध[2]ललना पुरतो जगाद
दे[3]व्यास्सखी विधुमुखी[3] विलसद्वचोभिः ॥

५९

चैत्राब्धिनौरिव नवाङ्कुरविद्रुमौघैः
मल्लीलताललितकुट्म[4]ल[4]मौक्ति[5]कैश्च[5] ।
चूतो विभाति पिकनाविकयुक्ततुङ्ग-
[6]शाखाच्छ[6]कूपकविराजितया समृद्धः ॥

६०

प्रोल्लासिपल्लवज[7]टः[7]स्फुटपुष्पगुच्छ-
दंष्ट्रः परागभसितः शिखिगुच्छबाहुः ।

---

[1] चूतालं मय मयमेव रसालसद्दशरीत्यात्म (क) चूतालतामयमयेवलसालसद्द्रुरि-त्यात्म (ख) [2] द्रुदग्ध (ख) [3] देव्या सखींदुमुखिना (ख) [4] ल (ख) [5] कस्य (ख) [6] शोभाच्च (ख) [7] टा (ख)

रक्ताक्ष[1]निक[1]णरवेण वियोगिस[2][ङ्घं]
[चैत्राम्र][2]भैरवपतिः परितस्तनर्ज ॥

६१

कर्णामृतं कलरुतं मधुराश्च वाणीं
[3]मञ्जु[3]स्वरं शुकपिकभ्रमराङ्गनानाम् ।
यः पल्लवैः फलरसैः प्रसवैश्चका[4]र[4]
'मा[5]धु[5]र्यमस्य सहकारतरोरतर्क्यम्' ॥

६२

कल्पद्रुरल्पफलदस्त्रिदशेष्टदो य-
त्कोटिद्विजेष्टफलदो मदनोपकारी ।
चूतद्रु[6]र[6]स्य न समस्स इति प्रघोषं
कुर्वन्निवोच्चक[7] रवेण[7] पिक[8]श्चु[8]कूज ॥

६३

मत्तोऽसि देव ! मधुना म[9]दन [स्त्व][9]मेव
नो चेत्कथंनु कुरुषेऽथ शि[10]ली[10]मु[11]खान्नः[11] ।

---

[1] नीक्ष (ख) [2] ङ्घमश्वाम्र (क), न्धुमाम्र (ख) [3] प्रीत (क) [4] म (ख)
[5] धू (ख) [6] म (ख) [7] रवाणि (क) [8] च्च (ख) [9] मदनत्व (क)
मधुरत्व (ख) [10] ली (क) [11] खं नः (ख)

ज्याम[1]द्य[1]सूनविशिखान्वहसीति भृङ्गाः
कामं वदन्त इव भा[2]न्ति[2] वने ध्वन[3]न्तः[3] ॥

६४

कीरान्विलोक्य परिपक्कफलस्य सारं
अन्योन्य[4][माशु]पिबत [स्सहसा]रसार्थम्[4] ।
भूयो[5]पिदास्यवि[6]वरं स्रवतीव भाति
तस्यालवालमधि[6]पू[6]रितमम्बुपूरैः ॥

६५

पुष्पैरतर्पि मधुपः परपु[7]ष्ट[7]वृन्दं
उत्पल्लवैः कुसुमिताऽपि च मल्लिकाऽसौ ।
श्लि[8]ष्टा[8] मयेति विनताम्रतरु[स्सु]नम्रः
शाखासमृद्धफलभारतया ह्रियेव ॥

६६

केतुश्चलत्किसलयान्वितदीर्घशाखा-
बद्धाश्ववृन्दमभवत्पुरतः शुकौघः ।

---

[1] ध्य (ख) [2] ति (ख) [3] नः (ख) [4] साधु पिबतस्स्वरसार्द्रपाति (क) साधु पिबतस्य रले रसार्थं (ख) [5] पि दास्यति (ख) [6] सू (ख) [7] ष्प (ख) [8] ष्णा (ख)

शक्राश्मतुङ्गकलशोऽग्रपिकस्तु यस्य
माकन्दमन्मथरथस्य मधुर्हि सूतः ॥

६७

ज्याबद्धपुष्पधनुषा समतामवाप
भृङ्गावलीमिलितपुष्पितमल्लिका च ।
शाखाभुजाग्रदलपाणितलाद्गृहीत्वा
[1]ता[1]मेव काम इव भाति नवाम्रभूजः ॥

६८

धूमं निपीय चिरमुग्रतपश्चचार
[2]मल्लीलता [प]तिमपे[2]क्ष्य र[3]साल[3]मस्याः ।
तत्सङ्ग[4][तौ म][4]धुमरुद्धलतो बभूव
पुष्पोद्गमात्प्रथम[5]मे[5]व वने रिरंसा ॥

६९

रागानुबद्धमधिकं कलकण्ठकान्ता-
चोचुम्ब्यमानमधिसंश्रितपल्लवश्च ।

---

[1] त्वा (ख) [2] या मल्लिका सतिरपे (क) मल्लीलता सतिमवेक्ष्य (ख)
[3] लास (ख) [4] तिर्म (क, ख) [5] ए (ख)

संवीक्ष्य संस्थितवतो विटपाभिधानं
युक्तं रसालशि[1]ख[1]रस्य मधुश्चकार ॥

७०

चूतः पलाशपिहिताङ्गशुकाननैः
सम्फुल्लकिंशुक इव प्रविभाति चान्यः
व्याप्तालिरात्तफलजम्बुरिवापरश्च
भास्वत्तमाल इव भूरिपिकप्रयुक्तः ॥

७१

पद्मानुषङ्गसुरभीकृतभानुरोचिः
उच्छिन्न[2]मु[2]विजचलद्दलकर्तरीभिः ।
वन्येन चान्धतमसा तरुमाश्रितं[3] तत्
म[3]न्ये मनोज्ञकुसुमं नवचम्पकस्य ॥

७२

वन्यान्ध[4]कार[4]तरुणार्कक[5]रौ[5]प्रकोपात्
अन्योन्ययुद्धकरणा[6]द्वय[6]सुतां प्रपन्नौ ।

---

[1] खि (ख) [2] मू (ख) [3] तं म (ख) [4] करार (ख) [5] रे (ख) [6] द्य (ख)

प्राप्तौ पुनर्भ्रमरचम्पकतां वनेऽपि
नो चेत्कथं तदुभयोरहि[1]त[1]प्रवृत्तिः ॥

७३

मौर्वीममेयमलिराजिरिदं विरुद्धं
अस्याः सदा कनकचम्पककुट्म[2]लं स्यात्[2] ।
इत्युत्सृजंस्तदपि चान्यलतान्तवाणान्
अङ्गीकरोति चतुरः स [हि] पञ्चवाणः ॥

७४

जात्या वियुक्तमिदम[3]द्य[3] पदैस्स्वकीयैः
आक्रम्य[4]य[4]त्सुमन[5][सश्च] रति[प्रतर्पात्][5] ।
मालिन्यशालि मधुमत्तमिति प्रकोपात्
उत्सारयत्यलिकुलं स्फुटचम्पकौघः ।

७५

सञ्जातस्व[6]नशिखर[6] [7]ध्वज[7]म[8]ध्यं[8]शाखा-
शु[9]ण्डो[9] रदद्वययु[10][तश्च][10]लपर्णक[11][र्णः[11]]

---

[1] तो त (ख) [2] लस्य (ख) [3] ध्य (ख) [4] यु (क) [5] साद्भतिप्रसेकात् (क) सां च रति प्रकोपात् (ख) [6] नसिबिर (ख) [7] द्वय (क) [8] द्य (ख) [9] ण्डा (ख)
[10] ता च (क) [11] र्णं (क, ख)

यस्यास्ति भृङ्गपटलावृतभूरुहोऽयं
पुन्नाग एव मकरन्दम[1][द]स्सम[1]रस्य ॥

७६

सञ्जान्म[2]मा[2]स्य मरुतः फलमुद्बभूव
पुष्पोदये सपदि वृत्तिर[तिः] कुतो मे ।
इत्थं विचिन्त्य मुकुलीकृतदीनवक्त्रा
चिन्ताभरेण नमितेव रराज रम्भा ॥

७७

पुष्पासवैः फलरसैर्भुवि पङ्किलायां
गत्वा पदाग्रगलनात्पतितां विलोक्य ।
हंसाङ्गनां प्रहसतीव पुरो विरेजे
भिद्यत्फलेन रुचिरेण च दाडि[3]मी[3]यम् ॥

७८

[4]गारुत्मतै[4]रपि शलाटुफलैर्द्विरेफैः
नी[5]लै[5]र्विभिद्य[द्रु]रुदाडिमपद्मरागैः ।

---

[1] धुस्म (क, ख) [2] म (ख) [3] मे (ख) [4] सरुक्मै (क) [5] तै (ख)

मल्लीलतां[1]तति[1]मौक्तिकराजिभिश्च
रत्नाकरेण तुलनां वनमाजगाम ॥

७९

आसीत्सरोरुहरजोऽन्वितवीचिरेखा
शक्रा[2]युधं ज[2]लपतत्रिरवोऽब्दघोषः ।
विद्युज्झषालिरपि तूत्प[3]ति[3]ता च यत्र
सेयं वनाब्दसदृशी सरसी बभूव ॥

८०

चक्रान्वितो हरिरिवाम्बरवत्सराज-
हंसस्सुराद्रिरिव सानिमिषाश्रयश्रीः ।
यक्षेन्द्रवन्मकरपद्मयुतोऽयमासीत्
[4]सङ्ग्रा[4]मभूरिव कबन्धशिलीमुखाढ्यः ॥

८१

पद्माश्रितोऽपि मधुभृत्कुमुदाश्रितोऽपि
कोकाञ्चितो विषधरोऽपि विभोगदेहः ।

---

[1] कुसुम (ख) [2] क्राचलो च (ख) [3] रि (ख) [4] त्सांगा (ख)

[1]क[1]व्याश्रितोऽप्यनिमिषप्रचयानुकूली
पद्माकरोऽत्र ददृशे वनमध्यसंस्थः ॥

८२

पङ्केजरेणुकपिशाङ्गरथाङ्गयुग्मं
[2]काश्मीरलिप्त[2] कुचयुग्ममिवारराज ।
वातोद्धतोर्मिचलनावृतपद्मप[3]त्रं[3]
तत्पार्श्वके हरितकञ्चुकवत्सरस्याः ॥

८३

पद्मेऽत्र सम्भवति यस्य हि पक्षपातो
नैवा[4]स्ति[4] जा[5][त्व]पि[5] लसत्कुमुदेऽस्य तस्मात् ।
हंसाभिधानमुचितं स च राजहंसो
नाम्ना बभूव हि 'विजातिषु को विवेकः' ॥

८४

मन्दं निवार्य नलिनीदल[6]वस्त्र[6]मस्याः
संस्पृश्य सैकतनितम्ब[7]त[7]लं सरस्याः ।

---

[1] का (ख) [2] कश्मीरयुक्त (ख) [3] द्मं (क) [4] स्मि (ख) [5]जात वि (क) जात पि (ख) [6] वार (ख) [7] क (ख)

संस्पृश्य कोककुचमम्बुरुहास्यविम्बं
चुम्बन्मृदुर्म[1]रुद[1]वाप भुजङ्गलीलाम् ॥

८५

पङ्केजपीठ[2]वसतां[2] वयसाम[3]पास्य[3]
बृन्दं चल[4][ज्झ][4]पदृशा परितो निरीक्ष्य ।
हंसस्य मञ्जुवपुषस्सरसी तरङ्ग-
दोष्कण्ठ एव दधती[5]व हि फेनमालाम्[5] ॥

८६

इत्थं प्रगल्भमधुराणि वचांसि [6]तस्याः[6]
[7]शृण्वन्विशांपतिरवेक्ष्य[7] तरून्प्रहृष्टः ।
[8][आदृत्य तां][8]प्रियवचोभिर[9][पा][9]ङ्ग[10]दानै[ः][10]
[11][रत्युत्सुकश्च] सुमनो[11]गृहमाजगाम [?] ॥

८७

[12]ह्रीवे[12]रभित्ति हिमकुट्टिममब्जपत्र-
चश्चद्वितानम[13]सि[13]तेक्षुवि[14]ट[14]ङ्करम्यम् ।

---

[1] धुमु (ख) [2] मवसां (ख। [3] वाप्य (ख) [4] झ (क, ख) [5] महिषेव मालां (ख)
[6] श्रुत्वा (ख) [7] भूपरंप्रमोदमवलोक्य (ख) [8] तामाद्रुतं (क, ख) [9] सा (क, ख)
[10] पादनै (क) [11] रत्युत्सुगंसुमनसो (क) रत्युत्सुगंधि सुमनो (ख)
[12] व्रीहे (ख) [13] श्चि (ख) [14] त (ख)

पुन्नागचम्पकवितर्दिं विभासिरम्भा-
स्तम्भाञ्चितं शिशिरमन्दिरमा[1]बभासे ॥

८८

कर्पूरचन्दनरसार्द्रतमालपत्र-
[2]यन्त्रा[2]म्बुदस्रुततुषारविराजमानम् ।
यूथीस[3]मा[3]स्तरणहैमसरोजपीठं
बध्वा सहात्र जगतःपतिरध्युवास ॥

८९

स्रष्टाऽब्जपीठमिव शारदया वरू[4]थं[4]
रत्या च पौष्पमिव पुष्प[5]श[5]रोऽधिरूढः ।
देव्या स पीठमधिरुह्य सहाचका[6]सीत्[6]
लोकेश्वरोचितरति[ः] प्रमदानुकूलः ॥

९०

सौरभ्य[7][मा][7]द्यदलिकौसुमतालवृन्त-
संवी[8]जि[8]तश्चतुरयोषिदुपान्तसे[9]व्यः[9] ।

---

[1] घ (ख) [2] यन्ना (क) [3] म (ख) [4] ढं (ख) [5] शि (ख) [6] स (ख)
[7] मो (क) यो (ख) [8] ज (ख) [9] वः (क, ख)

कान्तावलोकितमुखेन्दुरुदारसार-
गोष्ठ्यामतिष्ठदभिसम्पदपास्तशङ्कः ॥

९१

काचिद्विदग्धवनिता परिगृह्य वीणां
आरोहणादिसरसश्रुतिमूर्छनाभिः ।
गीतप्रबन्धमृदुराग[1]लयं[1] सरागं
वाणीव [2]वादि[2]तवती नृपतेः पुरस्तात् ॥

९२

शृण्वंस्तदीयरसगानमतिप्रतीतः
सम्राट् तदा सपदि शम्भुसमर्चनाय ।
सम्यक्प्रसूननिवहानयनाय वी[3]क्ष्य[3]
कान्ताकदम्बकमुदारमतिर्दिदेश ॥

[4]॥ मालिनीवृत्तम् ॥[4]

९३

अथकलरववीणाकर्णनानन्दसान्द्रः
सुतनुमुखशशाङ्कन्यस्तविद्युत्कटाक्षः ।

---

[1] य (ख) [2] ताडि (ख) [3] क्षन् (ख) [4] (क)

प्रथित कविकदम्बैस्सं[1]स्तुतः[1] स्फीतवाग्भिः
वसति शिवपदाम्भोजातचञ्चद्द्विरेफः ॥

इति सकलभुवनैकवल्लभनिखिललेखनायकनिकायसन्ततसमर्चित-
परम'शिवलिङ्ग'पादारविन्दषट्पदायमानलसदुभयकविता-
विशारद'श्रीषडक्षरिदेव'विरचिते 'चोलभूपालीये'
'कविकर्णरसायनाख्ये' महाकाव्ये 'वसन्तकेलीवर्णनं'
नाम नवमस्सर्गः ॥

---

[1] स्कृत (ख)

दशमस्सर्गः

१

अथ सलीलमनेकमृंगीदृशः चपकपुष्पकरण्डकराम्बुजाः ।
सुरभिसूचितमार्गमनुद्रुताः कुसुम[1]वा[1]टिमवापुर[2]दक्षिणाः[2] ॥

२

स्तननितम्बभरालसगामिनः कनकपङ्कजचारुकलाननाः ।
श्वसितसौरभपातिमधुव्रताः सस्रु[3]वु[3]रुत्सवशालिवधूजनाः ॥

३

कुचसुमस्तवकैस्स्मितकौसुमैः कचमदभ्रमरैः पदपल्लवैः ।
भुजलताभिरिवात्र वनश्रियः शुशुभिरे सुदृशो मदनोद्धताः ॥

४

[4]ल[4]स[5]दु[5]पान्तनिकुञ्जकुजव्रजप्रथमकीर्णकटाक्षकरो[6]द्र[6]माः ।
तदनु चिच्छिदुरु[7][द्र][7]मसङ्कुलं मधुसमृद्धसुगन्धिमृगीदृशः ॥

---

[1] वी (ख) [2] दीक्षणाः (ख) [3] षु (ख) [4] य (ख) [5] द (ख) [6] द्ध (ख)
[7] द्द (ख)

५

निजकचानुगभृङ्गविरोधि[1]तां[1] असहमानतयैव कराग्रतः ।
प्रसभतोऽ[2]प्यलुना[2]न्नव[3]चम्पक[3]प्रसवाम[4][त्त]कुचा[4]प्यलिकुन्तला ॥

६

स्मरश[5]र[5]त्वमुपेत्य हि बा[6]ध[6]ते
विरहिणीरिति का[7]ऽपि[7]रुपा वधूः ।
स्मितमुखं पुरतो नवमल्लिका-
कुसुममाशु चकर्त [8]नखाग्रतः[8] ॥

७

मदधरोपमताजनित[9]स्म[यं][9]किरति गन्धमिदं पुरतो मम ।
इति रुषेव वधूः स्मितपाटलीकुसुममा[10]श्वलुना[10]न्मधुराधरा ॥

८

कुटिलताऽसह[11]ना[11]दिव किंशुकं
सुमनसां पुरतः सुमु[12]खी[12] परा ।

---

[1] ना (ख) [2] दथनवं (ख) [3] पङ्कज (ख) [4] त्प च का (क), त्म कुचा (ख)
[5] नास्ति (ख) [6] ध्य (क) [7] पु (क) [8] नखांशुभिः (ख) [9] स्मया (क), श्रिया (ख) [10] नास्ति (ख) [11] सा (ख) [12] खे (ख)

करुरुहादपचित्य करे दधौ
मृ[1]ड[1]जटाऽरुणिता[2][र्ध][2]विधूपमम् ॥

९

परधूवपरिरम्भणकाङ्क्षिणः कुरवकस्य निपीडच शिखां प[3]राम् ।
यदकरोत्प्रसवोत्करखण्डनं समुचितं[4][नखरसु][4]दशस्त्विदम् ॥

१०

हसनरुग्जितमेतदपत्र[5][पं][5]
हसति[6][मां][6]पुर[7]त[स्त्वि]ति[7]रोषतः ।
सम[8]लु[8]नादिव काञ्चनयूथिका
कुसुमसैन्दवबिम्बनिभानना ॥

११

इयमभूद[9]पि[9] माधवसङ्गता
मधुपरागवती[10]किल[10] माधवी ।
इति रुषेव त[11]दुद्गम[11]सञ्चयः
पुन[12]र[12]लावि कयाऽपि[13][च][13] भामया ॥

---

[1] दु (ख) [2] र्द्र (क), र्थ (ख) [3] रा (क) [4] न खयोत्स (क, ख)
[5] पा (क), पां (ख) [6] मे (क), मीति (ख) [7] तस्त्वति (क), स्थित (ख)
[8] य (ख) [9] धि (क) [10] रिनय (ख) [11] माधव (ख) [12] द (ख) [13] क (क, ख)

१२

भवतु पल्लवकस्य सरागता सुमनसां तव साऽपि न साम्प्रतम् ।
युवतिरेवमशोकमुदीर्य सा तदुभयं प्रजहार कराग्रतः ॥

१३

लसदशोकनिकुञ्जनिगूहित
स्व[1]व[1]पुषः स्फुर[2]दा[2]स्यमराजत ।
तरुणपल्लवनिर्गतमैन्दवं
मिलित[3]सा[3]न्ध्यमिवोज्ज्वलमण्डलम् ॥

१४

पृथुलकुम्भकुचा[4]ऽल[4]स[5]गा[5]मिनी कुसुमराजिरजः परिधूसरा ।
त्रुटितचूतशिखाग्रदला बभौ स्मरकरेणुरिवालिसमाकु[6]ला[6] ॥

१५

कररुचा द्विगुणीकृतशोणिमस्फुरितपल्लवमादधती व[7]धूः[7] ।
व्यरुचदङ्गभवास्त्रमसृ[8][ग्युतं][8] विरहिणां दधतीव रतिस्स्वयम् ॥

---

[1] नास्ति (क) [2] द (ख) [3] स (ख) [4] य (ख) [5] या (ख) [6] लं (ख)
[7] धूं (ख) [8] क्षतं (क, ख)

१६

*[1]अ[1]नवयोद्गलितोद्गमालया
गलितकेशभरोधि[2]रपकुंजम्[2] ॥
तदप[3]ची[3]य नव प्रसते[4]द्युया[4]
त्यजति तामिव प[5]श्य[5]दिशो वभौ (?)

१७

ततमाललताधिरुहा स्त्रिया घनलसत्तटिदुज्ज्वलशोभया।
मदन[6]कोश[6]गताऽसिलतास्मृतिः [7]शृ[7]शमधायि विलोकयतां हृदि ॥

१८

अथ सरोवरमेत्य सरोरुहः स्वमुखसोमविरोधिधि[8]ये[8]व सा ।
प्रसभतो जघनाहतवीचिका कररुहाद[9]लु[9]नाच्चटुलेक्ष[10]णा[10] ॥

१९

अरुणपद्मधिया सितपङ्कजं कररुचाऽरुणितं समवेक्ष्य च ।
तदव[11][धी][11]र्य सितेक्षणकान्तिभिः मिलितमा[12][जगृहे][12] नलिनेक्षणा ॥

---

[1] आ (ख) [2] रपरिकुजं (क) [3] चे (क) [4] द्युभया (क) [5] ह्म (क)
* अस्फुटः । [6] शोक (ख) [7] भृ (ख) [8] यैं (क) [9] य (ख) [10] णः (ख)
[11] धा (क, ख) [12] ग्रहि (क), ग्रहिता (ख)

२०

निजविलोचननिर्जितमुत्पलं
    प्रगतमम्बु सभङ्गचयं वधूः ।
प्रसभतोऽप्यलुनात्किल 'योषितां
    विधिर[1][दादबले][1]ति सु[2][धा][2]भिदाम्' ॥

२१

यदपतत्स मरालख[3]गः[3] पुरा गतिविनिर्जित एव नतभ्रुवः ।
तदलकौघनवाभ्र[4]निरीक्षणात्[4] 'रिपुसमागमनं हि सहेत कः' ॥

२२

सर[5]सि[5] पूर्वगतामपि पद्मिनीं
    अलिरवाप्य नवागतपद्मिनीम् ॥
सरसमाप वधूमिह'नूतनां
    [[6]अभि][6]ल[7][ष] न्ति हि कामसमुद्धताः' ॥

२३

अपनुनोद मुखाम्बुजमावृतं भ्रमरपुञ्जतमः करपङ्कजम् ।
मृगदृशः कटकध्वनिगर्जितं 'कुलविरोधिनि कस्य सहिष्णु[8]ता[8]' ॥

---

[1] घाद्दइती (क), धाद्वयती (ख) [2] दा (क, (ख) [3] रः (ख) [4] रिपेक्ष्क (क)
[5] स (क) [6] खि (ख) [7] स (क, ख) [8] च (क)

२४

श्रम[1]जलार्द्र[1]वपुः कनकप्रभा
करधृता[2]म्बुरुहाऽ[2]ब्जमु[3]खी[3] दधौ ।
कमल[4]गे[4]हसमुद्गमितश्रियः
स्फुटमरन्दमिलद्वपुषः श्रियम् ॥

२५

द्रुमलतास्वखिला[5]स्व[5]पि योषितः
कुसुमसञ्चय[6]मेव[6]मुपार्जितम् ।
समुपवाह्य समुत्सवमानसाः
सविधमेत्य धराधिपते[7]र्ददुः[7] ॥

२६

अथ भुवःपतिरुद्गमसङ्कुलं समभिवीक्ष्य समुत्सवमावहन् ।
स्नपनमाशु विधाय समुत्थितः सितविभूतिशिवाक्षमणीन् दधौ ॥

२७

परमभक्तिसमाहितचेतसा विधिवदीशपदाब्जमिलाधिपः ।
विरचयन्नभजाद्विविधार्चनं सदशमात्मसमुन्नतसम्पदम् ॥

---

[1] निजार्ध (ख) [2] नास्ति (ख) [3] खे (ख) [4] दे (ख) [5] ष्व (ख)
[6] ये (ख) [7] र्वधूः (ख)

२८

शिवपदार्पितकौसुममालिकाः सह निजाङ्गनया धृतवान्नृपः ।
वनितया सम[1][मुद्रमभूषणं][1] धृतवतश्श्रियमात्मभुवो ययौ ॥

२९

प्रसवचेयभवश्रमवारिणा प्लुततनूरथ वीक्ष्य[2]वधूर्नृपः[2] ।
सलिलकेलिसमुत्सुकतां दधौ श्रितजनावनशीलवतां वरः

३०

स मदम[3][न्थ]र[3]यानव[4]धू[4]कुलैः तनुसुगन्धसमाहृतषट्पदैः ।
समसुपा[5]त्तरुचिः कमलाकरं समधिगम्य ददर्श धराधिपः ॥

३१

जलजचक्रलसद्घनमालया
महितमात्तसु[6][प][6]र्णविराजि[7]तम्[7] ।
अनिमिषाश्रितमुज्ज्वलितं श्रिया
वपुरिवाब्जदृशो व्यरुचत्सरः ॥

---

[1]भूषणमुद्रमं (ख) [2]वदन्नृपः (ख) [3] न्धम (ख) न्ध (क) [4] धूः (क)
[5] त्र (ख) [6] व (क, ख) [7] तः (ख)

३२

इषुधिरङ्गभुवो विधिमन्दुरा
यदव[1]रो[1]ध[2]गृ[2]हं वि[3]धु[3]भास्वतोः ।
वनरमामुकुरो मधुपप्रपा
क्षितिपतिस्तदभी[4]क्षि[4]तवान् सरः ॥

३३

हिमकरो[5]प[5]लसद्रु[6]चि[6]विस्फुर-
न्मकरिकाऽनिमिषेण [7]वि[7]रञ्जितम् ।
भ्रमरकाकलिकं सरदच्छविः
[8][स्फु][8]रति तत्र [9][वधू][9]मुखवत्सरः ॥

३४

त[10]ट[10]निबद्धमणिव्रजदीधितिः परिधिवद्रु[11]रुचे[11] परितस्सरः ।
विशदवारि शशाङ्कवदङ्कवत् सलिलमध्यगकैरवकोरकः ॥

३५

मरसकोक[12]स[12]को[13]क[13]न[14]दं सरज्ज[14]लविराजि विराजितमाबभौ ।
भृतमरालमरालतरङ्गकं मृदुसमीरसमीरणवत्सरः ॥

---

[1] लो (क) [2] द्द (ख) [3] धि (ख) [4] क्ष (क) [5] फ (ख) [6] द्रज (ख)
[7] नास्ति (क) [8] स्फु (क, ख) [9] सरो (क, ख) [10] टि (क) [11] चिरः (ख)
[12] न (ख) [13] नास्ति (ख) [14] दनन्दनज्ज्व (ख)

३६

सरसि बिम्बितशोणदृगञ्चलाः
श्रमवतोऽस्य [1][नृपस्य][1] च योषिताम् ।
स्मरशराः परिधौतुमिवाहिता
विरहिणां बभुरुद्रुधिरप्लु[2]ताः[2] ॥

३७

सरसि तत्प्रतिबिम्बकुलं पुरा सलिल[3]गाढ[3]मभीक्षितु[4]मु[4]द्यतम् ।
अविशदन्तरिवाशु मृगीदृ[5]शां[5] विलसति स्म विहारकृतेऽम्भसि ॥

३८

चलतरङ्गनियोजितपङ्कज
द्वयकृताञ्जलिपूर्वकमुत्थितम् ।
पवनतो विरुतिप्रणयोक्तिभिः
प्रियमिवा[6]श्व[6]करो[7]न्नृ[7]पतेस्सरः ॥

३९

सुरकरीव करे[8]णु[8]भिरन्वितः सपदि [9]तद्वनिताभिरिलाधिपः[9] ।
कनकशृङ्गधराभिरनुद्रुतः समविशत्सरसोऽन्तरमुत्सुकः ॥

---

[1] नास्ति (क, ख) [2] तः (क) [3] गन्ध (ख) [4] म (क) [5] शा (क)
[6] श्च (ख) [7] नृ (ख) [8] णि (ख) [9] रत्न तथाखिलदीपकाः (ख)

४०

[1]घु[1]सृणगैरिक[2][प]त्र[2]लतान्विता
नखरश[3]म्र[3]कृतक्षण[4][तापिताः][4] ।
मकरिकागरुतः कुचभूभृतः
प्रवि[5]विशुः[5] कमलाकरसागरम् ।

४१

मुखमृगाङ्कनिरीक्षणचन्द्रिका
ततमयादिव युक्तरथाङ्गकाः ।
विघटिताः कुचकुम्भपराजिताः
मृगदृशां पुरतः परि[6][दुद्रुवुः][6] ॥

४२

चलतरङ्गसमुत्पतदापतद्घनचलक्षणलीनतटिन्निभम् ।
झषकुलं [7]सु[7]दृशां दृशमीक्ष्य तज्जितमभूत्त्रपयेव तिरोहि[8]तम् ॥

४३

भुवनजातजि[9]त[9]स्सुदृशो दृशः कुवलयस्य जयेऽपि च का कथा ।
अनिमिषाऽभिभवोऽपि कृतस्तथेत्यति[10]श[10]याय न चात्र सरोवरे ॥

---

[1] घृ (ख) [2] रत्न (क), रत्र (ख) [3] ख (ख) [4] तोंछित: (क, ख) [5] शतुः (ख)
[6] दूद्रयोः (ख) दद्रुवुः (ख) [7] स (ख) [8] ताः (ख) [9] ता (ख) [10] स (ख)

४४

पृथुनितम्बनगौघविवर्धितः कमलषण्डसरोधिरराजत ।
मुखशशाङ्कनिरीक्षणतो ययौ सपदि वृद्धिमिवा[1]प्त[1]मृगीदृशाम् ॥

४५

*अ[2]धि[2] गभीरिमनाभिसरः श्रियं
चलतरङ्गकरात्कमलाकरः ।
यदभि[3]व्रीत्यमृतस्य[3] समाददे
तदभवत्सुदृशां कमलाकरः (?) ॥

४६

कुचत[4]ट[4]च्युतकुङ्कुमरेणुभिः
मिलितवीचिरवा[5]प[5] सरश्श्रियः ।
पुलिनपूर्णनितम्बवृतस्फुर-
त्कनकचेलरु[6]चिं[6] नृपयोषिताम् ॥

४७

कनक[7]शृ[7]ङ्गभृतं हिममिश्रितं वपुषि वारि मुमोच सचन्दनम् ।
निजकटाक्षरुचा सह भूभृतः सरभसं महिषी मधुरस्मिता ॥

---

[1] प (क) [2] भि (ख) [3] वित्यमृत्य (क) * अस्पष्टार्थः । [4] टि (ख)
[5] प्त (ख) [6] चं (क) [7] तु (ख)

४८

नृपतिरप्यथ वीक्ष्य निजाङ्गनां
प्रतिमुमोच पयो [1][घु][1]सृणा[2]वि[2]लम् ।
तदपि तत्कुचकुम्भयुगे स्फुर-
त्तरुणपल्लवसन्निभतां दधौ ॥

४९

कुचकुभृद्गतगैरिकनिर्झ[3]र[3]प्र[4]तिम[4]कौङ्कुमतोयकणाङ्कि[5]ता[5] ।
युवति[6]रो[6]मलतेव सपल्लवा नृवरचैत्रसमागमतो बभौ ॥

५०

इ[6]न[6]विमुक्तसकुङ्कुमशम्बरप्रविततातपतः सुमुखाम्बुजम् ।
विकचमास तदा मुकुलीकृतं दृगसिताब्जमरालतर[8]भ्रु[8]वाम् ॥

५१

कचभराम्बुमुचे स्फुटवृष्टितां
कुचमहीभृति निर्झरविभ्रमम् ।
वहति गुच्छरुचिं भुजवीरुधि
क्षितिभृताऽम्बुविमुक्तमथ स्त्रियाम् ॥

---

[1] घ (क, ख) [2] ति (ख) [3] रं (ख) [4] तति (ख) [5] तं (ख) [6] कों (ख)
[7] द (ख) [8] भ्र (ख)

५२

नृपविमुक्तज[1]ला[1]त् कुचकुङ्कुम[2]व्यपगते[2]ऽब्जदृशोऽत्र न[3]ख[3]क्षतिः ।
गलितसान्ध्यरुचावपराचले कलितचन्द्रकलावदलक्ष्यत ॥

५३

पृथुपयोधरपार्श्वपतज्जलं मृगमदाविलमा[4]प[4] समुज्झितम् ।
प्रणयिना[5]करि[5]कुम्भतटक्षर[6]न्म[6]दरसश्रियमब्जसदृग्दृशः ॥

५४

नृवरमुक्तमृगोद्भववारिणः कणगणाः परिवृत्य पयोधरम् ।
कन[7]क[7]पङ्कजकोशसमावृतभ्रमरविभ्रममब्जदृशो दधुः ॥

५५

[8]मुख[8]ममवाप मृगोद्भवधारया
स्थगितमुज्झितया जलयन्त्रतः ।
क्षितिभृताऽब्जदृशः सुरविद्विषा
सपदि चुम्बितचन्द्रमसश्श्रियम् ॥

---

[1] ता (ख) [2] त्यपदती (ख) [3] भि (ख) [4] स (क) [5] कुलि (ख)
[6] स्त (ख) [7] नास्ति (ख) [8] मभि (ख)

५६

विधुमयूखविलीनविधूप[1]ल[1]स्फुरितपुत्रिकया तुलनां दधौ ।
जनप्रमुक्त[2]स[2]चन्दनशम्बरस्नपितचन्दनलिप्तवपुर्वधू[3]ः[3] ॥

५७

हिमजलैरभिषिक्तवधूः परा सुरभिचन्दनलिप्तकलेवरा ।
प्रणयरोपसघर्मज[4]ला[4]विलद्रुहिणयोषिदिवाब्जमुखी बभौ ॥

५८

मलयजाम्बुनिषिक्तवपुर्नृपः विधुरिवा[5]ङ्ग[5]नया सितदीधितिः ।
मृगमदाम्बुनि[6]षेच[6]नतः [7]पु[7]नः विधुरिवांस तयाऽसितदीधितिः ॥

५९

सलिलकेलिकुतूहलतोऽब्जिनी मृगमदाम्बु करादिव सुभ्रुवाम् ।
व्यकि[8]र[8]दुत्पतितैरलिभिर्व[9]भौ उपरि[9] चापतितैर्नलिनाद्भृशम् ॥

६०

सलिलयन्त्रविमुक्तहिमा[10]म्बु[10]नः
कणगणान् गलतस्स्तनकुम्भतः ।

---

[1] नास्ति (ख) [2] स्व (ख) [3] नास्ति (ख) [4] ल (ख) [5] न्द (ख) [6] पीत (ख)
[7] घ (ख) [8] रि (ख) [9] भौ युविरि (ख) [10] य (ख)

त्रुटितहारगलन्मणिशङ्कया
स्पृशति मुग्धवधूर्निजपाणिना ॥

६१

विकलनादवतः सरसः पुरः
स्वकलनादकरत्वमसाम्प्रतम् ।
इति धियेव हि *[1]काञ्चि[1]पदाङ्गदे
मुमुचतुः स्वनमम्भसि योषितम् ॥

६२

सलिलकेलिगलन्मणिमेखलं पृथुनितम्बमुदीक्ष्य सरःश्रिया ।
कपिशपद्मरजोऽन्वित[2]वीचिकाकनककाञ्चिर[3]धायि[3] मृगीदृशः ॥

६३

जडनिषेवणतो दृशि रागिता भवतु नाम विचित्रमिदं द्वयम् ।
सरलता कुटिलालकसन्ततेः अधरपल्लवकस्य विरागि[4]ता[4] ॥

६४

तिलकपत्रलतापरिमार्जनं नृपवधूव[5]दनं सरसः[5]श्रिया ।
कृतमनेन मदास्यसरोरुहं जितमितीव तरङ्गकराग्रतः ॥

---

[1] काचि (ख) टिः—* काञ्चीतिपदं ह्रस्वत्वेन प्रयुक्तमत्र । [2] मी (क)
[3] याय (ख) [4] तु (क) [5] सार सर (ख)

६५

भृतवनेजवने जगतीपतिः सरसि कैरवकैरवभासिते ।
वनितया स तया सह खेलनं प्रवितताँन तता[1]नतसम्मदः[1] ॥

६६

अथ विनिर्गतसर्ववधूजनः स्व[2]ग[2]तशून्यतया कमलाकरः ।
हरिसमा[3]श्रि[3]तवस्तुकदम्बक[4]क्षुभि[4]तवार्धिसमत्वमुपाययौ ॥

६७

चलतरङ्गसमुद्गतपङ्कजभ्रम[5][विराजि][5] रराज सरश्श्रियः ।
प्रणयतः परिवीक्षितुमु[6]द्ग[6]तं मुखमिवाशु विनिर्गतयोषितः ॥

६८

घनगल[7]ज्ज[7]लसिक्तमयूर[8]वत् क[8]चभरोऽञ्जदृशोऽम्बुयुतस्स्थितः ।
लसति तन्मुखदष्टभुजङ्गवत् समभिलम्बितशैवलवल्लरी ॥

६९

सरसिजातरसं बहुशः पिबन् अलिगणः करपीडनतः स्त्रियाम् ।
निभृतमुद्गिरतीव कचोत्करः परिगलत्सलिलैस्समदृश्यत ॥

---

[1] ररन्नसंमरः (ख) [2] द् (ख) [3] श्र (ख) [4] स्फुरि (ख) [5] र राशि (क, ख)
[6] ध्द्ट (ख) [7] ज्ज (ख) [8] वान् क (ख)

७०

तटगतागतकर्भ[1]व[1]दूर्मिका स्वकनिवास[2]विनिर्गम[2]दङ्गनाः ।
अनुगमागमकृत्यविधायिनी सह विहाररसादिव राजते ॥

७१

त[3]ट[3]लस[4]त्सु[4]दशाञ्चलकेकरप्रसरदंशुरुदात्तसरश्रिये ।
प्रणयदत्तमिवाम्बर[5]माबभौ[5] सपदि तद्वनिताभिरिलेशितुः ॥

७२

सरसि सलिलक्रीडामेवं निवर्त्य महीपतिः
सपदि निहितं कोशाध्यक्षैस्सुवस्त्रविभूषणम् ।
युवतिनिवहैस्साकं [6][धृ][6]त्वा पृथक्पृथगन्वितः
पृथुलविभवस्ताभिस्त[7][स्थौ][7] मनोज इवापरः ॥

७३

प्रयच्छ[8]न्नर्थौ][8]घं सपदि वनपालाय स पुनः
वसुव्रातैः कुर्वन्विबुधमनसस्तृप्तिमधिकाम् ।
सखीभिस्सम्प्रेष्य प्रथममबलां भूरिविभ[9]वः[9]
करीन्द्रारूढस्सन् पुरमधिययौ चोलनृपतिः ॥

---

[1] म (ख) [2] टिः—— विनिर्गच्छत् इति पाणिनीयम्। [3] टि (क) [4] त्स (क)
[5] बद्बभौ (क) [6] द (क, ख) [7] स्थे (क, ख) [8] र्ना दौं (ख) [9] वं (ख)

इति सकलभुवनैकवल्लभनिखिललेखनायकनिकायसन्ततसमर्चित-
परम'शिवलिङ्ग'पादारविन्दषट्पदायमानलसदुभयकविता-
विशारद'श्रीषडक्षरिदेव'विरचिते 'चोलभूपालीये'
'कविकर्णरसायनाख्ये' महाकाव्ये 'जलक्रीडावर्णनं'
नाम दशमस्सर्गः ॥

एकादशस्सर्गः

१

सर्वसैन्यसहितः क्ष्मापतिः पश्यतां पथि ययौ कृतोत्सवः ।
मौलिरत्नघृणिचित्रिताम्बरः स्फारतूर्यरवपूर्णदिक्तटः ॥

२

तेजसैष जयति स्म मां पुनः स्पर्श[1][नेन][1] तनयं समेति च ।
ह्रीभरादिव रविः स्वयं तदा मन्ददीधितिरभूदधोमुखः ॥

३

भानुरेष मम वल्लभागृहं रञ्जयन्निति पयोधिशायिना ।
पीतवासं इव दत्तमुज्ज्वलं भाति सान्ध्यरुचिरस्य शालिना ॥

अन्धकारदितिजं विदार्य तद्रक्तसिक्तमुप[2][ग][2]त्य चक्रिणः
पश्चिमाब्धिशयितुः पुरस्स्थितं भाति चक्रमिव लोहितो रविः ।

---

[1] नं (ख) [2] द (ख)

५

अस्तमेत्ययमिनः पुनस्तमः तस्करः पट्टरि[1][तस्स][1]मेष्यति ।
इत्युपात्तभ[2][यमञ्जि][2]नी श्रियः गेहमाशु पिदधे निजाम्बुजम् ॥

६

वार्धिवारिणि ममज्ज भास्करः पद्मिनीविरहतापविह्वलः
साऽपि तस्य विरहाग्निपीडिता पद्मषण्डसलिले निषीदति॥

७

पद्मिनीपति[रु]पेत्य वारुणीं सेवते स्वयमितोऽपि सा पुनः ।
श्लिष्यतीति मधुपं कुमुद्वती सस्मितेव विकचोद्गमैर्बभौ ॥

८

दीप[3][ए][3]व [4][मिहिरोऽभ्रपात्रगः स्ने][4]हवर्धितरु[5][चि][5]र्दिनश्रिया ।
सान्ध्यरागव[6][स][6]नाञ्चलाञ्चिशा तं जहार शशिसङ्गमोत्सुका ॥

९

पश्चिमाद्रिशिखराग्रवङ्गनात् लोकचक्षुरभवत्किलारुणम् ।
तत्प्रसादयितुमभ्रविष्णुना कूलमञ्जनमिवाभवत्तमः ॥

---

[1] ह (ख) [2] याञ्जनी (ख) [3] ये (ख) [4] वनराभ्रपत्रगस्ने (ख)
[5] चे (ख) [6] श (ख)

१०

कालाचैत्रसमये समागते सान्ध्यरागनवपल्लवान्विते ।
व्योमकुञ्ज इव जातकोरकाः तारकास्समुदिताश्चकाशिरे ॥

११

पूर्वम[1][र्क][1]मपनुद्य सान्ध्यरु[2][ग्वह्निदग्ध][2]गगनक्ष्मातले ।
[3][लाङ्गली][3]कृततमस्युडुव्रजं कालशूद्रततबीजवद्बभौ ॥

१२

सान्ध्यरागविहगाधिपक्रमात् गन्तुमुत्थित[4][वतो][4] महाबिलम् ।
पूर्वदिग्गिरिफणाभृतः फणा स्थूलरत्नमिव भाति चन्द्रमाः ॥

१३

पश्चिमाब्धिसलिले निमज्जनात् [5]उ[ष्ण][5]तापचय[6][मा][6]प्य भास्करः ।
[7][शीतगु][7]स्स्वयमसाविवाबभौ चन्द्रमाः पुनरमन्दलोहितः ॥

१४

सान्ध्यरागवसनाञ्चलान्निशाऽर्यचन्द्रकुचमङ्कचूचुकम् ।
पश्यतश्चलचकोरबालकान् चद्रिकामृतरसैरतर्पयत् ॥

---

[1] कर (ख) [2] द्वह्निदद (ख) [3] हले (ख) [4] परो (ख) [5] ष्ट (ख)
[6] म (ख) [7] श्रीगत (ख)

१५

व्योमलिङ्गपदमीक्षितुं तमःपोत्रिकाकृतिविधावधोगते।
शीर्षमस्य हि दिदृक्षुरुत्पतन् हंसरूप इव भात्यजो वि[1][धुः][1] ॥

१६

व्योमलिङ्गमभि[2][पिच्य][2] चन्द्रिकापाथसाऽर्च्य भगणामलोद्गमैः।
[3][मेघ ?][3]धूपविधुरौप्यपात्र[4][कं न्यस्यति स्म निभृतं][4] क्षमावधूः ॥

१७

कालशूलिवपुरर्धसङ्ग[5][तेः][5] साङ्गरा[6][गम][6]गराट्तनूभुवः।
लक्ष्म नीलमिव मैक्तिकाञ्चितं कुण्डलं लसति चन्द्रमण्डलम् ॥

१८

व्योमतामरसलोचनोरसि श्रीमुखाब्जमिव लक्ष्यते शशी।
चिह्नमस्य मृगभूललाम[7][कं][7] नेत्रकान्तिरिव सान्द्रचन्द्रिका ॥

१९

चन्द्रचन्द्रमणिकुम्भसम्भृतं चन्द्रिकाम्बु गगनप्रपातटे।
यामिनीकरविमुक्तमुद्गतं तृप्ति[8][दं][8] चलचकोरपक्षिणाम् ॥

---

[1] धिः (ख) [2] षेक्श्य (ख) [3] यक्ष (ख) [4] क व्यस्य सन्निभृतं (ख) [5] त (ख)
[6] न (ख) [7] के (ख) [8] मोच (ख)

२०

चन्द्रचन्द्रमणिदर्पणे निशा बिम्बितात्मवदनेऽतिमाद्य[1][ती][1] ।
यच्चकार मृगभ्रूललाम तत्प्राहुरङ्क इति मन्दबुद्धयः ॥

२१

ऋक्षशङ्खमणिकालगारुडस्थापितस्फटिकपेटिकोदितः ।
कृष्णसर्प इव [2][दृश्यते][2] विधोः लक्ष्म कल्मषपरिवेषमण्डलम् ॥

२२

*चञ्चलोऽपि (?) रजनीचरो विधुः द्वेष्यमाणकमलोऽपि चन्द्रमाः ।
भूत[3][लो][3]पकृदपि ग्रहाग्रणीः सप्रदोषरुचिरप्यतामसः ॥

२३

तिग्मभानुमहसा महियसा तत्त्रभूरिभुवनस्य वेधसा ।
चन्द्रिकार[4][चि][4]तचन्दनाद्वपुः लिप्यवत्परित [5][ए][5]व दृश्यते ॥

२४

भानुरेष सुषुवे कलिन्दजां [6][इ][6]त्यमर्त्यतटिनीमसूयया ।
चन्द्रिका[7][च][7]यत [8][ए][8]व सूतवान् सिन्धु'रन्यविभवं सहेत कः' ॥

---

[1] तः (ख) [2] द्रस्यती (ख) * अन्यार्थस्तवस्फुटः [3] लो (ख) [4] जि (ख)
[5] ये (ख) [6] म (ख) [7] च्च (ख) [8] ये (ख)

२५

एवमुज्ज्वलकरे सुधाकरे ज्योत्स्निकाविहरणोत्सुको नृपः ।
वी[1][थि][1]मेत्य पथि वारयोषितां पर्यपश्यदबलास्सभावृतः ॥

२६

[2][निक्क][2]णत्कटककाञ्चिनूपुराः [2][खे][2]लनाब्जपरिधूतषट्पदाः ।
मन्दयानमहिताः पणस्त्रियः चन्द्रिकाविहरणोत्सुका ययुः ॥

२७

मन्दहासनयनाञ्चलप्रभा निन्दि[4][ते][4]न्दुरुचिरुन्नतस्त[5][नी][5]
स्वर्णचेलरुचिरा नितम्बिनी द्वारसंस्थितवती [6][व्य][6]राजत ॥

२८

तीव्रनिश्श्वसितकम्पि[7][ताधरा][7]*अजितामणिश्लथाम्बरा (?)
काचनारुणदगञ्चलीचलत्पीवरोरुरबला समीक्षिता ॥

२९

भूमिकासु मणिहर्म्यसंहतेः भूरिशः पणनितम्बिनीजनाः ।
[8][प्री][8]त्यधीतमदनागमाः परे केऽ[9][पि][9] तस्थु*रुपनीतसत्तमाः (?) ॥

---

[1] धि (ख) [2] निरीक्ष (ख) [3] चे (ख) [4] रे (ख) [5] ना (ख) [6] वि (ख)
[7] तक्षत (ख) * अस्फुटार्थः छन्दोभङ्गश्च [8] ए (ख) [9] प (ख) * अस्पष्टः

३०

पद्मसु[1][ज्ज्ञ][1]ति सुधामहस्त्विषं विद्युतं किरति मीनयोर्युगम् ।
इत्युदीक्ष्य मुखमम्बकं स्त्रिया[2][:][2] मन्वते सरुचि हर्म्यके ज[3][ना:][3] ॥

३१

[4][स्व][4]त्रिभङ्गिवपुरात्तमण्डना मत्तवारणतटाभिसंस्थिता ।
वा[5][दि][5]नी कुचनिविष्टवल्लकी [6][ह्या][6]चकर्ष युवह[7][न्यहर्निशम्][7] ॥

३२

श्रोतुमेतदबलाऽभिवादितं वैणिकध्वनिमदृश्यत स्वयम् ।
निम्ननाभिवि[8][वरात्स][8]मुद्गतः [9][श्यामसर्प][9] इव रोमवल्लरी ॥

३३

*धूपिता च धोरणेतनुर्भूपणै (?) ....
साध्वसंकुतमधीरचक्षुषा वल्लभागमनकाङ्क्षया कया (?) ॥

३४

अन्ययोपिदुपभोगजक्षतं कान्तमीक्ष्य गृहमागतं क्रुधा ।
सोष्णनिश्श्वसितपाटलेक्षणा सन्ततर्ज कुटिल[10][स्फुर][10]द्भ्रुवा ॥

---

[1] च्च (ख) [2] नास्ति (ख) [3] न: (ख) [4] स (ख) [5] धि (ख) या [6] (ख)
[7] न्महार्निशं (ख) [8] वरात्त (ख) [9] स्यमर्प (ख) * अस्फुट: असमग्रश्च
[10] स्फुश (ख)

३५

मुञ्च मानमिति वादिनि प्रिये साश्रु मुञ्चति कराम्बुज[1][ग्र][1]हे ।
कुप्यति स्म हसति स्तनस्पृ[2][शे][2] क्लिष्यति स्मरति नाङ्गमङ्गना ॥

३६

दृश्यते [3][च][3] जघने घनाघनः चन्द्रकारचितनव्यविभ्रमम् ।
अङ्ग[4][मे][4]ष्यति ममाद्य नाथ इत्याह जातपुलकाङ्कुराञ्चि[5][ता][5] ॥

३७

सान्त्व[6][नाभि][6]रपनुद्य मे रुषं तल्पभा[7][क्प][7]तिरिहावधीरितः ।
निर्गतस्सखि मुधा मयाऽतनोः दुस्सहास्त्रमधुना कथं स[8][हे][8] ॥

३८

स्वप्नचित्रपट[9][तो]ऽ[9]पि [10][हि][10] प्रियं
दृष्टुमिच्छति वियोगिनीजनः ।
तौ विनाऽपि विर[11][हेऽद्य][11] दृश्यते
सर्वतस्सखि म[12][या][12] मनोर[13][मः][13] ॥

---

[1] ग्र (ख) [2] श (ख) [3] नास्ति (ख) [4] मि (ख) [5] तं (ख)
[6] निभ (ख) [7] क्ष (ख) [8] हि (ख) [9] या (ख) [10] वि (ख) [11] ही व्य (ख)
[12] नो (ख) [13] मे (ख)

३९

स्वप्नदृष्ट[1][प][1]तिवत्पुराऽभवत् त[2][त्पतिस्स][2]खि ममाद्य जागरे ।
साधु दृष्ट इव सर्वतोऽप्यभूत् स्वप्नदृष्टपतिरद्भुतन्त्विदम् ॥

४०

चन्द्रिकाऽपि शिशिरा मरुन्मृदुः कन्तुरेष गतरोषसम्भ्रमः ।
आगते प्रणयिनि स्फुटं भवेत् तं ततः सखि समानयाद्य मे ॥

४१

इत्युदीरितवचो निशम्य सा नेतुरेत्य सविधं स्मराशिना ।
तप्तनीलनिभहारमौक्तिकं क्षिप्तवत्यथ जगाद तद्दशाम् ॥

४२

मन्दराग[3][सदृशा[3] मनोम्बुधिः क्षुब्ध एव चलते हि जीवनम् ।
अप्यनन्तगुणवत्तया महानर्थ एव भवता भविष्य[4][ति][4] ॥

४३

चन्द[5][नं त्वहिगराभिशङ्कया नेहते][5] [6][शिखिशिखे][6]ति पल्लवम् ।
शङ्कमार्गणधिया च [7][कौ][7]सुमं कामिनी त[8][व][8]वियोगविह्वला ॥

---

[1] र (ख) [2] द्रती स (ख) [3] सुदृशो (ख) [4] ते (ख) [5] नात्तशिखराभिशङ्कया नेहतीं (ख) [6] शिखिन्चिचे (ख) [7] का (ख) [8] त (ख)

४४

यूथिकाकुसुमतल्पशायिनी केशपाशमिलिता वियोगिनी ।
दृश्यते फणिपतल्पशायिनी श्रीरिवाच्युतवपुस्समन्विता ॥

४५

कामशास्त्रकुशला भवत्प्रिया ह्यागमं तव विलोकयत्यसौ ।
योगतो रहसि सौख्यमीहते तापहारि कुरुते तपस्ततः ॥

४६

इत्युदीर्य चतुरा सखी प्रि[1][यं][1] सार्द्रचित्तमनयत्तदन्तिकम् ।
वीक्ष्य चन्द्रमिव तं कुमुद्वती मुक्ततापमुराप सा मुदम् ॥

४७

प्रेमनिर्भरकृतोपगूहनं स्विद्यदङ्गपुलकं मृदुस्मितम् ।
चुम्बितोष्ठमधिकण्ठनिस्वनं जातसौख्यमभवद्रतं तयोः ॥

४८

योषिदो[2][ष्ठ][2]शशभृत्कलासुधां [3]प्राप्ति हन्त][3]तरसा भुजङ्गमः ।
इत्यनङ्ग[4][रिप][4]वे निवेदितुं कूजतीव जल[5][जो][5] गलस्व[6][नैः[6]] ॥

---

[1] यां (ख) [2] ष्टू (ख) [3] पत्तिहन्त (ख) [4] जम (ख) [5] जं (ख) [6] नः (ख)

४९

*तीव्रनिश्श्वसितमुत्किरत्कचं ताभ्यदङ्गमरुणाक्षिकुट्मलम् ।
.... सतित्रियास्त्रियाः तंभजरदनखक्षतोद्भवम् (?) ॥

५०

ने[1][त्र][1]सिंहकरजाग्रनि[2][र्द][2]लत्पीवरस्तनगजेन्द्रकुम्भतः ।
कीर्णमौक्तिकगणा इवाबभुः स्वेदवाष्कणगणा नतभ्रुवः ॥

५१

सुभ्रुवोऽधरदले [3][च तादृशः[3] कान्तदन्तहतिजातकालिमा ।
सान्ध्यरागमिलिते विधौ नवे राहुदन्तकिणवद्विभाव्यते ॥

५२

योषितस्स्तनसरोजकुट्मलं मा भवत्विह विकासि जात्विति ।
न्यस्तबालविधुवद्विराजते तत्र कान्तकरजातलाञ्छनम् ॥

५३

कान्तमीक्ष्य परकामिनीकुचालिप्तकुङ्कुमरसाङ्कितोरसम् ।
रोषलोहितदृगंशुकुङ्कुमात् काऽपि योषिद[4][किर][4]त्पुनः प्रियम् ॥

---

* अस्पष्टाभिप्रायः [1] त्र (ख) [2] र्ग (ख) [3] रद दशा (ख) [4] पिब (ख)

५४

*कामतोऽहमभियामि गच्छ[1][तात् मे प्रियं च][1] भवतीदृशं त्विदम् ।
अन्यतो मम रतिर्नवा प्रि[2][यात्][2] ज्ञाय[3][ते][3] वदसि किं पुनःपुनः ॥

५५

तीव्रनिश्श्वसितमस्ति चाम्ब[4][के][4] शोणिमा वपुषि घर्मबाष्कणः ।
अत्र[5][पः][5] कुत इहागतस्त्वमित्याह सागस[6][मि][6]नं मृगेक्षणा ॥

५६

पाणिजक्षत[7][दि][7]दृक्षुरुत्कुचे स्वर्णरोचिषि तदाऽऽगतस्य च ।
प्रेयसः प्रतिपदं निरीक्ष्य सा श्लिष्यति स्म तरुणी समुत्सुका ॥

५७

चुम्बनार्पितमुखापि नेक्ष[8][ते][8] तद्गृहीतसुकुचापि वेपते ।
मोहजातपुलकापि लज्जतेऽमध्यमा श्लथदुकूलमध्यमा ॥

५८

* वर्षसारगलितं गवेषितुं रत्नकङ्कणमिव स्वतल्पगम् ।
सुप्तमाहितकरा वियोगिनी तत्र वीक्ष्य परिरभ्य मोदते (?) ॥

---

* अस्फुटाभिप्रायः ।   [1] तां मे प्रियेव (ख)   [2] य (ख)   [3] ती (ख)   [4] की (ख)
[5] पी (ख)   [6] म (ख)   [7] मि (ख)   [8] ती (ख)   * अस्फुटाशयः ।

५९

कुञ्चिताग्रकुचहारमुल्लसन्मन्दहासभनि[1][मे][1]पवी[2][क्षणम्][2] ।
कर्णपूरमिलितांसमञ्जसा प्रेक्षते स्म कृति[3][नं][3] कमङ्गना ॥

६०

[4][सस्मर][4] स्मयविलोललोच[5][नां][5] भ्रूविलासमृदुहासभासु[6][राम्][6] ।
मत्सुतामयमवेक्ष्य कः पुमान् कामतीक्ष्णविशिखैर्न हन्यते ॥

६१

पुत्रिकाऽत्र धनदाशयाऽन्विता हैमराशिरत एव लभ्यते
दुर्भगत्वपरितापशान्तये साधु साध्वि[7][ति][7] जनन्यनन्द[8][य][8]त् ॥

६२

यानि चाटुवचने पराङ्मुखी पार्श्वभा[9][जि][9] परिहाय निर्गता ।
चेष्टितं तव किमेतदित्यलं स्वात्मजां पणवधूरतर्जयत् ॥

६३

सस्पृहं स्मितसुधाभिदर्शने
[10][त्वामुपैति[10] च भुजङ्गसञ्चयः ।

---

[1] वे (ख) [2] क्ष्यकं (ख) [3] नां (ख) [4] संस्मर (ख) [5] नं (ख) [6] रं (ख)
[7] नास्ति (ख) [8] ये (ख) [9] जि (ख) [10] तामुपेत्य (ख)

स प्रयाति विमु[खी] यदा स[1][खि
त्वत्क][1]चौवशिखि[2][दर्शनेऽ][2]न्यतः ॥

६४

चुम्बने सुमुखि नासिकामणिं प्रार्थय स्तनकरार्पणे प्रियम् ।
हारसंशुकनिकर्षणे रणन्मेखलामिति सुतामशिक्षयत् ।

६५

तुङ्गहर्म्यनिवसद्वियोगिनीसोष्णनिश्श्वसितजातकालिमा ।
दृश्यते वपुषि शीतरोचिषः तं कलङ्कमबुधा वदन्त्यहो ॥

६६

आननेन्दुनयनाब्जलत्त्विषा कामितापकर[3][णात्त][3]दोषतः ।
तापमाप विरहे विधोस्त्विषा कापि 'कर्म खलु भुज्यते [स्वयम्]' ॥

६७

*योषिदक्षिरुचिचन्द्रमस्त्विषा सार्द्रचन्द्रमणिदर्पणः करे
तन्मु[4][खा][4]ब्जजित एव साध्वसात् पीलमेव (?) रुरुचे पणस्त्रियः ॥

---

[1] खी तत्कु (ख) [2] दृश्यते (ख) [3] णोथ (ख) * अस्फुटः [4] खो (ख)

६८

पाटलीप[1][तदलि][1]द्द्युतिर्बभौ पण्ययोषिदधरस्थकालिमा ।
विद्रुमस्थगितनीलवत्पुनः किञ्च सान्ध्यतरुणेन्दुलक्ष्मवत् ।

६९

तापतप्ततृषि[2][तोऽ][2]क्षिचातकः [[3]तन्वि ! मेऽद्य सुचिरादुपोषितः][3]
[4][त्र][4]सिमेति खलु ते पयोध[5][रे][5] स्फारदीधितिरसप्रपान[6][के][6] ॥

७०

*दर्पणप्ररुचि व श्रियाश्रितस्त्रीमुखाब्जमिव रोगुणान्वितः ।
मे प्रियोऽस्य विरहे हि सम्भवेत् पारवश्यमिति चाह धूर्तिका (?)

७१

चक्रविभ्रमलसत्कर[7][:][7] क्षमाभृत्समस्तव पुरा मुरारिवत् ।
कामकारणमभूत्कुतः कुचस्त्वच्युतत्व[8][मय][8]मद्य नाश्रितः ॥

७२

दक्सितत्वमलके व[9][लिर्मुखे][9]
त्वत्कुचे [10][सु][10]तनु ! मार्दव[11][न्त्विदम्][11]

---

[1] दतल (ख) [2] ते (ख) [3] तन्वि मंध्यरुचिरात्सुपोषितं (ख) [4] स्त्र (ख)
[5] रः (ख) [6] कं (ख) * अस्पष्टाशयः [7] नास्ति (ख) [8] मिद (ख)
[9] कामुके (ख) [10] ·तु (ख) [11] श्रियं (ख)

का[1][म][1]नीतिरुचिता कथं त्वयी-
त्याह वृद्धगणिकां विदूषकः ॥

७३

नारदस्त्वमधुनाऽऽगतस्सदा विग्रहोदितरुचिश्चरा[2][ग्र][2]णीः ।
[3][सा][3]म[4][गा][4]मपरिवादिनीं कुतः कर्तुमुच्चलसि मां स्वरागतः ॥

७४

वारिदोपलसितद्युतिः कचः ते ममाप्यतनुसौष्ठवस्थितिः ।
ऊर्मिकावलिरहो समा तथाप्य[5][द्य][5] वृद्ध ! न रतिर्मम त्वयि ॥

७५

इत्युदीर्य परिहासपूर्वकं वृद्धमुज्झितवती पणाङ्गना ।
तत्प्रदर्शकविदूषकोक्तितः सस्मितो नृपतिरग्रतो ययौ ॥

७६

वल्गदुत्कुचभरा चल[6][त्कचा][6] गण्डताण्डवितरत्नकुण्डला ।
काचन प्रहतक[7][न्दु][7]काऽबला भाति [8][सो][8]परति[9][वि][9]क्रियेव सा ॥

---

[1] मि (ख) ? इति स्याद्वा । [2] णि (ख) [3] ना (ख) [4] हा (ख) [5] द्य (ख)
[6] त्कुजा (ख) [7] न्तु (ख) [8] जो (ख) [9] नास्ति (ख)

७७

मत्समत्वमदवान्प्रताड्यते क[1][न्दु][1]कः करतलादिति स्त्रियः ।
हारकान्तिमिषतो हसन् भृ[2][शं पश्य][2]तीव ददृशे चलत्कुचः ॥

७८

लोलांशुकाञ्चलचलत्कुचतारहार-
विभ्राजिता करगृहीतसुवर्णरज्जुः ।
चञ्चन्नितम्बकलकाञ्चिकलाभिरामा
डोलाविहारमकरोद्वरवारबाला ॥

७९

पाश्चात्यभागमवलोकयताञ्च दृग्भिः
उत्सर्पितेव परमूर्ध्वगता जनानाम् ।
दोलाधिरूढरमणी पुनरा[3][त्तदृष्टिः][3]
[4][मा][4]लेव तूर्णमवतीर्णवती मनोभिः ॥

८०

*आन्दोलिकोर्ध्वगमनेन विधुं विजित्य
वक्त्रेण चैणमपि तद्गतमम्बकेन ।

---

[1] न्तु (ख) [2] शस्त्रस्य (ख) [3] त्सकृष्टि (ख) [4] मा (ख) * आस्मिन् क्रियापदं न दृश्यते ।

स्मेरांशुना रुचिमसाववतीर्यमाणा
भूयस्तदा सुनयना सुभगाऽऽननश्रीः ॥

८१

कान्ताकुचान्तररतश्रमवारिधारा-
हारापहारचतुरः कुमुदात्तगन्धः ।
चन्द्रोपलस्नुतपयःप्लवजात[1][के][1]लिः
इन्दिन्दिरैस्सह ययाववलस्समीरः ॥

८२

इत्थं त[2][दा][2] बहुविधं गणिकाविलासं
आलोकयन् सहचरैस्सहभाषमाणः ।
शृण्वंस्तदीयचतुरोक्तिमतिप्रतीतः
साम्राट् प्रसन्नवदनो पुरतः प्रतस्थे ॥

८३

अथ सखिनिकुरुम्बं प्रे[3][म][3]तः प्रेषयित्वा
स्वकभवनमुपेत्य प्रेयसीसङ्गताङ्गः ।

---

[1] का (ख) [2] था (ख) [3] य (ख)

मृदुलधवलतल्पे सौख्यसञ्जातनिद्रः
क्षितिपतिरुपतस्थे शम्भुसम्बन्धचेताः ॥

इति सकलभुवनैकवल्लभनिखिललेखनायकनिकायसन्ततसमर्चित-
परम'शिवलिङ्ग'पादारविन्दषट्पदायमानलसदुभयकविता-
विशारद'श्रीषडक्षरिदेव'विरचिते 'चोलभूपालीये'
'कविकर्णरसायनाख्ये' महाकाव्ये 'चन्द्रिका-
विहारवर्णनं' नाम एकादशस्सर्गः ॥

द्वादशस्सर्गः

१

अथ स प्रभातसमये महीपतिः
मृडमुख्यनाममुखरस्समुत्थितः ।
वरवन्दिवृन्दनिनदैस्सुगन्धभृ-
त्सलिलाभिषेकमकरोदतन्द्रितः ॥

२

सितभस्म धार्य विधिवद्विधानवित्
मृडचक्षुरु[1][त्थ][1]मणिमालि[2][काः][2] वहन् ।
परिशुद्धदेशसुखविष्टरस्थितः
शिवभावमाप शिवमन्त्रतत्परः ॥

३

सकलं हृषीकमवरुध्य चासुभिः
सह भाव्यभावमवमत्य निश्चलः ।

---

[1] द्ध (ख) [2] कां (ख)

दहराब्जमध्यगतमण्डलाग्रगं
स[1][स][1]पश्यदर्कशतरोचिषं शिवम् ॥

४

निरवद्यमाद्यमतुलं चिदात्मकं
परिपूर्णमेकमजडं जगत्प्रभुम् ।
निजशक्तिक्लृप्त[2][चि][2]दचित्प्रपञ्चकं
हृदि लिङ्गरू[3][प][3]मभजन्महीभुजः ॥

५

स्नपनं विधाय [4][श][4]मवारिणा पुनः
परिपूर्णभाववसनं समर्पयन् ।
निनदादि पुष्पचय[5][मा][5]थ तत्परः
परबोधगन्धमनुलेपयन् नृपः ॥

६

ददक्षतांश्च क[6][र][6]णात्मकान्बहिः
विषयप्रपञ्चलयधूपमर्पयन् ।

---

[1] नास्ति (ख) [2] क्लृ (ख) [3] नास्ति (ख) [4] हि (ख) [5] ना (ख) [6] रु (ख)

ज्वलिताण्डवर्तिपरदीपमुद्वहन्
विमलात्मरूपमुपहारमर्पय[1][न्][1] ॥

७

सगुणत्रयात्मशुभवीटिकां दिशन्
मुहुरीश्वरोऽहमिति च प्रदक्षि[2][णम्][2] ।
व्यतनोत्तदेकरसभावचन्दनं
कलयंस्तदेवम[3][यज][3]त्स[4][माहि][4]तः ॥

८

अथ हस्तपीठगतमिष्ट[5][मीश्वरं][5]
पर[6][भ][6]क्तियुक्तमनसा महीपतिः ।
विविधोपचार[7][त][7]तिभिस्समर्चयन्
स्तुतिमाततान ततसात्त्विकोदयः ॥

९

[8][वृ][8]षपत्र ! नेत्रहृतकाम ! सोमभृत्
गुहतात ! वीतभव ! शर्व ! निर्वहन् !

---

[1] त् (ख), [2] णां (ख) [3] जय (ख) [4] मही (ख) [5] मत्परं (ख) [6] श (ख)
[7] र (ख) [8] हृ (ख)

सुरनाथयूथपरिपाल! कालजित्
 परिपाहि देहि करुणाञ्च मे प्रभो ! ॥

१०

*जितबाणबाण सपिनाक वन्द्य [1][स-
 द्गु][1]णराजिराजि दितिजातजात[2][मद-][2] ।
 ....गोत्रगोत्रभि-
 द्धृतलोक लोकधृतरक्ष रक्ष माम् ॥

११

अगजाधिपोऽपि बहुदानसङ्गतः
 सितकन्धरोऽपि मरुतां प्रशासकः ।
भुवनेश्वरोऽपि जडसङ्गवर्जितो
 वृषलक्षणोऽपि हृतधर्मखङ्गवान् ।

१२

शरणागतार्तिहरणेक्षणाञ्चल !
 स्थिरधर्मवाह ! गिरि धर्मकृद्विभो ! ।

---

[1] गु (क) [2] मुद (ख) * लुप्तभागश्चायं श्लोकः

मम देहि भक्तिममदां त्वयि स्थिरां
प्रणमामि दिव्यगुण ! मा[1][मव][1] प्रभो ॥

१३

समरोपयुक्त ! समरोपसंहृतं
भवतापदूर ! भवता पुरत्रयम् ।
मदनागजैत्र ! मदनागश[2][म्ब ! ते][2]
*महिमानदीन (?) महिमा न बुध्यते ॥

१४

शिव ! नव्य[3][सो][3]म ! तव दिव्य नाम मे
वदने सदाऽस्तु * वदने (?) समाश्रितम् ।
हृदि [4][देव][4] देव पदमेतदस्तु मे
सुरवृन्दवन्द्यमरविन्दवन्धुरम् ॥

१५

इति स स्तवैश्च बहुभिस्स्तुवन्मृडं
सरसैस्तदाऽऽस [5][हर][5]दासभावतः ।

---

[1] वन (ख) [2] म्भवे (ख) * अस्फुटार्थः । [3] गो (ख) [4] एत (ख)
[5] सह (ख)

पुलकैस्सहाश्रुनयनस्सगद्गदः
परमानुरागभरितः क्षमापतिः ॥

१६

अपहृत्य राजवसु च श्रियो गृहं
नलिनं भिनत्ति खररश्मितस्करः ।
स्वकरासिनेति पटुकूजनं व्य[1][धा-][1]
दिव भाति कण्ठनिनदेन कुक्कुटः ॥

१७

व्य[2][प][2]नुद्य भृङ्गनिनदं कपोतिका
रवमाविभज्य चरणायुधध्वनिम् ।
प्रविलङ्घ्य याति ककुभन्तरं भृशं
शिववेश्मजातघनशङ्खनिस्वनः ॥

१८

झणतामुपेत्य धनुषोऽङ्गजन्मनो
निशि संक्रमस्य मधुविट्कुलस्य च ।

---

[1] दा (ख) [2] व (ख)

मरुतेव पानविधये विकासितं
मधुना प्रभातदलिताब्जमुद्भ्रमौ ॥

१९

दलिताब्जतल्पगतचक्रवाकयोः
अभिवीक्ष्य जातसुरतं कुमुद्वती ।
विनिमील्य सूननयनं ह्रियोत्थिता'ऽऽ-
भरणं त्रपैव भुवि राजयोषिताम्' ॥

२०

सह[1][सा][1]पसार्य चलदूर्मिमार्जन-
क्रियया रजांसि मधुनाऽभिषिच्य च ।
कमलस्य चाभिगमने रवेस्सरः
पव[2][नः][2] प्रसाधयति पद्मिनीगृहम् ॥

२१

प्रतिकूलपद्मसदनेति मां विधुः
परिकुप्यतीति भयतस्ततश्श्रिया ।

---

[1] नि (ख) [2] नं (ख)

क्रियतेऽम्बुजस्य विनिमीलनं निशि
प्रविकासवृत्तिरुषसि स्ववेश्मनः ॥

२२

तिमिरालिवृन्दमपनुद्य लिप्सया
भगणप्रसूनलवने दिनश्रिया ।
मणिपात्रमेकमिव पाणिना धृतं
दद्द[1][शे][1]ऽरुणांशुरहिमांशुमण्डलम् ॥

२३

रविणेन्द्रशैलघटजन्मना ह[2][ठात्
क][2]रतोऽप्यपायि तत चद्रिकाम्बुधिः ।
अवशिष्टपङ्कमिव मौक्तिकान्वितं
प्रविभाति तस्य भ[3][ग][3]णान्वितं नभः ॥

२४

शरधौ निपी[4]तलवणाम्बुनस्तृषा
परिवर्धते हि दिविजापगापयः ।

---

[1] ते (ख) [2] रात्प (ख) [3] र (ख) [4] सो (ख) [5] य लवणाम्बु न त्विषा (ख)

[1][मधुरं][1] पिबा[2][मि][2] सहसेति [3][चोत्पतन्][3]
बडबोऽयमेव भवति प्रभाकरः ॥

२५

विततान्धकारपटलावृतं तदाऽऽ
गतमेचकाद्रिनिचयातिशङ्कया ।
तरसो[4][त्थितस्य][4] परिवीक्षितुं बभौ
गिरिभेदनस्य मणिमौलिवद्रविः ॥

२६

करवागुरान्तरितवृक्षसङ्कु[5][लः][5]
क्षपयन् मृगाङ्कमनुधावनोद्यतः ।
धृतसान्ध्यरागनवपल्लवोऽम्बरे
गहने प्रयाति दिननाथधीवरः ॥

२७

स्व[6][पु][6]रोगतेन्दुसुभटं समीक्ष्य [7][तं
त्व][7]रया करेण करिणा दिवौकसाम् ।

---

[1] मधुं (ख) [2] हु (ख) [3] चात्यतन् (ख) [4] धिकृत्य (ख) [5] लं (ख)
[6] सु (ख) [7] तत्प (ख)

धृतहेमपिण्डमिव मुक्तमुज्ज्वलं
सरुषा रराज चलदर्कमण्डलम् ॥

२८

पवनोपक्रान्तपरिरम्भसम्भ्र[1][मां][1]
नलिनीं विलोक्य सहसाम्बरद्युतिः ।
तिमिरालकालि[2][ल][2]वनं करासिना
कृतवानतो हि विकचत्वमाप सा ॥

२९

कनकाब्जगर्भकुहराद्विनिर्गता
चलचञ्चरीकविततिर्वनश्रिया ।
रवये प्रदातुमिव पाणिनोद्धृता
ददृशे महेन्द्रमणिमञ्जुमालिका ॥

३०

ततराजवैरिवियुताप्यनारतं
रजसाऽन्विताऽपि बहुकण्टकाऽपि च ।

[1] मात् (ख) [2] य (ख)

विसिनी [1][सुपाद][1]भज[2][ना][2]द्रवेश्चि[3][यो][3]
[4][गृह][4]मुक्तमस्य भजनं शुभप्रदम् ॥

३१

उदरान्तरात्तमधुपानि रेजिरे
लसितासिताब्जमुकुलानि वारिणि ।
निशया प्रसूतविततण्डवृन्दवत्
द्विजराजसङ्गम[5][वशात्][5] सगर्भया ॥

३२

नलिनीपरागरुचिरे सरस्त[6][टे][6]
घनचन्द्रभाजि नभसीव राजते ।
विम[7][ला][7]भभूमिकुमुदोडुसंह[8]ति[:][8]
स्वरुचिस्फुटाञ्जनिक[9][टे][9] यदद्भुतम् ॥

३३

इन ! नक्तमिन्दु[10][रु][10]पगत्य माऽस्पृशत्
स्वकरेण चेति नलिनीनिवेदितः ।

---

[1] पूत (ख) [2] ता (ख) [3] य (ख) [4] नास्ति (ख) [5] तत. (ख) [6] ले (ख)
[7] दा (ख) [8] ति (ख) [9] टी (ख) [10] मु (ख)

अमरप्रणादमिपतः [1][ख][1]रद्युतिः
प्रजहार पादहतिभिः क्रुधा विधुम् ।

३४

स्वकरैश्चकर्ष रविर[2][स्म][2]दंशुकं
विगताम्बरोऽस्मि हसतीह पद्मिनी ।
स तु मद्वदत्र विगतांशुकोऽस्त्विति
द्विजराट् प्रशप्य चरमाचलं गतः ॥

३५

नयनोत्पलानि सुदृ[3][शां][3] विकासयन्
शमयंस्तमांसि कुटिलाः प्रतर्जयन् ।
यमिहृत्प्रमोदव[4][र्धिं][4] विवर्धयन्
विधुकृत्यमेवमकरोद्दिवाकरः ॥

३६

कुमुदं निरुध्य परिहृत्य स[5][द्रुचिं][5]
परिभूय लोकसुखदं कलानिधिम् ।

---

[1] भि (ख) [2] स्त्व (ख) [3] शा (ख) [4] दनं (ख) [5] द्यचे (ख)

भुवि लोकबन्धुरिति वर्ण्यते रविः
'भुवनोत्तरस्य सुगुणो हि दुर्गुणः' ॥

३७

गतवत्यधो हि बलिवद्विधा[1][व][1]तः
[2][प्र][2]विवृद्धभानुरिव यस्त्रिविक्रमः ।
प्रबभूव भूमिवियतो[3][र्वि][3]राजते
कनकातपत्रमिव तद्धृतं रविः ॥

३८

गगनाच्युतस्य कनकाम्बरं करैः
घुसृणानुलेपपरदिङ्मृगीदृशाम् ।
क्षितियोषितश्च रज[4][नं][4] महीभृतां
नवधातुमे[5][प][5] तनुते विभाकरः ॥

३९

विधुमेघमुक्तनवकौमुदीसुधां
मिलि[6][तां][6] पयोधिपयसाऽभिवृद्धिदाम् ।

---

[1] न (ख) [2] प (ख) [3] र्मि (ख) [4] सीं (ख) [5] व (ख) [6] ता (ख)

सलि[1][लाद्वि][1]भज्य पिबति स्म हंसकः
उष[2][सिहृ्यु][2]पैति तनुतां *सचापः [?) ।।

४०

कमलालयस्य कनका[4][च्छ][4]कूर्चिका
स्मर[5][ना][5]यको[6][प][6]हर[7][पो][7]न्द्रदूतिका ।
वसुधान्धकारकचभारकर्त[8][री][8]
व्यरुचत्सह[9][स्रक][9]रवि[10][स्तृत][10]प्रभा ।।

४१

द्रुहिणाण्डसद्मवि[11][क][11]चार्कमण्डले
बहिरण्डहैमरुचिरन्तरागता ।
[12][वि][12]शतीव विश्वमभितः प्रकाशते
पिहिताखिला[13][र्थ][13]चयतत्पद्मप्रभा (?) ।।

४२

इनकानका[14][च्छ][14]सुक[15][रा][15]ट्टहासभृ-
द्द्युतिकुङ्कुमाम्बुपरिषिक्तमम्बरम् ।

---

[1] लं वि (ख) [2] निन्यु (ख) * अस्फुटार्थः [4] च्च (ख) [5] सा (ख) [6] पि (ख)
[7] च (ख) [8] रि (ख) [9] प्रस (ख) [10] स्पृह(ख) [11] व (ख)दि (ख)
[12] र्ध (ख) [13] च्च (ख) [14] णा (ख)

कनका[1][म्बरी][1]यपटमन्दिरश्रियं
वहति स्म कालनृपतेर्जगद्विभो[2][:][2] ॥

४३

कनकाचलेन्द्रसम[3][तां][3] महीधराः
[4][ह][4]रितस्सुवर्ण[5][भ][5]रितां मनोज्ञताम् ।
नलिनानि हेमनलिनीश्रियं दधुः
तरुणारुणस्य महसा महीयसा ॥

४४

कमले चकास्ति कमला स्वदूतिकां
प्रणयाद्दिदृक्षुरवतीर्य चाम्बरात् ।
सविधे निषण्णविधुवद्विमत्सरः
स्थितिमान्विभाति नलिने मरालकः ॥

४५

नलिनी चकार कुशवासिनी तपः
फलितं तदद्य पतिसङ्गमे[6][च्छ][6]या ।

---

[1] म्बली (ख) [2] नास्ति (ख) [3] ता (ख) [4] प (ख) [5] प (ख) [6] च

अपि तामुपेत्य यत एव सेवते
विकचाब्जरेणुकपिशः स हंसकः ॥

४६

कुमुदाहितात्मरुचिलक्षणान्वितः
प्रमदालिका[1][ष्य ?][1] कमलाहितोदयः ।
रतिरागचक्रहितकृत्सितद्युतिः
प्रविभाति सोम इव बालभास्करः ॥

४७

ततलोकचक्षुरपि लुप्ततारकः
कमलाश्रितोऽपि जनतापकृत्करः ।
सुरविश्रुतोऽपि कविहृत्प्रमोदकः
[2][ख][2]गतायुतोऽपि [3][नहि][3] विभ्रमाश्रितः ॥

४८

अथ तत्समाप्य [4][परमेश्वरार्चनं][4]
गिरिशप्रसादपरितुष्टमानसः ।

---

[1] न्य (ख) [2] भ (ख) [3] रवि (ख) [4] कृतमीश्वरार्चनं (ख)

मणिभूषणांशुरुचिरोऽतिवैभवात्
सचिवैरुपेत्य नृपतिस्सदो ययौ ॥

४९

वरवन्दिवृन्दनिनदानकस्वनैः
सममध्युवास मणिपीठमुच्छ्रितम् ।
दिनकृन्महीध्रमिव पूर्व[1][मु][1] विभ्रत्
मणिकुण्डलांशु मि[2][ल][2]दाननद्युतिः ॥

५०

अपि जिष्णुरेष शुचि[3][र][3]र्यमोदितः
ततदानव*[त्व]* सहितो [4][महाप्प्रभुः][4] ।
स हि लोकपाल इति किं महाबलो
निधिरा[5][ड्विव][5]भूतिनियुतो न कथ्यते ॥

५१

कविभिः कला[6][दि][6]निपुणैर्मनीषिभिः
वरवन्दिवाग्मिनिवहैर्नियन्तृभिः ।

---

[1] मू (ख) [2] लि (ख) [3] रा (ख) * त्स (ख) [4] महाप्रभुः (ख) [5] ड्वि (ख)
[6] ति (ख)

धरणीश्वरैश्च सचिवैस्सुगायकैः
सुभटैर्भिषग्भिरभवत्सभाश्रितिः ॥

५२

सुरमण्युपेतविबुधेन्द्रबन्धुरं
कविराजहंसगुरुमङ्गलान्वितम् ।
प्रमदालिकीर्णसुमनोऽन्वितं सदः
समतामुपैति सदसा बिडौजसः ॥

५३

ततदारवारिक[1][म][1]ले[ऽ]जडान्विते
घ[2][न][2]भूभृदौघमिलिते सदोऽम्बुधौ ।
पटहस्वना[3][ब्द][3]रवभीसमुत्पत-
त्सितप[4][क्षि][4]युग्ममिव चामरद्वयम् ॥

५४

मणिभित्तिबद्धबहुरत्नपुत्रिकाः
परितो विरेजुर[5][चला][5]स्सकौतुकम् ।

---

[1] ख पुस्तके नास्ति [2] नास्ति (ख) [3] ञ्ज (ख) [4] क्ष (ख) [5] चना (ख)

श्रवणात्सु[1][गी][1]तनिनदस्य सुभ्रुवां
स्तिमि[2][ता इ][2]वात्र सदसि क्षिती[3][शि][3]तुः ॥

५५

नृपपादपीठपतितं स्फुरद्रजः-
कषणात्सुवर्णमकुटैर्महीभृताम् ।
शुशुभे प्रणामवशतः पदाम्बुज-
च्युतचारुरेणुरिव त[4][त्क्ष][4]माभुजः ॥

५६

ततसान्ध्यरागग[ग]नाश्रियं दधौ
स्फुरदिन्द्रनीलमणिकुट्टिमस्थलम् ।
कुचकुम्भयुग्मकषणाऽभिसम्पत-
द्घुसृणाङ्गरागरज[5][सा][5] पणस्त्रियाम् ॥

५७

ततनादशोभि विततस्वनोल्लसत्
घनरावभासि सुषिरस्वराञ्चितम् ।

---

[1] नी (ख) [2] तौ दि (ख) [3] श (ख) [4] तक्ष (ख) [5] सं (ख)

नवनृत्यचारुपटुताण्डवस्फुरत्
मृदु[1][गी][1]तमञ्जुतरमास तत्सदः ॥

५८

[2][क्रथ][2]कैशिकापसर तिष्ठ गुर्जर
प्रणिपत्य [3][वङ्ग][3] वितरोपदां पदे ।
मगधात्र याहि भज लाळ मौनमि-
त्यखिलान्नियम्य विचचार कञ्चुकी ॥

५९

हरिनीलनीलकबरीभरस्फुर-
[त्सु]रभिप्रसूनघृतमत्तषट्पदम् ।
युवतिप्रतानमवसत्सभास्थले
स्तनभारभी[4][रु][4]त[5][नु][5]मध्यसुन्दरम् ॥

६०

मृदुचित्रचीनवसनाग्रविस्फुर-
त्कलकाञ्चिहारमणिकञ्चुकाञ्चि[6][तम्][6] ।

---

[1] नी (ख) [2] क्रुध (ख) [3] वंद (ख) [4] र (ख) [5] रु (ख) [6] तः (ख)

सुदगन्तकान्तिमणिकुण्डलं बभौ
कनकाङ्गदाङ्घ्रिवलयं वधूकुलम् ॥

६१

अलकप्रभाभिररुणोष्ठकान्तिभिः
चल[1][के][1]करा[2][च्छ][2]रुचिभिर्मृगीदृशः ।
रविचारणाश्रतटिनीपयश्श्रियं
विदधुर्युवाऽक्षि[3][शफ][3]रोत्सवप्रदाम् ॥

६२

तदुपान्तवर्तिवसुधावरस्फुर-
न्मकुटांशुबालरविशोचिषा भृशम् ।
विक[4][चा][4]ब्जपङ्क्तिरिव भाति सस्मित-
प्रमदाऽऽस्यराजिर[5][ति][5]सौरभाश्रिता ॥

६३

अतनुत्वमस्ति जघने सदर्ककः
कुच एव भाति मधुमि[6][श्र][6]ताधरे ।

---

[1] की (ख) [2] च्च (ख) [3] तिप (ख) [4] टा (ख) [5] थि (ख) [6] श्रि (ख) .

कुसुमेषुता च दृशि [1][तद्धूतते-][1]
रत एव सा[2][र्थ][2]मिह कामिनी[3][पदम्][3] ॥

६४

र[4][शनावनद्ध][4]जघनावनीभृता
प्रसभं प्रमथ्य युवहृत्पयोनिधिम् ।
श्रियमाजहार पणकामिनीजनः
प्रण[5][याम्र][5]तेन सह तत्सद[6][स्स्थतः][6] ॥

६५

कृ[7][श][7]मध्य एष वहति स्तनाचलं
वहने वरस्य मम कम्पनं कुतः ।
युवयोरितीव र[8][श][8]नारव[9][च्छलात्][9]
जघ[10][नस्त][10]दूरुयुगभाल[11][प][11]त्ययम् ॥

६६

मणिकर्णपत्रघृणिवालभानुरु-
ग्दलिताम्बुजातमिव तन्मुखं बभौ ।

---

[1] तत्वतते (ख) [2] र्थ (ख) [3] जनः पदः (ख) [4] सवाहिनीनश्च (ख), [5] माम्र (ख) [6] स्थितः (ख) [7] त (ख) [8] स (ख) [9] च्चरा (ख) [10] नं त (ख) [11] व (ख)

स्मितरोचिरिन्दुमणिरोचि[1]विस्फुर-[1]
त्कुमुदावभासि नयनं नतभ्रुवाम् ॥

६७

ततहा[2][रि][2] हारवलितं स्तनद्वयं
सुद्द[3][शो वभावजनुपाद्य][3] कन्तुना ।
प[4][रमर्च्य][4]मानमिव पुष्पमालया
कल[5][श][5]द्वयश्च कलधौतनिर्मितम् ॥

६८

*द्विजराजसेव्य परतार्थ तत्कथं
सुरतोपयोग्यममृतं वसेन्महा ।
विलसद्भुजङ्गपरिदष्टचापि च
.................................(?) ॥

६९

*प्रणयप्रगल्भवचसा चमत्कृति
स्मितन चलितेन सभ्रुवः ।

---

[1] विस्फुरल्लये (ख) [2] र (ख) [3] शुभावि भविजं निष (ख) [4] रिमार्ज्य (ख)
[5] त (ख) * अस्फुटः

सरसेक्षणेन यसिताः पण-
प्रमदाः प्रसूनशरदेवता इव (?) ॥

७०

[1][ल][1]तिका इवातिसुषमास्मितोद्गमैः
घटिका इवोपचितसत्कलालिभिः ।
चपला इवात्तरभसा[2][ति][2]विभ्रमैः
महिला विरेजुरचलास्सभास्थले ॥

७१

इति भासमानसदसि क्षि[3][ती][3]शितुः
पुर उन्नमय्य कटकाञ्चितं करम् ।
[4][प्रजजल्पु][4]रुच्चनिनदैस्ससम्मुखं
बिरुदं तदीयमभिव[5][न्द्य व[5]न्दिनः

७२

जय राजराज ! शिवमार्गमार्गण-
प्रिय ! साध्वसाध्ववनशिक्षणक्षम !

---

[1] य (ख) [2] व (ख) [3] ते (ख) [4] परितल्प (ख) [5] न्दन (ख)

रणधीर ! धीरसु[1][र][1]भूज! भूजन-
[2][स्तु][2]त! कालकाल ! भजमानमानस ! ॥

७३

रिपुकुम्भिकुम्भदलनद्विपद्वि[3][षन्][3]
भवत[4][:][4] प्रतापतपनातपावृतम् ।
कनकाण्डमण्डमभवद्बहिर्विधे[5][:][5]
प्रतिबिम्बमस्य भुवनेऽर्कमण्डलम् ॥

७४

भवतः करालकरखड्गपन्नगः
पिबतीति युक्तमसुहृद्यशस्सुधाम् ।
इदमत्र चित्रमहितस्त्रियां पुनः
कुरुते कचौघशिखिनोऽपवर्जनम् ॥

७५

तरवारवारिधरधारया रिपु-
प्रमदाश्रुपूरतटिनी प्रतन्यताम् ।

---

[1] नास्ति (ख) [2] स्र (ख) [3] स्र (ख) [4] नास्ति (ख) [5] नास्ति (ख)

भवतस्तदीयहृदि वह्निरुज्ज्वलः
[1]क्रियते[1] नरेन्द्र स तये[2][द्][2]मद्भुतम् ॥

७६

भुवनावगाढ इह ते यशोऽम्बुधौ
उडुराजिफेनशकलेऽम्ब[3][रा][3]च्युतः ।
[4][शयिता][4] शशाङ्क शुभ श[5][ङ्ख][5]मण्डि[6][तः][6]
सुरनिम्न[7][गाहिपति][7]तल्पसंश्रितः ॥

७७

स स[8][ह][8]स्रचक्षुरुप[गी]तमुत्सुकः
खचरैर्निशम्य तव सद्गुणोत्करम् ।
श्रवणेच्छयैव पुनरात्मचक्षुषां
चकमे च येन [9][नयनश्रुतीशताम्[9] ॥

७८

भुजमन्दरेण परसैन्यसागरं
परिमथ्य लब्धरमयाऽनुमोद[10][से][10] ।

---

[1] क्रियते (ख) [2] य (ख) [3] रे (ख) [4] तयिका (ख) [5] म्च (ख) [6] तं (ख)
[7] गा पतति (ख) [8] हा (ख) [9] न न श्रृतीशतां (ख) [10] ते (ख)

पुरुषोत्तम[1][त्व][1]मधिलोकचक्रभृ-
द्विनतात्मजातसगमाब्जलोचनः ॥

७९

स्वर[2][गा][2]मराश्म सुरधेनुसंस्थितिः
भुवि वेधसा हि न कृता कृता दिवि ।
अतिदानशील ! सविधे तवे"हते
नृप ! दीपदीप्तिमिनसन्निधौ च कः ?" ॥

८०

श्रुतवैभवेन तव गीष्पतिर्जितः
स्वरहीनवृत्तिमभ[3][जद्बहुत्रपः][3]
स[4] [च][4] पाण्डुरूषित[5][सुमेचकाननः][5]
फणिराड्विहस्तपदतामयाद्विभो ! ॥

८१

मथनासमान ! मधुना समान ! ते
वचनं प्रसाद्य मुदितास्सदालयः ।

---

[1] स्त (ख) [2] रा (ख) [3] वत्सपत्रगा (ख) [4] नास्ति (ख) [5] च कानने (ख)

कमलाश्रिताऽऽस्यकम[1][ला][1]त्समुत्थितं
सरसास्ततो हि सरसा[2][श्रि[2]]तो भवान् ॥

८२

कवितासरोजसविता भवान् प्रभो
भरताम्बुराशिवरतारकापतिः ।
अवि[3][गी][3]तसाधुरवनीत[4][लस्तुतः][4]
श्रुतिसारसिन्धुततिसारसागरः ॥

८३

परमेशभ[5][क्त !][5] परमेशभाग्यभृत् !
बलदानवारिवल ! दानबन्धुर ! ।
[6][ध][6]रधैर्य [7][धा][7]र ! [8][स][8]रसाश्रच[9][न्द्र !][9]
जय [10][सु][10]प्रताप ! विजयी भव प्रभो ॥

८४

परितुष्टुवुस्तदवनीपतेर्गुणान्
सहजांस्तदैव महितांश्च [11][ते मुदा][11]

---

[1] ल (ख) [2] स (ख) [3] नी (ख) [4] निस्तुलः (ख) [5] क्ति (ख) [6] सा (ख)
[7] घ (ख) [8] सा (ख) [9] ग्रन्वि (ख) [10] नास्ति (ख) [11] मदाः (ख)
श्रुत्वेत्यत्राध्याहार्यम् ॥

वितरंस्तदिष्टवसुभूषणादिकं
कलयन्विनोदमवसत्क्षमाधवः ॥

८५

गजवाजिरत्नकनकाद्युपायनं
प्रभवे [1][प्रदाय][1] जगदुर्जगत्पतिम् ।
[2][कनकादि][2] पाण्ड्यनिभुरेक एव [3][ते][3]
मदवान् समेत्य न ददा[4][त्युपा][4]यनम् ॥

८६

इति भाषितेन वचसाऽरुणेक्षणः
सचिवं जगाद स नृपस्तदाशयम् ।
त्वमुपेत्य [5][विद्धि][5] यदि [6][चेदनानतः][6]
क्षितिभृत्स याति पविता[7][मसिर्मम][7] ॥

८७

मददाव एव यदि तद्धराभृति
प्रसरत्यमुष्य शमनाय चोद्यतः ।

---

[1] प्रणम्य (ख) [2] कनकापि (ख) [3] ती (ख) [4] त्युषा (ख) [5] वीधि (ख)
[6] बेदवानतः (ख) [7] र्मम (ख)

निजधारयैव मम खड्गवार्धरः
स्फुरितप्रतापरुचिरुद्यदश्चितः ॥

८८

इति वक्तुरस्य नृपते[1][र्नि][1]योगतः
सचिवस्समेत्य विभवाद्विचक्षणः ।
पुरमाशु पाण्ड्यजनपस्य तत्सदः
सदनान्तरालमविशत्तदीरितः ॥

८९

सवयोभिरात्तविभवैर्नृपात्मजैः
[सचिवै[2][:][2] प्रतापिसुभटैस्समावृतम् ।
मणिपीठरूढमधिरत्नभूषणं
स नृपं ददर्श पट्टसिंहविक्रमम् ॥

९०

प्रमदालिसेव्य इह भद्रलक्षणो
घनरोचिरे[3][प इह][3] कुम्भिनीपतिः ।

---

[1] र्वि (ख) [2] नास्ति (ख) [3] स खइ (ख)

[1][म][1]दवत्वमस्य निभृ[2][तं क][2]टस्थिते
रुचिरं सदेति सचिवो ह्यमंस्त सः ॥

९१

अथ तत्र पाण्ड्यविभुनाऽभिवीक्षितो
विनयाद्विनम्र उचितासने स्थितः ।
किमिहागतोऽसि ? तत्र भूपतिश्शुभे
स्थितवान्वदेति गदितोऽमुना च सः ॥

९२

प्रथितप्रतापनिधिरीशभक्तिमान्
कुशली कलापनृपनीतिकोविदः ।
बलवानतर्क्यमहिमा च मत्प्रभुः
प्रतिपक्षकक्षपटदावपावकः ॥

९३

सकलप्रजौघपरिपालनोद्यमः
सततावनीशपरिषत्समाश्रितः ।

---

[1] मु (ख) [2] तो त (ख)

शरणागतार्तजनरक्षणक्षमो
'रिपुदुर्जयो हि युधि चोलभूपतिः' ॥

९४

[1][स्व][1]मभिगत्य [2][च][2] भूपकदम्ब[3][कं][3]
तमभिवन्द्य ददाति न दत्तवान् ।
[4][त्व][4]मसि तच्च तदानयनेरितः
तव सभां विभुनाऽहमुपागतः ॥

९५

त्वमभिगत्य निपत्य पदाम्बुजे
मम विभोरुपदाश्व समर्प[य] ।
यदि तथा न करोषि [5][पुरीमिमां][5]
शबरकेलिगृहं स करिष्यति ॥

९६

प्रकटितस्वगुणान् क्षमयाऽन्वितः
त्वयि कृतागसि मामनयत्प्र[6][भु]ः[6] ।

---

[1] त्व (ख) [2] स्वक (ख) [3] मुपायनं (ख) [4] त (ख) [5] रिपुं च मां (ख)
[6] भू (ख)

नृपभवन्तमिह प्रतिबोधितुं
यदि भवान् विमुखः क्षमते न सः ॥

९७

किमपि चेत्कुपितो बडवानलं
प्रमथितुं दलितुं कु[1][ल][1]भूभृतम् ।
मदधिपो हि समुत्सहते करात्
धनशिखावहमेव विमर्दितुम् ॥

९८

उचितवृष्टिकरो मघवान्मरु-
[2][न्मृ][2]दुगतिस्तदुपाहितभूतले ।
रविभवोऽप्यनतिक्रमवर्तनः
तमनुसृत्य सदा परिवर्तते ॥

९९

स्वतनुभेदभिया सम[3][रेऽ][3]रिभि-
स्त[4][दसि][4]पातहतैरपि कम्पितु[5][:][5] ।

---

[1] नास्ति (ख) [2] मृ (ख) [3] की (ख) [4] मपि (ख) [5] नास्ति (ख)

गज[1][वि][1]हारणभूमिं(?) इनः प्र[2][भो]ः[2]
बलरजः परिधूसरतां गतः ॥

१००

[3][जनयतेऽसितटि][3]द्भुजवार्भृता
युधि नृपो रिपुरक्ततरङ्गिणीम् ।
तदब[4][ला][4]श्रुपयः सरितं पुनः
[5][विकच][5]निर्मलकीर्तिसुधापगाम् ॥

१०१

द्विषदिलाधवदत्तशिरोऽम्बुजं
निजकरेण जहार रणाजिरे ।
सरसि भद्र[युतो] भ्रमरोचित-
प्रकटदान[6][गुणोऽर्थपतिर्यथाः][6] (?) ॥

१०२

ज्वलनमाशु विधाय रिपुस्त्रियां
[7][हृद][7]हिमांशुमणौ स्मितचन्द्रिकाम् ।

---

[1] मि (ख) [2] भौं (ख) [3] जनयितायतट (ख) [4] नास्ति (ख) [5] कसुकविस्वक (ख)
[6] रुणोऽर्थपरिद्विषः (ख) [7] हृद (ख)

[1]मुख[1]विधोरपनुद्य विजृ[2][म्भ][2]ते
पटु[3][त][3]रोऽस्य पराक्रमभास्करः ॥

१०३

नमसि [4][चे][4]त्तव दिक्षु यशोलतां
मम विभुः परिवर्धयतेऽन्यथा ।
भवदगारपुरस्थितहर्म्यके
तृणचयस्य नवाङ्कुरमुर्विप ! ॥

१०४

इति वचस्स निशम्य रुषोद्धतः
तमभिवीक्ष्य जपारुणचक्षुषा ।
भ्रुकुटिभीष्ममुखस्फुरिताधरः
परिहसन्नवदत्कृतगर्जनः ॥

१०५

चपल ! किं बहुधा परिभाषसे
मम पुरस्स्वपतेः पटु पौरुषम् ।

---

[1] विमुख (ख) [2] म्बि (ख) [3] क (ख) [4] चि (ख)

तव वचः परीशिक्षि[1][त][1]मन्यथा
प्रकृतिसिद्धमिदं किमिहोच्यताम् ॥

१०६

इतरविद्विषदर्दनगर्वतः
तव पतिः किल मामपि तादृशम् ।
स मनुते यदि सङ्गरसङ्गतः
सपदि वेत्स्य[2][ति][2] मत्करकौशलम् ॥

१०७

करिकरादिव हंसशिशुर्बिसं
मम करात्करमिच्छति ते पतिः ।
न हि ददामि तमाहवभूतले
प्रतिददामि नवक्षतभूषणम् ॥

१०८

सुरवधूजनतव्यरतोत्सवं
क्षुधितभूतगणोदरपूरणम् ।

---

[1] तु (ख) [2] सि (ख)

वियति नाकिमुनेर्नटनोत्सवं
कलयितुं युधि चाद्य समुत्स[1][हे][1] ॥

१०९

इति वदन्तमुपेक्ष्य समुत्थितो
विधिविवञ्चित एष इति ब्रुवन् ।
स तदमात्यवचांस्यपि लङ्घयन्
[2][द्रुतमयान्नृ][2]पतेस्सचिवस्सदः ॥

११०

प्रणतिपूर्वमु[3][वा][3]च कृताञ्जलिः
परिमिताप्तजनैस्सहितं विभुम् ।
मम वचां[4][स्युचितान्यपि][4] लङ्घयन्
कुमतिराहितवान् समरे मनः ॥

१११

परु[5][ष][5]वर्णवि[6][वृद्धि][6]वितर्जिता
नृप ! विसन्धिरपास्तरसस्थितिः ।

---

[1] हि (ख) [2] द्रुतसमाप (ख) [3] दा (ख) [4] स्यति चेतसि (ख) [5] नास्ति (ख)
[6] वर्ध (ख)

कुकविवागिव दुष्टपदान्विता
गदितवागपि तेन न रोचते ॥

११२

दुरभिमाननिरस्तनयक्रमः
प्रणयवा[1][ग्भि]रसौ हि न शाम्यति ।
ज्वलति यः पटुदोषसमाकुल[2][ः][2]
स्फुटसुधाभिरिवोग्रत[3][रो][3] ज्वरः ॥

११३

इति कथितवचोभिर्मन्त्रिणा [4][स][4] क्षितीशः
सपदि निजभुजाग्रं तिर्यगालोक्य रोषात् ।
करधृत[5][ख][5]रखड्गं चालयन् सप्रतिज्ञः
प्रबलरिपु[6][तमोऽर्कः][6] प्रोत्थितस्सिंहपीठात् ॥

११४

अथ पितरमुपेत्य स्वीयमन्तःपुरस्थं
यमिवरमभिवन्द्याशेषवि[7][ज्ञ][7]सकार्यः ।

---

[1] ग्मि (ख) [2] नास्ति (ख) [3] रः (ख) [4] सा (ख) [5] क (ख)
[6] जपुञ्जः (ख) [7] ज्ञा (ख)

रणकृततदनुज्ञस्सम्यगभ्यर्च्य शम्भुं
प्रथितशुभमुहूर्ते प्रस्थितोऽभूत्कुमारः ॥

इति सकलभुवनैकवल्लभनिखिललेखनायकनिकायसन्ततसमर्चित-
परम'शिवलिङ्ग'पादारविन्दषट्पदायमानलसदुभयकविता-
विशारद'श्रीषडक्षरिदेव'विरचिते 'चोलभूपालीये'
'कविकर्णरसायनाख्ये' महाकाव्ये 'सुन्दरचोलस्य
पाण्ड्यराजं प्रति युद्धप्रस्थानवर्णनं'
नाम द्वादशस्सर्गस्समाप्तः ॥*

---

*मूलग्रन्थः एतावानेव उपलब्धः ।

परिशिष्टम्

१. कविकर्णरसायनपद्यानामकाराद्यनुक्रमणिका

* एतच्चिह्नाङ्कितानि व्याख्यानोपक्रमस्थानि ॥

★

स

पद्यानि	सर्गः	पद्यं	पद्यानि	सर्गः	पद्यं
स्खलत्पदा	१	३२	स्वमभिगत्य च	१२	९४
स्तननितम्ब	१०	२	स्वरगामराश्म	१२	७९
स्तनसुधां	४	६५	स्वर्णच्छवि	९	२२
स्थाणुस्तावत्	७	५२	स्वर्णस्तम्भैः	७	१
स्नपनं विधाय	१२	५	स्वर्णाम्बराभरण	९	३७
स्नात्वाथ मञ्जुल	७	१३	स्वर्भानुभीति	५	१३१
स्नात्वा नद्यां	५	२६	स्वर्भेरीभूरि	३	८०
स्नात्वा सरोऽम्भसि	२	१७	स्यान्नन्दने	२	५
स्मरशरत्वं	१०	६	स्वाङ्कैकदेश	२	३४
स्रस्तं हस्तात्	५	८७	स्वात्यम्बुदाम्भः	१	३५
स्रष्टाब्जपीठमिव	९	८९	स्वार्थव्ययात्	१	३७
स्वकरैश्चकर्ष	१२	३४	स्वान्तस्सुधांशु	५	१२०
स्वतनुभेदभिया	१२	९९	स्वांशजीव	६	११
स्वतेजोभिः	३	७८	स्मितमुखश्च	३	२१
स्वत्रिभङ्गि	११	३१	स्विद्यद्वक्त्रा	५	९३
स्वनैस्स्वतापापह	८	९	स्फुटमधीत	३	१५
स्वपानयोग्याम्बु	८	६	स्फूरद्दंष्ट्राभीम	१	९६
स्वपुरोगतेन्दु	१२	२७	स्फुरत्तारामुक्ता	१	७०
स्वप्नचित्रपटतोऽपि	११	३८	स्नेहात्सिद्धं	५	९६
स्वप्नदृष्टपतिवत्	११	३९	स्वेदार्द्राङ्गा	५	८०
स्वप्रेयस्याः	५	५५	स्रोतस्विन्याः	५	२५

२. कविकर्णरसायनस्थरम्याः लोकोक्तयः

		सर्गः	पद्यम्
१.	श्रिया युक्तस्स्तुत्यो भवति हि सदोषोऽपि जगति	१	६७
२.	न रुचिः कस्य तनये ?	१	६८
३.	दरिद्रत्वे को वा भरति तनयान् जाड्यभरितः ?	१	६९
४.	कान्तानुरागचपलस्य कुतोऽस्ति भीतिः ?	२	४५
५.	प्रायः कुजातनिवहे हि कुतोऽभिमानः ?	२	४९
६.	को नैव तत्र वनिताजनताऽनुरक्तः ?	२	६२
७.	सुगुणवान्न हि कैस्समुपास्यते ?	३	२१
८.	न विफलं महतामुपसर्पणम्	३	४६
९	चतुराः खलु योषितः	३	५४
१०.	विमुच्यते नहि रिपुत्वमहितैर्मृतैरपि	३	७०
११.	सहेत हि कः पुमान् सततमाततमानरिपुश्रियम्	४	४४
१२.	स्थाने स्त्रीणामधिकविभवो यत्र तत्रैव रागः	५	७
१३.	कामिनीनां क्रोधोद्रेकस्सदृशगतिषु प्रायशो दुर्निवारः	५	४५
१४.	तृणमुखहतिः कस्य नाशं न धत्ते	५	५४
१५.	प्रेम प्रायस्सदृशविषये कामिनां कामिनीनाम्	५	५८
१६.	प्रियजनवचो लङ्घने कस्समर्थः ?	५	६०
१७.	भुज्यते हि भुवि चात्मना कृतम्	६	२८
१८.	अशत्रुषु जनस्य कुतोऽस्ति मन्युः ?	७	२९
१९.	कान्तानुकूलचरितेति किमत्र चित्रम् ?	७	३३
२०.	जगति हि सतामन्यतोऽपिप्रवृत्तिः	७	६०
२१.	शैवमुद्राङ्कितानां चोलश्रेण्यां भवति विदुषां प्रत्ययो ह्यार्यवृत्तौ	७	७६

		सर्गः	पद्यं
२२.	निदाघवागस्सहते हि कः प्रभुः ?	८	१५
२३.	स्त्रियः कथं हि जीवन्ति विनेनसङ्गमम्	८	४०
२४.	हितेऽहिते कस्य भयं न जायते ?	८	६०
२५.	हास्याय हि नाम केवलम्	८	६४
२६.	विजातिषु को विवेकः ?	९	८३
२७.	योषितां विधिरदादबलेति मुधाभिधाम्	१०	२०
२८.	रिपुसमागमनं हि सहेत कः ?	१०	२१
२९.	नूतनामभिलषन्ति हि कामसमुद्धताः	१०	२२
३०.	कुलविरोधिनि कस्य सहिष्णुता ?	१०	२३
३१.	अन्यविभवं सहेत कः ?	११	२४
३२.	कर्म खलु भुज्यते स्वयम्	११	६६
३३.	आभरणं त्रपैव भुवि राजयोषिताम्	१२	१९
३४.	भुवनोत्तरस्य सुगुणो हि दुर्गुणः	१२	३६
३५.	ईहते नृप ! दीपदीप्तिमिनसन्निधौ च कः ?	१२	७९

३. मूलग्रन्थस्थविशेषपदानां अकारादिसूची

४. व्याख्यानस्थ विशेषपदानां अकारादिसूची

* एतच्चिह्नाङ्कितानि व्याख्यानपीठिकापद्यस्थानि ॥

५. व्याख्यानोदाहृतकोशनामकारादिसूची

१. अभिधानकोशः (स. २ प ४४ इत्यादि)

२. अमरः (१-१ इत्यादि)

३. कुमारः (१-४७)

४. धनञ्जयः (१-७ इत्यादि)

५. नानार्थरत्नमाला (रत्नमाला) (१-१० इत्यादि)

६. विश्वः (१-३ इत्यादि)

७. वैजयन्ती (यादवः) (१-२४ इत्यादि)

८. शाश्वतः (१-३९ इत्यादि)

९. हलायुधः (१-६२ इत्यादि)